

सर्वदमनः

कालिदास-ग्रन्थावली

सं.-रेवाप्रसाद-द्विवेदी

11

KĀLIDĀSA GRANTHĀVALĪ

[Complete works of Kālidāsa]





Critically Edited by

REVĀPARSĀDA DVIVEDĪ

Sāhityācārya, M.A., Ph. D., D. Litt.

Head of the Department of Samskṛta-Sāhitya

Faculty of Oriental Learning

BANARAS HINDU UNIVERSITY

INDIA

VARANASI—221005

1976

Publisher

Banaras Hindu University, Varanasi–5

Editor

Dr. REVĀ PRASĀDA DVIVEDĪ

Price Rs. 11.50 P.

Printed by

Tārā Printing Works, Kamacchā, Vārānasī

Can be had also from

P. R. O.

B. H. U., Varanasi–5

Contents—

Poetry

Drama

कालिदास-ग्रन्थावली

[सरूपान्तरपाठान्तर-संशोधितमूला]

संपादयिता

रेवाप्रसाद-द्विवेदी

साहित्याचार्यः, एम्. ए., पीएच. डी., डी. लिट्.

काशीहिन्दूविश्वविद्यालयीये प्राच्यविद्यासंकाये

साहित्यविद्याविभागस्य

अध्यक्षः



प्रकाशकः

काशी हिन्दू विश्वविद्यालयः

वाराणसी


१९७६

मनुष्य इति नामके गिरिश-पार्वती-मन्दिरे
त्रिपुण्ड्रितललाटको विधृतविल्वपत्रश्च यः ।
तनोति सततं निजाखिलरसैः सपर्यामसौ
कवित्वधृतदक्षिणो जयति कालिदासः कविः ।।

—सनातनकवेः

Dedicated to
My Learned Teachers
and
Brilliant Students

•



अस्माकं
विद्यातीर्थेभ्यः श्रीगुरुभ्यः
स्नातकेभ्यश्च सुमेधोभ्यः

किञ्च—

'विश्वस्वस्तिवचः' समर्प्यत इदं तेभ्यः, पुराणी विराट्
प्रज्ञा येषु कुलाचलेषु मधुमद्दिव्यौषधीवत् स्थिता ।
येषां मौक्तिक-वारिणैव पिहिता दृष्टिर्न, ये तद्गतं
सारोत्कर्षमपीक्षितुं दधति तां काञ्चित् परामीक्षिकाम् ॥

भृङ्गी हेमाम्बुजमधुरसे, कोकिला केसराम्रा-
शोकोत्सङ्गे, पृषतदयिता शाद्वलश्यामसीम्नि ।
केकिप्रेष्ठा परुषविषमे किञ्च कान्तारगर्भे
यस्य प्रज्ञा कविकुलगुरुं तं नुमः कालिदासम् ॥

—सनातनकवेः

संकेतार्थाः

अ.	अर्त्ते भास्कर-रामचन्द्रः
अ.सू.	अष्टाध्यायीसूत्रम्
क.	कर्णाटकपब्लिशिंगहा., बम्बई
का.	काटयवेमः
काम.	कामसूत्रम्
काशि.	अष्टाध्यायीकाशिकावृत्तिः
कि.	किरातार्जुनीयम्
कु.	कुमारसंभवम्
खि.	खिस्ते म.म. नारायणशास्त्री
ग.	गद्यम्
च.	चतुर्वेदी पं. सीतारामः
चा.	चारित्रवर्धनः
चौ.सं.सी.	चौखम्भासंस्कृतसीरीज, काशी
छ.	छन्दोऽनुशासनम्, हेमचन्द्रस्य
द्र.	द्रष्टव्यम्
ध्व.	ध्वन्यालोकः
न.	नास्ति
ना.शा.	नाट्यशास्त्रं भरतस्य
नि.नि.सा.	निर्णयसागरमुद्रणालयः बम्बई
नि-४.	रङ्गनाथकाटयवेमान्यतर-टीकोपेतं नि.सा.-४-सं.
नि-४रं-.	रङ्गनाथटीकोपेतं निर्णय-सागरस्य चतुर्थं संस्करणम्
नि-९.	काटयवेमटीकोपेतं निर्णय-सागरस्य नवमं संस्करणम्
नै.	नैषधीयचरितम्
पं.	पण्डितः शङ्करपाण्डुरङ्गः
प.	परे
परि.	परिशेषे
पा. पा०.	पाठान्तरम्

पा.टि.	पादटिप्पणी
पि.	पिशेल रिचर्डः
पृ.	पृष्ठम्
ब.सं.	बड़ौदासंस्करणम्
भा.	भानुजिः अमरटीकायाम्
म.	मल्लिनाथः
म.प्र.शा. सा.प.	मध्यप्रदेशशासनसाहित्य-परिषद्, भोपालम्
मनु.	मनुस्मृतिः
मा.	मानियरविलियम्स
माल., मा.	मालविकाग्निमित्रम्
मे.	मेघदूतम्
मे. १	पूर्वमेघः
मे. २	उत्तरमेघः
रं.	रङ्गनाथः
र., रघु०.	रघुवंशम्
रा.	राघवभट्टः
रू.	रूपान्तरम्
लो.	लोचनं ध्वन्यालोकटीका
व.	वल्लभः
वाम.	वामनः काव्यलंकारसूत्रकृत्
वि.	विक्रमोर्वशीयम्
विश्वः.	विश्वप्रकाशकोषः महेश्वरस्य
शा.	शास्त्री डॉ० सुरेन्द्रनाथः
शा.,शाकु.	अभिज्ञानशाकुन्तलम्
सं.	संस्करणम्
सा.	साहित्याकादमी, भारत-शासनम्, दिल्ली
हे.	हेमाद्रिभट्टो रघुवंशदर्पणे
[१]	आदयः सर्गाङ्कान्यतरसंख्याङ्काः
अत्रैव	अस्मिन्नेव पुस्तके

प्रमुखा आधारग्रन्थाः

१. ऋतुसंहारे
1. डॉ. सीतारामसहगलस्य १६४४ ईशाब्दे लाहौरतः प्रकाशितम्
2. डॉ. अभिन्नचन्द्रदासस्य १९५८ ई. काशीस्थमा०खेलाडीलाल-प्र०
3. अग्निहोत्रि(डॉ.)प्रभुदयालोः १९६४ ई० म.प्र.शा.सा. परिषदः

२. मेघदूते
1. डे(डॉ.) सुशीलकुमारस्य साहित्याकादमीतः १६५७ ई० प्र०
2. दक्षिणावर्त्तनाथ-प्रदीपयुतं १६१६ ई० त्रिवेन्द्रमतः प्रकाशितम्
3. सञ्जीवनीचारित्रवर्धनीयुतं चौखम्भासंस्कृतग्रन्थमालातः प्र०
4. भरतमल्लिकटीकोपेतं १९५० ई० कलकत्ताप्राच्यवाणीतः प्र०

३. कुमारसंभवे
1. १६४६ ई० प्रकाशितम् निर्णयसागरीयं सञ्जीवनीयुतम्
2. डॉ. सूर्यकान्तशास्त्रिणः १९६२ ई० साहित्याकादमीतः प्र०
3. डॉ. सीतारामसहगलस्य १९६६ ई० दिल्लीनवयुगप्रकाशनतः प्र०

४. रघुवंशे
1. प्रा० नन्दर्गीकरस्य १८९७ ई० बाम्बेसंस्कृतसीरीजतः प्र०
2. निर्णयसागरतः १९४८ ई० प्र० ११-शं संजीवनीयुतं सं०
4. अस्माकं १९७४ ई० पटना—काशीप्रसाद-जायसबाल-शोध-संस्थानतः प्रकाशितं हेमाद्रेर्दर्पणेन युतम्।
5. राजस्थानप्राच्यविद्याप्रतिष्ठानस्योदयपुरजोधपुरशाखाहस्तलेखाः।

५. मालविकाग्निमित्रे
- १-३. काटयवेमटीकोपेतानि नि. सा. ४, ७, ९ संस्करणानि
- ४. बाम्बेकर्णाटकपब्लिशिंगहाउसस्याऽसंपादकसंवत्सरोल्लेखं सं०

६. विक्रमोर्वशीये
1. बाम्बेसंस्कृतसीरीजतः १९०१ ई० प्र० पण्डितार्त्तेभ्यां संपादितम्
2. नि.सा. रङ्गनाथटीकोपेतं १९०१ ई० प्रकाशितं सं०
3. नि.सा. शास्त्रि (डॉ.) सुरेन्द्रनाथटीकोपेतं १९४५ ई० प्र०सं०

७. अभिज्ञानशाकुन्तले
1. नागरपाठे (क) नि. सा. ११ शं० सं० (ख) ऑक्सफोर्डस्य १८७६ ई० मानियरविलियम सं० (ग) नारायणशास्त्रिखिस्तेटीकितं १९३८ ई० मास्टरखे० प्र० सं०
2. वङ्गपाठे १९२२ ई० हार्वर्डतः प्र० पिशेलकैपेलरयोः सं०
3. कश्मीरपाठे १९६५ ई० साहित्याकादमीतः प्र० वेल्वेल्करसं०

सर्वत्र दृष्टे : पं० सीतारामचतुर्वेदस्य 'कालिदासग्रन्थावल्या' '१९४४'-'१९६४' ई. सं.

क्वचिद् दृष्टः : शार्पेमहोदयस्य 'कालिदासलेक्सिकन'-योजनागतो मूलपाठः।

पश्चाद् दृष्टम् : उस्मानियाविश्वविद्या० हैदरावादस्य १९६६ प्र. काटकोणेश्वरीयुतं विक्रमोर्व०

Preface

Sanskrit literature is the most ancient as well as the richest in the world. Beginning, from times immemorial, with Vedic hymns, a tradition of literary compositions in Sanskrit has continued through all these millenia right upto the present day. During this long period, Sanskrit has produced a large number of works, to cover various fields of knowledge as well as of art and literature, of such perfection that a poet-dramatist of the calibre of Kālidāsa could flourish more than two thousand years ago.[1]

2. While most other languages have just one or two epics, Sanskrit contains more than a dozen epics of great literary merit. Kālidāsa himself has produced 2 of the greatest epics, besides 3 Dramas, of which "Śākuntalam" is known all the world over. His two shorter poems Ṛtusaṁhāram and Meghadūtam are also great in themselves: in particular Meghadūtām is superb in its sheer lyrical quality, in the depiction of the emotions of separated lovers, and in the interplay of external nature and human feelings. In each of the forms of literature adopted by Kālidāsạ, he has reached levels of excellence unrivalled in the whole field of world literature.

3. Though known to be a poet of Śṛṅgāra (erotic sentiment), he has also a positive message of universal

1. Editor's note page 33

application. His heroines are embodiments of grace and beauty but they pass through the fire of separation, discipline and penance to achieve the fulfilment of their love. In Kumārasambhavam Kālidāsa put his message directly through Umā and Śiva. Umā realising the futility[2] of bodily beauty takes to penance for fulfilment of her love. Śiva appears before her and says "Verily, Beauty is not for sinful purposes."[3] Ultimately Śiva appears as "a slave purchased through penance."[4] With exquisite art, Kālidāsa has woven his message into all his writings, whom 'age cannot wither nor custom stale.' His literature is the touch-stone[5] for testing the merit of other literary works. He is indeed an eternal poet for all times and all climes.

4. Unfortunately, a handy volume of the complete works of this poet-dramatist, with scholarly editing of the text, was not available so far, certainly not within a reasonable price. Scholars were looking forward to the B. H. U. which has a separate Department of Sāhitya in the Faculty of Oriental Learning to produce such a one. Dr. Rewa Prasad Dwivedi who has been engaged in the study of Sánskrit poetics, dramaturgy, and Kālidāsa-literature in particular, for about a quarter of century, took up this labour of love and the B. H. U. came forward with the funds required for its publication. Scholars and lovers of literature

2. K. 111. 75, V. 1 & 2. 3. K. V. 36 4. K. V. 86
5. On the basis of which Poetics is prepared.

are grateful to both for bringing out the present volume.

Dr. Rewa Prasad Dwivedi has earlier produced a critical edition of Hemādri's commentary on Raghuvaṁśa and has published several essays, Research Papers and books on Kālidāsa, making very valuable contributions to literature and poetics in Sanskrit. He has also composed an original epic "Sītācaritam", which naturally reflects the impact of his deep study of Kālidāsa's literature. He has taken great pains to sort out from amongst the various readings the one that, according to him, is the most apt and most in keeping with Kālidāsa's artistic genius and diction. Earlier he had prepared an "Index Verborum" to the complete works of Kālidāsa, and handed it over to the Government of U. P. in 1958 for publication; this has not yet seen the light of the day.

5. It is hoped that this publication will be appreciated by the students as well as scholars of Sanskrit as it will enable them to understand the style and spirit of Kālidāsa and to derive both delight and instruction from this great literary artist of world reputation, whom age cannot wither nor custom stale.

L. O. Joshi
Adviser to Vice-Chancellor

Banaras Hindu University
5-2-76

निशीथवहुलक्षपा-तिमिरसंहतौ विद्युता
प्रवर्त्तितगतागतं प्रियजनाभिसारं स्मरन् ।
स्मरँश्च सुरशाखिनां तल उपोषितं निश्छलं
जयत्यमरभारतीकविषु कालिदासः कविः ॥

—सनातनकवेः

EDITOR'S NOTE

The present 'KĀLIDĀSA-GRANTHĀVALĪ': 'Complete works of Kālidāsa' will meet a long-felt need for Kālidāsa-literature of the students of Sanskṛta Poetry, Poetics and Dramaturgy.

I

1. Earlier attempts

Some attempts of this nature have been made earlier also.

(i) Pandita Sītārāma Caturvedi had published his 'Kālidāsa-grānthāvalī first in 1944 under the inspiration and the chief-editorship of the great founder of Banaras Hindu University, Pandita Madanamohana Mālavīya, and printed it again in 1964.

(ii) The 'Sāhitya Academy' of the Govt. of India started its function in 1955 with the publication scheme of the critically edited text of Kālidāsa's works and has so far published Meghadūtam[1] (1957), Vikramorvaśīyam (1961), Kumārasaṁbhavam (canto 1-17, 1962) and Śākuntalam (1965) one by one.

(iii) Prof. Scharpē of Belgium has had published all the works of Kālidāsa in the parts of the Volume-1 of his 'KĀLIDĀSA-LEXICON'.

(iv) Pt. Rāmapratāpa Śāstrī and others have also published all the works of Kālidāsa recently.

However, the production of this volume needs no apologies, since the two, first and the last, Granthāvalīs—

(i) are not handy in volume,

(ii) contain Hindi Translation etc. too, and

(iii) do not have the text, virtually edited.

---

1. Abbreviations: Ṛ. = Ṛtusaṁhāram, Me. = Meghadūtam, K. = Kumārasambhavam R. = Raghuvaṁśam, Mā. = Mālavikāgnimitram, Vi. = Vikramorvaśīyam Ś. = Śākuntalam., K.L. = Kālidāsa-literature.

The first of the rest two : of 'Sāhitya Academy' is

(i) not yet completed,

(ii) published in separate volumes and

(iii) Contain the text which does not convince us– the students of Sanskṛta Poetics Dramaturgy and Kālidāsa himself.

The last one : of Prof. Scharpë is printed

(i) in Roman Script,

(ii) in different parts,

(iii) with the variants given in brackets with the text only and not in footnotes,

(iv) without distinction between the original text and the later interpolations, and

(v) in the manner which is meant for concordance and research only.

Above all, all these Granthāvalis are rather costly in price and are beyond the reach of the majority of readers interested in original text only.

2. Present work

Removing all these difficulties in this volume the order, arrangement and presentation of the text have received special attention and the variants have been accepted even if they are not available in the various editions, quotations and mss. too. So the selection has been made mainly on the basis of ***internal evidences*** of diction, imagery, literary style and aesthetic taste of the great poet himself. In other words this challenging task is performed on the ground

(i) of a deep, prolonged, and amply rewarding study of K. L. (ii) of Sanskṛta-Poetics (iii) of Sanskṛta dramaturgy (iv) of Sanskṛta Poetry and dramas and (v) of some of the historical, geographical and cultural findings of past few decades.

3. Sources of readings :

A. *Manuscripts*. The K. L. had come into existence at time when the Brāhmī Script was in vogue (300 B. C. to 500 A. D.) and this literature had been studied throughout the Greater India and abroad. But the mss. available today are written in the scripts other than Brāhmī. Brāhmī as it developed later could have not been deciphered without a prior knowledge of the meaning and the knowledge of such a meaning of any classical and mature document needs a vast learning, which can hardly be expected from any inscriber, transcriber or reader too. Hence the mss. of K. L. available today are prepared much later. The transcribers etc. too might have been some ordinary scholars or possibly their students. Therefore we are inherited with a lot of the alterations and interpolations fancied and dictated by the scholars of world and the mistakes made by the students in their copies. This is the story of the *Majority* of Mss. which is presumed as the most reliable source for editing work of old records.

B. The second dependable guidance could be expected from the various readings available in the valuable commentaries of Mallinātha (1400-1500 A.D.) etc. But unfortunately, these are also misled by the disorder, in the manuscripts, like Jayaratha's Vimarśinī (1300 A.D.) based on the disordered text of 'Alaṁkārasarvasvam' (1200 A.D.). The Vimarśinī repeatedly speaks[1] of the disorder found in the leaves the 'Alaṁkārasarvasvam'.

C. Thirdly some of the passages from K.L. have been quoted by ancient rhetoricians and thus it is presumed that these quotations would provide conclusive answers to the controversies about the variant readings. This, however, is not the case, as

(i) they are only few in number,

(ii) they are verses and not dramatic dialogues, (except a few cases) and

1. Vimarśinī on Atiśayokti of Alaṅkārasarvasvam p. 224 of my edition.

(iii) came into knowledge for the first time in 800 A.D. in Vāmana's 'Kāvyalaṅkārasūtravṛtti', which was not the period of the script which can strictly be called Brāhmī of Kālidāsa's time.[1]

A few illustrations may be given to clarify the points—

(i) As Dr. S.K. De[2] and Prof. Scharpé[3] hint the majority of manuscripts and of commentators read 'KETAKA' and not 'KAUTUKA' in Me. I. 5. In the adjustment of syntactical meaning the latter is more suitable, as it supports the tears of *YAKṢA* and his unability to set his glances on the cloud. At the same time 'KAUTUKA' had been written as and KETAKA as (in Brāhmī) during the period of 2nd century B.C. to the 4th century A. D.[4]. In the later inscriptions of the same script 'Tu' is found in the shape of ' ' also. Hence it is probable to read Kautuka as Ketaka if written in an illegible form. Here the majority of records or the so called *priori* is condemned by the *posteriori* as such, in a careful evaluation of the material. However it is a matter of extreme surprise that while advocating for *posteriori* Dr. S. K. De selected 'KETAKA' only and not 'KAUTUKA' which has been accepted by the eminent com-

---

1. In Vṛtti on his 'Kāvyalankārasūtra' Vāmana quotes the following passages from K. L. : Me. I. 9, 31 ; K. I. 1, 14, 32, 35, II. 55, V. 63, VI. 94, VIII. 31, 62, 63 ; R. III. 9, 60, VI. 60, 70; XIX. 14, Mā. III. 6; Vi. III. 10, IV. 7, 39 ; Ś. I. 16, II-6, V. 13, VI. 23 and some others. The verse 'मन्दरस्थ मदिराक्षि etc.' (5. 2. 47) seems to be of K. VIII but has not so far been seen in the mss. or the printed editions.
2. Meghadūtam : Sāhitya Academy Edi 1957.
3. Kālidāsa Lexicon.
4. प्राचीनलिपिमाला by G. H. Ojha.

mentators like Mallinātha and Caritravardhana; and Dakṣiṇāvartanātha too, who rejects the KETAKA, saying 'that would not be more apt in the context'. The same case is with 'Tvaṁ' which is taken as Tvāṁ in Me. I. 9.

(ii) Mallinātha excludes the verse R. IX. 31 although it has been quoted by an earlier rhetorician Mahima[1] (1050 A.D.). It is also accepted by a commentator Hemādri (1500 A. D.), contemporary or coming a little later of Mallinātha, in his Darpaṇa[2] on R.

With this verse the other verse उपहितं°[3] can also be accepted as original in accordance with the idea flashed in the verse R. XIII. 9.

(iii) Mallinātha's acceptance of 'KUVALAYA-DALA-PRĀPI' in preference to the other two variants 'KUVALAY-DALA-KṢEPI' and 'KUVALAYA-PADA-PRĀPI' in Me. I.44. is a severe fallacy on the part of the editor. He connects his own reading with 'KARṆE' and imagines an unnatural etymology of 'KVIP'–suffix. The fact that both the two variants are intermingled with each other in the shapes of 'oDALA-PRĀPI' and 'oPADAKṢEPI' does not strike to his mind.[4]

(iv) In Me. I. 5 Mallinātha missed the correct reading 'PRAṆAYA-KṚPAṆAH' and was satisfied with the wrong reading 'PRAKṚTI-KṚPAṆAH' which is capable to support the illusion only and not the request too, whereas the former

---

1. In his Vyaktiviveka p. 360 in my edition.
2. Edited by me and published by the Kaśīprasāda Jāyasvāla Research Institute of Patna Bihāra, in 1974. But the cantos 2-4 are not dependable due to the lack of Mss.
3. Here this verse is noted as variant, but can be read as original.
4. 'K. Dalakṣepi' is also inserted in Mallinātha's commentary as a variant but his son does not know the same in his Pañjarikā on Me. Published from Rāmavana, Satanā, M. P. in1966.

reading stands for both, as in sanskṛta 'Praṇaya' means 'courteous request' (vide F.N.p.230). The hero of Vi. too is as Kāmārta as the Yakṣa of Me. and he too, is depicted as 'PRAṆAYA-KṚPAṆA' = 'requesting courteously' to both *Cetana* and *Acetana* in the act IV. Here too the poet starts with the same 'cloud-episode' and brings forth the Peacock, Cuckoo, Swan, Ruddy-gose (Cakravāka), Blackbee, Elephant, Mountain, River, Deer and lastly the auspicious and symbolic tree of 'Aśoka' seeing which he will be free of Śoka = Sorrow. In this soliloquy poet makes the hero speak this 'PRAṆAYA' word recurrently (vide p. 349, 397, 401, 404 etc.). The earlier commentator Dakṣiṇāvartanātha reads 'PRAṆAYA' only in his 'Pradīpa' on Me. Therefore the variant reading containing the word 'Praṇayā'[1] should be adopted finally as is happily done by the majority of the commentators.

(v) In the Me. I. 2 Mallinātha has connoted the word 'Prathama' as 'First', whereas it is used in the sense of 'Highly Significant' as in the places like K. VI-15, VII-43, 44, Ś. V. 21, VII. 1, 9-10, R. X. 67, Mā. I. 12. and Vi. V. 1. (vide F. N. p. 409). Here in Me. I. 2 'PRATHAMA' means the most significant day of 'HARIŚAYANA-PARVAN' which dissolves the sad controversy about the counting of the days of four months ending with the moment of 'HARIPRABODHA'.[2]

(vi) The word 'ŚEṢĀ' arises the same controversy. In R. XVII. 79 the poet says 'Atithi's rulings were carried on by the kings like ŚEṢĀ of Indra in their heads'. But Mallinātha reads here 'Devāh' and knows nothing about the 'Śeṣā'. In

1. My paper 'कालिदाससाहित्ये प्रणयशब्दार्थः'–Sāgarikā V. 4., Vikrama–IX.
2. I myself was misled in this matter in my paper 'मेघदूतेऽभिव्यक्तिदोषाः' Sāgarikā X. 2. For the counting of the four months see my paper 'मेघदूते तिथिनिश्चयः' Sāgarikā VI–2 and मेघदूत में शापावधि और चातुर्मास्य' Vikrama-X. Caritravardhana agrees on this meaning and one should not think of the change चतुरे for चतुरो in Me. II. 47 (p. 42).

Ś. (p. 465) too 'Śeṣā' is changed with 'Prasāda' and the eminent commentator Vīrarāghava gives no information about 'Śeṣā'. But K. III. 22 compels us to accept the 'Śeṣā' only as original text. In my 'Introduction to Hemādri's Darpaṇa' it has already been shown 'how the whole context is made magnificent by adopting 'Śeṣā' and how much famous this word had been during the ancient days.[1] Above all the images of 'Śeṣā-pradāna' are reported to have occurred into the background of Ś. VII. 2 and Mā. I-3.

(vii) As discussed in my other papers, in R. V-4. Mallinātha is not aware of other three readings excepting one : 'LOKENA CAITANYAM IVOṢṆARAŚMEH', whereas Hemādri gives three other readings also (vide F. N. on the verse). Out of these four, two are repeated in their ideas in the verse 35 of the same canto, and one of the rest of the two, excepting that which has been accepted here as original, does not possess a natural syntax.[2] On the other hand R. VI. 35 cannot be disturbed and fortunately has no variation at all which is natural to aviod the 'NIYOGA'[3]–sense in the birth of Aja. At the same time the sense derived from the reading adopted here in V. 4. as text is conveyed by the poet himself at so many places (vide my F. N. p. 134)[4].

(viii) In R. VII. 39 the dust of battlefield is delineated as gradually spreading over and over and covering the Sun. Here the simile is not needed, therefore the variant reading accepted by Mallinātha : 'NETRAKRAMEṆA' does not come in the scope of Kālidāsa's expression. He never uses 'krama'

---

1. pp. 128-133.
2. In this reading one is bound to split the passage 'यतस्त्वया ज्ञानम्' as 'यत: तु अया: ज्ञानम्' and it is beyond the spirit of Kālidāsa.
3. An allowed sexual intercourse for one who does not have her husbend capable to beget a child.
4. For further arguments see my introduction to Hemādri's Darpaṇa pp. 127-133.

for 'like'. Mallinātha connotates his reading as 'like a long piece of silken cloth the dust had covered the Sun'. But like K. V. 24 here in this verse too the 'KRAMA' is itself sufficient to present a pleasant image and therefore many commentators like Hemādri read 'ANUKRAMEṆA' only and we have also adopted the same, giving the former in footnote. After consulting Mallinātha one may enjoy the 'Netra' word also if interested in cultural studies and remember the word 'Netrasubhagena' used by Vatsabhatti in his inscription, though he was bound to adopt 'Netra' like 'Sparśa' etc. to work out the pun in his whole verse, whereas Kālidāsa can skip the word and simile both. At the same time 'Anu' should have been turned into 'EVAM' to cover up all the three previous statements. In the reading 'NETRA°' poet must have composed this verse as 'NETRAṀ YATHĀ ASAU RURUDHE TATOARKAM'. 'रेवं' can be read as 'नेत्र°' easily.

(ix) In R. XIII. 10, one, like Hemādri, may presume 'VIVṚTĀNANATVAM' instead of Mallinātha's '°TVĀT' if '°NANAṀ SVAM' is not available in any manuscript. Mahīmabhatta would have changed it to 'VIVṚTAṀ SVAMĀSYAM' if the case had come into his notice, as he did in the forthcoming cases. Though the reading of Hemādri is accepted here, the '°NANAM SVAM' would have been better, since it serves the ulteriar object needed for the verb √MĪLA. The compound with epithet is a recurring expression of the poet, as we will see later on. In case of '°TVĀT' Mallinātha should consider the 'AMBHAS', given in the verse itself, as an object of the said verb and not of the conjectured one: Cañcuputa. However the syntactical situation of the sentence is poor due to the long distance between the two, the object and the verb in the reading of Mallinātha.

(x) The horses of Indian conquerors were worshipped with the saffron of '*OXUS*' named Vakṣu, Vaṅkṣu or Vaṅku in our country. This historical fact is overlooked by Mallinātha etc. adopting a poor reading 'SINDU' in R.IV.67. Here in this volume the 'Vaṅkṣu' reading is adopted on the

testimony of the majority of Mss. (vide my F. N. on the verse) and the commentators like Caritravardhana and Sumativijaya, as Prof. Nandargikar notes.

(xi) The reading 'BHĀGĪRATHĪM' in R.VII.36 mars the imagery as this river does not attack 'SOṆA', whereas the opposit troops do attack 'Aja', the winner of 'Svayamvaram' of Indumatī. The geographical fact that the present 'JOHILĀ'[1] falls into 'ŚOṆA' magnifies the imagery when we come across the reading 'JYOTĪRATHĀM' in the majority of records. The word Johilā can easily be accepted as a developed form of Jyotīrathā. However, Mallinātha and most of the modern translators accept the reading 'BHĀGĪRATHĪM' only.

(xii) The very custom of the Hūṇas that their wives will lacerate their cheeks after their husbands' death, is supported by the reading '°PĀTANA°' in R.IV.68, which is happily available in the manuscripts too with or without commentaries. Like Mallinātha, Hemādri too missed this cultural fact and read the variant '°PĀTALA°' which does not support the 'Paryāyokta' in full, and becomes rather an absticle for a moment to its charm. On the other hand Vallabha, Sumativijaya and Dharmameru are conversant with 'Pātana', therefore this volume contains this correct reading. Late Pt. K.S. Cattopādhyāya and Dr. V. S. Agrawāla were also in favour of the same.

D. Now it is useful to draw the attention of scholars to some other words and phrases accepted in this volume in accordance with the passages quoted by the earlier rhetoricians or otherwise.

(i) In K.III.55 Mahimabhatta[2] and Mammata[3] discarded the compound 'DVITĪYA-MAURVĪM' and replaced by 'Maurvīm Dvitīyām', which is followed by Mallinātha

1. कालिदास की कृतियों में भौगोलिक स्थलों का प्रत्यभिज्ञान by Dr. K.N. Dvivedi, page 101.
2. Vyaktiviveka p. 235.
3. Kāvyaprakāśa Chapter VII.

as well by others. The present edition has welcomed the original compound, since it reflects the tendency of विशेषणसमास readily noticeable elsewhere in K. L. : in 'EKAVEṆĪM' in Mc. II. 40 (p. 40) 'AVIŚRĀNTADUHKHA' (p. 532) ANIMIT-TOTKAṆTHAM in Mā. III. 1. etc. At the same time it is felt that the latest manuscript available to Mahimabhatta should not be neglected in this manner.

(ii) In K. V. 71 Kuntaka[1] and Mahimabhatta[2] have accepted the reading 'KAPĀLINAH' after a full length discussion about its propriety and its position in the paradoxical syntax. On the other hand Mallinātha has adopted the reading 'PINĀ. KINAH'. Here I missed to follow Kuntaka and unconsciously got the Mallinātha's reading printed. Some of my students argue that the Pināka is also made of bone and therefore solves the purpose of paradox. I too, think that the 'Pināka' is more suggestive, as it is a symbol of sexual control[3] and hence is more useful to threaten the tender heart of Pārvatī. But Pārvatī's reply in K.V.78 and the verse K.VII.32 do not allow one to think of the change in the reading 'KAPĀLĪ'. Meanwhile the word 'Pinākī' is used here frequently[4] and has no need of repetition in this verse i.e. K.V.71.

4. **Two specific issues** are worth mentioning here.

(1) Firstly the cantos IX-XVII, sometime accepted in K. have deliberately been omitted from this collection. The reasons for this are given under footnote on page 99. Moreover the K. is not 'Tārakavadham' of which all these nine cantos have not been noticed by the earlier rhetoricians like Vāmana, Ānandavardhana, Abhinavagupta, Bhoja etc.

(ii) There has been some controversy even with regard to the authorship of the 8th canto. But the greatness,

1. Vakroktijīvitam I. 9 Vṛtti.
2. Vyaktiviveka p. 199, 252, 388 of my edi.
3. K. III. 10, V. 53 and VII. 2 are enough to support this thinking.
4. K. III.10, V. 53, 56, 77 and VIII. 2.

the beauty and the sublimity of this canto claim Kālidāsa as its author. The canto deals with the deepest and the subtlest of human sentiments and the theme has been handled with excellent artistry. Even history speaks in favour of the view as the ancient scholars like Vāmana[1] (800 A.D.) and Ānanda vardhana.[2] (850 A. D.) have quoted from or spoken of this canto. In his Vyaktiviveka Mahimabhatta[3] has also quoted from the same.

5. **The controversy over authorship of Ṛtusaṁhāra** has been settled by Dr. S.R. Sahagel in the learned introduction to his edition of Ṛ. and this work has been ascribed to Kālidāsa's earlier years. It is beyond doubt that Kālidāsa was the author of this poem as, at places, specially in describing the autumn, this poem attains the same height of excellence as is found in the works of Kālidāsa's maturity.

6. **The editions consulted** in editing the first four poetical works have been listed on p. 8 here separately.

7. I have changed some colophon-titles of the cantos with a view to reflect more precisely and clearly on the contents and the mysteries of the cantos.[4]

II

Editing the dramas proved to be more difficult a task.

A. (i) Most of the earlier editions did not have demar-

---

1. See footnote on page 16 of this introduction.
2. Dhvanyāloka III-6 Vṛtti.
3. A. Mahimabhatta quotes K. VIII. 57, 63 on p. 352, 444. of Vyaktiviveka in my edi.
   B. Dhanika in his Avaloka on Daśarupaka quotes VIII. 2, 5.
   C. Dr. Sītārāma Sahagel omitted this canto from his edition possibly because it was not translated by Grifith.
4. For example the colophon titles of R. I, VI, VII, etc.

cation between the two kinds of plot Sūcya[1] = Prelude and Dṛśya = Act. Even when starting with former they are put under the heading applicable to the latter, which is not in accordance with the Indian dramaturgy. Both the kinds of plot are totally different and cannot be mixed with each other.

Kālidāsa has used preludes only and not interludes as such, as he puts all of them at the beginning of the forthcoming 'Acts' and not in between. In this volume both the plots are placed separately under their suitable headings.

The preludes to Mā. V, Vi. II & III and Ś. IV & VI are found changeable and are changed without any hesitation, except the one to Mā. V. All the remaining four are extended upto the continuity of information. Accordingly the name Praveśaka = प्रवेशक is also changed and taken as Miśraviṣkambhaka = मिश्रविष्कम्भक in the preludes for Vi. II and Ś. VI.

The prelude to Ś. IV has been named by all the editors as Miśraviṣkambhaka, though the Sanskṛta stanza of Durvāsas's curse is spoken directly by Durvāsas himself to the audiance from behind the certain and not at the stage. In this edition two other Sanskṛta-Stanzas are mixed and each of them is spoken at stage only.

---

1. In Bharta's Nātyaśāstra VIṢKAMBHAKA has no importance at all. All sorts of preludes are called 'Praveśak' there. Viṣkambhaka is introduced later on in the context of Prakaraṇa and not of Nātaka. However in later dramaturgies three types of preludes are found—
   - A. Viṣkambhaka = having Sanskṛta only in the mouth of the actors of class II
   - B. Praveśaka = having Prākṛta only with the actors of class III.
   - C. Miśraviṣkambhaka = mixture of both the two classes of actors and their languages. But Pravesaka is not allowed to be placed at the beginning of the first act.

The prelude to Mā. V. could not be extended upto the entry of the hero and his friend Viduṣaka due to the advice of Dr. Raghavan (Madras) and Dr. R. Upādhyāya (Sāgara).

(ii) To joint the preludes with the Acts concerned the verses of both are numbered in continuation, but the method of M. M. williams is not followed i.e. having a continuous numbering through all the Acts of like 1-199 in Ś.

B. The stage-directions are added even in the Sanskṛta equivalents of Prākṛta-diologues in order to make it easily understood by a Sanskṛta-reader who does not care for Prākṛta.

C. Dialogues are also reshaped whereever necessary and it is mentiond clearly in the footnotes. For example—

(i) The interpolated verse 'न खलु न खलु बाण:' in Ś. I is assigned to two characters other than the speaker of the relevant most verse 'तत् साधु कृतसन्धानं'°. It is done due to the utmost familiarity of the verse 'न खलु न खलु', though it is totally unfit to the quick action of deer hunting.

(ii) In Ś. IV the rift caused in the speech of the actor called Śiṣya by the sudden and hurried entry of Ansūyā, has been patched up by a rearrangement of the text. Even Ansūya's speech which was totally disjointed in the edition of Nirṇayasāgara Press has been systematized (p. 481). Here the stage direction 'Praviśya apatīpṣepeṇa' or 'P. aptā°' has had to be affixed before Praviśya when Priyamvadā enters and not at the entry of Anasūyā. Priyamvadā is in a cheerful gay and active mood which justifies the entry with 'Apatī-(tā)-kṣepa'.

(iii) Any sentitive reader may find it a bit pinching if Priyamvadā all of a sudden comes out with the terms and conditions of marriage saying 'द्वयोर्नंनु युवयो॰' in the edition of N. S. Press etc. Some courteous and formal discourse is desirable before Priyamvadā can speak this way. Here in this volume readers will not face this difficulty (p. 467) which is removed on the ground of other recensions.

(iv) In the same Act Śiṣya says प्रवासादुपावृत्तेन or प्रभासादुपावृत्तेन. Here we have both the readings combind as 'प्रभासप्रवासा॰' (p.

480). Now the query about the Tīrtha where KAṆVA went does not arise.

(v) In Vi. IV (p. 403) 'AŚOKA' tree has not been introduced in all the editions[1], excepting in the one of च. In his Kāvyaprakāsha Mammata quotes the verse related to the Aśoka but without assigning it to Vi. and makes a comment that the third line of this verse is a speech of an angry person.[2] Paṇdita in his most authentic edition of Vi. informs its avaibility in two mss.

So is the case with the verse 'क्वाकार्यं०' It is also quoted by so many eminent rhetoricians[3] as an example of 'भावशबलता = mixtuer of more than two emotions'. It seems to be Purūrava's speech and some of the commentators too think so. According to Paṇdita only one modern manuscript includes it into the text. Even च., who paid his attention to the verse रक्ताशोक etc. did not include this verse in his editions. However he did not make any introduction for Aśoka which is readily available to all the previous entries like Peacock etc. Here in this volume readers will find a suitable statement for the entry of Aśoka also and in the words of Kalidāsa himself : 'अये प्रियावामपादप्रियः०'. Here the reader may be reminded of the seventh Act of Ś. where the hero meets his beloved after a long separation only when he sits under the shadow of this auspicious tree Aśoka. No doubt, here this Aśoka is a symbolic tree and it would not be surprising in Vi. also if the Aśoka is introduced just before Purūravā's reunion with Urvaśī. It is not out of season too because the Gandhamādana mauntains are known to the poet to have got all the seasons synchronised [vide Me. 2.9].

---

1. Paṇdita mentions it in footnote, but Velankar is totally unaware of it.
2. Example Verse No. 300, p. 416-417 of B. O. R. I. Poona edition.
3. Dhvanyāloka 3.20 Vṛtti, Kāvyaprakāśa example No. 53 and 3.31.

The verse क्वाकार्यं etc. does not find any suitable point in this Act to be placed, as the hero Purūravas does not appear with a serious mood which is needed for this verse.

In Dhanika's Commentary Avaloka (1000 A. D.) on Daśarūpaka one more passage is assigned[1] to Vi., but, as Dr. Rāghavan states it belongs to some other play. The same is with the verse 'रक्तस्त्वं नवपल्लवैः' etc. which is quoted and discussed in detail by Ānandavardhana. It also may be a statement of Purūravas, but then it is required that the speaker is circumspect.

(vi) Also in the case of stage directions a few words and sentences are added whereever necessary. (p. 499, 527 निर्वर्ण्य, 526 प्रकाशं with सस्मितम्' etc.).

(vii) The words स्वगतम् are mostly changed into आत्मगतम् because the latter is found frequently in K.L. So also the words अपवार्य, आत्मगतम् and प्रकाशम् are readjusted in accordance with the context.

(Viii) The word 'ITI' = इति in stage directions is invariably used by almost all the editors. Here in this edition it is totally discarded, but at a few places. I cannot understand its propriety.

(ix) In order that the technical aspects like Dhruvā = ध्रुवा, Cārī = चारी, Mahācārī = महाचारी, Trigata = त्रिगत etc. of the traditional preliminaries to stage a drama called Pūrvaraṅga = पूर्वरङ्ग are not overlooked the words पूर्वरङ्ग and नान्दी = Nāndī are added to the text in brackets before the first verse of every play. However in Ś. and Mā. this Pūrvaraṅga runs as far as Prastāvanā = प्रस्तावना, whereas in Vi. the latter outruns the former. पूर्वरङ्ग consists of 22 parts, out of which first nine are not stagable and are performed behind the curtain (e.g. Tiraskariṇī[2] of

1. Daśarupaka 3.13.
2. (i) Kalidāsa uses this term twice in the context of drama itself i.e. Mā. II. 1 & 11, once in the sense of curtain in general K. I. 21 and frequently in the sense of the Vidyā with help of which divine persons take themselves unvisible to humen. →

Kālidāsa and Yamanikā of others and not Javanikā or Yavanikā as such). Among the stageable 13 parts Nāndī is also enlisted as one. Drum is the dictionary-meaning of the word Nāndī, but in drama it has got a fixed connotation as 'a part of पूर्वरङ्ग.' It is of two kinds Citrā = चित्रा and Śuddhā = शुद्धा. The former consists of 4 elements (i) Bheri : Nagārhā in Hindi and drum in English, two other musical equipments (ii) Nṛtya = dance and (iii) Gīta = Vocal music or song and lastly (iv) the phrase 'EVAMĀRYA' = एवमार्य' = 'Go on, O. K.' of Sūtradhāra's friend 'Pāripārśvika = पारिपार्श्विक'[1]. The constituents of the Śudha-nāndī are (i) drum i.e. Bherī or Nagārha or any kind of 'Puṣkaravādya' = पुष्करवाद्य and (ii) Vocal music or some short of song. Thus the Bheri or Mṛdaṅga is an essential part of both the Nāndīs. Kālidāsa himself has been conversant with this fact as he introduces the Mṛdaṅga-dhvani at the beginning of dance in Mā. Act I. & II.

D. (i) *For Text* in plays I have given priority to the Nirnayasāgara editions, which, as I think, run with NĀGARA recension, but with a few corrections. However I could not leave aside the Bengali recension too in Ś. Next to the Nāgara edition it is the only edition which I considered dependable when ever any textual difficulty arised. Here in this edition the languages for the diologues of Sarvadamana and Fisherman are taken from the Bengali text of Ś. Here I have given importance to the aesthetic sense and not to the so called authenticity fixed by the timid and rigid minds looking upon the majority of copies etc. Poetry cannot be considered history in a strict sense. History is some thing that is perpetually Dead, whereas Poetry has never seen the face of so called death. Death can dare

---

→ (ii) Javanikā in Nātyaśāstra Chapter V is some how considerable but the word Yavanikā is totally absurd. Yamanikā is used by Dr. Hajārīprasāda Dwivedi and others.

1. See footnote on p. 257-58 and the Chapters V and XXXIV of Nātyaśāstra.

to touch some compositions only and not the Poetry as such that is beyond its reach.[1]

For Vi. I have depended mainly on the beautiful edition of Paṇdita. Here all the other editions are proved of secondery importance. For the notations of the terms like 'Carcarī = चर्चरी' and the fixation of the stanzas of Prākṛta and Apabhraṁśa other editions do extend their help notably that those of Sāhitya Academy and N.S.-4 with Raṅganātha's commentary.

For Mā. all the three 4th, 5th and 9th editions of N.S. Press are found differing in their texts. Here I only depended mostly on my discretion, and in a few cases on the anonymous and undated edition of Karṇātaka-Publishing House Bombay–2.

(ii) The Gathās in Prākṛta and Apabhraṁśa, as well as one Samskṛta verse (p. 401 note) in Vi. IV are unwarranted and therefore not acceptable to me. Kātayavem, Paṇdita, Arte and the majority of Mss.[2] as Paṇdita says, have given no room to all these Gathās in their texts. Kātyavema is an old and authoritative commentator on all the three plays of Kālidāsa. At the same time an old commentator Raṅganātha (1800 A.D.) explains the terms चर्चरी etc. and records the samskṛta-equivalents to their Gathās. Prof. Velankara introduced them in the text with a bit of hesitation but without any demarcation between the fictitious and the real. Here they all are given in text but in a way that would not interfere with the sanctity of the text. The numbering order of verses is also changed, as the soliloquy of 71-76 verses[3]

1. Bhavabhuti suggests 'Poetry is an immortal art of human spirit = 'अमृता आत्मनः कला' = (First verse of his Uttararāmacarita).
2. Paṇdita's 'Critical Notice' to his edition p. 8-9.
3. Number of verses in Scharpe's Edi. goes upto 76, in Pandita's edition the total number of both the kinds of verses is 75, in Śastree's edi.–74 and in Velankara's 75.

becomes a subject to ridicule. Prof. Scharpe too has given all these Gāthās in brackets. (My F.N. on p. 386-7, 390)

E. (i) Variant readings regarding the sequence of events as well as regarding the length of particuler piece of text have been given at the same place under the heading 'RŪPĀNTARA = रूपान्तर' just below the original text (p. 469, 495-97), though some of the passages of this type do not have any heading (p. 535-36). Now one may well go through the text of one's own choice.

(ii) Instead of giving all the variants I have given only the important ones.

(iii) A few changes have been made in the variants too. The variant in N.S. Press edition 'वनवासस्य सौकुमार्यस्याविनयस्य च यत् सदृशं' [p. 530] is adjusted, like (i) वनवासस्य सौकुमार्यस्य च००' and (ii) कन्यकाभावस्य विनयस्य च००'. Such corrections were needed in order to make the text and variants natural. Out of these two the first is more appropriate in the context, Śakuntalā being painted in Kaṇva-Āśrama. In Prākṛta 'च' becomes 'अ' and hence 'च विनय' is naturally converted into अविनय which is totally irrelevent.

(iv) MĀḌHAVYA = माढव्य of other editions is taken here as MĀDHAVYA = माधव्य to suggest his वैशाखनन्दनत्व[1] or foolishness' as Pischel did. Howevere not suitable equivalent has been available for भट्टिणी of prakṛta. But the word भट्टा can easily be translated as भर्त्तः as I did at a few places. 'णं' of Prakṛta is taken for ननु and 'नु' both.

III

Now a few lines about my reflections and observations in footnotes and in text as well.

A. (i) I have paid undivided attention to the oft-recurring images and expressions of the poet, like साधारणोऽयं

---

1. In the month of may donkey becomes healthy, seeing the entire field empty and imagining that it finished the grass.

प्रणय: in Ś. (p. 468) and in Vi. साधरणोऽयं प्रणय: स्मरस्य (p. 362, Act II 12), 'परवानयं जन: (p. 335) समदुःखसुख: (R. VIII 65 etc.) At the same time the particular words and expressions used at different places and in different contexts like उदाहरण (p. 347, 360) स्वहस्त (p. 360, F.N.–4 364) सौभाग्य (p. 366), प्रथम (p. 181, 409), प्रणय (p. 230) to the notice have been brought.

(ii) Some of the footnotes carry some indications of the symbolism of the Poet. For instance Kāmadhenu and Nandinī are suggested as the symbols of Prakṛti and Vikṛti : the cosmic energy or intellect and its shadow, in individuals. (p. 109 F.N.) Nandini is considered as a Vidyā too, and it is presumed that Vasiṣṭha had advised Dilīpa to get both the Nandinis pleased (i) Nandini-cow and (ii) Nandini-Vidyā.[1] (p. 110-111). On page 432 the reader will enjoy the footnote disclosing the reality of Somatīrtha and the Black-Deer. They are really Duṣyanta and Kaṇva themselves. Hence it is Kaṇva who brought the hero to Āśrama like the one who is hypnotized. The 'Nīlalohita-tattva' is also considered as 'Ātmabhū' or 'KĀMA' and it is suggested that the way of conjugal love is also capable of bringing the solvation to man (p. 560).

Elsewere I have pointed out that 'Raghu is the only hero of Raghuvaṁśam and even Rāma is a supplement to his character (p. 103 and 254 F.N.–2). I shall quote here my two verses—

I. नायको रघुवंशस्य राम इत्युच्यते यदि ।
उच्यते न कथं कर्त्ताप्यस्य वाल्मीकिरेव तत् ॥

II. 'कालिदासकृते:' कर्त्ता कालिदासात् परोऽस्तु चेत् ।
नायको रघुवंशस्याप्यस्तु भिन्नस्तदा रघो: ॥'[2]

(iii) For the reading चित्रे निवेश्य and not चित्रे निवेश्य one may consult the footnote on the page 452.

(iv) On my own part I have given some adverse comments also on the poet. Those too may be seen with vision and

1. For all these presumptions I have given strong arguments in my research papers too : नन्दिनीविद्या etc.
2. Composed on 1.10.1967.

a free insight to realise the fact. For example see my note on the verse अनाघ्रातं पुष्पं etc. on page 453.

(v) One may appreciate my verse too, passing remark on the रूपान्तर–verses in Ś. III (p. 473).

(vi) A few classical terms have also been defined on the basis of the commentaries and so also independently.

B. 'व' or 'वा' is used by Kalidāsa thrice in the sense of 'यथा': in Me. II. 20, in R. IV.42, and Mā. V. 12. In R. IV.42 it has its variant 'च' which is admissible too. I have noted 'व' or 'वा' word as the variant reading of च in R. IV.42. in appendix.

On Me. II-20 मल्लिमभट्ट remarkes that people are misled about 'वा' which he reads as 'इव'. . He says that such confusion is caused by स्वरसन्धि between the words 'पद्मिनी' and 'इव'. 'Here in the काव्य : मेघदूत, the ocean of रस this 'वा'–word is as pinching as the leoprosy in body' (p. 485 Vy.). After generalising the matter like 'नापि महाकवेः कालिदासस्य अन्वयगतिरियं क्वचनापि प्रबन्धे अवधारित-पूर्वा'—'Kalidāsa is not found writing this way elsewhere in his literature' he makes all the द्वितीयान्त words प्रथमान्त like–'गाढोत्कण्ठा गुरुषु दिवसेष्वेषु गच्छत्सु बाला जाता मन्ये शिशिरमथिता पद्मिनीवान्यरूपा'. He is of course not aware of the remaining two ussages of 'व' or 'वा'.

Again he defends our poet against a grave fallasy of 'पौनरुक्त्य' = repeatition' in R. V-61 converting its last three words into 'प्रवृद्धो जलधिर्निशीव' (p. 458 Vy.). For both the defects he tends the commentators responsible. Here मल्लिमभट्टs enthusiasm is of course, a subject of ridicule, yet his devotion for the Greatness of our poet is, undoubtedly admirable. The 'व' or 'वा' in Mā. V. 12 does not yield to any change what ever.

C. The uniformity in the spellings of the words has been maintained through out. सार of the word 'कृष्णसार' is printed as 'शार', as the authoritative lexicographers महेश्वर in विश्वप्रकाश and in its appendix शब्दभेदप्रकाश and क्षीरस्वामी in his commentary on अमरकोष have ascertained 'शार' reading as correct (reffered by Hemādri : Darpaṇa R. IX. 55). The word वशिष्ठ is printed as

वसिष्ठ, because the word has got its vedic root √वस् to shine like in 'उवासोषा उच्छाच्च etc. रशना is taken as रसना, as there is no root like रश in पाणिनि's धातुपाठ. The other words changed here are सीकर for शीकर, कैलास for कैलाश, कौसल्या for कौशल्या and कुबेर for कुवेर (at a few places कुवेर is also printed). To me 'द्विरूपकोष' is more or less an attempt to channalize the weak and incorrect reading in a modrate manner.

IV

Now the questions about Kālidāsa's date, birthplace, life and the authorship of all the three dramas are to be considered:

A. *Date of Kālidāsa* [110 B.C. to 55 B.C.] The solid facts :

(i) Kālidāsa is referred by name in Ravikīrti's Aihole inscription (634 A.D.),

(ii) Kālidāsa speaks of the caves of the 'NĪCA'—mountain and not of the images got engraved there by the Armychief of Gupta King Candra–II,

(iii) the said caves have the image of Gaṇeśa also and K. L. does not make any reference to Gaṇeśa,

(iv) leaving Puṣyamitra himself and his heroic deeds aside Kālidāsa selects a plot of love affairs of Puṣyamitra's son Agnimitra, about 40 to 45, for his 'Mālavikāgnimitram', a Nāṭaka which requires only a reputed person, preferably king, as its hero. In this drama Puṣyamitra is reported busy with his Aśvamedha and his grandson Vasumitra in the protection of the Aśva. If this Aśvamedha is the last : second one surely it was the later half of Śuṅg's rule i.e. 110 B.C. to 55 B.C.,

(v) Vidiśa is known to Kālidāsa as the beautiful capital of Daśārṇas [Me.I.24] though it never, as is called, reached this rank excepting in the rule of Śuṅgas,

(vi) Kālidāsa makes no direct reference to the King Vikramāditya whose court is said to be adorned by this great poet as one of the nine Jewels 'Dhanvan-

tari' etc., on the other hand he writes extensively of the historical facts of Śuṅgas, repeatedly,

(vii) a poet of 500 A.D. will hardly remember an ordinary ruler like Agnimitra of 100 or 110 B. C., leaving all his contemporary monarchs like Gupta King Candra–II or his father Samudra, aside.

These facts, force us to come to the conclusion that Kālidāsa flourished during the transital period when Śuṅgas were ruling and the would be monarch Vikramāditya was in the process of achievnig his fame i.e. 100 B.C. to 57 B.C.

B. *Birth place of Kālidāsa* cannot be decided finally. What can be said in this direction is that Kālidāsa knows each and every part of this vast continent and its territories closely. The great mountain Himālaya and its vast region win his regards but his affection is reserved to the small rivers too of Avanti region and its holy, beautiful and auspicious city Ujjayani for which he asserts–'Useless is the life if the Ujjayinī is not visited'.

C. *Life of Kālidāsa*, as strikes to my mind had been a life of (i) a staunch devotee of 'Aṣṭamūrti Śiva' : the whole universe, (ii) a welwisher of mankind (iii) a practical scholarship of every branch of learning (iv) a leader of SAMSKṚTA Language and literature headed by the Greatest literature of the Vedas (v) a Karmakāṇḍī Brāhmaṇa (vi) a Yogī believing in Overcoming Death, (vi) a religious person desiring solvation by enjoying each fruit of life with no place for the ever green tears of sorrow. In nutshell 'Kālidāsa's life is a pleasant centre of 'Ultimate Bliss'. And hence Kālidāsa's life is the life of a poet whose heart is full of experiences, bubbling out in the form of similes which do not depend upon an imaginary or utopion world suitable for 'Utprekṣā' of Śriharṣa etc. . And so Kālidāsa's works are not withered by 'Time' or staled by 'Custom'. In other words Kālidāsa's Poetry has out-stood time and custom both, and this supremacy of his poetry is the reality of his life too.

D. *Authorship of Dramas*. The question whether the author of dramas and epics is the same Kālidāsa or different persons is obsolutely baseless, for (i) the instances of identical words, ideas, images and expressions running through all the seven works of Kālidāsa are numerous (ii) the distinctness of Kālidāsa's vision is his own and it is reflecting in his all the six, if not seven, masterpieces, in which I have repeatedly mentioned and pinpointed such similarities in the footnotes.[1] (iii) Kālidāsa's central theme in all the works is one and the same i.e. 'To creat a noble and flawless National Leader' by a conscious and delibrerate effort in the image prescribed by Indian Dharma-Sastras and Rāja-Śāstras. This theme gets a well planned handling in the three major works of the author : K. Ś. and R. The characters of divine heads like Saptarṣi [in K.], Viśvāmitra, Kaṇva and Mārīca [in Ś.] Bharatamuni and Nārada [in Vi.] and Vasiṣṭha [in R.] in Kālidāsa are turned and twisted by a conscious choice or the final aims—'the birth (i) of Kumāra in K. (ii) of Sarvadamana Bharata in Ś., (iii) of Āyuṣa in Vi. and (iv) of Raghu in R. Thus almost all the works of Kālidāsa are the stories of 'Kumāra-Sambhavam' (my note-3 p. 254) under the different headings and shapes.

The Epic named Kumārasaṁbhavam is the story of the marriage of Śiva and Pārvatī and both are divine in nature. Characters of Vi. are semi-divine and so are of Ś. In R. the divinity is kept aside from the characters and the poet's concern is only with the human element of their nature. With divine grace won by his own Tapas = तपस् King Dilīpa attains a heroice son like Raghu = रघु whose march cannot be checked even by Oceans, Mountains and Sky, who challenges the Lord of Heaven: Indra or Mahendra and overcomes him by his own valour alone. An aweful weapon like thunder or Vajra fails on him. On the other hand as soon as he decides to invade Kuvera, another Lokapāla, gold showers in Raghu's palace.

---

1. Specially in my book 'कालिदासः : मानवशिल्पी महाकविः' = 'Kālidāsa is a great poet because he is a builder of Man'.

Similerly Kumāra-Kārtikeya will come forward when all the gods exaust themselves. He carries the divine troops like a Bridegroom carrying his bride. Raghu though a human being, is enriched with the same divine valour and we can assign him the same title Kumāra = कुमार in the words of Kalidāsa himself

i. हरेः कुमारोऽपि कुमारविक्रमः [R. III-55] and

ii. उमावृषाङ्कौ शरजन्मना यथा [R. III-23].

In Vi. Purūravas, who had killed the demon Keśin and protected Urvaśī from his clutches, fails to hunt even a vulture which is shot down by his son Āyuṣa of about 12 years. One may remember here the इन्द्रविजय—episode of R., where the father : Dilīpa is trying to become Indra and the son : Raghu defeats the same Indra. What a deep irony is implied here ? Father, by foresight and wisdom of his son will be directed from heaven to the solvation. Dilīpa after this renounces the idea of winning the Kingdom of Heaven by being Indra.

Hence if K. is Kārtikeyasambhavam than R. is Raghu-sambhavam, Vi. is Āyussambhavam and Ś. is obviously 'Sarva-damanan-Bharata-sambhavam. This way in all the works irrespective of their genre (drama or epic) poet's mind is warking upon the same theme and the same lines.

E. *Order of works.*

In Ṛ., Me. and Mā. Kālidāsa depicts nature in both its forms overt and covert i.e. the nature of outer world and the collective unconsciousness of mankind. Kālidāsa starts with outer nature in Ṛ. and proceeds gradually towards the inner nature which will reach its peack in R. This is why the works are here arranged in the order Ṛ., Me., K., R., and Mā., Vi. Ś. In Poetry Kālidāsa commences, here, with Ṛ. and ends with R. In drama he starts with Mā. and stops with Ś. Here I think Kālidāsa on his path towards the National theme of Kumāra-sambhavam = कुमारसंभवम् starts with overt nature and selects the covert nature as his future field. Here we remember the first verse of Ṛ. 'प्रचण्डसूर्यः स्पृहणीयचन्द्रमाः' etc. R. is an epic

of solar-race and all the other works belong to the lunarrace. The hero of Ma., though being Brāhmaṇa by birth, is no more in character than those of other heros of other dramas. In this first drama Mā. only the levity of human nature is depicted. But here the planned theme of Kumāra-sambhavam is not forfeited. Agnimitra, the hero of the drama is already having a son of heroic valour : Vasumitra. Hence no child born of Mālavikā and Agnimitra in shown in the drama.

V

A. I am glad to have Kālidāsa's works printed in the present form and deem myself fortunate for the fulfilment of my personal need regarding the dependable text of K. L. in one handy volume.

B. (i) It beffals on me as a sacred duty to remember Pt. Madanamohana Ji Mālavīya whose soul : Banaras Hindu University is fortunate enough to publish the complete works of one of the Greatest Poets world ever produced : Kālidāsa. Our gratefulness is due to Pt. Sītarāma Caturvedī too who served us with his Kālidāsa-granthāvalī for past three decades.

(ii) My thanks are due, here, to the present Vice Chancellor Dr. K. L. Srīmālī and his learned advisor Śri L. O. Joshi whose Co-operation has been highly encouraging and stimulating. The Ratna Printers, Pt. Kapiladeva Giri and my students deserve my hearty thanks who have finished the printing work in record time, helped me in finalising the Prakṛta words with proofreading, and preparing the appendices respectively.

C. I regrete for the printing mistaks and request the readers to correct the text with help of the errata, appendix and variants.

D. Currections, suggestions, additions and ovservations are invited from expert readers. Actually a team of scholers is needed for the edition-work of such a great, vast and old literature.

VI

WHAT KĀLIDĀSA IS

I will sum up with my observations on Kālidāsa—

Kālidāsa is one of the greatest humanists, world ever produced. He is a staunch devotee of Humanity and Mankind. Though flourished in the days of monarchy, Kālidāsa beleives in MONESTARY and not in Monarchy as such. Kālidāsa's Monarch is a benevolant servant of his subjects, Kālidāsa's harem is meant for the battle-fields, his minute observations on human personality (female and male) are the exposition of 'National Health' and 'National Beauty', to bring Man ultimate and universal VICTORY. Kālidāsa's Man is proud of his devotion to his duty whatever may be its nature. Lastly Kālidāsa has a responsible and balanced but realistic sympathy for all the classes of society. Following is the message of Kālidāsa to the modern world of powerful weapons :

- बलमार्त्तभयोपशान्तये [R. VIII. 31]
- आर्त्तत्राणाय वः शस्त्रम्, न प्रहर्त्तुमनागसि ॥ [S. I. 11.]

'Your mights and weapons are meant to protect and serve the needy world, and not to strike at the innocent, harmless and at the clean hands'.

And following is the song of social welfare of Kālidāsa :

सर्वस्तरतु दुर्गाणि सर्वो भद्राणि पश्यतु ।
सर्वः कामानवाप्नोतु सर्वः सर्वत्र नन्दतु ॥ [Vi. V.25]

May *all* overcome their difficulties.
May *all* experience bliss.
May *all* fulfill their desires.
May *all* enjoy everywhere.

R. P. Dwivedi

Banaras Hindu University
5. 2. 76

1. आर्त्तानां भयमपनेतुमात्तधन्वा दुष्यन्तः Ś. VI.

संपादकीयम्

'कालिदासग्रन्थावली' नाम कालिदासस्य निरनुवादानि सटिप्पनकानि च सप्त काव्यानि । विशेषश्चात्र चत्वारि श्रव्याणि त्रीणि च दृश्यानीत्याहृत्य सप्तानां संपरिष्कृतमूलपाठानां काव्यानामवंहीयान् पुस्तबन्धः । परिष्कारश्चात्र कालिदासोचितस्य वाग्योगस्य सप्रत्यभिज्ञानमुपश्लेषणम् । उचितत्वं चात्राभ्यस्तत्वम् । तदपि च कविगतम्, अस्मदादिगतं च । तत्र पूर्वस्य पद-वाक्य-वाक्यार्थ-वाक्यार्थविच्छित्ति-प्रबन्धाङ्गसंघटन-संवाद इति संज्ञानान्तरम्, अपरस्य चैतेषां संप्रतिपत्तिः, एतत्संवादस्यानुसन्धानं चेति । ततश्च कालिदासस्य प्रबन्धादिसंवादमनुसन्धाय तदङ्गभूतानां वाक्यार्थाङ्गानां संप्रत्ययेन कालिदासवाग्देवतापरामर्श एवात्र परिष्कारो निरुपाधिकसाक्षात्कारापरपर्यायः । अनया संवाद-संप्रतिपत्ति-चालन्या नीरक्षीरीं न्यायीकृत्य निष्पन्नेयं सयुक्तिक-पाठ-तद्भेद-प्रवृत्ति-निष्पादित-सौभगविशेषा प्रतिप्रसूतिः कालिदासकवितायाः । एवं चाऽगतार्थेयमितः पूर्वं प्रवर्त्तितैः पं. सीतारामचतुर्वेदी, साहित्याकादमी, प्रा०ए-शार्पेमहोदयश्चेत्येवंप्रभृतीनां कालिदासकाव्यप्रकाशनैः ।

१

१. आधाराः । भाषा हि स्वतः पङ्गुं प्रति काष्ठपादिकेव मन्दसामर्थ्येव याथार्थ्यसंपरिज्ञानेऽनर्थज्ञं प्रति । अर्थज्ञाय पुनः सैवेयं संवृताननापि सुभ्रूः स्वाकूतमिव प्रकाशयत्येव कृत्स्नमपि रहस्यजातम् । एवं च मूल-तदन्तर-विवेकः पूर्वं कविमर्मप्रत्यभिज्ञानमप्यपेक्षते । प्रमाणान्तराणि हि तदनन्तरप्रत्यासत्तिकानि । तेषु (i) कविकालिक-लिपि-ज्ञानं प्रथमं, (ii) हस्तलेखा द्वितीयं (iii) उल्लेखाश्च तृतीयम् । साम्प्रतं हि सुमेधसो द्वितीयमेव प्रमाणं प्रथमयन्ति तत्रापि च बाहुल्यम् । तत्र

क. ब्राह्मीलिपौ हि 𑀓𑁅𑀢𑀼𑀓𑀁 इति कौतुकं

𑀓𑁂𑀢𑀓𑀁 इति च केतकं

लिख्यते स्म । भट्टिप्रोलु-[1] लेखादारभ्य समुद्रगुप्तस्य [ई. ४००] प्रयागाभिलेखं[2] यावद् ब्राह्मीलिपेरियमेव स्थितिः । पश्चात् पुनः शीघ्रलेखे तुकारः 𑀢𑀼 एवमपि निर्मीयमाणो लभ्यते । अधुना कालिदासस्य काव्यनाटकानि लिप्यन्तरेष्वेव लभ्यन्ते

१. प्राचीनलिपिमाला : हीराचन्दगौरीचन्द ओझा ।

नतु ब्राह्मीलिपौ । तान्यपि लिप्यन्तराणि नातिचिरकाललेखानि । एवं चाधुनिकै-र्बहुतिथमन्तरमभ्यन्तरीकृत्य लिखितैर्हस्तलेखैरतितरां प्राचीन एव समये कालेन कवलितानां ग्रन्थानां याथार्थ्यपरिज्ञानं दुश्शकमेव । कालिदासो हि विक्रमसम्वत्सरा-दव्यवहितपूर्व-शुङ्गराज्यान्तिमचरणकालिक इत्यास्माकीना प्रतिपत्तिः । ततश्च ५००-वर्षानधिकप्राचीनैर्हस्तलिखितैः कालिदासकाव्यैः १६०० वर्षाणामन्तरालं कथं वा मूलमनुसन्धातुमेकपद एकोदस्येत । अत एव कौतुकस्य स्थाने केतकमिति बहुषु हस्तलेखेषु लभ्यमानमपि काव्यवाक्यार्थानौपयिकमिति चरित्रवर्धनः, मल्लिनाथः, दक्षिणावर्त्तनाथश्चेति त्रिभ्यो न रोचते, तदितरेभ्यः सर्वेभ्य एव रोचमानमपि । प्राचीनतमो दक्षिणावर्त्तः पुनः 'इदमतिश्लाघ्यविशेषणं न स्यादि'ति 'केतक'-पाठं भर्त्सयत्यपि । अथापि डेमहोदयः साहित्याकादमीमेघदूते शार्पेमहोदयश्च कालिदासलेक्सिकनमूले केतकमेव मूलतया पठतः, तमिलसिंहललिपिषु जैनहस्त-लेखेषु केतकस्यैव लाभात् । मेघे कौतुकाधानमेव कविपरिचितं 'मेघालोके भवति सुखिनोऽप्यन्यथावृत्ति चेत' इति । केतकाः पुनरदृष्टमेघा अपि श्रावणभाद्रयोः केतकानि दर्शयन्त्येवेति नास्ति ग्रीष्मकालिकेनाषाढेन, तत्रापि मेघेन, तत्र चापि कविसमयेन केतकस्य समर्थनम् । केतकं हि वर्षापुष्पमिति प्रसिद्धिः, अत एव च सुकविरेष 'पाण्डुच्छायोपवनवृतयः केतकैः सूचिभिन्नै'-[मे. १. २३] रिति 'हसितमिव विधत्ते सूचिभिः केतकानामि' [ऋ. २.२४,]-ति च मेघासत्ति केत-कोल्लासे समर्थयति । ऋतुसंहारस्य १७, २१ इति पद्यद्वयेऽपि कविर्वर्षास्वेव केतकीं स्मरति, न चोल्लिखति ग्रीष्मादिष्वेकदापि । अतोऽस्माभिरत्र केतकमिदं मूलतया नाभिमतम् । 'मन्दं मन्दं नुदति पवनश्चानुकूलो यथा त्वाम्' इति पद्ये युष्मत्पदं सर्वत्र द्वितीयान्तमेव लभ्यते । अत्र पुनः प्रथमान्ततया पठ्यते रेखामात्र-परित्यागेन । अत्रार्थः परिवर्त्तितः । प्रस्पन्दमानचारुतातिशयश्च सः, प्रकृतद्वयौपम्य-संघटनया । यथापदमत्रानुकूल्यपरतया निनीष्यते, तद् व्यर्थमेव, अनुकूलशब्दस्य कविनैव प्रयुक्तत्वात् । हेतुवाचकत्वे पुनरुत्तरार्धे तथार्थकेन केनापि पदेन भवितव्य-मेव । नास्ति च तत् । ततो द्वितीयान्तपाठे वाक्यार्थ एष दरिद्रदम्पत्योः शिशिर-कालावगुण्ठनपट इवैकेनाकृष्टोऽपरं परिहरति ।

हस्तलेखाः पुनर्भ्रष्टा अपि भवन्ति खेदयन्ति च टीकितॄन् । अलङ्कारसर्वस्वे विमर्शिनीमारचितवान् राजानकश्रेष्ठस्तत्रभवाञ्जयरथोऽत्र प्रमाणम् । अतिशयोक्त्य-लंकारादिविमर्शिन्यामसौ मूलपाठस्य विपर्यासं स्पष्टमेवोद्गिरति । मल्लिनाथो रघुवंशस्य यं हस्तलेखमवाप तत्र नासीदेव महिमभट्टोद्धृतं हेमाद्रिदर्पणागतं 'सुरभिसंगमज'-मिति नवमसर्गीयं पद्यम् । रघुवंशस्यैव १७।७९ पद्ये मल्लिनाथः कालिदाससाहित्य-

प्रसिद्धां शेषां न जानाति, तत्र 'देवा' इति पठति । 'ससत्त्वमादाये'-ति १३-सर्गीये पद्ये स 'विवृताननत्वादि'-ति पठति, त्यजति चाम्भसः कर्मत्वम्, आक्षिपति च चञ्चुपुटं कर्मतया । 'उत्थापित' इति सप्तमसर्गीये पद्ये 'नेत्रक्रमेणे'-ति मल्लिनाथपाठः, क्रमशब्दश्च तन्मत औपम्यार्थकः । न च कालिदासेऽन्यत्रासावेवंविधेऽर्थे प्रतिपन्नः । नास्ति च तत्र नेत्रौपम्यमावश्यकम्, स्थिताः क्षणं पक्ष्मस्वि'-त्यादिपद्य इव क्रममात्रस्यैवात्र सुभगत्वात् । '०रेवं क्रमणे'-ति वस्तुतोऽत्र मूलम् । 'रेवं'-शब्दस्य 'नेत्र'-इति वाचनं ब्राह्मीलिपौ न न संभवि ।

मेघदूत एव मल्लिनाथवत् सुशीलकुमारडे, शार्पे, आधुनिकाश्च सर्वे 'कामार्त्ता हि प्रकृतिकृपणा' इति पाठं मूलतया नयन्ति । दक्षिणावर्त्तनाथादयोऽत्र 'प्रणयकृपणा' इति पठन्ति । उचितं च तत्, कालिदासस्य, विक्रमोर्वशीये कामार्त्तस्य पुरूरवसः चेतनवदचेतनेष्वपि प्रियाप्रवृत्तिप्रणयस्य तेनैवोपनिबद्धत्वात्, उपनिबद्धत्वाच्च तत्र 'प्रणय'-शब्दस्यैवानेकशः पुरूरवःप्रयुक्तेषु तेषु तेषु वाक्येषु 'कालिदास-साहित्ये प्रणयशब्दार्थ' इति प्रकाशितचरेऽस्मदीये लेखे, अत्र च २०३ पृष्ठपादटिप्पणे संदृब्धेषु । तृतीयचरणपर्यन्तव्यापिनो याचनारूपस्य समर्थ्यस्य वाक्यार्थस्य प्रकृति-पदेनासमर्थनं, समर्थनं च प्रणयपदेनैवेत्यत्रापरो लाभः । प्रकृतिकार्पण्यं हि चेतनाचेतन-भेदाग्रहमेव समर्थयेत्, तच्च याचना-ङ्गभूतम् न तु प्रधानम्, प्रधानं च याचनम् । अत्रास्माभिः प्रणय एव कृतः प्रणयः ।

मेघदूत एव मल्लिनाथो 'ज्योतिर्ल्लेखावलयी'-ति पद्ये कुवलयपदाव्यवहितोत्तरीयं 'पदप्रापि' 'दलक्षेपि' इति पदद्वयं संमिश्रच पदक्षेपीति पठन् क्विब्व्युत्पत्त्या कर्णपदार्थे-नास्वाभाविकतया योजयतीति दक्षिणावर्त्तादिभिरभ्युपेतं दलक्षेपीत्येव पाठमत्रा-द्रियामहे ।

रघुवंशस्य ५।१४ पद्ये हेमाद्रिदर्शितेषु चतुर्षु पाठेषु मल्लिनाथो 'लोकेन चैतन्यमिवे' त्यादिकं पाठमेव वेत्ति । तच्च तस्यैव सर्गस्य ३५-तम-पद्यार्थेन पुनरुक्त-भूयिष्ठम् । तत्र यदुचितं तदस्माभिरत्र गृहीतम्, हेतवश्च हेमाद्रेर्दर्पणस्य भूमिकायां वितत्य दत्ताः । अस्ति कालिदासो यजमानस्याष्टमूर्त्तिशिवान्यतमोग्रनामकमूर्त्ति-रूपतां तत्र तत्रोपनिबध्नन्ननुभूतः । ततश्चास्माभिः स्वीकृतः पाठ एव कालिदासो-चितः ।

र. ४.६७ पद्ये हस्तलेखानां बाहुल्यं 'वंकू-वक्षु वंक्षु'-ष्वन्यतमं बिभर्ति । मल्लिनाथस्तत्सगोत्राश्चान्ये केचित् 'सिन्धुतीरे'-त्यादिकं पठन्ति । साम्प्रतिक आक्ससनामा नदविशेष एव वक्षुः । स एव च वंक्षुः । त्रिविष्टपमार्गेण कैलासादा-वर्त्तमानस्य रघोः पारसीकाञ्जेतुं स्थलवर्त्मना जाता या यात्रा सा पञ्चापदेशीयं

सिन्धुनामकं नदं यावदेव न संभवति। हूणादयस्तत्र न लभ्येरन्, न च लभेरन् रघोरश्वाः कुङ्कुमकेसरपटवाससौभाग्यम् आक्ससतीरमगत्वा। अत्रास्माभिर्वङ्क्षुतीरे-त्यादिकः पाठ एवोरीकृतः। हूणेषु मृतभर्तृकाणां कपोलपाटनं प्रसिद्धम्। ततो रघोः ४।६८ पद्ये पाटलं विहाय पाटनमेव हस्तलेखबाहुल्यप्रमाणितमत्र प्रमाणीकुर्महे। एवमेव 'भागीरथीं शोण इवात्तरङ्ग' इत्यत्र 'ज्योतीरथामि'-ति हस्तलेखबाहुल्य-प्रमाणितं वाक्यार्थसङ्गतिशुभं च पाठमत्राद्रियामहे। हेमाद्रिप्रभृतिभिरपि स एव पाठ आदृतः। मल्लिनाथ एव तत्र भागीरथीप्रियः। ज्योतिरथा च शोणगामिनी सरित्। सा साम्प्रतमपि जोहिलेति नाम्ना प्रसिद्धा। अस्याः सङ्गमे स्नानं महाभारते नितरां प्रशस्यते।

(ख) साम्प्रतं काव्यशास्त्रोद्धृतां सामग्रीमुपाददमहे। तत्र महिमभट्टः कुमारसंभवस्य ३।५५ पद्ये द्वितीयमौर्वीमिति समासे द्वितीयत्वस्य विधेयत्वं समासेन कवलितं मा भूदिति 'मौर्वीं द्वितीयामि-ति यद् विश्लिष्य पठति मम्मटोऽपि तदनुवदति मल्लिनाथे च तथैव परिवर्त्तनं लभ्यते। कालिदासः पुनः एकवेणीम् [मे. ३.१] इति अनिमित्तोत्कण्ठामिति [मा. ३.१] च प्रियविशेषणसमास इति, महिमभट्टदृष्टचरो हस्तलेख एव प्राचीनतम इति चात्र समास एवादृतः। कु. ५.७१ पद्ये कथमपि 'पिनाकिन' इत्येव मुद्रितम्। तत्र कुन्तकश्लाघितो महिमभट्टविचारितश्च 'कपालिन' इति पाठ एवोचितः। यद्यपि पिनाकः कपालं चेति द्वितयेऽपि सक्थिनिर्मितत्वात् जुगुप्साजनकत्वम्, तथापि कु. ५।७८,७।३२ पद्ये कपालिपाठमेव समर्थयितुमुत्प्रेरयतः। एवं च मल्लिनाथस्य 'पिनाकिन' इति पाठः परिशेषात् शुद्धिपत्राच्च शोधनीयः।

(ग कुमारसम्भवे १-८ इत्यादिकानष्टावेव सर्गान् मूलतया मन्यामहे। तत्र यानि कारणानि तानि कु. ८ सर्गान्ते दत्तानि। अष्टमः सर्गो ग्रिफिथ-सहगल-प्रभृतिभिस्त्यक्तः। वामनः, धनञ्जयः, महिमाचार्यश्च तमुद्धरन्ति, मध्यवर्त्ती आनन्द-वर्धनश्च तत्र देवीसंभोगवर्णनं भर्त्सयति, मम्मटोऽपि तदनुवादे बद्धादर इति तस्य मूलत्वे नास्त्येव सन्देहः। अत्र यद् वस्तु यच्च तस्य शिष्टं समुदारकविकर्मकं च चित्रणं तत्र परिस्फुरन् प्रतिभाविशेषो यन्महाकवित्वं व्यनक्ति तदपि कालिदास-मात्रोचितमेव। नास्ति च काव्यमिदं 'तारकवधम्'।

(घ) ऋतुसंहारं कालिदासस्यैव कृतिरिति तत्रोपनिबद्धेन वस्तुना सह कुमारसंभवाद्युपनिबद्धानां वस्तूनां संवादेन स्पष्टभूयिष्ठम्। यद्यपि 'सोत्सुकम्, मनोरथानि' इत्यादीनि व्याकृति-कोषासमर्थितानि पदानि काव्यस्यास्य कालिदास-कविकर्मण आरम्भकालिकत्वं साधयन्ति, साधयन्ति वा जनान्तरयोजितत्वं तेषां, तथापि शरद्वर्णनादिषु कालिदासोऽत्राप्यन्यत्रेव महानेव।

(ङ) काव्यानि शोधयितुं यानि संस्करणानि दृष्टानि तेषां सूची अत्र पूर्वं दत्तैव। पुष्पिकासु लभ्यानि सर्गनामानि पुनर्बहुशः कथावस्तुनोऽन्तरङ्गमुपवीक्ष्य परिशील्य च तत्र स्थितानि रहस्यानि परिवर्त्तितानि। तानि तत एव द्रष्टव्यानि।

२

नाटकेषु संपादनं कृच्छ्रसाध्यमिति सर्वेषामनुभूतिः। अत्रापि सैव स्थितिः। अत्र ये विशेषास्तान्नामत एव सारत एवोद्धरामः—

१ सूच्यं दृश्यं चेति द्वयोरपि वस्तुनोः प्रतिनाटकं शीर्षकादिभिरनितरसुलभः शास्त्रसंमतश्च विभागः।

२ 'मा. ५; वि २ ३; शा ४,६-' अङ्कारम्भका अर्थोपक्षेपका मुख्यपात्र-प्रवेशावधिकव्याप्तिकतयाऽनुभूता मुद्रिताश्च तदवधिकतयैव, प्रथमं मा ५ विहाय। तत्त्यागे कारणं डॉ.राघव-डा रामज्युपाध्या॰ प्रतिषेधदाक्षिण्यम्। कलेवरवृद्धयाऽऽवश्यकानि नामान्यपि परिवर्त्तितान्येव किन्तु दशरूपकादीन्यनुसृत्य, न तु भरत-नाट्यशास्त्रम्, तत्र प्रवेशकमात्रस्यैव लाभात्. विष्कम्भकस्य च कथञ्चिदिव प्रकरणप्रस्तावे पश्चाद् योजित्वेन लाभात्। अर्थोपक्षेपकाङ्कयोः सम्बन्धाय श्लोकसंख्या तु न खण्डिता।

३. रङ्गनिर्देशाः संस्कृतच्छायास्वपि योजिताः।

४. (क) संवादाकारा अपि क्वचनान्यथिताः। तथाहि (१) शाकुन्तलस्य प्रथमेऽङ्के 'न खलु-न खलु' इति पद्यं स्पष्टमेव प्रक्षेपमात्रम्, अथापि प्रियतमत्वान्मूल एव ग्रहणम्, किन्तु पात्रान्तरमुखनिक्षिप्तया, (२) शाकुन्तलस्य चतुर्थेऽङ्के शिष्यानुसूययोः प्रवेशस्य पृथक्कृतिः. परिष्कृतिश्चानुसूयोक्तीनामसम्बद्धत्वेन मुद्रितचराणां निर्णयसागरसंस्करणे, लतामण्डपे प्रविष्टमात्र एव दुष्यन्तः प्रियंवदात्वेन ख्यातया सख्याऽप्रियेण क्रमेण पुस्तकान्तरेषु यदुच्यते तत्र प्रियत्व-स्वाभाविकता, (३) शाकुन्तल एव (४८० पृ०) 'प्रभासप्रवास'—शब्दयोः संयोजनम्, (४) वि० ४—अङ्कान्तेऽशोकस्योपक्षेपायावतरणिकावाक्यम्, (५) ४९९, ५२७-तमयोः पृष्ठयोः 'निर्वर्ण्य' इति, ५२६ पृष्ठे च 'सस्मितेन' सह 'प्रकाशम्' इत्यस्यापि योजनम्, (५) 'स्वगतम्'—इत्यस्य स्थाने कालिदासाभ्यस्त 'आत्मगतम्' इति पाठः, (७) अपवार्यात्मगतप्रकाश'—शब्दानां यथायोगं योजनम्, (८) 'इति निष्क्रान्तः' इत्यादिरङ्गनिर्देशेभ्यः 'इति'—शब्दस्यापवादलेशकलुषितस्त्यागः, (९) नाटकप्रयोगारम्भे पूर्वरङ्गानां द्वाविंशत्याः त्रयोविंशत्या वा एव योजनायै प्रयोक्तॄणामवधानाय नान्दीपद्यानामारम्भे 'पूर्वरङ्गादि'—शब्दयोजनम्, (१०) नान्द्या

अपि मृदङ्गादिपुष्करवाद्यपरत्वेन, चित्रशुद्धत्वेन च द्वैविध्याय टिप्पण्या विनियोग:, (११) भाषासौष्ठवाय सर्वदमन—धीवरयो: संवादवाक्येषु नागरं पाठं विहाय वङ्गीयस्य पाठस्योपादानम्, ५३० पृष्ठे 'वनवासस्ये' त्यादेर्वाक्यस्य निपुणं संशोधनम्, परिहासाय विदूषकस्य वैशाखनन्दनत्वं रक्षितुं माधव्य इति वङ्गपाठादृतं नाम ।

(ख) 'क्वाकार्यं शश०' इति भावशबलतायै ख्यातं विक्रमोर्वशीयपद्यत्वेन चाङ्गीकृतं पद्यमत्रास्माभिर्न गृहीतम्, तस्योन्मत्तस्य पुरूरवस उन्मादोक्तिषु गभीरता-सापेक्षस्यास्याशक्यपरिग्रहत्वात् । 'रक्तस्त्वं नवपल्लवैरि'—ति चानन्दवर्धनोद्धृत-मपि पद्यं पुरूरवउक्तितया प्रतिभाति, किन्तु नास्ति तत्र विनिगमकमिति न तदपि गृहीतम्, मम्मटोद्धृतं 'रक्तशोके'ति पद्यमपि हस्तलेखेषु काठिन्येन लभ्यतेऽथापि प्रतीकविद्यामनुपालयद्भि: सीतारामचतुर्वेदिभिरिवास्माभिरपि गृहीतम् । अशोक: शोकविमोकाय शाकुन्तलेऽपि मातलिना निर्दिष्ट: 'अस्मिन् अशोकवृक्षमूले ताव-दास्तामायुष्मानि'—ति (पृ० ५४५) इति ब्रुवता मारीचाश्रमं च प्रविशता ।

(ग) शाकुन्तले यस्तावद् वङ्गीये पाठे शकुन्तलादुष्यन्तयो: प्रथमसमागम-प्रस्तावे तृतीयाङ्कागतो विस्तर: सोऽपि तादृशांशान्तरवदस्माभिरत्र रूपान्तरत्वेन तथा योजितो यथा तत्रैव बद्धश्रद्ध: पुस्तकान्तरं न स्पृशेत् ।

(घ) विक्रमोर्वशीयस्य काटयवेमत्यक्ता: प्रकृताभ्रंशगाथा: पुन: प्रक्षिप्तयैव मुद्रिता:, पण्डितसंस्करणस्य मूलेऽपि तासामलाभात्, शार्पेसंस्करणे च तासां कोष्ठका-न्तर्गतत्वात् । कारणान्तराणि च तत्र पादटिप्पणीषु दत्तान्येव ३८६ पृष्ठे ३९० पृष्ठे च ।

(घ) संवादभाञ्जि वाक्यानि भावजातानि, पदानि वा तत्र तत्र टिप्पणेषु सन्दर्भै: सूचितानि यथा—

४६०, ३६२ पृष्ठगत: 'साधारणोऽयं प्रणय' इति प्रयोग:, स्वहस्तशब्द: (३६० पृ०) सौभाग्यशब्द: (३६६ पृ०) प्रथमशब्द: (१८१, ४०९ पृ०) प्रणयशब्दश्च (२३० पृ०) ।

(ङ) प्रतीकविद्यामुपलालयद्भिरस्माभिरत्र कामधेनु: प्रकृतित्वेन, नन्दिनी च तत्तद्व्यक्तिषु लभ्येन विकृतित्वेन, गुरुवृद्धिरूपेण शिष्यवृद्धिरूपेण वा दर्शिते [पृ० १०९] सोमतीर्थं स्वयं दुष्यन्त एव, कृष्णशारश्च स्वयं कण्व इति कण्वेनैव दुष्यन्तो बलादिवाश्रममानीत इति न: प्रतिपत्ति: (४३२ पृ०) । नीललोहिततत्त्वं च कामतत्त्वमपि । तत: काममार्गेणापि शिवसायुज्यसंभव इत्यपि चात्रास्माकं संकेत: [५६० पृ०] । एतेषु पादटिप्पणेषु रघोरेव रघुवंश-नायकत्वमपि समर्थितम् । शाकुन्तले 'चित्ते निवेश्य' इति वा पठनीयं 'चित्रे

निवेश्य' इति वेत्यपि ४५२ पृष्ठे या श्लोकमयी टिप्पणी तत्रापि सुमनसोऽवदधीरन् । यत्र तत्र टिप्पणैः काश्चन शास्त्रपरिभाषा अप्यत्र लक्षणैः स्फुटीकृताः ।

(च) 'व'-शब्दो 'वा'-शब्दो वा कालिदासेनैवार्थे वारत्रयं प्रयुक्तः । मा. २।१२ पद्ये सोऽपरिवर्त्तनीयः । मे. २।२०, र ४।४२ पद्ययोर्मध्ये रघुवंशपद्ये तत्स्थाने 'च' इति पठ्यते, मेघपद्ये च महिमभट्टो यक्षीविशेषणेषु प्रथमान्तत्वं वीक्ष्य 'पद्मिनीवान्यरूपा' इति पिपठिषति (द्र० व्यक्तिविवेकस्य ४८५ पृ०) । रघुवंशे वयमपि विप्रलब्धाः । परिशेषे दत्तेषु पाठभेदेषु पुनः 'व'-'वा'- शब्दयोः संकेतोऽस्माभिः कृत एव । र. ४।६१ पद्यस्यापि चतुर्थचरणं 'चन्द्रं प्रवृद्धो जलधिर्निशीवे'—ति महिमभट्टः परिवर्त्तयति (व्य० वि० पृ० ४५८) ।

(छ) अत्र 'वसिष्ठ—रसना—सीकर—कैलास—कौसल्या' —शब्दाः शकार-घटितत्वेन न पठिताः, कृष्णशारशब्दश्च सकारघटितत्वेन । कुवेरशब्देऽपवर्गीय-मध्यत्वस्य केचनापवादाः पुनरभ्यासवशादत्र सुलभाः । वसिष्ठशब्दे प्रकाशार्थो वैदिको वसधातुः, रसनाशब्दे रशधातोरभावः, कृष्णशारशब्दे पुनर्हेमाद्रिदर्पणे सकारविरोधः कारणानि ।

३

१. कालिदासस्य समयः (१) ६३४ ईशाब्दे रविकीर्त्तिना नाम्ना निर्दिष्ट (२) एष कालिदासः शुङ्गनृपं महापराक्रमं पुष्यमित्रं विहाय तस्य विलासिनं पुत्रमग्निमित्रं नाटके नायकीकरोति, (३) नीचगिरौ शिलावेश्ममात्राणि स्मरति, न तु तेषु तृतीयचन्द्रगुप्तस्य सेनापतिना निर्मापितास्तत्तद्देवप्रतिमाः, (४) प्रतिमास्वासु गणेशप्रतिमाप्यस्ति, कालिदासश्च गणेशं न जानाति, (५) कालिदासो विदिशां दशार्णानां प्रथितलक्षणां राजधानीं कथयति, न चासीदेषा कदापि तथा विहाय शुङ्गराज्यम्, (६) कालिदासः पुष्यमित्रमश्वमेधदीक्षितं तत्पौत्रमाग्निमित्रिं वसुमित्रं चाश्वरक्षणे दर्शितपराक्रमं निर्दिशति (७) न च तथा स्पष्टं निर्दिशति विक्रमादित्यं यस्य सभारत्नतयाऽस्य कीर्त्तिः (८) तृतीयचन्द्रगुप्तस्य ५०० ई० शतकीयेन कविनाऽप्रसिद्धस्य ६०० वर्षपूर्ववर्त्तिन इतिहाससिद्धस्याप्यकिञ्चित्करस्य राज्ञोऽग्निमित्रस्य नायकत्वे किमिव प्रसज्येतेति कविरेष विक्रमसम्वत्सरप्रवर्त्तक-विक्रमादित्यतः पूर्वं शुङ्गानां राज्यस्योत्तरार्धे च कदाचिदपि यौवनं भेजे । स च समयः इतः पूर्वं २१३९ वर्षाणि भवेत् । विरुद्धास्तर्काः पुनर्हेत्वाभासाश्रिताः ।

२. नाटकेऽस्य कर्तृत्वे सन्दिहानाः कितर्का एव । शब्दाः, वाक्यानि, अभिप्रायाः, कविकर्म, प्रतिभा, वक्तव्यवस्तु चेति सर्वमपि यदा रघुवंशादिवच्छाकुन्तलादारभ्य मालविकाग्निमित्रं यावदप्यभिन्नं तदा को नु सचेतास्तेषां कर्तृत्वे भेदमभिवीक्षेत ।

३. कालिदासो जन्मनाऽवश्यमेव ब्राह्मण एवासीत्, कर्मकाण्डस्य, ज्यौतिषस्य, विवाहादिकर्मणां विज्ञानस्य क्षत्रियादिष्वप्रयोजनकत्वात् । भगवतोऽष्टमूर्त्तेः परमश्चरमो भक्त एष भुक्त्या मुक्ति लिप्सत इति वैदिके सनातने धर्मेऽस्य विश्वासः । संस्कृतस्यासौ महान् समर्थकः, किन्तु न संस्कृतसामान्यस्य, अपितु श्रुतिमहतः । राष्ट्रस्यासौ स्वस्तिवाचकः, किन्तु विश्वस्यापि कृते नास्त्यकुशलचेताः ।

४. कालिदासस्य जन्म भारते वर्षे कुत्र वा बभूवेति निश्चेतुं न शक्यते । स संपूर्णमपि भारतं सम्यग् विजानाति, विजानाति चास्योपद्वीपानि, किन्तु हिमाचले बद्धादर एषोऽवन्तिक्षेत्रे निबद्धरतिरिति केवलं वक्तुं शक्यते ।

५. कालिदासस्य वक्तव्यं त्वस्माभिरास्मकीने 'कालिदासः : मानवशिल्पी महाकविः' इति ग्रन्थे प्रतिपादितचरमेव भूम्ना । सारतः पुनरसौ 'राष्ट्रस्य महासत्त्वं रक्षकं' कुमाराणां संभवनाम्ना सुनियोजितेन विधिना लाभायैव कुमार-संभवे कार्त्तिकेय-संभवं, विक्रमोर्वशीय आयुस्संभवम्, शाकुन्तले च सर्वदमनभरत-संभवं न्यभान्त्सीत् । रघुवंशे प्रचण्डसूर्यं काव्यान्तरेषु च स्पृहणीयचन्द्रमाः कालिदासः ऋतुसंहारमेव प्रथमसोपानयति । मालविकाग्निमित्रस्य नायको ब्राह्मणोऽपि भूत्वा व्यवहारेण राजन्यप्राय एव लालित्यवशंवदः ।

कुमारेष्वपि कार्त्तिकेय केवलो दिव्यः, आयुः दिव्यादिव्यः, सर्वदमनोऽपि दिव्यादिव्यप्राय एव, रघुस्तु केवलः पुरुषः । स हि महेन्द्रस्य पर्वतेष्वविसह्यं वज्रं स्वे वक्षसि विफलीकृत्य महेन्द्रपदाभिलाषिणं स्वपितरं स्वर्गान्मोक्षाय प्रवर्त्तयति । ततश्च स एव वस्तुतो रघुवंशस्य नायकः ।

६. इत्थं ग्रन्थावल्या अस्यास्त्रयोंऽशा : (i) मूलम् (ii) मूलस्य रूपान्तरम् (iii) पाठान्तरं चेति । तत्र सर्वत्र जनेनानेन प्रामाणिकत्वमानिनीषितम् ।

४

साम्प्रतं काशीहिन्दूविश्वविद्यालयस्य कुलपतिभ्यो डॉ० कालूलालश्रीमालि-महोदयेभ्यस्तेषामसदृशप्रज्ञेभ्यः परामर्शदातृभ्यः श्रीलक्ष्मीनारायणजोषिमहोदयेभ्यश्च धन्यतां प्रकाशयानि यैः चिरप्रतीक्षं कार्यमिदं संपूरयितुं जन एषोऽवसरं लम्भितः । अत्र ये मुद्रणदोषास्तेषां कृते दौर्भाग्यमेव मूलम् । तद् विज्ञैः पाठकैः संशोध्य पठितव्यम् । वस्तुतः कार्यमिदं विदुषां समवायमेव सुपरिणतयेऽपेक्षते ।

अन्ते विद्वांसोऽत्र हंसतामादधीरन्निति उपकुर्वीरंश्च संशोधनजातमभिसूच्येति प्रार्थयते—

काशीहिन्दूविश्वविद्यालयः
वसन्तपञ्चमी २०३२

रेवाप्रसादो द्विवेदः

कालिदासग्रन्थावली

शुद्धिपत्रम्

१. आरम्भे पृष्ठेषु सर्गादिसंख्याङ्काः स्वयमेव योज्याः।

२. शाकुन्तलतृतीयाङ्कपद्यसंख्या शोध्या। ३. शा. ५।१—छाया 'अभिनवमधुलोलुपो भवाँस्तथा परिचुम्ब्य चूतमञ्जरीम्। कमलवसतिमात्र-निर्वृतो मधुकर विस्मृतोऽसि कथमेनाम्॥

४. संकेताः—नी = नीचैस्तः, टि = टिप्पण्याः, प्रघ. = प्रघट्टकः

५. २९१ पृष्ठे 'निर्वर्ण्य निरूप्ये'ति २९६ पृष्ठे च 'ईदृश दृश'-मिति शुद्धमेव।

पृष्ठे	पद्ये	अशुद्धम्	शुद्धम्	पृष्ठे	पद्ये	अशुद्धम्	शुद्धम्
२७	१	०विर[१]	०कार[१]	२९१	११	विवर्त्त	निर्वर्त्त
२७	६	नानां	नां	२९२	७नी.	वर्त्तिनो	वर्त्तिनी
३१	३५	रशना	रसना	२९३	११	परि	परी
३८	२१	ननं	नूनं	२९४	१४,१६	नुपुर	नूपुर
३९	२३	मूर्छनां	मूर्च्छनां	२९५	१	मेतावता	मेतावत्
५५	४१	०वध०	०वधू०	२९७	१६	०र्थिनं	०र्थनं
५९	१८	तद्गच्छ	तद् गच्छ	२९९	५	यां	मां
६३	६९	दष्टि	दृष्टि	३०९	१२	०स्न्य०	०स्न्यै०
७४	७१	[illegible]	कपालि	३२८	१५	०त्यजा	०भृता
७८	३३	तत्प्र०	तत् प्र०	३७१	१	[४]	[३]
१३७	४५	सहार	संहार	४०५	५	तद् वि	त्वद्वि
१४२	३७	०मनप०	०मनूप०	४६१	८	अङ्ग	अङ्गं
१५२	टि-१	र्क्त०	०त्ति०	४६४	७	वर्त्तेथां	वर्त्तेयाथां
१५२	टि-२	समरो	समयो	४६७	५	मदनो	मअणो
१६१	५८	विभ्रसा	विभ्रमसा	४७७	१५	आत्मगतम्	(अ००म्)
१६७	१२	सशर	स शर	४७९	७	सपत्थि	सप्पत्थि
१९२	१०	२०	१०	४८१	२	(प्र००ण)	(प्रविश्य)
२०२	१०	०ननत्वम्	०ननं स्वम्	४८१	२४	पङ्क्तेः परं	(प्रवि०पटो०)
२१६	टि-१	११	१२	४८२	२	प्रविश्य	×
२३०	टि-१	मे११५	मे १.५	५१६	७,२०	प्रतीष्य	प्रतीच्छय
२५६	पं०१०	सेव	सेन	५२६	१४	०गुय०	०गुलीय०
२५७	टि-३	०द्यानि	द्यानि-९	५४४	९	०भुवान् म०	०भुवान्म०
२५८	टि-१	पृ० २२२	प्रघ. २२	५५३	९नी.	दृष्टसं०	दृष्टमसं०
२७३	टि-३	शा.	सा.	५५९	४नी.	यौः	यौ
२७७	टि-२	मानो	मात्रो	सर्वत्र अन्यत् सुधीभि स्वमेव शोध्यम्।			

ऋतुसंहारम्

ऋतुसंहारम्

प्रथमः सर्गः

ग्रीष्मवर्णनम्

प्रचण्डसूर्यः स्पृहणीयचन्द्रमाः सदावगाहक्षतवारिसञ्चयः ।
दिनान्तरम्योऽभ्युपशान्तमन्मथो निदाघकालोऽयमुपागतः प्रिये ॥१॥

निशाः शशाङ्कक्षतनीलराजयः क्वचिद् विचित्रं जलयन्त्रमन्दिरम् ।
मणिप्रकाराः सरसं च चन्दनं शुचौ प्रिये यान्ति जनस्य सेव्यताम् ॥२॥

सुवासितं हर्म्यतलं मनोहरं प्रियामुखोच्छ्वासविकम्पितं मधु ।
सुतन्त्रिगीतं मदनस्य दीपनं शुचौ निशीथेऽनुभवन्ति कामिनः ॥३॥

नितम्बविम्बैः सदुकूलमेखलैः स्तनैः सहाराभरणैः सचन्दनैः ।
शिरोरुहैः स्नानकषायवासितैः स्त्रियो निदाघं शमयन्ति कामिनाम् ॥४॥

नितान्तलाक्षारसरागरञ्जितैर्नितम्विनीनां चरणैः सनूपुरैः ।
पदे पदे हंसरुतानुकारिभिर्जनस्य चित्तं क्रियते समन्मथम् ॥५॥

पयोधराश्चन्दनपङ्कचर्चितास्तुषारगौरार्पितहारशेखराः ।
नितम्वदेशाश्च सहेममेखलाः प्रकुर्वते कस्य मनो न सोत्सुकम् ॥६॥

समुद्गतस्वेदचिताङ्गसंधयो विमुच्य वासांसि गुरूणि साम्प्रतम् ।
स्तनेषु तन्वंशुकमुन्नतस्तना निवेशयन्ति प्रमदाः सयौवनाः ॥७॥

सचन्दनाम्बुव्यजनोद्भवानिलैः सहारयष्टिस्तनमण्डलार्पणैः ।
सवल्लकीकाकलिगीतनिस्वनैर्विवोध्यते सुप्त इवाद्य मन्मथः ॥८॥

सितेषु हर्म्येषु निशासु योषितां सुखप्रसुप्तानि मुखानि चन्द्रमाः ।
विलोक्य नूनं भृशमुत्सुकश्चिरं निशाक्षये याति ह्रियेव पाण्डुताम् ॥९॥

असह्यवातोद्धतरेणुमण्डला प्रचण्डसूर्यातपतापिता मही ।
न शक्यते द्रष्टुमपि प्रवासिभिः प्रियावियोगानलदग्धमानसैः ॥१०॥

मृगाः प्रचण्डातपतापिता भृशं तृषा महत्या परिशुष्कतालवः ।
वनान्तरे तोयमिति प्रधाविता निरीक्ष्य भिन्नाञ्जनसन्निभं नभः ॥११॥

सविभ्रमैः सस्मितजिह्मवीक्षितैर्विलासवत्यो मनसि प्रवासिनाम् ।
अनङ्गसंदीपनमाशु कुर्वते यथा प्रदोषाः शशिचारुभूषणाः ।।१२।।

रवेर्मयूखैरभितापितो भृशं विदह्यमानः पथि तप्तपांसुभिः ।
अवाङ्मुखो जिह्मगतिः श्वसन् मुहुः फणी मयूरस्य तले निषीदति ।।१३।।

तृषा महत्या हतविक्रमोद्यमः श्वसन् मुहुर्दूरविदारिताननः ।
न हन्त्यदूरेऽपि गजान् मृगेश्वरो विलोलजिह्वश्चलिताग्रकेसरः ।।१४।।

विशुष्ककण्ठोद्गतसीकराम्भसो गभस्तिभिर्भानुमतोऽनुतापिताः ।
प्रवृद्धतृष्णोपहता जलार्थिनो न दन्तिनः केसरिणोऽपि बिभ्यति ।।१५।।

हुताग्निकल्पैः सवितुर्गभस्तिभिः कलापिनः क्लान्तशरीरचेतसः ।
न भोगिनं घ्नन्ति समीपवर्तिनं कलापचक्रेषु निवेशिताननम् ।।१६।।

सभद्रमुस्तं परिशुष्ककर्दमं सरः खनन्नायतपोत्रमण्डलैः ।
रवेर्मयूखैरभितापितो भृशं वराहयूथो विशतीव भूतलम् ।।१७।।

विवस्वता तीक्ष्णतरांशुमालिना सपङ्कतोयात् सरसोऽभितापितः ।
उत्प्लुत्य भेकस्तृषितस्य भोगिनः फणातपत्रस्य तले निषीदति ।।१८।।

समुद्धृताशेषमृणालजालकं विपन्नमीनं द्रुतभीतसारसम् ।
परस्परोत्पीडनसंहतैर्गजैः कृतं सरः सान्द्रविमर्दकर्दमम् ।।१९।।

रविप्रभोद्भिन्नशिरोमणिप्रभो विलोलजिह्वाद्वयलीढमारुतः ।
विषाग्निसूर्यातपतापितः फणी न हन्ति मण्डूककुलं तृषाकुलः ।।२०।।

सफेनलालावृतवक्त्रसंपुटं विनिःसृतालोहितजिह्वमुन्मुखम् ।
तृषाकुलं निःसृतमद्रिगह्वरादवेक्षमाणं महिषीकुलं जलम् ।।२१।।

पटुतरदवदाहोच्छुष्कसस्यप्ररोहाः,
परुषपवनवेगोत्क्षिप्तसंशुष्कपर्णाः ।
दिनकरपरितापक्षीणतोयाः समन्ताद्
विदधति भयमुच्चैर्वीक्ष्यमाणा वनान्ताः ।।२२।।

श्वसिति विहगवर्गः शीर्णपर्णद्रुमस्थः
कपिकुलमुपयाति क्लान्तमद्रेर्निकुञ्जम् ।
भ्रमति गवययूथः सर्वतस्तोयमिच्छन्
शरभकुलमजिह्मं प्रोद्धरत्यम्बु कूपात् ।।२३।।

विकचनवकुसुम्भस्वच्छसिन्दूरभासा
प्रबलपवनवेगोद्भूतवेगेन तूर्णम् ।
तटविटपलताग्रालिङ्गनव्याकुलेन
दिशि दिशि परिदग्धा भूमयः पावकेन ॥२४॥

ज्वलति पवनवृद्धः पर्वतानां दरीषु
स्फुटति पटुनिनादः शुष्कवंशस्थलीषु ।
प्रसरति तृणमध्ये लब्धवृद्धिः क्षणेन
ग्लपयति मृगवर्गं प्रान्तलग्नो दवाग्निः ॥२५॥

वहुतर इव जातः शाल्मलीनां वनेषु
स्फुरति कनकगौरः कोटरेषु द्रुमाणाम् ।
परिणतदलशाखानुत्पतन् प्रांशुवृक्षान्
भ्रमति पवनधूतः सर्वतोऽग्निर्वनान्ते ॥२६॥

गजगवयमृगेन्द्रा वह्निसंतप्तदेहा
सुहृद इव समेता द्वन्द्वभावं विहाय ।
हुतवहपरिखेदादाशु निर्गत्य कक्षाद्
विपुलपुलिनदेशां निम्नगां संविशन्ति ॥२७॥

कमलवनचिताम्बुः पाटलामोदरम्यः
सुखसलिलनिषेकः सेव्यचन्द्रांशुहारः ।
व्रजतु तव निदाघः कामिनीभिः समेतो
निशि सुललितगीते हर्म्यपृष्ठे सुखेन ॥२८॥

॥ इति श्रीकालिदासकविकृतौ ऋतुसंहारे ग्रीष्मवर्णनो नाम प्रथमः सर्गः ॥

द्वितीयः सर्गः

प्रावृड्वर्णनम्

ससीकराम्भोधरमत्तकुञ्जरस्तडित्पताकोऽशनिशब्दमर्दलः ।
समागतो राजवदुद्धतद्युतिर्घनागमः कामिजनप्रियः प्रिये ॥१॥

नितान्तनीलोत्पलपत्रकान्तिभिः क्वचित्प्रभिन्नाञ्जनराशिसंनिभैः ।
क्वचित् सगर्भप्रमदास्तनप्रभैः समाचितं व्योम घनैः समन्ततः ॥२॥

तृषाकुलैश्चातकपक्षिणां कुलैः प्रयाचितास्तोयभरावलम्बिनः ।
प्रयान्ति मन्दं वहुधारवर्षिणो वलाहकाः श्रोत्रमनोहरस्वनाः ॥३॥

बलाहकाश्चाशनिशब्दमर्दलाः सुरेन्द्रचापं दधतस्तडिद्गुणम् ।
सुतीक्ष्णधारापतनाग्रसायकैस्तुदन्ति चेतः प्रसभं प्रवासिनाम् ॥४॥

प्रभिन्नवैदूर्यनिभैस्तृणाङ्कुरैः समाचिता प्रोत्थितकन्दलीदलैः ।
विभाति शुक्लेतररत्नभूषिता वराङ्गनेन क्षितिरिन्द्रगोपकैः ॥५॥

सदा मनोज्ञं स्वनदुत्सवोत्सुकं विकीर्णविस्तीर्णकलापिशोभितम् ।
ससंभ्रमालिङ्गनचुम्वनाकुलं प्रवृत्तनृत्यं कुलमद्य वर्हिणाम् ॥६॥

निपातयन्त्यः परितस्तटद्रुमान् प्रवृद्धवेगैः सलिलैरनिर्मलै ।
स्त्रियः सुदुष्टा इव जातविभ्रमाः प्रयान्ति नद्यस्त्वरितं पयोनिधिम् ॥७॥

तृणोत्करैरुद्गतकोमलाङ्कुरैश्चितानि नीलैर्हरिणीमुखक्षतैः ।
वनानि वैन्ध्यानि हरन्ति मानसं विभूषितान्युद्गतपल्लवैर्द्रुमैः ॥८॥

विलोलनेत्रोत्पलशोभिताननैर्मृगैः समन्तादुपजातसाध्वसैः ।
समाचिता संकतिनी वनस्थली समुत्सुकत्वं प्रकरोति चेतसः ॥९॥

अभीक्ष्णमुच्चैर्ध्वनता पयोमुचा घनान्धकारीकृतशर्वरीष्वपि ।
तडित्प्रभादर्शितमार्गभूमयः प्रयान्ति रागादभिसारिकाः स्त्रियः ॥१०॥

पयोधरैर्भीमगभीरनिस्वनैस्तडिद्भिरुद्वेजितचेतसो भृशम् ।
कृतापराधानपि योषितः प्रियान् परिष्वजन्ते शयने निरन्तरम् ॥११॥

विलोचनेन्दीवरवारिविन्दुभिर्निषिक्तविम्वाधरचारुपल्लवाः ।
निरस्तमाल्याभरणानुलेपनाः स्थिता निराशाः प्रमदाः प्रवासिनाम् ॥१२॥

विपाण्डुरं कीटरजस्तृणान्वितं भुजङ्गवद् वक्रगतिप्रसर्पितम् ।
ससाध्वसैर्भेककुलैर्निरीक्षितं प्रयाति निम्नाभिमुखं नवोदकम् ।।१३।।

विपत्रपुष्पां नलिनीं समुत्सुका विहाय भृङ्गाः श्रुतिहारिनिस्वनाः ।
पतन्ति मूढाः शिखिनां प्रनृत्यतां कलापचक्रेषु नवोत्पलाशया ।।१४।।

वनद्विपानां नववारिदस्वनैर्मदान्वितानां ध्वनतां मुहुर्मुहुः ।
कपोलदेशा विमलोत्पलप्रभाः सभृङ्गयूथैर्मदवारिभिश्चिताः ।।१५।।

सितोत्पलाभाम्बुदचुम्बितोपलाः समाचिताः प्रस्रवणैः समन्ततः ।
प्रवृत्तनृत्यैः शिखिभिः समाकुलाः समुत्सुकत्वं जनयन्ति भूधराः ।।१६।।

कदम्बसर्जार्जुनकेतकीवनं विकम्पयँस्तत्कुसुमाधिवासितः ।
ससीकराम्भोधरसङ्गशीतलः समीरणः कं न करोति सोत्सुकम् ।।१७।।

शिरोरुहैः श्रोणितटावलम्बिभिः कृतावतंसैः कुसुमैः सुगन्धिभिः ।
स्तनैः सहारैर्वदनैः ससीधुभिः स्त्रियो रतिं संजनयन्ति कामिनाम् ।।१८।।

वहन्ति वर्षन्ति नदन्ति भान्ति रुदन्ति नृत्यन्ति समाश्रयन्ति ।
नद्यो घना मत्तगजा वनान्ताः प्रियाविहीना शिखिनः प्लवङ्गाः ।।१९।।

तडिल्लताशक्रधनुर्विभूषिताः पयोधरास्तोयभरावलम्बिनः ।
स्त्रियश्च काञ्चीमणिकुण्डलोज्ज्वला हरन्ति चेतो युगपत्प्रवासिनाम् ।।

माला: कदम्बनवकेसरकेतकीभि-
रायोजिताः शिरसि बिभ्रति योषितोऽद्य ।
कर्णान्तरेषु ककुभद्रुममञ्जरीभि-
रिच्छानुकूलरचितानवतंसकाँश्च ।।२१।।

कालागुरुप्रचुरचन्दनचर्चिताङ्ग्यः
पुष्पावतंससुरभीकृतकेशपाशाः ।
श्रुत्वा ध्वनिं जलमुचां त्वरितं प्रदोषे
शय्यागृहं गुरुगृहात् प्रविशन्ति नार्यः ।।२२।।

कुवलयदलनीलैरुन्नतैस्तोयनम्रै-
र्मृदुपवनविधूतैर्मन्दमन्दं चलद्भिः ।
अपहृतमिव चेतस्तोयदैः सेन्द्रचापैः
पथिकजनवधूनां तद्वियोगाकुलानाम् ।।२३।।

मुदित इव कदम्बैर्जातपुष्पैः समन्तात्
पवनचलितशाखैः शाखिभिर्नृत्यतीव ।
हसितमिव विधत्ते सूचिभिः केतकीनां
नवसलिलनिषेकच्छिन्नतापो वनान्तः ॥२४॥

शिरसि वकुलमालां मालतीभिः समेतां
विकसितनवपुष्पैर्यूथिकाकुड्मलैश्च ।
विकचनवकदम्बैः कर्णपूरं वधूनां
रचयति जलदौघः कान्तवत् काल एषः ॥२५॥

दधति वरकुचाग्रैरुन्नतैर्हारयष्टिं
प्रतनुसितदुकूलान्यायतैः श्रोणिबिम्बैः ।
नवजलकणसेकादुद्गतां रोमराजीं
ललितवलिविभङ्गैर्मध्यदेशैश्च नार्यः ॥२६॥

नवजलकणसङ्गाच्छीततामादधानः
कुसुमभरनतानां लासकः पादपानाम् ।
जनितरुचिरगन्धः केतकीनां रजोभिः
परिहरति नभस्वान् प्रोषितानां मनांसि ॥२७॥

जलभरनमितानामाश्रयोऽस्माकमुच्चै-
रयमिति जलसेकैस्तोयदास्तोयनम्राः ।
अतिशयपरुषाभिर्ग्रीष्मवह्नेः शिखाभिः
समुपजनिततापं ह्लादयन्तीव विन्ध्यम् ॥२८॥

बहुगुणरमणीयः कामिनीचित्तहारी
तरुविटपलतानां बान्धवो निर्विकारः ।
जलदसमय एष प्राणिनां प्राणभूतो
दिशतु तव हितानि प्रायशो वाञ्छितानि ॥२९॥

॥ इति श्रीकालिदासकविकृतौ ऋतुसंहारे प्रावृड्वर्णनो नाम द्वितीयः सर्गः ॥

तृतीयः सर्गः

शरद्वर्णनम्

काशांशुका विकचपद्ममनोज्ञवक्त्रा
सोन्मादहंस-रव-नूपुरनादरम्या ।
आपक्वशालिरुचिरानतगात्रयष्टिः
प्राप्ता शरन्नवधूरिव रूपरम्या ॥१॥

काशैर्मही शिशिरदीधितिना रजन्यो
हंसैर्जलानि सरितां कुमुदैः सरांसि ।
सप्तच्छदैः कुसुमभारनतैर्वनान्ताः
शुक्लीकृतान्युपवनानि च मालतीभिः ॥२॥

चञ्चन्मनोज्ञशफरीरसनाकलापाः
पर्यन्तसंस्थितसिताण्डजपङ्क्तिहाराः ।
नद्यो विशालपुलिनान्तनितम्वविम्बा
मन्दं प्रयान्ति समदाः प्रमदा इवाद्य ॥३॥

व्योम क्वचिद् रजतशङ्खमृणालगोरै-
स्त्यक्ताम्बुभिर्लघुतया शतशः प्रयातैः ।
संलक्ष्यते पवनवेगचलैः पयोदै
राजेव चामरशतैरुपवीज्यमानः ॥४॥

भिन्नाञ्जनप्रचयकान्ति नभो मनोज्ञं
बन्धूकपुष्परजसाऽरुणिता च भूमिः ।
वप्राश्च पक्वकलमावृतभूमिभागाः
प्रोत्कण्ठयन्ति न मनो भुवि कस्य यनः ॥५॥

मन्दानिलाकुलितचारुतराग्रशाखः
पुष्पोद्गमप्रचयकोमलपल्लवाग्रः ।
मत्तद्विरेफपरिपीतमधुप्रसेक-
श्चित्तंविदारयति कस्य न कोविदारः ॥६॥

तारागणप्रवरभूषणमुद्वहन्ती
मेघावरोधपरिमुक्तशशाङ्कवक्त्रा ।

ज्योत्स्नादुकूलममलं रजनी दधाना
वृद्धिं प्रयात्यनुदिनं प्रमदेव बाला ॥७॥

कारण्डवाननविघट्टितवीचिमालाः
कादम्बसारसकुलाकुलतीरदेशाः ।
कुर्वन्ति हंसविरुतैः परितो जनस्य
प्रीतिं सरोरुहरजोरुणितास्तटिन्यः ॥८॥

नेत्रोत्सवो हृदयहारिमरीचिमालः
प्रह्लादकः शिशिरसीकरवारिवर्षी ।
पत्युर्वियोगविषदग्धशरक्षतानां
चन्द्रो दहत्यतितरां तनुमङ्गनानाम् ॥९॥

आकम्पयन् फलभरानतशालिजाला-
न्यानर्तयँस्तरुवरान् कुसुमावनम्रान् ।
उत्फुल्लपङ्कजवनां नलिनीं विधुन्वन्
यूनां मनश्चलयति प्रसभं नभस्वान् ॥१०॥

सोन्मादहंसमिथुनैरुपशोभितानि
स्वच्छप्रफुल्लकमलोत्पलभूषितानि ।
मन्दप्रभातपवनोद्गतवीचिमाला-
न्युत्कण्ठयन्ति सहसा हृदयं सरांसि ॥११॥

नष्टं धनुर्बलभिदो जलदोदरेषु
सौदामनी स्फुरति नाद्य वियत्पताका ।
धुन्वन्ति पक्षपवनैर्न नभो बलाकाः
पश्यन्ति नोन्नतमुखा गगनं मयूराः ॥१२॥

नृत्यप्रयोगरहिताञ्छिखिनो विहाय
हंसानुपैति मदनो मधुरप्रगीतान् ।
मुक्त्वा कदम्बकुटजार्जुनसर्जनीपान्
सप्तच्छदानुपगता कुसुमोद्गमश्रीः ॥१३॥

शेफालिकाकुसुमगन्धमनोहराणि
स्वस्थस्थिताण्डजकुलप्रतिनादितानि ।
पर्यन्तसंस्थितमृगीनयनोत्पलानि
प्रोत्कण्ठयन्त्युपवनानि मनांसि पुंसाम् ॥१४॥

कह्लारपद्मकुमुदानि मुहुर्विधुन्वं-
स्तत्संगमादधिकशीतलतामुपेतः ।
उत्कण्ठयत्यतितरां पवनः प्रभाते
पत्रान्तलग्नतुहिनाम्बुविधूयमानः ॥१५॥

संपन्नशालिनिचयावृतभूतलानि
स्वस्थस्थितप्रचुरगोकुलशोभितानि ।
हंसैः ससारसकुलैः प्रतिनादितानि
सीमान्तराणि जनयन्ति नृणां प्रमोदम् ॥१६॥

हंसैर्जिता सुललिता गतिरङ्गनाना-
मम्भोरुहैर्विकसितैर्मुखचन्द्रकान्तिः ।
नीलोत्पलैर्मदकलानि विलोचनानि
भ्रूविभ्रमाश्च रुचिरास्तनुभिस्तरङ्गैः ॥१७॥

श्यामा लताः कुसुमभारनतप्रवालाः
स्त्रीणां हरन्ति धृतभूषणबाहुकान्तिम् ।
दन्तावभासविशदस्मितचन्द्रकान्तिं
कङ्केलिपुष्परुचिरा नवमालती च ॥१८॥

केशान्नितान्तघननीलविकुञ्चताग्रा-
नापूरयन्ति वनिता नवमालतीभिः ।
कर्णेषु च प्रवरकाञ्चनकुण्डलेषु
नीलोत्पलानि विविधानि निवेशयन्ति ॥१९॥

हारैः सचन्दनरसैः स्तनमण्डलानि
श्रोणीतटं सुविपुलं रसनाकलापैः ।
पादाम्बुजानि कलनूपुरशेखरैश्च
नार्यः प्रहृष्टमनसोऽद्य विभूषयन्ति ॥२०॥

स्फुटकुमुदचितानां राजहंसाश्रितानां
मरकतमणिभासा वारिणा भूषितानाम् ।
श्रियमतिशयरूपां व्योम तोयाशयानां
वहति विगतमेघं चन्द्रतारावकीर्णम् ॥२१॥

शरदि कुमुदसङ्गाद् वायवो वान्ति शीता
विगतजलदवृन्दा दिग्विभागा मनोज्ञाः ।

विगतकलुषमम्भः श्यानपङ्का धरित्री
विमलकिरणचन्द्रं व्योम ताराविचित्रम् ॥२२॥

करकमलमनोज्ञाः कान्तसंसक्तहस्ता
वदनविजितचन्द्राः काश्चिदन्यास्तरुण्यः ।
रचितकुसुमगन्धि प्रायशो यान्ति वेश्म
प्रबलमदनहेतोस्त्यक्तसंगीतरागाः ॥२३॥

सुरत-रसविलासाः सत्सखीभिः समेता
असमशरविनोदं सूचयन्ति प्रकाशम् ।
अनुपममुखरागा रात्रिमध्ये विनोदं
शरदि तरुणकान्ताः सूचयन्ति प्रमोदान् ॥२४॥

दिवसकरमयूखैर्बोध्यमानं प्रभाते
वरयुवतिमुखाभं पङ्कजं जृम्भतेऽद्य ।
कुमुदमपि गतेऽस्तं लीयते चन्द्रबिम्बे
हसितमिव वधूनां प्रोषितेषु प्रियेषु ॥२५॥

असितनयनलक्ष्मीं लक्षयित्वोत्पलेषु
क्वणितकनककाञ्चीं मत्तहंसस्वनेषु ।
अधररुचिरशोभां बन्धुजीवे प्रियाणां
पथिकजन इदानीं रोदिति भ्रान्तचित्तः ॥२६॥

स्त्रीणां विहाय वदनेषु शशाङ्कलक्ष्मीं
काम्यं च हंसवचनं मणिनूपुरेषु ।
बन्धूककान्तिमधरेषु मनोहरेषु
क्वापि प्रयाति सुभगा शरदागमश्रीः ॥२७॥

विकचकमलवक्त्रा फुल्लनीलोत्पलाक्षी
विकसितनवकाशश्वेतवासो वसाना ।
कुमुदरुचिरकान्तिः कामिनीवोन्मदेयं
प्रतिदिशतु शरद् वश्चेतसः प्रीतिमग्र्याम् ॥२८॥

॥ इति श्रीकालिदासकविकृतौ ऋतुसंहारे शरद्वर्णनो नाम तृतीयः सर्गः ॥

चतुर्थः सर्गः

हेमन्तवर्णनम्

नवप्रवालोद्गमसस्यरम्यः प्रफुल्ललोध्रः परिपक्वशालिः ।
विलीनपद्मः प्रपतत्तुषारो हेमन्तकालः समुपागतोऽयम् ॥१॥

मनोहरैश्चन्दनरागगौरैस्तुषारकुन्देन्दुनिभैश्च हारैः ।
विलासिनीनां स्तनशालिनीनां नालंक्रियन्ते स्तनमण्डलानि ॥२॥

न बाहुयुग्मेषु विलासिनीनां प्रयान्ति सङ्गं वलयाङ्गदानि ।
नितम्बविम्बेषु नवं दुकूलं तन्वंशुकं पीनपयोधरेषु ॥३॥

काञ्चीगुणैः काञ्चनरत्नचित्रैर्नो भूषयन्ति प्रमदा नितम्बान् ।
न नूपुरैर्हंसरुतं भजद्भिः पादाम्बुजान्यम्बुजकान्तिभाञ्जि ॥४॥

गात्राणि कालीयकचर्चितानि सपत्रलेखानि मुखाम्बुजानि ।
शिरांसि कालागुरुधूपितानि कुर्वन्ति नार्यः सुरतोत्सवाय ॥५॥

रतिश्रमक्षामविपाण्डुवक्त्राः संप्राप्तहर्षाभ्युदयास्तरुण्यः ।
दशन्ति नोच्चैर्दशनाग्रभिन्नान् प्रपीड्यमानानधरानवेक्ष्य ॥६॥

पीनस्तनोरःस्थलभागशोभामासाद्य तत्पीडनजातखेदः ।
तृणाग्रलग्नैस्तुहिनैः पतद्भिराक्रन्दतीवोषसि शीतकालः ॥७॥

प्रभूतशालिप्रसवैश्चितानि मृगाङ्गनायूथविभूषितानि ।
मनोहरक्रौञ्चनिनादितानि सीमान्तराण्युत्सुकयन्ति चेतः ॥८॥

प्रफुल्लनीलोत्पलशोभितानि सोन्मादकादम्बविभूषितानि ।
प्रसन्नतोयानि सुशीतलानि सरांसि चेतांसि हरन्ति पुंसाम् ॥९॥

मार्गं समीक्ष्यातिनिरस्तनीरं प्रवासखिन्नं पतिमुद्वहन्त्यः ।
अवेक्ष्यमाणा हरिणेक्षणाक्ष्यः प्रबोधयन्तीव मनोरथानि ॥१०॥

पाकं व्रजन्ती हिमजालशीतैराधूयमाना सततं मरुद्भिः ।
प्रिये प्रियङ्गुः प्रियविप्रयुक्ता विपाण्डुतां याति विलासिनीव ॥११॥

पुष्पासवामोदसुगन्धिवक्त्रो निःश्वासवातैः सुरभीकृताङ्गः ।
परस्पराङ्गव्यतिषङ्गशायी शेते जनः कामरसानुविद्धः ॥१२॥

दन्तच्छदैः सव्रणदन्तचिह्नैः स्तनैश्च पाण्यग्रकृताभिलेखैः ।
संसूच्यते निर्दयमङ्गनानां रतोपभोगो नवयौवनानाम् ॥१३॥

काचिद् विभूषयति दर्पणसक्तहस्ता
बालातपेषु वनिता वदनारविन्दम् ।
दन्तच्छदं प्रियतमेन निपीतसारं
दन्ताग्रभिन्नमवकृष्य निरीक्षते च ॥१४॥

अन्या प्रकामसुरतश्रमखिन्नदेहा
रात्रिप्रजागरविपाटलनेत्रपद्मा ।
स्रस्तांसदेशलुलिताकुलकेशपाशा
निद्रां प्रयाति मृदुसूर्यकराभितप्ता ॥१५॥

निर्माल्यदाम परिमुक्तमनोज्ञगन्धं
मूर्ध्नोऽपनीय घननीलशिरोरुहान्ताः ।
पीनोन्नतस्तनभरानतगात्रयष्टयः
कुर्वन्ति केशरचनामपरास्तरुण्यः ॥१६॥

अन्या प्रियेण परिभुक्तमवेक्ष्य गात्रं
हर्षान्विता विरचिताधरचारुशोभा ।
कूर्पासकं परिदधाति नखक्षताङ्गी
व्यालम्बिनीलललितालककुञ्चिताक्षी ॥१७॥

अन्याश्चिरं सुरतकेलिपरिश्रमेण
खेदं गताः प्रशिथिलीकृतगात्रयष्टयः ।
संहृष्यमाणपुलकोरुपयोधरान्ता
अभ्यञ्जनं विदधति प्रमदाः सुशोभाः ॥१८॥

बहुगुणरमणीयो योषितां चित्तहारी
परिणतबहुशालिव्याकुलग्रामसीमा ।
विनिपतिततुषारः क्रौञ्चनादोपगीतः
प्रदिशतु हिमयुक्तो वः सुखं काल एषः ॥१९॥

॥ इति श्रीकालिदासकविकृतौ ऋतुसंहारे हेमन्तवर्णनो नाम चतुर्थः सर्गः ॥

पञ्चमः सर्गः

शिशिरवर्णनम्

प्ररूढशालीक्षुचयावृतक्षितिं
क्वचित् स्थितक्रौञ्चनिनादराजितम् ।
प्रकामकामं प्रमदाजनप्रियं
वरोरु कालं शिशिराह्वयं शृणु ।।१।।

निरुद्धवातायनमन्दिरोदरं
हुताशनो भानुमतो गभस्तयः ।
गुरूणि वासांस्यवलाः सयौवनाः
प्रयान्ति कालेऽत्र जनस्य सेव्यताम् ।।२।।

न चन्दनं चन्द्रमरीचिशीतलं
न हर्म्यपृष्ठं शरदिन्दुनिर्मलम् ।
न वायवः सान्द्रतुषारशीतला
जनस्य चित्तं रमयन्ति साम्प्रतम् ।।३।।

तुषारसंघातनिपातशीतलाः
शशाङ्कभाभिः शिशिरीकृताः पुनः ।
विपाण्डुतारागणचारुभूषणा
जनस्य सेव्या न भवन्ति रात्रयः ।।४।।

गृहीतताम्बूलविलेपनस्रजः
पुष्पासवामोदितवक्त्रपङ्कजाः ।
प्रकामकालागुरुधूपवासितं
दिशन्ति शय्यागृहमुत्सुकाः स्त्रियः ।।५।।

कृतापराधान् वहुशोऽभितर्जितान्
सवेपथून् साध्वसलुप्तचेतसः ।
निरीक्ष्य भर्तॄन् सुरताभिलाषिणः
स्त्रियोऽपराधान् समदा विसस्मरुः ।।६।।

प्रकामकामैर्युवभिः सुनिर्दयं
निशासु दीर्घास्वभिरामिताश्चिरम् ।
भ्रमन्ति मन्दं श्रमखेदितोरवः
क्षयावसाने नवयौवनाः स्त्रियः ॥७॥

मनोज्ञकूर्पासकपीडितस्तनाः
सरागकौषेयकभूषितोरवः ।
निवेशितान्तःकुसुमैः शिरोरुहै-
र्विभूषयन्तीव हिमागमं स्त्रियः ॥८॥

पयोधरैः कुङ्कुमरागपिञ्जरैः
सुखोपसेव्यैर्नवयौवनोष्मभिः ।
विलासिनीभिः परिपीडितोरसः
स्वपन्ति शीतं परिभूय कामिनः ॥९॥

सुगन्धिनिःश्वासविकम्पितोत्पलं
मनोहरं कामरतिप्रबोधकम् ।
निशासु हृष्टाः सह कामिभिः स्त्रियः
पिबन्ति मद्यं मदनीयमुत्तमम् ॥१०॥

अपगतमदरागा योषिदेका प्रभाते
कृतनिविडकुचाग्रा पत्युरालिङ्गनेन ।
प्रियतमपरिभुक्तं वीक्षमाणा स्वदेहं
व्रजति शयनवासाद् वासमन्यं हसन्ती ॥११॥

अगुरुसुरभिधूपामोदितं केशपाशं
गलितकुसुममालं कुञ्चिताग्रं वहन्ती ।
त्यजति गुरुनितम्बा निम्ननाभिः सुमध्या
उषसि शयनमन्या कामिनी चारुशोभा ॥१२॥

कनककमलकान्तैश्चारुताम्राधरोष्ठैः
श्रवणतटनिषक्तैः पाटलोपान्तनेत्रैः ।
उषसि वदनबिम्बैरंससंसक्तकेशैः
श्रिय इव गृहमध्ये संस्थिता योषितोऽद्य ॥१३॥

पृथुजघनभरार्त्ता किञ्चिदानम्रमध्याः
स्तनभरपरिखेदान्मन्दमन्दं वदन्त्यः ।
सुरतसमयवेशं नैशमाशु प्रहाय
दधति दिवसयोग्यं वेशमन्यास्तरुण्यः ॥१४॥

नखपदचितभागान् वीक्षमाणाः स्तनान्ता-
नधरकिसलयाग्रं दन्तभिन्नं स्पृशन्त्यः ।
अभिमतरतवेशं नन्दयन्त्यस्तरुण्यः
सवितुरुदयकाले भूषयन्त्याननानि ॥१५॥

प्रचुरगुडविकारः स्वादुशालीक्षुरम्यः
प्रबलसुरतकेलिर्जातकन्दर्पदर्पः ।
प्रियजनरहितानां चित्तसन्तापहेतुः
शिशिरसमय एष श्रेयसे वोऽस्तु नित्यम् ॥१६॥

॥इति श्रीकालिदासकविविरचिते ऋतुसंहारकाव्ये शिशिरवर्णनो नाम पञ्चमः सर्गः ॥५॥

षष्ठः सर्गः

वसन्तवर्णनम्

प्रफुल्लचूताङ्कुरतीक्ष्णसायको
द्विरेफमालाविसद्‌धनुर्गुणः ।
मनांसि भेत्तुं सुरतप्रसङ्गिनां
वसन्तयोद्धा समुपागतः प्रिये ॥१॥

द्रुमाः सपुष्पाः सलिलं सपद्मं
स्त्रियः सकामाः पवनः सुगन्धिः ।
सुखाः प्रदोषा दिवसाश्च रम्याः
सर्वं प्रिये चारुतरं वसन्ते ॥२॥

ईषत्तुषारैः कृतशीतहर्म्यैः
सुवासितं चारु शिरश्च चम्पकैः ।
कुर्वन्ति नार्योऽपि वसन्तकाले
स्तनं सहासं कुसुमैर्मनोहरैः ॥३॥

वापीजलानां मणिमेखलानां
शशाङ्कभासां प्रमदाजनानाम् ।
चूतद्रुमाणां कुसुमान्वितानां
ददाति सौभाग्यमयं वसन्तः ॥४॥

कुसुम्भरागारुणितैर्दुकूलै-
र्नितम्बबिम्बानि विलासिनीनाम् ।
तन्वंशुकैः कुङ्कुमरागगौरै-
रलं क्रियन्ते स्तनमण्डलानि ॥५॥

कर्णे सुयोग्यं नवकर्णिकारं
चलेषु नीलेष्वलकेष्वशोकम् ।
पुष्पं च फुल्लं नवमल्लिकायाः
प्रयान्ति कान्तिं प्रमदाजनानाम् ॥६॥

स्तनेषु हाराः सितचन्दनार्द्रा
भुजेषु सङ्गं वलयाङ्गदानि ।
प्रयान्त्यनङ्गातुरमानसानां
नितम्बिनीनां जघनेषु काञ्च्यः ॥७॥

सपत्रलेखेषु विलासिनानां
वक्त्रेषु हेमाम्बुरुहोपमेषु ।
रत्नान्तरे मौक्तिकसङ्गरम्यः
स्वेदागमो विस्तरतामुपैति ॥८॥

उच्छ्वासयन्त्यः श्लथवन्धनानि
गात्राणि कन्दर्पसमाकुलानि ।
समीपवर्त्तिष्वधुना प्रियेषु
समुत्सुका एव भवन्ति नार्यः ॥९॥

तनूनि पाण्डूनि मदालसानि
मुहुर्मुहुर्जृम्भणतत्पराणि ।
अङ्गान्यनङ्गः प्रमदाजनस्य
करोति लावण्यससम्भ्रमाणि ॥१०॥

छायां जनः समभिवाञ्छति पादपानां
नक्तं तथेच्छति पुनः किरणं सुधांशोः।
हर्म्यं प्रयाति शयितुं सुखशीतलं च
कान्तां च गाढमुपगूहति शीतलत्वम् ॥११॥

नेत्रेषु लोलो मदिरालसेषु
गण्डेषु पाण्डुः कठिनस्तनेषु ।
मध्येषु निम्नो जघनेषु पीनः
स्त्रीणामनङ्गो बहुधा स्थितोऽद्या ॥१२॥

अङ्गानि निद्रालसविभ्रमाणि
वाक्यानि किञ्चिन्मदिरालसानि ।
भ्रूक्षेपजिह्मानि च वीक्षितानि
चकार कामः प्रमदाजनानाम् ॥१३॥

प्रियङ्गु-कालीयक-कुङ्कुमाक्तं
स्तनेषु गौरेषु विलासिनीभिः ।

आलिप्यते चन्दनमङ्गनाभि-
मँदालसाभिर्मृगनाभियुक्तम् ॥१४॥

गुरूणि वासांसि विहाय तूर्णं
तनूनि लाक्षारसरञ्जितानि ।
सुगन्धिकालागुरुधूपितानि
धत्ते जनः काममदालसाङ्गः ॥१५॥

पुंस्कोकिलश्चूतरसासवेन
मत्तः प्रियां चुम्बति रागहृष्टः ।
कुजन् द्विरेफोऽप्ययमम्बुजस्थः
प्रियं प्रियायाः प्रकरोति चाटु ॥१६॥

ताम्रप्रवालस्तवकावनम्रा-
श्चूतद्रुमाः पुष्पितचारुशाखाः ।
कुर्वन्ति कामं पवनावधूताः
पर्युत्सुकं मानसमङ्गनानाम् ॥१७॥

आमूलतो विद्रुमरागताम्रं
सपल्लवाः पुष्पचयं दधानाः ।
कुर्वन्त्यशोकाः हृदयं सशोकं
निरीक्ष्यमाणा नवयौवनानाम् ॥१८॥

मत्तद्विरेफपरिचुम्बितचारुपुष्पा
मन्दानिलाकुलितनम्रमृदुप्रवालाः ।
कुर्वन्ति कामिमनसां सहसोत्सुकत्वं
बालातिमुक्तलतिकाः समवेक्ष्यमाणाः ॥१९॥

कान्तामुखद्युतिजुषामचिरोद्गतानां
शोभां परां कुरबकद्रुममञ्जरीणाम् ।
दृष्ट्वा प्रिये सहृदयस्य भवेन्न कस्य
कन्दर्पबाणपतनं व्यथितं हि चेतः ॥२०॥

आदीप्तवह्निसदृशैर्मरुताऽवधूतैः
सर्वत्र किंशुकवनैः कुसुमावनम्रैः ।
सद्योवसन्तसमयेन समाचितेयं
रक्तांशुका नववधूरिव भाति भूमिः ॥२१॥

किं किंशुकैः शुकमुखच्छविभिर्न भिन्नं
किं कर्णिकारकुसुमैर्न कृतं न दग्धम् ।
यत् कोकिलः पुनरयं मधुरैर्वचोभि-
र्यूनां मनः सुवदनानिहितं निहन्ति ॥२२॥
पुंस्कोकिलैः कलवचोभिरुपात्तहर्षैः
कूजद्भिरुन्मदकलानि वचांसि भृङ्गैः ।
लज्जान्वितं सविनयं हृदयं क्षणेन
पर्याकुलं कुलगृहेऽपि कृतं वधूनाम् ॥२३॥
आकम्पयन् कुसुमिताः सहकारशाखा
विस्तारयन् परभृतस्य वचांसि दिक्षु ।
वायुर्विवाति हृदयानि हरन्नराणां
नीहारपातविगमात् सुभगे वसन्ते ॥२४॥
कुन्दैः सविभ्रमवधूहसितावदातै-
रुद्द्योतितान्युपवनानि मनोहराणि ।
चित्तं मुनेरपि हरन्ति निवृत्तरागं
प्रागेव रागमलिनानि मनांसि यूनाम् ॥२५॥
आलम्बिहेमरसनाः स्तनसक्तहाराः
कन्दर्पदर्पशिथिलीकृतगात्रयष्ट्यः ।
मासे मधौ मधुरकोकिलभृङ्गनादै-
र्नार्यो हरन्ति हृदयं प्रसभं नराणाम् ॥२६॥
नानामनोज्ञकुसुमद्रुमभूषितान्तान्
हृष्टान्यपुष्ट-निनदाकुलसानुदेशान् ।
शैलेयजालपरिणद्धशिलातलान्तान्
दृष्ट्वा नतः क्षितिभृतो मुदमेति सर्वः ॥२७॥
नेत्रे निमीलयति रोदिति याति शोकं
घ्राणं करेण विरुणद्धि विरौति चोच्चैः ।
कान्तावियोगपरिखेदितचित्तवृत्ति-
र्दृष्ट्वाध्वगः कुसुमितान् सहकारवृक्षान् ॥२८॥
समदमधुकराणां कोकिलानां च नादै-
र्कुसुमितसहकारैः कर्णिकारैश्च रम्यः ।

इषुभिरिव सुतीक्ष्णैर्मानसं मानिनीनां
तुदति कुसुममासो मन्मथोद्दीपनाय ॥२९॥

रुचिरकनककान्ति मुञ्चतः पुष्पराशीन्
मृदुपवनविधूतान् पुष्पितांश्चूतवृक्षान् ।
अभिमुखमभिवीक्ष्य क्षामदेहोऽपि मार्गे
मदनशरनिघातैर्मोहमेति प्रवासी ॥३०॥

परभृतकलगीतैर्ह्लादिभिः सद्वचांसि
स्मितदशनमयूखान् कुन्दपुष्पप्रभाभिः ।
कलकिसलयकान्ति पल्लवैर्विद्रुमाभै-
रुपहसति वसन्तः कामिनीनामिदानीम् ॥३१॥

कनककमलकान्तैराननैः पाण्डुगण्डै-
रुपरिनिहितहारैश्चन्दनार्द्रैः स्तनान्तैः ।
मदजनितविलासैर्दृष्टिपातैर्मुनीन्द्रान्
स्तनभरनतनार्यः कामयन्ति प्रशान्तान् ॥३२॥

मधुसुरभिमुखाब्जं लोचने लोध्रताम्रे
नवकुरबकपूर्णः केशपाशो मनोज्ञः ।
गुरुतरकुचयुग्मं श्रोणिबिम्बं तथैव
न भवति किमिदानीं योषितां मन्मथाय ॥३३॥

आकम्पितानि हृदयानि मनस्विनीनां
वातैः प्रफुल्लसहकारकृताधिवासैः ।
उत्कूजितैः परभृतस्य मदाकुलस्य
श्रोत्रप्रियैर्मधुकरस्य च गीतनादैः ॥३४॥

रम्यः प्रदोषसमयः स्फुटचन्द्रभासः
पुंस्कोकिलस्य विरुतं पवनः सुगन्धिः ।
मत्तालियूथविरुतं निशि शीधुपानं
सर्वं रसायनमिदं कुसुमायुधस्य ॥३५॥

रक्ताशोकविकल्पिताधरमधुर्मत्तद्विरेफस्वनः
कुन्दापीडविशुद्धदन्तनिकरः प्रोत्फुल्लपद्माननः ।
चूतामोदसुगन्धिमन्दपवनः शृङ्गारदीक्षागुरुः
कल्पान्तं मदनप्रियो दिशतु वः पुष्पागमो मङ्गलम् ॥३६॥

मलयपवनविद्धः कोकिलालापरम्यः
सुरभिमधुनिषेकाल्लब्धगन्धप्रबन्धः ।
विविधमधुपयूथैर्वेष्टयमानाः समन्ताद्
भवतु तव वसन्त-श्रेष्ठकालः सुखाय ॥३७॥

आम्रीमञ्जुलमञ्जरीवरशरः सत् किंशुकं यद्धनु-
र्ज्या यस्यालिकुलं कलङ्करहितं छत्रं सितांशुः सितम् ।
मत्तेभो मलयानिलः परभृता यद्वन्दिनो लोकजित्
सोऽयं वो वितरीतरीतु वितनुर्भद्रं वसन्तान्वितः ॥३८॥

॥ इति श्रीकालिदासकविविरचिते ऋतुसंहारकाव्ये वसन्तवर्णनो नाम षष्ठः सर्गः ॥६॥

मेघदूतम्

मेघदूतम्

पूर्वमेघः

कश्चित् कान्ताविर[1]हगुरुणा स्वाधिकारप्रमत्तः
शापेनास्तङ्गमितमहिमा वर्षभोग्येण भर्तुः ।
यक्षश्चक्रे जनकतनयास्नानपुण्योदकेषु
स्निग्धच्छायातरुषु वसतिं रामगिर्याश्रमेषु ॥१॥

तस्मिन्नद्रौ कतिचिदबलाविप्रयुक्तः स कामी
नीत्वा मासान् कनकवलयभ्रंशरिक्तप्रकोष्ठः ।
आषाढस्य प्रथमदिवसे मेघमाश्लिष्टसानुं
वप्रक्रीडापरिणतगजप्रेक्षणीयं ददर्श ॥ २ ॥

तस्य स्थित्वा कथमपि पुरः कौतुकाधानहेतो-
रन्तर्बाष्पश्चिरमनुचरो राजराजस्य दध्यौ ।
मेघालोके भवति सुखिनोऽप्यन्यथावृत्ति चेतः
कण्ठाश्लेषप्रणयिनि जने किं पुनर्दूरसंस्थे ॥३॥

प्रत्यासन्ने नभसि दयिताजीवितालम्बनार्थी
जीमूतेन स्वकुशलमयीं हारयिष्यन् प्रवृत्तिम् ।
स प्रत्यग्रैः कुटजकुसुमैः कल्पितार्घाय तस्मै
प्रीतः प्रीतिप्रमुखवचनं स्वागतं व्याजहार ॥४॥

धूमज्योतिः-सलिलमरुतां सन्निपातः क्व मेघः
सन्देशार्थाः क्व पटुकरणैः प्राणिभिः प्रापणीयाः ।
इत्यौत्सुक्यादपरिगणयन् गुह्यकस्तं ययाचे
कामार्ता हि [2]प्रणयकृपणाश्चेतनाचेतनेषु ॥५॥

जातं वंशे भुवनविदिते पुष्करावर्तकानानां
जानामि त्वां प्रकृतिपुरुषं कामरूपं मघोनः ।
तेनार्थित्वं त्वयि विधिवशाद् दूरबन्धुर्गतोऽहं
याच्ञा मोघा वरमधिगुणे नाधमे लब्धकामा ॥६॥

---

१. रात् प्र-पा० । २. प्रकृति-पा० ।

संतप्तानां त्वमसि शरणं तत्पयोद ! प्रियायाः
सन्देशं मे हर धनपतिक्रोधविश्लेषितस्य ।
गन्तव्या ते वसतिरलका नाम यक्षेश्वराणां
बाह्योद्यानस्थितहरशिरश्चन्द्रिकाधौतहर्म्या ॥७॥

त्वामारूढं पवनपदवीमुद्गृहीतालकान्ताः
प्रेक्षिष्यन्ते पथिकवनिताः प्रत्ययादाश्वसन्त्यः ।
कः संनद्धे विरहविधुरां त्वय्युपेक्षेत जायां
न स्यादन्योऽप्यहमिव जनो यः पराधीनवृत्तिः ॥८॥

मन्दं मन्दं नुदति पवनश्चानुकूलो यथा त्वं
वामश्चायं नदति मधुरं चातकस्ते सगन्धः ।
गर्भाधानक्षणपरिचयान्नूनमावद्धमालाः
सेविष्यन्ते नयनसुभगं खे भवन्तं वलाकाः ॥९॥

तां चावश्यं दिवसगणनातत्परामेकपत्नी-
मव्यापन्नामविहतगतिर्द्रक्ष्यसि भ्रातृजायाम् ।
आशावन्धः कुसुमसदृशं प्रायशो ह्यङ्गनानां
सद्यःपाति प्रणयि हृदयं विप्रयोगे रुणद्धि ॥१०॥

कर्तुं यच्च प्रभवति महीमुच्छिलीन्ध्रामवन्ध्यां
तच्छ्रुत्वा ते श्रवणसुभगं गर्जितं मानसोत्काः ।
आ कैलासाद् बिसकिसलयच्छेदपाथेयवन्तः
संपत्स्यन्ते नभसि भवतो राजहंसाः सहायाः ॥११॥

आपृच्छस्व प्रियसखममुं तुङ्गमालिङ्ग्य शैलं
वन्द्यैः पुंसां रघुपतिपदैरङ्कितं मेखलासु ।
काले काले भवति भवतो यस्य संयोगमेत्य
स्नेहव्यक्तिश्चिरविरहजं मुञ्चतो वाष्पमुष्णम् ॥१२॥

मार्गं तावच्छृणु कथयतस्त्वत्प्रयाणानुरूपं
सन्देशं मे तदनु जलद ! श्रोष्यसि श्रोत्रपेयम् ।
खिन्नः खिन्नः शिखरिषु पदं न्यस्य गन्तासि यत्र
क्षीणः क्षीणः परिलघु पयः स्रोतसां चोपभुज्य ॥१३॥

अद्रेः शृङ्गं हरति पवनः किंस्विदित्युन्मुखीभि-
दृष्टोत्साहश्चकितचकितं मुग्धसिद्धाङ्गनाभिः ।
स्थानादस्मात् सरसनिचलादुत्पतोदङ्मुखः खं
दिङ्नागानां पथि परिहरन् स्थूलहस्तावलेपान् ॥१४॥

रत्नच्छायाव्यतिकर इव प्रेक्ष्यमेतत् पुरस्ताद्
वल्मीकाग्रात् प्रभवति धनुष्खण्डमाखण्डलस्य ।
येन श्यामं वपुरतितरां कान्तिमापत्स्यते ते
बर्हेणेव स्फुरितरुचिना गोपवेषस्य विष्णोः ॥१५॥

त्वय्यायत्तं कृषिफलमिति भ्रूविकारानभिज्ञैः
प्रीतिस्निग्धैर्जनपदवधूलोचनैः पीयमानः ।
सद्यः-सीरोत्कषणसुरभि क्षेत्रमारुह्य मालं
किञ्चित् पश्चाद् व्रज लघुगतिर्भूय एवोत्तरेण ॥१६॥

त्वामासारप्रशमितवनोपप्लवं साधु मूर्ध्ना
वक्ष्यत्यध्वश्रमपरिगतं सानुमानाम्रकूटः ।
न क्षुद्रोऽपि प्रथमसुकृतापेक्षया संश्रयाय
प्राप्ते मित्रे भवति विमुखः किं पुनर्यस्तथोच्चैः ॥१७॥

छन्नोपान्तः परिणतफलद्योतिभिः काननाम्रै-
स्त्वय्यारूढे शिखरमचलः स्निग्धवेणीसवर्णे ।
नूनं यास्यत्यमरमिथुनप्रेक्षणीयामवस्थां
मध्ये श्यामः स्तन इव भुवः शेषविस्तारपाण्डुः ॥१८॥

स्थित्वा तस्मिन् वनचरवधूभुक्तकुञ्जे मुहूर्तं
तोयोत्सर्गद्रुततरगतिस्तत्परं वर्त्म तीर्णः ।
रेवां द्रक्ष्यस्युपलविषमे विन्ध्यपादे विशीर्णां
भक्तिच्छेदैरिव विरचितां भूतिमङ्गे गजस्य ॥१९॥

तस्यास्तिक्तैर्वनगजमदैर्वासितं वान्तवृष्टि-
र्जम्बूकुञ्जप्रतिहतरयं तोयमादाय गच्छेः ।
अन्तःसारं घन ! तुलयितुं नानिलः शक्ष्यति त्वां
रिक्तः सर्वो भवति हि लघुः पूर्णता गौरवाय ॥२०॥

नीपं दृष्ट्वा हरितकपिशं केसरैरर्धरूढै-
राविर्भूतप्रथममुकुलाः कन्दलीश्चानुकच्छम् ।

दग्धाऽरण्येष्वधिकसुरभिं गन्धमाघ्राय चोर्व्याः
सारङ्गास्ते जललवमुचः सूचयिष्यन्ति मार्गम् ।२१।।

उत्पश्यामि द्रुतमपि सखे मत्प्रियार्थं यियासोः
कालक्षेपं ककुभसुरभौ पर्वते पर्वते ते ।
शुक्लापाङ्गैः सजलनयनैः स्वागतीकृत्य केकाः
प्रत्युद्यातः कथमपि भवान् गन्तुमाशु व्यवस्येत् ।।२२।।

पाण्डुच्छायोपवनवृतयः केतकैः सूचिभिन्नै-
र्नीडारम्भैर्गृहबलिभुजामाकुलग्रामचैत्याः ।
त्वय्यासन्ने परिणतफलश्यामजम्बूवनान्ताः
संपत्स्यन्ते कतिपयदिनस्थायिहंसा दशार्णाः ।।२३।।

तेषां दिक्षु प्रथितविदिशालक्षणां राजधानीं
गत्वा सद्यः फलमविकलं कामुकत्वस्य लब्धा ।
तीरोपान्तस्तनितसुभगं पास्यसि स्वादु यस्मात्
सभ्रूभङ्गं मुखमिव पयो वेत्रवत्याश्चलोर्मि ।।२४।।

नीचैराख्यं गिरिमधिवसेस्तत्र विश्रामहेतो-
स्त्वत्संपर्कात् पुलकितमिव प्रौढपुष्पैः कदम्बैः ।
यः पण्यस्त्रीरतिपरिमलोद्गारिभिर्नागराणा-
मुद्दामानि प्रथयति शिलावेश्मभिर्यौवनानि ।।२५।।

विश्रान्तः सन् व्रज वननदीतीरजातानि सिञ्च-
न्नुद्यानानां नवजलकणैर्यूथिकाजालकानि ।
गण्डस्वेदापनयनरुजाक्लान्तकर्णोत्पलानां
छायादानात् क्षणपरिचितः पुष्पलावीमुखानाम् ।।२६।।

वक्रः पन्था यदपि भवतः प्रस्थितस्योत्तराशां
सौधोत्सङ्गप्रणयविमुखो मा स्म भूरुज्जयिन्याः ।
विद्युद्दामस्फुरितचकितैस्तत्र पौराङ्गनानां
लोलापाङ्गैर्यदि न रमसे लोचनैर्, वञ्चितोऽसि ।।२७।।

वीचिक्षोभस्तनितविहगश्रेणिकाञ्चीगुणायाः
संसर्पन्त्याः स्खलितसुभगं दर्शितावर्तनाभेः ।
निर्विन्ध्यायाः पथि भव रसाभ्यन्तरः सन्निपत्य
स्त्रीणामाद्यं प्रणयवचनं विभ्रमो हि प्रियेषु ।।२८।।

वेणीभूतप्रतनुसलिला तामतीतस्य सिन्धुः[1]
पाण्डुच्छाया तटरुहतरुभ्रंशिभिर्जीर्णपर्णैः ।
सौभाग्यं ते सुभग ! विरहावस्थया व्यञ्जयन्ती
कार्श्यं येन त्यजति विधिना स त्वयैवोपपाद्यः ॥२९॥

प्राप्यावन्तीनुदयनकथाकोविदग्रामवृद्धान्
पूर्वोद्दिष्टामनुसर पुरीं श्रीविशालां विशालाम् ।
स्वल्पीभूते सुचरितफले स्वर्गिणां गां गतानां
शेषैः पुण्यैर्हृतमिव दिवः कान्तिमत् खण्डमेकम् ॥३०॥

दीर्घीकुर्वन् पटु मदकलं कूजितं सारसानां
प्रत्यूषेषु स्फुटितकमलामोदमैत्रीकषायः ।
यत्र स्त्रीणां हरति सुरतग्लानिमङ्गानुकूलः
शिप्रावातः प्रियतम इव प्रार्थनाचाटुकारः ॥३१॥

जालोद्गीर्णैरुपचितवपुः केशसंस्कारधूपै-
र्बन्धुप्रीत्या भवनशिखिभिर्दत्तनृत्तोपहारः ।
हर्म्येष्वस्याः कुसुमसुरभिष्वध्वखेदं नयेथा
लक्ष्मीं पश्यंल्ललितवनितापादरागाङ्कितेषु ॥३२॥

भर्तुः कण्ठच्छविरिति गणैः सादरं वीक्ष्यमाणः
पुण्यं यायास्त्रिभुवनगुरोर्धाम चण्डीश्वरस्य ।
धूतोद्यानं कुवलयरजोगन्धिभिर्गन्धवत्या-
स्तोयक्रीडानिरतयुवतिस्नानतिक्तैर्मरुद्भिः ॥३३॥

अप्यन्यस्मिञ्जलधर ! महाकालमासाद्य काले
स्थातव्यं ते नयनविषयं यावदत्येति भानुः ।
कुर्वन् संध्यावलिपटहतां शूलिनः श्लाघनीया-
मामन्द्राणां फलमविकलं लप्स्यसे गर्जितानाम् ॥३४॥

पादन्यासैः क्वणितरशनास्तत्र लीलावधूतै
रत्नच्छायाखचितवलिभिश्चामरैः क्लान्तहस्ताः ।
वेश्यास्त्वत्तो नखपदसुखान् प्राप्य वर्षाग्रबिन्दू-
नामोक्ष्यन्ते त्वयि मधुकरश्रेणिदीर्घान् कटाक्षान् ॥३५॥

---

१. 'कालीसिन्ध'नाम्नी सरित् ।

पश्चादुच्चैर्भुजतरुवनं मण्डलेनाभिलीनः
सान्ध्यं तेजः प्रतिनवजपापुष्परक्तं दधानः ।
नृत्यारम्भे हर पशुपतेरार्द्रनागाजिनेच्छां
शान्तोद्वेगस्तिमितनयनं दृष्टभक्तिर्भवान्या ॥३६॥

गच्छन्तीनां रमणवसतिं योषितां तत्र नक्तं
रुद्धालोके नरपतिपथे सूचिभेद्यैस्तमोभिः ।
सौदामन्या कनकनिकषस्निग्धया दर्शयोर्वीं
तोयोत्सर्गस्तनितमुखरो मा स्म भूर्विक्लवास्ताः ॥३७॥

तां कस्यांचिद् भवनवलभौ सुप्तपारावतायां
नीत्वा रात्रिं चिरविलसनात् खिन्नविद्युत्कलत्रः ।
दृष्टे सूर्ये पुनरपि भवान् वाहयेदध्वशेषं
मन्दायन्ते न खलु सुहृदामभ्युपेतार्थकृत्याः ॥३८॥

तस्मिन् काले नयनसलिलं योषितां खण्डितानां
शान्तिं नेयं प्रणयिभिरतो वर्त्म भानोस्त्यजाशु ।
प्रालेयास्रं कमलवदनात् सोऽपि हर्तुं नलिन्याः
प्रत्यावृत्तस्त्वयि कररुधि स्यादनल्पाभ्यसूयः ॥३९॥

गम्भीरायाः पयसि सरितश्चेतसीव प्रसन्ने
छायात्मापि प्रकृतिसुभगो लप्स्यते ते प्रवेशम् ।
तस्मादस्याः कुमुदविशदान्यर्हसि त्वं न धैर्या-
न्मोघीकर्तुं चटुलशफरोद्वर्तनप्रेक्षितानि ॥४०॥

तस्याः किंचित् करधृतमिव प्राप्तवानीरशाखं
नीत्वा नीलं सलिलवसनं मुक्तरोधोनितम्बम् ।
प्रस्थानं ते कथमपि सखे लम्बमानस्य भावि
ज्ञातास्वादो विवृतजघनां को विहातुं समर्थः ॥४१॥

त्वन्निष्यन्दोच्छ्वसितवसुधागन्धसंपर्करम्यः
स्रोतोरन्ध्रध्वनितसुभगं दन्तिभिः पीयमानः ।
नीचैर्वास्यत्युपजिगमिषोर्देवपूर्वं गिरिं ते
शीतो वायुः परिणमयिता काननोदुम्बराणाम् ॥४२॥

तत्र स्कन्दं नियतवसतिं पुष्पमेघीकृतात्मा
पुष्पासारैः स्नपयतु भवान् व्योमगङ्गाजलार्द्रैः ।

रक्षाहेतोर्नवशशिभृता वासवीनां चमूना-
मत्यादित्यं हुतवहमुखे संभृतं तद्धि तेजः ।।४३।।

ज्योतिर्लेखावलयि गलितं यस्य वर्हं भवानी
पुत्रप्रेम्णा कुवलयदलक्षेपि कर्णे करोति ।
धौतापाङ्गं हरशशिरुचा पावकेस्तं मयूरं
पश्चादद्रिग्रहणगुरुभिर्गर्जितैर्नर्तयेथाः ।।४४।।

आराध्यैनं शरवणभवं देवमुल्लङ्घिताध्वा
सिद्धद्वन्द्वैर्जलकणभयाद्वीणिभिर्मुक्तमार्गः ।
व्यालम्बेथाः सुरभितनयालम्भजां मानयिष्यन्
स्रोतोमूर्त्त्या भुवि परिणतां रन्तिदेवस्य कीर्तिम्।।४५।।

त्वय्यादातुं जलमवनते शार्ङ्गिणो वर्णचौरे
तस्याः सिन्धोः पृथुमपि तनुं दूरभावात् प्रवाहम् ।
प्रेक्षिष्यन्ते गगनगतयो नूनमावर्ज्य दृष्टी-
रेकं मुक्तागुणमिव भुवः स्थूलमध्येन्द्रनीलम् ।।४६।।

तामुत्तीर्य व्रज परिचितभ्रूलताविभ्रमाणां
पक्ष्मोत्क्षेपादुपरिविलसत्कृष्णशारप्रभाणाम् ।
कुन्दक्षेपानुगमधुकरश्रीमुषामात्मविम्बं
पात्रीकुर्वन् दशपुरवधूनेत्रकौतूहलानाम् ।।४७।।

ब्रह्मावर्तं जनपदमथ च्छायया गाहमानः
क्षेत्रं क्षत्रप्रधनपिशुनं कौरवं तद् भजेथाः ।
राजन्यानां शितशरशतैर्यत्र गाण्डीवधन्वा
धारापातैस्त्वमिव कमलान्यभ्यवर्षन्मुखानि ।।४८।।

हित्वा हालामभिमतरसां रेवतीलोचनाङ्कां
बन्धुप्रीत्या समरविमुखो लाङ्गली याः सिषेवे ।
कृत्वा तासामभिगममपां सौम्य सारस्वतीना-
मन्तःशुद्धस्त्वमपि भविता वर्णमात्रेण कृष्णः ।।४९।।

तस्माद् गच्छेरनुकनखलं शैलराजावतीर्णां
जह्नोः कन्यां सगरतनयस्वर्गसोपानपङ्क्तिम् ।
गौरीवक्त्रभ्रुकुटिरचनां या विहस्येव फेनैः
शम्भोः केशग्रहणमकरोदिन्दुलग्नोर्मिहस्ता ।।५०।।

तस्याः पातुं सुरगज इव व्योम्नि पश्चार्धलम्बी
त्वं चेदच्छस्फटिकविशदं तर्कयेस्तिर्यगम्भः ।
संसर्पन्त्या सपदि भवतः स्रोतसि च्छाययाऽसौ
स्यादस्थानोपनतयमुनासङ्गमेवाभिरामा ॥५१॥

आसीनानां सुरभितशिलं नाभिगन्धैर्मृगाणां
तस्या एव प्रभवमचलं प्राप्य गौरं तुषारैः ।
वक्ष्यस्यध्वश्रमविनयने तस्य शृङ्गे निषण्णः
शोभां शुभ्रत्रिनयनवृषोत्खातपङ्कोपमेयाम् ॥५२॥

तं चेद् वायौ सरति सरलस्कन्धसंघट्टजन्मा
बाधेतोल्काक्षपितचमरीवालभारो दवाग्निः ।
अर्हस्येनं शमयितुमलं वारिधारासहस्रै-
रापन्नार्तिप्रशमनफलाः सम्पदो ह्युत्तमानाम् ॥५३॥

ये संरम्भोत्पतनरभसाः स्वाङ्गभङ्गाय तस्मिन्
मुक्तध्वानं सपदि शरभा लङ्घयेयुर्भवन्तम् ।
तान् कुर्वीथास्तुमुलकरकावृष्टिपातावकीर्णान्
के वा न स्युः परिभवपदं निष्फलारम्भयत्नाः ॥५४॥

तत्र व्यक्तं दृषदि चरणन्यासमर्धेन्दुमौलेः
शश्वत् सिद्धैरुपचितवलिं भक्तिनम्रः परीयाः ।
तस्मिन् दृष्टे करणविगमादूर्ध्वमुद्धूतपापाः
संकल्पन्ते स्थिरगणपदप्राप्तये श्रद्दधानाः ॥५५॥

शब्दायन्ते मधुरमनिलैः कीचकाः पूर्यमाणाः
संसक्ताभिस्त्रिपुरविजयो गीयते किन्नरीभिः ।
निर्ह्रादी ते मुरज इव चेत् कन्दरेषु ध्वनिः स्यात्
सङ्गीतार्थो ननु पशुपतेस्तत्र भावी समग्रः ॥५६॥

प्रालेयाद्रेरुपतटमतिक्रम्य तांस्तान् विशेषान्
हंसद्वारं भृगुपतियशोवर्त्म यत् क्रौञ्चरन्ध्रम् ।
तेनोदीचीं दिशमनुसरेस्तिर्यगायामशोभी
श्यामः पादो बलिनियमनाभ्युद्यतस्येव विष्णोः ॥५७॥

गत्वा चोर्ध्वं दशमुखभुजोच्छ्वासितप्रस्थसन्धेः
कैलासस्य त्रिदशवनितादर्पणस्यातिथिः स्याः ।

शृङ्गोच्छ्रायैः कुमुदविशदैर्यो वितत्य स्थितः खं
राशीभूतः प्रतिदिनमिव त्र्यम्बकस्याट्टहासः ।।५८।।

उत्पश्यामि त्वयि तटगते स्निग्धभिन्नाञ्जनाभे
सद्यःकृत्तद्विरद-दशनच्छेदगौरस्य तस्य ।
शोभामद्रेः स्तिमितनयनप्रेक्षणीयां भवित्री-
मंसन्यस्ते सति हलभृतो मेचके वाससीव ।।५९।।

हित्वा तस्मिन् भुजगवलयं शम्भुना दत्तहस्ता
क्रीडाशैले यदि च विहरेत् पादचारेण गौरी ।
भङ्गीभक्त्या विरचितवपुः स्तम्भितान्तर्जलौघः
सोपानत्वं कुरु मणितटारोहणायाग्रयायी ।।६०।।

तत्रावश्यं वलयकुलिशोद्घट्टनोद्गीर्णतोयं
नेष्यन्ति त्वां सुरयुवतयो यन्त्रधारागृहत्वम् ।
ताभ्यो मोक्षस्तव यदि सखे घर्मलब्धस्य न स्यात्
क्रीडालोलाः श्रवणपरुषैर्गर्जितैर्भीषयेस्ताः ।।६१।।

हेमाम्भोजप्रसवि सलिलं मानसस्याददानः
कुर्वन् कामं क्षणमुखपटप्रीतिमैरावतस्य ।
धुन्वन् कल्पद्रुमकिसलयान्यंशुकानीव वातै-
र्नानाचेष्टैर्जलद ! ललितैर्निर्विशेस्तं नगेन्द्रम् ।।६२।।

तस्योत्सङ्गे प्रणयिन इव स्रस्तगङ्गादुकूलां
न त्वं दृष्ट्वा न पुनरलकां ज्ञास्यसे कामचारिन् ।
या वः काले वहति सलिलोद्गारमुच्चैर्विमाना
मुक्ताजालग्रथितमलकं कामिनीवाभ्रवृन्दम् ।।६३।।

।। इति पूर्वमेघः ।।

उत्तरमेघः

विद्युत्वन्तं ललितवनिताः सेन्द्रचापं सचित्राः
संगीताय प्रहतमुरजाः स्निग्धगम्भीरघोषम् ।
अन्तस्तोयं मणिमयभुवस्तुङ्गमभ्रंलिहाग्राः
प्रासादास्त्वां तुलयितुमलं यत्र तैस्तैर्विशेषैः ।।१।।

हस्ते लीलाकमलमलके बालकुन्दानुविद्धं
नीता लोध्रप्रसवरजसा पाण्डुतामानने श्रीः ।
चूडापाशे नवकुरबकं चारु कर्णे शिरीषं
सीमन्ते च त्वदुपगमजं यत्र नीपं वधूनाम् ।।२।।

आनन्दोत्थं नयनसलिलं यत्र नान्यैर्निमित्तै-
र्नान्यस्तापः कुसुमशरजादिष्टसंयोगसाध्यात् ।
नाप्यन्यस्मात् प्रणयकलहाद् विप्रयोगोपपत्ति-
र्वित्तेशानां न च खलु वयो यौवनादन्यदस्ति ।।

यस्यां यक्षाः सितमणिमयान्येत्य हर्म्यस्थलानि
ज्योतिश्छायाकुसुमरचितान्युत्तमस्त्रीसहायाः ।
आसेवन्ते मधु रतिफलं कल्पवृक्षप्रसूतं
त्वद्गम्भीरध्वनिषु शनकैः पुष्करेष्वाहतेषु ।।३।।

मन्दाकिन्याः सलिलशिशिरैः सेव्यमाना मरुद्भि-
र्मन्दाराणामनुतटरुहां छायया वारितोष्णाः ।
अन्वेष्टव्यैः कनकसिकतामुष्टिनिक्षेपगूढैः
संक्रीडन्ते मणिभिरमरप्रार्थिता यत्र कन्याः ।।४।।

नीवीबन्धोच्छ्वसितशिथिलं यत्र बिम्बाधराणां
क्षौमं रागादनिभृतकरेष्वाक्षिपत्सु प्रियेषु ।
अर्चिस्तुङ्गानभिमुखमपि प्राप्य रत्नप्रदीपान्
ह्रीमूढानां भवति विफलप्रेरणा चूर्णमुष्टिः ।।५।।

नेत्रा नीताः सततगतिना यद्विमानाग्रभूमी-
रालेख्यानां नवजलकणैर्दोषमुत्पाद्य सद्यः ।

शङ्कास्पृष्टा इव जलमुचस्त्वादृशा जालमार्गै-
धूमोद्गारानुकृतिनिपुणा जर्जरा निष्पतन्ति ॥६॥

यत्र स्त्रीणां प्रियतमभुजालिङ्गनोच्छ्वासितानामङ्गग्लानिं सुरतजनितां तन्तुजालावलम्बाः ।
त्वत्संरोधापगमविशदैश्चन्द्रपादैर्निशीथे
व्यालुम्पन्ति स्फुटजललवस्यन्दिनश्चन्द्रकान्ताः ॥७॥

अक्षय्यान्तर्भवननिधयः प्रत्यहं रक्तकण्ठै-
रुद्गायद्भिर्धनपतियशः किन्नरैर्यत्र सार्धम् ।
वैभ्राजाख्यं विबुधवनितावारमुख्यासहाया
बद्धालापा वहिरुपवनं कामिनो निर्विशन्ति ॥८॥

गत्युत्कम्पादलकपतितैर्यत्र मन्दारपुष्पैः
पत्रच्छेदैः कनककमलैः कर्णविभ्रंशिभिश्च ।
मुक्ताजालैः स्तनपरिसरच्छिन्नसूत्रैश्च हारै-
र्नैशो मार्गः सवितुरुदये सूच्यते कामिनीनाम् ॥९॥

मत्वा देवं धनपतिसखं यत्र साक्षाद् वसन्तं
प्रायश्चापं न वहति भयान्मन्मथः षट्पदज्यम् ।
सभ्रूभङ्गप्रहितनयनैः कामिलक्ष्येष्वमोघै-
स्तस्यारम्भश्चतुरवनिताविभ्रमैरेव सिद्धः ॥१०॥

वासश्चित्रं मधु नयनयोर्विभ्रमादेशदक्षं
पुष्पोद्भेदं सह किसलयैर्भूषणानां विकल्पान् ।
लाक्षारागं चरणकमलन्यासयोग्यं च यस्या-
मेकः सूते सकलमबलामण्डनं कल्पवृक्षः ॥११॥

तत्रागारं धनपतिगृहानुत्तरेणास्मदीयं
दूराल्लक्ष्यं सुरपतिधनुश्चारुणा तोरणेन ।
तस्योपान्ते कृतक-तनयः कान्तया वर्धितो मे
हस्तप्राप्यस्तबकनमितो वालमन्दारवृक्षः ॥१२॥

वापी चास्मिन् मरकतशिलाबद्धसोपानमार्गा
हैमैश्छन्ना विकचकमलैः स्निग्धवैदूर्यनालैः ।
यस्यास्तोये कृतवसतयो मानसं सन्निकृष्टं
नाध्यास्यन्ति व्यपगतशुचस्त्वामपि प्रेक्ष्य हंसाः ॥१३॥

तस्यास्तीरे रचितशिखरः पेशलैरिन्द्रनीलैः
क्रीडाशैलः कनककदलीवेष्टनप्रेक्षणीयः ।
मद्गेहिन्याः प्रिय इति सखे ! चेतसा कातरेण
प्रेक्ष्योपान्तस्फुरिततडितं त्वां तमेव स्मरामि ॥१४॥

रक्ताशोकश्चलकिसलयः केसरश्चात्र कान्तः
प्रत्यासन्नौ कुरबकवृतेर्माधवीमण्डपस्य ।
एकः सख्यास्तव सह मया वामपादाभिलाषी
काङ्क्षत्यन्यो वदनमदिरां दोहदच्छद्मनाऽस्याः ॥१५॥

तन्मध्ये च स्फटिकफलका काञ्चनी वासयष्टि-
र्मूले बद्धा मणिभिरनतिप्रौढवंशप्रकाशैः ।
तालैः शिञ्जद्वलयसुभगैर्नर्तितः कान्तया मे
यामध्यास्ते दिवसविगमे नीलकण्ठः सुहृद् वः ॥१६॥

एभिः साधो ! हृदयनिहितैर्लक्षणैर्लक्षयेथा
द्वारोपान्ते लिखितवपुषौ शङ्खपद्मौ च दृष्ट्वा ।
क्षामच्छायं भवनमधुना मद्वियोगेन नूनं
सूर्यापाये न खलु कमलं पुष्यति स्वामभिख्याम् ॥१७॥

गत्वा सद्यः कलभतनुतां शीघ्रसम्पातहेतोः
क्रीडाशैले प्रथमकथिते रम्यसानौ निषण्णः ।
अर्हस्यन्तर्भवनपतितां कर्तुमल्पाल्पभासं
खद्योतालीविलसितनिभां विद्युदुन्मेषदृष्टिम् ॥१८॥

तन्वी श्यामा शिखरिदशना पक्वबिम्बाधरोष्ठी
मध्ये क्षामा चकितहरिणीप्रेक्षणा निम्ननाभिः ।
श्रोणीभारादलसगमना स्तोकनम्रा स्तनाभ्यां
या तत्र स्याद् युवतिविषये सृष्टिराद्येव धातुः ॥१९॥

तां जानीथाः परिमितकथां जीवितं मे द्वितीयं
दूरीभूते मयि सहचरे चक्रवाकीमिवैकाम् ।
गाढोत्कण्ठां गुरुषु दिवसेष्वेषु गच्छत्सु बालां
जातां मन्ये शिशिरमथितां पद्मिनीं वाऽन्यरूपाम् ॥२०॥

ननं तस्याः प्रबलरुदितोच्छूननेत्रं प्रियाया
निःश्वासानामशिशिरतया भिन्नवर्णाधरोष्ठम् ।

हस्तन्यस्तं मुखमसकलव्यक्ति लम्बालकत्वा-
दिन्दोर्दैन्यं त्वदनुसरणक्लिष्टकान्तेर्बिभर्ति ॥२१॥
आलोके ते निपतति पुरा सा वलिव्याकुला वा
मत्सादृश्यं विरहतनु वा भावगम्यं लिखन्ती ।
पृच्छन्ती वा मधुरवचनां सारिकां पञ्जरस्थां
कच्चिद् भर्तुः स्मरसि रसिके त्वं हि तस्य प्रियेति ॥२२॥

उत्सङ्गे वा मलिनवसने सौम्य ! निक्षिप्य वीणां
मद्गोत्राङ्कं विरचितपदं गेयमुद्गातुकामा ।
तन्त्रीमार्द्रां नयनसलिलैः सारयित्वा कथंचिद्
भूयो भूयः स्वयमपि कृतां मूर्छनां विस्मरन्ती ॥२३॥

शेषान् मासान् विरहदिवसस्थापितस्यावधेर्वा
विन्यस्यन्ती भुवि गणनया देहलीदत्तपुष्पैः ।
मत्सङ्गं वा हृदयनिहितारम्भमास्वादयन्ती
प्रायेणैते रमणविरहेष्वङ्गनानां विनोदाः ॥२४॥

सव्यापारामहनि न तथा पीडयेन्मद्वियोगः
शङ्के रात्रौ गुरुतरशुचं निर्विनोदां सखीं ते ।
मत्सन्देशैः सुखयितुमलं पश्य साध्वीं निशीथे
तामुन्निद्रामवनिशयनां सौधवातायनस्थः ॥२५॥

आधिक्षामां विरहशयने सन्निषण्णैकपार्श्वां
प्राचीमूले तनुमिव कलामात्रशेषां हिमांशोः ।
नीता रात्रिः क्षण इव मया सार्धमिच्छारतैर्या
तामेवोष्णैर्विरहमहतीमश्रुभिर्यापयन्तीम् ॥२६॥

पादानिन्दोरमृतशिशिराञ्जालमार्गप्रविष्टान्
पूर्वप्रीत्या गतमभिमुखं संनिवृत्तं तथैव ।
चक्षुः खेदात् सलिलगुरुभिः पक्ष्मभिश्छादयन्तीं
साभ्रेऽह्नीव स्थलकमलिनीं न प्रबुद्धां न सुप्ताम् ॥२७॥

निःश्वासेनाधरकिसलयक्लेशिना विक्षिपन्तीं
शुद्धस्नानात् परुषमलकं नूनमागण्डलम्बम् ।
मत्संभोगः कथमुपनयेत् स्वप्नजोऽपीति निद्रा-
माकाङ्क्षन्तीं नयनसलिलोत्पीडरुद्धावकाशाम् ॥२८॥

आद्ये बद्धा विरहदिवसे या शिखा दाम हित्वा
शापस्यान्ते विगलितशुचा तां मयोद्वेष्टनीयाम् ।
स्पर्शक्लिष्टामयमितनखेनासकृत् सारयन्तीं
गण्डाभोगात् कठिनविषमामेकवेणीं करेण ।।२९।।

सा संन्यस्ताभरणमबला पेशलं धारयन्ती
शय्योत्सङ्गे निहितमसकृद् दुःखदुःखेन गात्रम् ।
त्वामप्यस्रं नवजलमयं मोचयिष्यत्यवश्यं
प्रायः सर्वो भवति करुणावृत्तिरार्द्रान्तरात्मा ।।३०।।

जाने सख्यास्तव मयि मनः संभृतस्नेहमस्मा-
दित्थंभूतां प्रथमविरहे तामहं तर्कयामि ।
वाचालं मां न खलु सुभगंमन्यभावः करोति
प्रत्यक्षं ते निखिलमचिराद् भ्रातरुक्तं मया यत् ।।३१।।

रुद्धापाङ्गप्रसरमलकैरञ्जनस्नेहशून्यं
प्रत्यादेशादपि च मधुनो विस्मृतभ्रूविकारम्[1] ।
त्वय्यासन्ने नयनमुपरिस्पन्दि शङ्के मृगाक्ष्या
मीनक्षोभाच्चलकुवलयश्रीतुलामेष्यतीति ।।३२।।

वामश्चास्याः कररुहपदैर्मुच्यमानो मदीयै-
र्मुक्ताजालं चिरपरिचितं त्याजितो दैवगत्या ।
संभोगान्ते मम समुचितो हस्तसंवाहनानां
यास्यत्यूरुः सरसकदलीस्तम्भगौरश्चलत्वम् ।।३३।।

तस्मिन् काले जलद यदि सा लब्धनिद्रासुखा स्या-
दन्वास्यैनां स्तनितविमुखो याममात्रं सहस्व ।
मा भूदस्याः प्रणयिनि मयि स्वप्नलब्धे कथंचित्
सद्यः कण्ठच्युतभुजलताग्रन्थि गाढोपगूढम् ।।३४।।

तामुत्थाप्य स्वजलकणिकाशीतलेनानिलेन
प्रत्याश्वस्तां सममभिनवैर्जालकैर्मालतीनाम् ।
विद्युद्गर्भः स्तिमितनयनां त्वत्सनाथे गवाक्षे
वक्तुं धीरः स्तनितवचनैर्मानिनीं प्रक्रमेथाः ।।३५।।

---

१. विलासम् । एवमेव पूर्वमेघस्य १६ पद्येऽपि ।

भर्तुर्मित्रं प्रियमविधवे विद्धि मामम्बुवाहं
तत्संदेशैर्हृदयनिहितैरागतं त्वत्समीपम् ।
यो वृन्दानि त्वरयति पथि श्राम्यतां प्रोषितानां
मन्द्रस्निग्धैर्ध्वनिभिरबलावेणिमोक्षोत्सुकानि ॥३६॥

इत्याख्याते पवनतनयं मैथिलीवोन्मुखी सा
त्वामुत्कण्ठोच्छ्वसितहृदया वीक्ष्य संभाव्य चैवम् ।
श्रोष्यत्यस्मात् परमवहिता सौम्य ! सीमन्तिनीनां
कान्तोदन्तः सुहृदुपनतः संगमात् किञ्चिदूनः ॥३७॥

तामायुष्मन् मम च वचनादात्मनश्चोपकर्तुं
ब्रूया एवं तव सहचरो रामगिर्याश्रमस्थः ।
अव्यापन्नः कुशलमबले ! पृच्छति त्वां वियुक्तः
पूर्वाभाष्यं सुलभविपदां प्राणिनामेतदेव ॥३८॥

अङ्गेनाङ्गं प्रतनु तनुना गाढतप्तेन तप्तं
सास्रेणास्रद्रुतमविरतोत्कण्ठमुत्कण्ठितेन ।
उष्णोच्छ्वासं समधिकतरोच्छ्वासिना दूरवर्ती
संकल्पैस्तैर्विशति विधिना वैरिणा रुद्धमार्गः ॥३९॥

शब्दाख्येयं यदपि किल ते यः सखीनां पुरस्तात्
कर्णे लोलः कथयितुमभूदाननस्पर्शलोभात् ।
सोऽतिक्रान्तः श्रवणविषयं लोचनाभ्यामदृष्ट-
स्त्वामुत्कण्ठाविरचितपदं मन्मुखेनेदमाह ॥४०॥

श्यामास्वङ्गं चकितहरिणीप्रेक्षणे दृष्टिपातं
वक्त्रच्छायां शशिनि शिखिनां बर्हभारेषु केशान् ।
उत्पश्यामि प्रतनुषु नदीवीचिषु भ्रूविलासान्
हन्तैकस्मिन् क्वचिदपि न ते चण्डि! सादृश्यमस्ति ॥४१॥

त्वामालिख्य प्रणयकुपितां धातुरागैः शिलाया-
मात्मानं ते चरणपतितं यावदिच्छामि कर्तुम्[१] ।
अस्रैस्तावन्मुहुरुपचितैर्दृष्टिरालुप्यते मे
क्रूरस्तस्मिन्नपि न सहते सङ्गमं नौ कृतान्तः ॥४२॥

---

१. कर्तुं लेखितुम् ।

मामाकाशप्रणिहितभुजं निर्दयाश्लेषहेतो-
लब्धायास्ते कथमपि मया स्वप्नसन्दर्शनेषु ।
पश्यन्तीनां न खलु बहुशो न स्थलीदेवतानां
मुक्तास्थूलास्तरुकिसलयेष्वश्रुलेशाः पतन्ति ॥४३॥

भित्त्वा सद्यः किसलयपुटान् देवदारुद्रुमाणां
ये तत्क्षीरस्रुतिसुरभयो दक्षिणेन प्रवृत्ताः ।
आलिङ्ग्यन्ते गुणवति ! मया ते तुषाराद्रिवाताः
पूर्वं स्पृष्टं यदि किल भवेदङ्गमेभिस्तवेति ॥४४॥

संक्षिप्येत क्षण इव कथं दीर्घयामा त्रियामा
सर्वावस्थास्वहरपि कथं मन्दमन्दातपं स्यात् ।
इत्थं चेतश्चटुलनयने ! दुर्लभप्रार्थनं मे
गाढोष्माभिः कृतमशरणं त्वद्वियोगव्यथाभिः ॥४५॥

नन्वात्मानं बहु विगणयन्नात्मनैवावलम्बे
तत् कल्याणि ! त्वमपि नितरां मा गमः कातरत्वम् ।
कस्यात्यन्तं सुखमुपनतं दुःखमेकान्ततो वा
नीचैर्गच्छत्युपरि च दशा चक्रनेमिक्रमेण ॥४६॥

शापान्तो मे भुजगशयनादुत्थिते शार्ङ्गपाणौ
शेषान् मासान् गमय चतुरो[1] लोचने मीलयित्वा ।
पश्चादावां विरहगुणितं तं तमात्माभिलाषं
निर्वेक्ष्यावः परिणतशरच्चन्द्रिकासु क्षपासु ॥४७॥

भूयश्चाह त्वमपि शयने कण्ठलग्ना पुरा मे
निद्रां गत्वा किमपि रुदती सस्वनं विप्रबुद्धा ।
सान्तर्हासं कथितमसकृत् पृच्छतश्च त्वया मे
दृष्टः स्वप्ने कितव ! रमयन् कामपि त्वं मयेति ॥४८॥

एतस्मान्मां कुशलिनमभिज्ञानदानाद् विदित्वा
मा कौलीनादसितनयने ! मय्यविश्वासिनी भूः ।
स्नेहानाहुः किमपि विरहे ध्वंसिनस्ते त्वभोगा-
दिष्टे वस्तुन्युपचितरसाः प्रेमराशीभवन्ति ॥४९॥

---

१. चतुरे-पा० ।

आश्वास्यैवं प्रथमविरहोदग्रशोकां सखीं ते
शैलादाशु त्रिनयनवृषोत्खातकूटान्निवृत्तः ।
साभिज्ञानप्रहितकुशलैस्तद्वचोभिर्ममापि
प्रातः कुन्दप्रसवशिथिलं जीवितं धारयेथाः ॥५०॥

कच्चित् सौम्य ! व्यवसितमिदं बन्धुकृत्यं त्वया मे
[1]प्रत्यादेशान्न खलु भवतो धीरतां कल्पयामि ।
निःशब्दोऽपि प्रदिशसि जलं याचितश्चातकेभ्यः
प्रत्युक्तं हि प्रणयिषु सतामीप्सितार्थक्रियैव ॥५१॥

एतत् कृत्वा प्रियमनुचितप्रार्थनावर्तिनो मे
सौहार्दाद् वा विधुर इति वा मय्यनुक्रोशबुद्धया ।
इष्टान् देशान् विचर जलद ! प्रावृषा सम्भृतश्री-
र्मा भूदेवं क्षणमपि च ते विद्युता विप्रयोगः ॥५२॥

इति मेघदूत उत्तरमेघः

॥ इति श्रीकालिदासकविविरचितं मेघदूतम् सम्पूर्णम् ॥

---

१. प्रतिशब्द उत्तरमिति यावत् ।

कुमारसम्भवम्

कुमारसम्भवम्

प्रथमः सर्गः

अस्त्युत्तरस्यां दिशि देवतात्मा हिमालयो नाम नगाधिराजः ।
पूर्वापरौ तोयनिधी वगाह्य स्थितः पृथिव्या इव मानदण्डः ॥१॥

यं सर्वशैलाः परिकल्प्य वत्सं मेरौ स्थिते दोग्धरि दोहदक्षे ।
भास्वन्ति रत्नानि महौषधीश्च पृथूपदिष्टां दुदुहुर्धरित्रीम् ॥२॥

अनन्तरत्नप्रभवस्य यस्य हिमं न सौभाग्यविलोपि जातम् ।
एको हि दोषो गुणसन्निपाते निमज्जतीन्दोः किरणेष्विवाङ्कः ॥३॥

यश्चाप्सरोविभ्रममण्डनानां संपादयित्रीं शिखरैर्बिभर्ति ।
बलाहकच्छेदविभक्तरागामकालसंध्यामिव धातुमत्ताम् ॥४॥

आमेखलं संचरतां घनानां छायामधःसानुगतां निषेव्य ।
उद्वेजिता वृष्टिभिराश्रयन्ते शृङ्गाणि यस्यातपवन्ति सिद्धाः ॥५॥

पदं तुषारस्रुतिधौतरक्तं यस्मिन्नदृष्ट्वापि हतद्विपानाम् ।
विदन्ति मार्गं नखरन्ध्रमुक्तैर्मुक्ताफलैः केसरिणां किराताः ॥६॥

न्यस्ताक्षरा धातुरसेन यत्र भूर्जत्वचः कुञ्जरबिन्दुशोणाः ।
व्रजन्ति विद्याधरसुन्दरीणामनङ्गलेखक्रिययोपयोगम् ॥७॥

यः पूरयन् कीचकरन्ध्रभागान् दरीमुखोत्थेन समीरणेन ।
उद्गास्यतामिच्छति किन्नराणां [1]तानप्रदायित्वमिवोपगन्तुम् ॥८॥

कपोलकण्डूः करिभिर्विनेतुं विघट्टितनां सरलद्रुमाणाम् ।
यत्र स्रुतक्षीरतया प्रसूतः सानूनि गन्धः सुरभीकरोति ॥९॥

वनेचराणां वनितासखानां दरीगृहोत्सङ्गनिषक्तभासः ।
भवन्ति यत्रौषधयो रजन्यामतैलपूराः सुरतप्रदीपाः ॥१०॥

उद्वेजयत्यङ्गुलिपार्ष्णिभागान् मार्गे शिलीभूतहिमेऽपि यत्र ।
न दुर्वहश्रोणिपयोधरार्ता भिन्दन्ति मन्दां गतिमश्वमुख्यः ॥११॥

दिवाकराद् रक्षति यो गुहासु लीनं दिवा भीतमिवान्धकारम् ।
क्षुद्रेऽपि नूनं शरणं प्रपन्ने ममत्वमुच्चैःशिरसां सतीव ॥१२॥

---

१. स्थान-पा० ।

लाङ्गूलविक्षेपविसर्पिशोभैरितस्ततश्चन्द्रमरीचिगौरैः ।
यस्यार्थयुक्तं गिरिराजशब्दं कुर्वन्ति बालव्यजनैश्चमर्यः ॥१३॥

यत्रांशुकाक्षेपविलज्जितानां यदृच्छया किंपुरुषाङ्गनानाम् ।
दरीगृहद्वारविलम्बिविम्बास्तिरस्करिण्यो जलदा भवन्ति ॥१४॥

भागीरथीनिर्झरसीकराणां वोढा मुहुः कम्पितदेवदारुः ।
यद्वायुरन्विष्टमृगैः किरातैरासेव्यते भिन्नशिखण्डिबर्हः ॥१५॥

सप्तर्षिहस्तावचितावशेषाण्यधो विवस्वान् परिवर्तमानः ।
पद्मानि यस्याग्रसरोरुहाणि प्रबोधयत्यूर्ध्वमुखैर्मयूखैः ॥१६॥

यज्ञाङ्गयोनित्वमवेक्ष्य यस्य सारं धरित्रीधरणक्षमं च ।
प्रजापतिः कल्पितयज्ञभागं शैलाधिपत्यं स्वयमन्वतिष्ठत् ॥१७॥

स मानसीं मेरुसखः पितॄणां कन्यां कुलस्य स्थितये स्थितिज्ञः ।
मेनां मुनीनामपि माननीयामात्मानुरूपां विधिनोपयेमे ॥१८॥

कालक्रमेणाथ तयोः प्रवृत्ते स्वरूपयोग्ये सुरतप्रसङ्गे ।
मनोरमं यौवनमुद्वहन्त्या गर्भोऽभवद् भूधरराजपत्न्याः ॥१९॥

असूत सा नागवधूपभोग्यं मैनाकमम्भोनिधिवद्धसख्यम् ।
क्रुद्धेऽपि पक्षच्छिदि वृत्रशत्राववेदनाज्ञं कुलिशक्षतानाम् ॥२०॥

अथावमानेन पितुः प्रयुक्ता दक्षस्य कन्या भवपूर्वपत्नी ।
सती सती योगविसृष्टदेहा तां जन्मने शैलवधूं प्रपेदे ॥२१॥

सा भूधराणामधिपेन तस्यां समाधिमत्यामुदपादि भव्या ।
सम्यक्प्रयोगादपरिक्षतायां नीताविवोत्साहगुणेन संपत् ॥२२॥

प्रसन्नदिक्पांसुविविक्तवातं शङ्खस्वनानन्तरपुष्पवृष्टि ।
शरीरिणां स्थावरजङ्गमानां सुखाय तज्जन्मदिनं बभूव ॥२३॥

तया दुहित्रा सुतरां सवित्री स्फुरत्प्रभामण्डलया चकासे ।
विदूरभूमिर्नवमेघशब्दादुद्भिन्नया रत्नशलाकयेव ॥२४॥

दिने दिने सा परिवर्धमाना लब्धोदया चान्द्रमसीव लेखा ।
पुपोष लावण्यमयान् विशेषा[1]ञ्ज्योत्स्नान्तराणीव कलान्तराणि ॥२५॥

तां पार्वतीत्याभिजनेन नाम्ना बन्धुप्रियां बन्धुजनो जुहाव ।
उमेति मात्रा तपसो निषिद्धा पश्चादुमाख्यां सुमुखी जगाम ॥२६॥

---

१. विशेषान् अवयवान् ।

महीभृतः पुत्रवतोऽपि दृष्टिस्तस्मिन्नपत्ये न जगाम तृप्तिम् ।
अनन्तपुष्पस्य मधोर्हि चूते द्विरेफमाला सविशेषसङ्गा ॥२७॥

प्रभामहत्या शिखयेव दीपस्त्रिमार्गयेव त्रिदिवस्य मार्गः ।
संस्कारवत्येव गिरा मनीषी तया स पूतश्च विभूषितश्च ॥२८॥

मन्दाकिनीसैकतवेदिकाभिः सा कन्दुकैः कृत्रिमपुत्रकैश्च ।
रेमे मुहुर्मध्यगता सखीनां क्रीडारसं निर्विशतीव बाल्ये ॥२९॥

तां हंसमालाः शरदीव गङ्गां महौषधिं नक्तमिवात्मभासः ।
स्थिरोपदेशामुपदेशकाले प्रपेदिरे प्राक्तनजन्मविद्याः ॥३०॥

असंभृतं मण्डनमङ्गयष्टेरनासवाख्यं करणं मदस्य ।
कामस्य पुष्पव्यतिरिक्तमस्त्रं बाल्यात् परं साथ वयः प्रपेदे ॥३१॥

उन्मीलितं तूलिकयेव चित्रं सूर्यांशुभिर्भिन्नमिवारविन्दम् ।
बभूव तस्याश्चतुरस्रशोभि वपुर्विभक्तं नवयौवनेन ॥३२॥

अभ्युन्नताङ्गुष्ठनखप्रभाभिर्निक्षेपणाद् रागमिवोद्गिरन्तौ ।
आजह्रतुस्तच्चरणौ पृथिव्यां स्थलारविन्दश्रियमव्यवस्थाम् ॥३३॥

सा राजहंसैरिव संनताङ्गी गतेषु लीलाञ्चितविक्रमेषु ।
व्यनीयत प्रत्युपदेशलुब्धैरादित्सुभिर्नूपुरसिञ्जितानि ॥३४॥

वृत्तानुपूर्वे च न चातिदीर्घे जङ्घे शुभे सृष्टवतस्तदीये ।
शेषाङ्गनिर्माणविधौ विधातुर्लावण्य उत्पाद्य इवास यत्नः ॥३५॥

नागेन्द्रहस्तास्त्वचि कर्कशत्वादेकान्तशैत्यात् कदलीविशेषाः ।
लब्ध्वापि लोके परिणाहि रूपं जातास्तदूर्वोरुपमानबाह्याः ॥३६॥

एतावता नन्वनुमेयशोभि काञ्चीगुणस्थानमनिन्दितायाः ।
आरोपितं यद् गिरिशेन पश्चादनन्यनारी-कमनीयमङ्कम् ॥३७॥

तस्याः प्रविष्टा नतनाभिरन्ध्रं रराज तन्वी नवलोमराजिः ।
नीवीमतिक्रम्य सितेतरस्य तन्मेखलामध्यमणेरिवार्चिः ॥३८॥

मध्येन सा वेदविलग्नमध्या वलित्रयं चारु बभार बाला ।
आरोहणार्थं नवयौवनेन कामस्य सोपानमिव प्रयुक्तम् ॥३९॥

अन्योन्यमुत्पीडयदुत्पलाक्ष्याः स्तनद्वयं पाण्डु तथा प्रवृद्धम् ।
मध्ये यथा श्याममुखस्य तस्य मृणालसूत्रान्तरमप्यलभ्यम् ।।४०।।

शिरीषपुष्पाधिकसौकुमार्यौ वाहू तदीयाविति मे वितर्कः ।
पराजितेनापि कृतौ हरस्य यौ कण्ठपाशौ मकरध्वजेन ।।४१।।

कण्ठस्य तस्याः स्तनबन्धुरस्य मुक्ताकलापस्य च निस्तलस्य ।
अन्योन्यशोभाजननाद् बभूव साधारणो भूषणभूष्यभावः ।।४२।।

चन्द्रं गता पद्मगुणान् न भुङ्क्ते पद्माश्रिता चान्द्रमसीमभिख्याम् ।
उमामुखं तु प्रतिपद्य लोला द्विसंश्रयां प्रीतिमवाप लक्ष्मीः ।।४३।।

पुष्पं प्रवालोपहितं यदि स्यान्मुक्ताफलं वा स्फुटविद्रुमस्थम् ।
ततोऽनुकुर्याद् विशदस्य तस्यास्ताम्रोष्ठपर्यस्तरुचः स्मितस्य ।।४४।।

स्वरेण तस्याममृतस्रुतेव प्रजल्पितायामभिजातवाचि ।
अप्यन्यपुष्टा प्रतिकूलशब्दा श्रोतुर्वितन्त्रीरिव ताडयमाना ।।४५।।

प्रवात-नीलोत्पल-निर्विशेषमधीर-विप्रेक्षितमायताक्ष्या ।
तया गृहीतं नु मृगाङ्गनाभ्यस्ततो गृहीतं नु मृगाङ्गनाभिः ।।४६।।

तस्याः शलाकाञ्जननिर्मितेव कान्तिर्भ्रुवोरायतलेखयोर्या ।
तां वीक्ष्य लीलाचतुरामनङ्गः स्वचापसौन्दर्यमदं मुमोच ।।४७।।

लज्जा तिरश्चां यदि चेतसि स्यादसंशयं पर्वतराजपुत्र्याः ।
तं केशपाशं प्रसमीक्ष्य कुर्युर्वालप्रियत्वं शिथिलं चमर्यः ।।४८।।

सर्वोपमाद्रव्यसमुच्चयेन यथाप्रदेशं विनिवेशितेन ।
सा निर्मिता विश्वसृजा प्रयत्नादेकस्थसौन्दर्यदिदृक्षयेव ।।४९।।

तां नारदः कामचरः कदाचित् कन्यां किल प्रेक्ष्य पितुः समीपे ।
समादिदेशैकवधूं भवित्रीं प्रेम्णा शरीरार्धहरां हरस्य ।।५०।।

गुरुः प्रगल्भेऽपि वयस्यतोऽस्यास्तस्थौ निवृत्तान्यवराभिलाषः ।
ऋते कृशानोर्न हि मन्त्रपूतमर्हन्ति तेजांस्यपराणि हव्यम् ।।५१।।

अयाचितारं नहि देवदेवमद्रिः सुतां ग्राहयितुं शशाक ।
अभ्यर्थनाभङ्गभयेन साधुर्माध्यस्थ्यमिष्टेऽप्यवलम्बतेऽर्थे ।।५२।।

यदैव पूर्वे जनने शरीरं सा दक्षरोषात् सुदती ससर्ज ।
तदाप्रभृत्येव विमुक्तसङ्गः पतिः पशूनामपरिग्रहोऽभूत् ॥५३॥

स कृत्तिवासास्तपसे यतात्मा गङ्गाप्रवाहोक्षितदेवदारु ।
प्रस्थं हिमाद्रेर्मृगनाभिगन्धि किंचित्क्वणत्किन्नरमध्युवास ॥५४॥

गणा नमेरुप्रसवावतंसा भूर्जत्वचः स्पर्शवतीर्दधानाः ।
मनःशिलाविच्छुरिता निषेदुः शैलेयनद्धेषु शिलातलेषु ॥५५॥

तुषारसंघातशिलाः खुराग्रैः समुल्लिखन् दर्पकलः ककुद्मान् ।
दृष्टः कथंचिद् गवयैर्विविग्नैरसोढसिंहध्वनिरुन्ननाद ॥५६॥

तत्राग्निमाधाय समित्समिद्धं स्वमेव मूर्त्यन्तरमष्टमूर्तिः ।
स्वयं विधाता तपसः फलानां केनापि कामेन तपश्चचार ॥५७॥

अनर्घ्यमर्घ्येण तमद्रिनाथः स्वर्गौकसामर्चितमर्चयित्वा ।
आराधनायास्य सखीसमेतां समादिदेश प्रयतां तनूजाम् ॥५८॥

प्रत्यर्थिभूतामपि तां समाधेः शुश्रूषमाणां गिरिशोऽनुमेने ।
विकारहेतौ सति विक्रियन्ते येषां न चेतांसि त एव धीराः ॥५९॥

अवचितबलिपुष्पा वेदिसंमार्गदक्षा
नियमविधिजलानां बर्हिषां चोपनेत्री ।
गिरिशमुपचचार प्रत्यहं सा सुकेशी
नियमितपरिखेदा तच्छिरश्चन्द्रपादैः ॥६०॥

॥ इति श्रीमहाकविकालिदासकृतौ कुमारसम्भवे महाकाव्ये
उमोत्पत्तिर्नाम प्रथमः सर्गः ॥

द्वितीयः सर्गः

तस्मिन् विप्रकृताः काले तारकेण दिवौकसः ।
तुरासाहं पुरोधाय धाम स्वायंभुवं ययुः ॥१॥

तेषामाविरभूद् ब्रह्मा परिम्लानमुखश्रियाम् ।
सरसां सुप्तपद्मानां प्रातर्दीधितिमानिव ॥२॥

अथ सर्वस्य धातारं ते सर्वे सर्वतोमुखम् ।
वागीशं वाग्भिरर्थ्याभिः प्रणिपत्योपतस्थिरे ॥३॥

नमस्त्रिमूर्तये तुभ्यं प्राक् सृष्टेः केवलात्मने ।
गुणत्रयविभागाय पश्चाद् भेदमुपेयुषे ॥४॥

यदमोघमपामन्तरुप्तं वीजमज त्वया ।
अतश्चराचरं विश्वं प्रभवस्तस्य गीयसे ॥५॥

तिसृभिस्त्वमवस्थाभिर्महिमानमुदीरयन् ।
प्रलयस्थितिसर्गाणामेकः कारणतां गतः ॥६॥

स्त्रीपुंसावात्मभागौ ते भिन्नमूर्तेः सिसृक्षया ।
प्रसूतिभाजः सर्गस्य तावेव पितरौ स्मृतौ ॥७॥

स्वकालपरिमाणेन व्यस्तरात्रिन्दिवस्य ते ।
यौ तु स्वप्नाववोधौ तौ भूतानां प्रलयोदयौ ॥८॥

जगद्योनिरयोनिस्त्वं जगदन्तो निरन्तकः ।
जगदादिरनादिस्त्वं जगदीशो निरीश्वरः ॥९॥

आत्मानमात्मना वेत्सि सृजस्यात्मानमात्मना ।
आत्मना कृतिना च त्वमात्मन्येव प्रलीयसे ॥१०॥

द्रवः संघातकठिनः स्थूलः सूक्ष्मो लघुर्गुरुः ।
व्यक्तो व्यक्तेतरश्चासि प्राकाम्यं ते विभूतिषु ॥११॥

उद्घातः प्रणवो यासां [1]न्यायैस्त्रिभिरुदीरणम् ।
कर्म यज्ञः फलं स्वर्गस्तासां त्वं प्रभवो गिराम् ॥१२॥

त्वामामनन्ति प्रकृतिं पुरुषार्थप्रवर्तिनीम् ।
तद्दर्शिनमुदासीनं त्वामेव पुरुषं विदुः ॥१३॥

त्वं पितृणामपि पिता देवानामपि देवता ।
परतोऽपि परश्चासि विधाता वेधसामपि ॥१४॥

त्वमेव हव्यं होता च भोज्यं भोक्ता च शाश्वतः ।
वेद्यं च वेदिता चासि ध्याता ध्येयं च यत् परम् ॥१५॥

इति तेभ्यः स्तुतीः श्रुत्वा यथार्था हृदयंगमाः ।
प्रसादाभिमुखो वेधाः प्रत्युवाच दिवौकसः ॥१६॥

पुराणस्य कवेस्तस्य चतुर्मुखसमीरिता ।
प्रवृत्तिरासीच्छब्दानां चरितार्था चतुष्टयी ॥१७॥

स्वागतं स्वानधीकारान् प्रभावैरवलम्ब्य वः ।
युगपद् युगबाहुभ्यः प्राप्तेभ्यः प्राज्यविक्रमाः ॥१८॥

किमिदं द्युतिमात्मीयां न बिभ्रति यथा पुरा ।
हिमक्लिष्टप्रकाशानि ज्योतींषीव मुखानि वः ॥१९॥

प्रशमादर्चिषामेत--दनुद्गीर्णसुरायुधम् ।
वृत्रस्य हन्तुः कुलिशं कुण्ठिताश्रीव लक्ष्यते ॥२०॥

किंचायमरिदुर्वारः पाणौ पाशः प्रचेतसः ।
मन्त्रेण हतवीर्यस्य फणिनो दैन्यमाश्रितः ॥२१॥

कुबेरस्य मनःशल्यं शंसतीव पराभवम् ।
अपविद्धगदो बाहुर्भग्नशाख इव द्रुमः ॥२२॥

यमोऽपि विलिखन् भूमिं दण्डेनास्तमितत्विषा ।
कुरुतेऽस्मि[2]न्नमोघेऽपि निर्वाणालातलाघवम् ॥२३॥

१. न्यायैरुदात्तानुदात्तस्वरितत्वैः । २. अस्मिन् दण्डे ।

अमी च कथमादित्याः प्रतापक्षतिशीतलाः ।
चित्रन्यस्ता इव गताः प्रकामालोकनीयताम् ॥२४॥

पर्याकुलत्वान्मरुतां वेगभङ्गोऽनुमीयते ।
अम्भसामोघसंरोधः प्रतीपगमनादिव ॥२५॥

आवर्जित-जटामौलि-विलम्बि-शशिकोटयः ।
रुद्राणामपि मूर्धानः क्षतहुंकारशंसिनः ॥२६॥

लब्धप्रतिष्ठाः प्रथमं यूयं किं बलवत्तरैः ।
अपवादैरिवोत्सर्गाः कृतव्यावृत्तयः परैः ॥२७॥

तद् ब्रूत वत्साः किमितः प्रार्थयध्वं समागताः ।
मयि सृष्टिर्हि लोकानां रक्षा युष्मास्ववस्थिता ॥२८॥

ततो मन्दानिलोद्धूत-कमलाकर-शोभिना ।
गुरुं नेत्रसहस्रेण चोदयामास वासवः ॥२९॥

स द्विनेत्रं हरेश्चक्षुः सहस्रनयनाधिकम् ।
वाचस्पतिरुवाचेदं प्राञ्जलिर्जलजासनम् ॥३०॥

एवं यदात्थ भगवन्नामृष्टं नः परैः पदम् ।
प्रत्येकं विनियुक्तात्मा कथं न ज्ञास्यसि प्रभो ॥३१॥

भवल्लब्धवरोदीर्णस्तारकाख्यो महासुरः ।
उपप्लवाय लोकानां धूमकेतुरिवोत्थितः ॥३२॥

पुरे तावन्तमेवास्य तनोति रविरातपम् ।
दीर्घिकाकमलोन्मेषो यावन्मात्रेण साध्यते ॥३३॥

सर्वाभिः सर्वदा चन्द्रस्तं कलाभिर्निषेवते ।
नादत्ते केवलां लेखां हरचूडामणीकृताम् ॥३४॥

व्यावृत्तगतिरुद्याने कुसुमस्तेयसाध्वसात् ।
न वाति वायुस्तत्पार्श्वे तालवृन्तानिलाधिकम् ॥३५॥

पर्यायसेवामुत्सृज्य पुष्पसंभारतत्पराः ।
उद्यानपाल—सामान्यमृतवस्तमुपासते ॥३६॥

तस्योपायनयोग्यानि रत्नानि सरितां पतिः ।
कथमप्यम्भसामन्त-रानिष्पत्तेः प्रतीक्षते ।।३७।।

ज्वलन्मणिशिखाश्चैनं वासुकिप्रमुखा निशि ।
स्थिरप्रदीपतामेत्य भुजङ्गाः पर्युपासते ।।३८।।

तत्कृतानुग्रहापेक्षी तं मुहुर्दूतहारितैः ।
अनुकूलयतीन्द्रोऽपि कल्पद्रुमविभूषणैः ।।३९।।

इत्थमाराध्यमानोऽपि क्लिश्नाति भुवनत्रयम् ।
शाम्येत् प्रत्यपकारेण नोपकारेण दुर्जनः ।।४०।।

तेनामरवधूहस्तैः सदयालूनपल्लवाः ।
अभिज्ञाश्छेदपातानां क्रियन्ते नन्दनद्रुमाः ।।४१।।

वीज्यते स हि संसुप्तः श्वाससाधारणानिलैः ।
चामरैः सुरवन्दीनां बाष्पसीकरवर्षिभिः ।।४२।।

उत्पाट्य मेरुशृङ्गाणि क्षुण्णानि हरितां खुरैः ।
आक्रीडपर्वतास्तेन कल्पिताः स्वेषु वेश्मसु ।।४३।।

मन्दाकिन्याः पयः शेषं दिग्वारणमदाविलम् ।
हेमाम्भोरुहसस्यानां तद्वाप्यो धाम सांप्रतम् ।।४४।।

भुवनालोकनप्रीतिः स्वर्गिभिर्नानुभूयते ।
खिलीभूते विमानानां तदापातभयात् पथि ।।४५।।

यज्वभिः संभृतं हव्यं विततेष्वध्वरेषु सः ।
जातवेदोमुखान्मायी मिषतामाच्छिनत्ति नः ।।४६।।

उच्चैरुच्चैःश्रवास्तेन हयरत्नमहारि च ।
देहबद्धमिवेन्द्रस्य चिरकालार्जितं यशः ।।४७।।

तस्मिन्नुपायाः सर्वे नः क्रूरे प्रतिहतक्रियाः ।
वीर्यवन्त्यौषधानीव विकारे सान्निपातिके ।।४८।।

जयाशा यत्र चास्माकं प्रतिघातोत्थितार्चिषा ।
हरिचक्रेण तेनास्य कण्ठे निष्कमिवार्पितम् ।।४९।।

तदीयास्तोयदेष्वद्य पुष्करावर्तकादिषु ।
अभ्यस्यन्ति तटाघातं निर्जितैरावता गजाः ॥५०॥

तदिच्छामो विभो स्रष्टुं सेनान्यं तस्य शान्तये ।
कर्मबन्धच्छिदं धर्मं भवस्येव मुमुक्षवः ॥५१॥

गोप्तारं सुरसैन्यानां यं पुरस्कृत्य गोत्रभित् ।
प्रत्यानेष्यति शत्रुभ्यो वन्दीमिव जयश्रियम् ॥५२॥

वचस्यवसिते तस्मिन् ससर्ज गिरमात्मभूः ।
गर्जितानन्तरां वृष्टिं सौभाग्येन जिगाय सा ॥५३॥

संपत्स्यते वः कामोऽयं कालः कश्चित् प्रतीक्ष्यताम् ।
न त्वस्य सिद्धौ यास्यामि सर्गव्यापारमात्मना ॥५४॥

इतः स दैत्यः प्राप्तश्रीर्नेत एवार्हति क्षयम् ।
विषवृक्षोऽपि संवर्ध्य स्वयं छेत्तुमसांप्रतम् ॥५५॥

वृतं तेनेदमेव प्राङ् मया चास्मै प्रतिश्रुतम् ।
वरेण शमितं लोकानलं दग्धुं हि तत्तपः ॥५६॥

संयुगे सांयुगीन तमुद्यतं प्रसहेत कः ।
अंशादृते निषिक्तस्य नीललोहितरेतसः ॥५७॥

स हि देवः परं ज्योतिस्तमःपारे व्यवस्थितम् ।
परिच्छिन्नप्रभावर्द्धिर्न मया न च विष्णुना ॥५८॥

उमारूपेण ये यूयं संयमस्तिमितं मनः ।
शम्भोर्यतध्वमाक्रष्टुमयस्कान्तेन लोहवत् ॥५९॥

उभे एव क्षमे वोढुमुभयोर्बीजमाहितम् ।
सा वा शम्भोस्तदीया वा मूर्तिर्जलमयी मम ॥६०॥

तस्यात्मा शितिकण्ठस्य सैनापत्यमुपेत्य वः ।
मोक्ष्यते सुरवन्दीनां वेणीर्वीर्यविभूतिभिः ॥६१॥

इति व्याहृत्य विबुधान् विश्वयोनिस्तिरोदधे ।
मनस्याहितकर्त्तव्यास्तेऽपि देवा दिवं ययुः ॥६२॥

तत्र निश्चित्य कन्दर्पमगमत् पाकशासनः ।
मनसा कार्यसंसिद्धौ त्वराद्विगुणरंहसा ॥६३॥

अथ स ललितयोषिद्भ्रूलताचारुशृङ्गं
रतिवलयपदाङ्के चापमासज्य कण्ठे ।
सहचरमधुहस्तन्यस्तचूताङ्कुरास्त्रः
शतमखमुपतस्थे प्राञ्जलिः पुष्पधन्वा ॥६४॥

॥ इति श्रीमहाकविकालिदासकृतौ कुमारसंभवे महाकाव्ये
मदनागमनो नाम द्वितीयः सर्गः ॥



तृतीयः सर्गः

तस्मिन् मघोनस्त्रिदशान् विहाय सहस्रमक्ष्णां युगपत् पपात ।
प्रयोजनापेक्षितया प्रभूणां प्रायश्चलं गौरवमाश्रितेषु ॥१॥

स वासवेनासनसंनिकृष्टमितो निषीदेति विसृष्टभूमिः ।
भर्तुः प्रसादं प्रतिनन्द्य मूर्ध्ना वक्तुं मिथः प्राक्रमतैवमेनम् ॥२॥

आज्ञापय ज्ञातविशेष पुंसां लोकेषु यत् ते करणीयमस्ति ।
अनुग्रहं संस्मरणप्रवृत्तमिच्छामि संवर्द्धितमाज्ञया ते ॥३॥

केनाभ्यसूया पदकाङ्क्षिणा ते नितान्तदीर्घैर्जनिता तपोभिः ।
यावद् भवत्याहितसायकस्य मत्कार्मुकस्यास्य निदेशवर्ती ॥४॥

असम्मतः कस्तव मुक्तिमार्गं पुनर्भवक्लेशभयात् प्रपन्नः ।
बद्धश्चिरं तिष्ठतु सुन्दरीणामारेचितभ्रूचतुरैः कटाक्षैः ॥५॥

अध्यापितस्योशनसापि नीतिं प्रयुक्तरागप्रणिधिर्द्विषस्ते ।
कस्यार्थधर्मौ वद पीडयामि सिन्धोस्तटावोघ इव प्रवृद्धः ॥६॥

कामेकपत्नीव्रतदुःखशीलां लोलं मनश्चारुतया प्रविष्टाम् ।
नितम्बिनीमिच्छसि मुक्तलज्जां कण्ठे स्वयंग्राहनिषक्तबाहुम् ॥७॥

कयासि कामिन् सरसापराधः पादानतः कोपनयावधूतः ।
तस्याः करिष्यामि दृढानुतापं प्रवालशय्याशरणं शरीरम् ॥८॥

प्रसीद विश्राम्यतु वीर वज्रं शरैर्मदीयैः कतमः सुरारिः ।
बिभेतु मोघीकृतबाहुवीर्यः स्त्रीभ्योऽपि कोपस्फुरिताऽधराभ्यः ॥९॥

तव प्रसादात् कुसुमायुधोऽपि सहायमेकं मधुमेव लब्ध्वा ।
कुर्यां हरस्यापि पिनाकपाणेर्धैर्यच्युतिं के मम धन्विनोऽन्ये ॥१०॥

अथोरुदेशादवतार्य पादमाक्रान्तिसंभावितपादपीठम् ।
संकल्पितेऽर्थे विवृतात्मशक्तिमाखण्डलः काममिदं बभाषे ॥११॥

सर्वं सखे त्वय्युपपन्नमेतदुभे ममास्त्रे कुलिशं भवाँश्च ।
वज्रं तपोवीर्यमहत्सु कुण्ठं त्वं सर्वतोगामि च साधकं च ॥१२॥

अवैमि ते सारमतः खलु त्वां कार्ये गुरुण्यात्मसमं नियोक्ष्ये ।
व्यादिश्यते भूधरतामवेक्ष्य कृष्णेन देहोद्धरणाय शेषः ॥१३॥

आशंसता बाणगतिं वृषाङ्के कार्यं त्वया नः प्रतिपन्नकल्पम् ।
निबोध यज्ञांशभजामिदानीमुच्चैर्द्विषामीप्सितमेतदेव ॥१४॥

अमी हि वीर्यप्रभवं भवस्य जयाय सेनान्यमुशन्ति देवाः ।
स च त्वदेकेषुनिपातसाध्यो ब्रह्माङ्गभूर्ब्रह्मणि योजितात्मा ॥१५॥

तस्मै हिमाद्रेः प्रयतां तनूजां यतात्मने रोचयितुं यतस्व ।
योषित्सु तद्वीर्यनिषेकभूमिः सैव क्षमेत्यात्मभुवोपदिष्टम् ॥१६॥

गुरोर्नियोगाच्च नगेन्द्रकन्या स्थाणुं तपस्यन्तमधित्यकायाम् ।
अन्वास्त इत्यप्सरसां मुखेभ्यः श्रुतं मया मत्प्रणिधिः स वर्गः ॥१७॥

तद्गच्छ सिद्ध्यै कुरु देवकार्यमर्थोऽयमर्थान्तरभाव्य एव ।
अपेक्षते [1]प्रत्ययमुत्तमं त्वां बीजाङ्कुरः प्रागुदयादिवाम्भः ॥१८॥

अस्मिन् सुराणां विजयाभ्युपाये तवैव नामास्त्रगतिः कृती त्वम् ।
अप्यप्रसिद्धं यशसे हि पुंसामनन्यसाधारणमेव कर्म ॥१९॥

सुराः समभ्यर्थयितार एते कार्यं त्रयाणामपि विष्टपानाम् ।
चापेन ते कर्म न चातिहिंस्रमहो बतासि स्पृहणीयवीर्यः[2] ॥२०॥

मधुश्च ते मन्मथ साहचर्यादसावनुक्तोऽपि सहाय एव ।
समीरणो नोदयिता भवेति व्यादिश्यते केन हुताशनस्य ॥२१॥

तथेति शेषा[3]मिव भर्तुराज्ञामादाय मूर्ध्ना मदनः प्रतस्थे ।
ऐरावतास्फालन-कर्कशेन हस्तेन पस्पर्श तदङ्गमिन्द्रः ॥२२॥

---

१. प्रत्ययः कारणम्, द्र० रघु० १०।३ बौद्ध-वाङ्मयं च ।

२. इतः परं साहित्याकादमीपुस्तके पद्यम्—
ततः स्फुरत्केसरलग्नभृङ्गं सौरभ्यसंक्रान्तदिगन्तरालम् ।
ददौ हरिः सादरमीक्षमाणो मन्दारमालां मकरध्वजाय ॥

३. शेषां प्रसाददत्तां मालाम् ।

स माधवेनाभिमतेन सख्या रत्या च साशङ्कमनुप्रयातः ।
अङ्गव्ययप्रार्थितकार्यसिद्धिः स्थाण्वाश्रमं हैमवतं जगाम ॥२३॥

तस्मिन् वने संयमिनां मुनीनां तपःसमाधेः प्रतिकूलवर्ती ।
संकल्पयोनेरभिमानभूतमात्मानमाधाय मधुर्जजृम्भे ॥२४॥

कुबेरगुप्तां दिशमुष्णरश्मौ गन्तुं प्रवृत्ते समयं विलङ्घ्य ।
दिग् दक्षिणा गन्धवहं मुखेन व्यलीकनिःश्वासमिवोत्ससर्ज ॥२५॥

असूत सद्यः कुसुमान्यशोकः स्कन्धात् प्रभृत्येव सपल्लवानि ।
पादेन नापैक्षत सुन्दरीणां संपर्कमासिञ्जितनूपुरेण ॥२६॥

सद्यः प्रवालोद्गमचारुपत्रे नीते समाप्तिं नवचूतबाणे ।
निवेशयामास मधुर्द्विरेफान्नामाक्षराणीव मनोभवस्य ॥२७॥

वर्णप्रकर्षे सति कर्णिकारं दुनोति निर्गन्धतया स्म चेतः ।
प्रायेण सामग्र्यविधौ गुणानां पराङ्मुखी विश्वसृजः प्रवृत्तिः ॥२८॥

बालेन्दुवक्राण्यविकासभावाद् बभुः पलाशान्यतिलोहितानि ।
सद्यो वसन्तेन समागतानां नखक्षतानीव वनस्थलीनाम् ॥२९॥

लग्नद्विरेफाञ्जनभक्तिचित्रं मुखे मधुश्रीस्तिलकं प्रकाश्य ।
रागेण बालारुणकोमलेन चूतप्रवालोष्ठमलंचकार ॥३०॥

मृगाः प्रियालद्रुममञ्जरीणां रजःकणैर्विघ्नितदृष्टिपाताः ।
मदोद्धताः प्रत्यनिलं विचेरुर्वनस्थलीर्मर्मरपत्रमोक्षाः ॥३१॥

चूताङ्कुरास्वादकषायकण्ठः पुंस्कोकिलो यन्मधुरं चुकूज ।
मनस्विनीमानविघातदक्षं तदेव जातं वचनं स्मरस्य ॥३२॥

हिमव्यपायाद् विशदाधराणामापाण्डुरीभूतमुखच्छवीनाम् ।
स्वेदोद्गमः किम्पुरुषाङ्गनानां चक्रे पदं पत्रविशेषकेषु ॥३३॥

तपस्विनः स्थाणुवनौकसस्तामाकालिकीं वीक्ष्य मधुप्रवृत्तिम् ।
प्रयत्नसंस्तम्भितविक्रियाणां कथंचिदीशा मनसां बभूवुः ॥३४॥

तं देशमारोपितपुष्पचापे रतिद्वितीये मदने प्रपन्ने ।
काष्ठागतस्नेहरसानुविद्धं द्वन्द्वानि भावं क्रियया विवव्रुः ॥३५॥

मधु द्विरेफः कुसुमैकपात्रे पपौ प्रियां स्वामनुवर्त्तमानः ।
शृङ्गेण च स्पर्शनिमीलिताक्षीं मृगीमकण्डूयत कृष्णशारः ॥३६॥

ददौ रसात् पङ्कजरेणुगन्धि गजाय गण्डूषजलं करेणुः ।
अर्द्धोपभुक्तेन बिसेन जायां संभावयामास रथाङ्गनामा ॥३७॥

गीतान्तरेषु श्रमवारिलेशैः किंचित्समुच्छ्वासितपत्रलेखम् ।
पुष्पासवाघूर्णितनेत्रशोभि प्रियामुखं किम्पुरुषश्चुचुम्बे ॥३८॥

पर्याप्तपुष्पस्तवकस्तनाभ्यः स्फुरत्प्रवालोष्ठमनोहराभ्यः ।
लतावधूभ्यस्तरवोऽप्यवापुर्विनम्रशाखाभुजबन्धनानि ॥३९॥

श्रुताप्सरोगीतिरपि क्षणेऽस्मिन् हरः प्रसंख्यानपरो बभूव ।
आत्मेश्वराणां नहि जातु विघ्नाः समाधिभेदप्रभवो भवन्ति ॥४०॥

लतागृहद्वारगतोऽथ नन्दी वामप्रकोष्ठार्पितहेमवेत्रः ।
मुखार्पितैकाङ्गुलिसंज्ञयैव मा चापलायेति गणान् व्यनैषीत् ॥४१॥

निष्कम्पवृक्षं निभृतद्विरेफं मूकाण्डजं शान्तमृगप्रचारम् ।
तच्छासनात् काननमेव सर्वं चित्रार्पितारम्भमिवावतस्थे ॥४२॥

दृष्टिप्रपातं परिहृत्य तस्य कामः पुरः शुक्रमिव प्रयाणे ।
प्रान्तेषु संसक्तनमेरुशाखं ध्यानास्पदं भूतपतेर्विवेश ॥४३॥

स देवदारुद्रुमवेदिकायां शार्दूलचर्मव्यवधानवत्याम् ।
आसीनमासन्नशरीरपातस्त्रियम्बकं संयमिनं ददर्श ॥४४॥

पर्यङ्कबन्धस्थिरपूर्वकायमृज्वायतं सन्नमितोभयांसम् ।
उत्तानपाणिद्वयसन्निवेशात् प्रफुल्लराजीवमिवाङ्कमध्ये ॥४५॥

भुजङ्गमोन्नद्धजटाकलापं कर्णावसक्तद्विगुणाक्षसूत्रम् ।
कण्ठप्रभासङ्गविशेषनीलां कृष्णत्वचं ग्रन्थिमतीं दधानम् ॥४६॥

किंचित्प्रकाशस्तिमितोग्रतारैर्भ्रूविक्रियायां विरतप्रसङ्गैः ।
नेत्रैरविस्पन्दितपक्ष्ममालैर्लक्ष्यीकृतघ्राणमधोमयूखैः ॥४७॥

अवृष्टिसंरम्भमिवाम्बुवाहमपामिवाधारमनुत्तरङ्गम् ।
अन्तश्चराणां मरुतां निरोधान्निवातनिष्कम्पमिव प्रदीपम् ॥४८॥

कपालनेत्रान्तरलब्धमार्गैर्ज्योतिःप्ररोहैरुदितैः शिरस्तः ।
मृणालसूत्राधिकसौकुमार्यां बालस्य लक्ष्मीं ग्लपयन्तमिन्दोः ॥४९॥

मनो नवद्वारनिषिद्धवृत्ति हृदि व्यवस्थाप्य समाधिवश्यम् ।
यमक्षरं क्षेत्रविदो विदुस्तमात्मानमात्मन्यवलोकयन्तम् ॥५०॥

स्मरस्तथाभूतमयुग्मनेत्रं पश्यन्नदूरान्मनसाप्यधृष्यम् ।
नालक्षयत् साध्वससन्नहस्तः स्रस्तं शरं चापमपि स्वहस्तात् ॥५१॥

निर्वाणभूयिष्ठमथास्य वीर्यं संधुक्षयन्तीव वपुर्गुणेन ।
अनुप्रयाता वनदेवताभ्यामदृश्यत स्थावरराजकन्या ॥५२॥

अशोकनिर्भर्त्सितपद्मरागमाकृष्टहेमद्युतिकर्णिकारम् ।
मुक्ताकलापीकृतसिन्दुवारं वसन्तपुष्पाभरणं वहन्ती ॥५३॥

आवर्जिता किंचिदिव स्तनाभ्यां वासो वसाना तरुणार्करागम् ।
पर्याप्तपुष्पस्तवकावनम्रा संचारिणी पल्लविनी लतेव ॥५४॥

स्रस्तां नितम्बादवलम्बमाना पुनः पुनः केसरदामकाञ्चीम् ।
न्यासीकृतां स्थानविदा स्मरेण द्वितीयमौर्वीमिव कार्मुकस्य ॥५५॥

सुगन्धिनिश्वासविवृद्धतृष्णं बिम्बाधरासन्नचरं द्विरेफम् ।
प्रतिक्षणं संभ्रमलोलदृष्टिर्लीलारविन्देन निवारयन्ती ॥५६॥

तां वीक्ष्य सर्वावयवानवद्यां रतेरपि ह्रीपदमादधानाम् ।
जितेन्द्रिये शूलिनि पुष्पचापः स्वकार्यसिद्धिं पुनराशशंसे ॥५७॥

भविष्यतः पत्युरुमा च शम्भोः समाससाद प्रतिहारभूमिम् ।
योगात् स चान्तः परमात्मसंज्ञं दृष्ट्वा परं ज्योतिरुपारराम ॥५८॥

ततो भुजङ्गाधिपतेः फणाग्रैरधः कथंचिद्धृतभूमिभागः ।
शनैः कृतप्राणविमुक्तिरीशः पर्यङ्कबन्धं निबिडं बिभेद ॥५९॥

तस्मै शशंस प्रणिपत्य नन्दी शुश्रूषया शैलसुतामुपेताम् ।
प्रवेशयामास च भर्तुरेनां भ्रूक्षेपमात्रानुमतप्रवेशाम् ॥६०॥

तस्याः सखीभ्यां प्रणिपातपूर्वं स्वहस्तलूनः शिशिरात्ययस्य ।
व्यकीर्यत त्र्यम्बकपादमूले पुष्पोच्चयः पल्लवभङ्गभिन्नः ॥६१॥

उमापि नीलालकमध्यशोभि विस्रंसयन्ती नवकर्णिकारम् ।
चकार कर्णच्युतपल्लवेन मूर्ध्ना प्रणामं वृषभध्वजाय ॥६२॥

अनन्यभाजं पतिमाप्नुहीति सा तथ्यमेवाभिहिता भवेन ।
न ह्रीश्वरव्याहृतयः कदाचित् पुष्णन्ति लोके विपरीतमर्थम् ॥६३॥

कामस्तु बाणावसरं प्रतीक्ष्य पतङ्गवद् वह्निमुखं विविक्षुः ।
उमासमक्षं हरबद्धलक्ष्यः शरासनज्यां मुहुराममर्श ॥६४॥

अथोपनिन्ये गिरिशाय गौरी तपस्विने ताम्ररुचा करेण ।
विशोषितां भानुमतो मयूखैर्मन्दाकिनीपुष्करवीजमालाम् ॥६५॥

प्रतिग्रहीतुं प्रणयिप्रियत्वात् त्रिलोचनस्तामुपचक्रमे च ।
संमोहनं नाम च पुष्पधन्वा धनुष्यमोघं समधत्त बाणम् ॥६६॥

हरस्तु किंचित्परिलुप्तधैर्यश्चन्द्रोदयारम्भ इवाम्बुराशिः ।
उमामुखे बिम्बफलाधरोष्ठे व्यापारयामास विलोचनानि ॥६७॥

विवृण्वती शैलसुतापि भावमङ्गैः स्फुरद्वालकदम्बकल्पैः ।
साचीकृता चारुतरेण तस्थौ मुखेन पर्यस्तविलोचनेन ॥६८॥

अथेन्द्रियक्षोभमयुग्मनेत्रः पुनर्वशित्वाद् बलवन्निगृह्य ।
हेतुं स्वचेतोविकृतेर्दिदृक्षुर्दिशामुपान्तेषु ससर्ज दष्टिम् ॥६९॥

स दक्षिणापाङ्गनिविष्टमुष्टिं नतांसमाकुञ्चितसव्यपादम् ।
ददर्श चक्रीकृतचारुचापं प्रहर्त्तुमभ्युद्यतमात्मयोनिम् ॥७०॥

तपःपरामर्शविवृद्धमन्योर्भ्रूभङ्गदुष्प्रेक्ष्यमुखस्य तस्य ।
स्फुरन्नुदर्चिः सहसा तृतीयादक्ष्णः कृशानुः किल निष्पपात ॥७१॥

क्रोधं प्रभो संहर संहरेति यावद् गिरः खे मरुतां चरन्ति ।
तावत् स वह्निर्भवनेत्रजन्मा भस्मावशेषं मदनं चकार ॥७२॥

तीव्राभिषङ्गप्रभवेण वृत्तिं मोहेन संस्तम्भयतेन्द्रियाणाम् ।
अज्ञातभर्तृव्यसना मुहूर्तं कृतोपकारेव रतिर्बभूव ॥७३॥

तमाशु विघ्नं तपसस्तपस्वी वनस्पतिं वज्र इवावभज्य ।
स्त्रीसंनिकर्षं परिहर्तुमिच्छन्नन्तर्दधे भूतपतिः सभूतः ॥७४॥

शैलात्मजापि पितुरुच्छिरसोऽभिलाषं
व्यर्थं समर्थ्य ललितं वपुरात्मनश्च ।
सख्योः समक्षमिति चाधिकजातलज्जा
शून्या जगाम भवनाभिमुखी कथंचित् ॥७५॥

सपदि मुकुलिताक्षीं रुद्रसंरम्भभीत्या
दुहितरमनुकम्प्यामद्रिरादाय दोर्भ्याम् ।
सुरगज इव बिभ्रत् पद्मिनीं दन्तलग्नां
प्रतिपथगतिरासीद् वेगदीर्घीकृताङ्गः ॥७६॥

॥ इति श्रीमहाकविकालिदासकृतौ कुमारसंभवे महाकाव्ये
मदनदहनो नाम तृतीयः सर्गः ॥



चतुर्थः सर्गः

अथ मोहपरायणा सती विवशा कामवधूर्विवोधिता ।
विधिना प्रतिपादयिष्यता नववैधव्यमसह्यवेदनम् ॥१॥

अवधानपरे चकार सा प्रलयान्तोन्मिषिते विलोचने ।
न विवेद तयोरतृप्तयोः प्रियमत्यन्तविलुप्तदर्शनम् ॥२॥

अयि जीवितनाथ जीवसीत्यभिधायोत्थितया तया पुरः ।
ददृशे पुरुषाकृति क्षितौ हरकोपानलभस्म केवलम् ॥३॥

अथ सा पुनरेव विह्वला वसुधालिङ्गनधूसरस्तनी ।
विललाप विकीर्णमूर्धजा समदुःखामिव कुर्वती स्थलीम् ॥४॥

उपमानमभूद् विलासिनां करणं यत् तव कान्तिमत्तया ।
तदिदं गतमीदृशीं दशां न विदीर्ये कठिनाः खलु स्त्रियः ॥५॥

क्व नु मां त्वदधीनजीवितां विनिकीर्य क्षणभिन्नसौहृदः ।
नलिनीं क्षतसेतुबन्धनो जलसंघात इवासि विद्रुतः ॥६॥

कृतवानसि विप्रियं न मे प्रतिकूलं न च ते मया कृतम् ।
किमकारणमेव दर्शनं विलपन्त्यै रतये न दीयते ॥७॥

स्मरसि स्मरमेखलागुणैरुत गोत्रस्खलितेषु बन्धनम् ।
च्युत-केशर-दूषितेक्षणान्यवतंसोत्पल-ताडनानि वा ॥८॥

हृदये वसतीति मत्प्रियं यदवोचस्तदवैमि कैतवम् ।
उपचारपदं न चेदिदं त्वमनङ्गः कथमक्षता रतिः ॥९॥

परलोक-नवप्रवासिनः प्रतिपत्स्ये पदवीमहं तव ।
विधिना जन एष वञ्चितस्त्वदधीनं खलु देहिनां सुखम् ॥१०॥

रजनी-तिमिरावगुण्ठिते पुरमार्गे घनशब्दविक्लवाः ।
वसतिं प्रिय कामिनां प्रियास्त्वदृते प्रापयितुं क ईश्वरः ॥११॥

नयनान्यरुणानि घूर्णयन् वचनानि स्खलयन् पदे पदे ।
असति त्वयि वारुणीमदः प्रमदानामधुना विडम्बना ॥१२॥

अवगम्य कथीकृतं वपुः प्रियबन्धोस्तव निष्फलोदयः ।
बहुलेऽपि गते निशाकरस्तनुतां दुःखमनङ्ग मोक्ष्यति ॥१३॥

हरितारुणचारुबन्धनः कलपुंस्कोकिलशब्दसूचितः ।
वद संप्रति कस्य बाणतां नवचूतप्रसवो गमिष्यति ॥१४॥

अलिपङ्क्तिरनेकशस्त्वया गुणकृत्ये धनुषो नियोजिता ।
विरुतैः करुणस्वनैरियं गुरुशोकामनुरोदितीव माम् ॥१५॥

प्रतिपद्य मनोहरं वपुः पुनरप्यादिश तावदुत्थितः ।
रतिदूतिपदेषु कोकिलां मधुरालापनिसर्गपण्डिताम् ॥१६॥

शिरसा प्रणिपत्य याचितान्युपगूढानि सवेपथूनि च ।
सुरतानि च तानि ते रहः स्मर संस्मृत्य न शान्तिरस्ति मे ॥१७॥

रचितं रतिपण्डित त्वया स्वयमङ्गेषु ममेदमार्तवम् ।
ध्रियते कुसुमप्रसाधनं तव तच्चारु वपुर्न दृश्यते ॥१८॥

विबुधैरसि यस्य दारुणैरसमाप्ते परिकर्मणि स्मृतः ।
तमिमं कुरु दक्षिणेतरं चरणं निर्मितरागमेहि मे ॥१९॥

अहमेत्य पतङ्गवर्त्मना पुनरङ्काश्रयिणी भवामि ते ।
चतुरैः सुरकामिनीजनैः प्रिय यावन्न विलोभ्यसे दिवि ॥२०॥

मदनेन विनाकृता रतिः क्षणमात्रं किल जीवितेति मे ।
वचनीयमिदं व्यवस्थितं रमण त्वामनुयामि यद्यपि ॥२१॥

क्रियतां कथमन्त्यमण्डनं परलोकान्तरितस्य ते मया ।
सममेव गतोऽस्यतर्कितां गतिमङ्गेन च जीवितेन च ॥२२॥

ऋजुतां नयतः स्मरामि ते शरमुत्सङ्गनिषण्णधन्वनः ।
मधुना सह सस्मितां कथां नयनोपान्तविलोकितं च तत् ॥२३॥

क्व नु ते हृदयङ्गमः सखा कुसुमायोजितकार्मुको मधुः ।
न खलूग्ररुषा पिनाकिना गमितः सोऽपि सुहृद्गतां गतिम् ॥२४॥

अथ तैः परिदेविताक्षरैर्हृदये दिग्धशरैरिवाहतः ।
रतिमभ्युपपत्तुमातुरां मधुरात्मानमदर्शयत् पुरः ॥२५॥

तमवेक्ष्य रुरोद सा भृशं स्तनसंबाधमुरो जघान च ।
स्वजनस्य हि दुःखमग्रतो विवृतद्वारमिवोपजायते ॥२६॥

इति चैनमुवाच दुःखिता सुहृदः पश्य वसन्त किं स्थितम् ।
तदिदं कणशो विकीर्यते पवनैर्भस्म कपोतकर्बुरम् ॥२७॥

अयि संप्रति देहि दर्शनं स्मर पर्युत्सुक एष माधवः ।
दयितास्वनवस्थितं नृणां न खलु प्रेम चलं सुहृज्जने ॥२८॥

अमुना ननु पार्श्ववर्तिना जगदाज्ञां ससुरासुरं तव ।
बिसतन्तुगुणस्य कारितं धनुषः पेलवपुष्पपत्त्रिणः ॥२९॥

गत एव न ते निवर्त्तते स सखा दीप इवानिलाहतः ।
अहमस्य दशेव पश्य मामविषह्यव्यसनेन धूमिताम् ॥३०॥

विधिना कृतमर्द्धवैशसं ननु मां कामवधे विमुञ्चता ।
अनपायिनि संश्रयद्रुमे गजभग्ने पतनाय वल्लरी ॥३१॥

तदिदं क्रियतामनन्तरं भवता बन्धुजनप्रयोजनम् ।
विधुरां ज्वलनातिसर्जनान्ननु मां प्रापय पत्युरन्तिकम् ॥३२॥

शशिना सह याति कौमुदी सह मेघेन तडित् प्रलीयते ।
प्रमदाः पतिवर्त्मगा इति प्रतिपन्नं हि विचेतनैरपि ॥३३॥

अमुनैव कषायितस्तनी सुभगेन प्रियगात्रभस्मना ।
नवपल्लवसंस्तरे यथा रचयिष्यामि तनुं विभावसौ ॥३४॥

कुसुमास्तरणे सहायतां बहुशः सौम्य गतस्त्वमावयोः ।
कुरु संप्रति तावदाशु मे प्रणिपाताञ्जलियाचितश्चिताम् ॥३५॥

तदनु ज्वलनं मदर्पितं त्वरयेर्दक्षिणवातवीजनैः ।
विदितं खलु ते यथा स्मरः क्षणमप्युत्सहते न मां विना ॥३६॥

इति चापि विधाय दीयतां सलिलस्याञ्जलिरेक एव नौ ।
अविभज्य परत्र तं मया सहितः पास्यति ते स बान्धवः ॥३७॥

परलोकविधौ च माधव स्मरमुद्दिश्य विलोलपल्लवाः ।
निवपेः सहकारमञ्जरीः प्रियचूतप्रसवो हि ते सखा ॥३८॥

इति देहविमुक्तये स्थितां रतिमाकाशभवा सरस्वती ।
शफरीं ह्रदशोषविक्लवां प्रथमा वृष्टिरिवान्वकम्पयत् ॥३९॥

कुसुमायुधपत्नि दुर्लभस्तव भर्ता नचिराद् भविष्यति ।
शृणु येन स कर्मणा गतः शलभत्वं हरलोचनार्चिषि ॥४०॥

अभिलाषमुदीरितेन्द्रियः स्वसुतायामकरोत् प्रजापतिः ।
अथ तेन निगृह्य विक्रियामभिशप्तः फलमेतदन्वभूत् ॥४१॥

परिणेष्यति पार्वतीं यदा तपसा तत्प्रवणीकृतो हरः ।
उपलब्धसुखस्तदा स्मरं वपुषा स्वेन नियोजयिष्यति ॥४२॥

इति चाह स धर्मयाचितः स्मरशापावधिदां सरस्वतीम् ।
अशनेरमृतस्य चोभयोर्वशिनश्चाम्बुधराश्च योनयः ॥४३॥

तदिदं परिरक्ष शोभने भवितव्यप्रियसंगमं वपुः ।
रविपीतजला तपात्यये पुनरोघेन हि युज्यते नदी ॥४४॥

इत्थं रतेः किमपि भूतमदृश्यरूपं
मन्दीचकार मरणव्यवसायबुद्धिम् ।
तत्प्रत्ययाच्च कुसुमायुधबन्धुरेना-
माश्वासयत् सुचरितार्थपदैर्वचोभिः ॥४५॥

अथ मदनवधूरुपप्लवान्तं
व्यसनकृशा परिपालयांबभूव ।
शशिन इव दिवातनस्य लेखा
किरणपरिक्षयधूसरा प्रदोषम् ॥४६॥

॥ इति श्रीमहाकविकालिदासकृतौ कुमारसंभवे महाकाव्ये
रतिविलापो नाम चतुर्थः सर्गः ॥

पञ्चमः सर्गः

तथा समक्षं दहता मनोभवं पिनाकिना भग्नमनोरथा सती ।
निनिन्द रूपं हृदयेन पार्वती [1]प्रियेषु सौभाग्यफला हि चारुता ॥१॥

इयेष सा कर्तुमवन्ध्यरूपतां समाधिमास्थाय तपोभिरात्मनः ।
अवाप्यते वा कथमन्यथा द्वयं तथाविधं प्रेम पतिश्च तादृशः ॥२॥

निशम्य चैनां तपसे कृतोद्यमां सुतां गिरीशप्रतिसक्तमानसाम् ।
उवाच मेना परिरभ्य वक्षसा निवारयन्ती महतो मुनिव्रतात् ॥३॥

मनीषिताः सन्ति गृहेषु देवतास्तपः क्व वत्से क्व च तावकं वपुः ।
पदं सहेत भ्रमरस्य पेलवं शिरीषपुष्पं न पुनः पतत्त्रिणः ॥४॥

इति ध्रुवेच्छामनुशासती सुतां शशाक मेना न नियन्तुमुद्यमात् ।
क ईप्सितार्थस्थिरनिश्चयं मनः पयश्च निम्नाभिमुखं प्रतीपयेत् ॥५॥

कदाचिदासन्नसखीमुखेन सा मनोरथज्ञं पितरं मनस्विनी ।
अयाचतारण्यनिवासमात्मनः फलोदयान्ताय तपःसमाधये ॥६॥

अथानुरूपाभिनिवेशतोषिणा कृताभ्यनुज्ञा गुरुणा गरीयसा ।
प्रजासु पश्चात् प्रथितं तदाख्यया जगाम गौरी शिखरं शिखण्डिमत् ॥७॥

विमुच्य सा हारमहार्यनिश्चया विलोलयष्टिप्रविलुप्तचन्दनम् ।
बबन्ध बालारुणबभ्रु वल्कलं पयोधरोत्सेधविशीर्णसंहति ॥८॥

यथा [2]प्रसिद्धैर्मधुरं शिरोरुहैर्जटाभिरप्येवमभूत् तदाननम् ।
न षट्पदश्रेणिभिरेव पङ्कजं सशैवलासङ्गमपि प्रकाशते ॥९॥

प्रतिक्षणं सा कृतरोमविक्रियां व्रताय मौञ्जीं त्रिगुणां बभार याम् ।
अकारि तत्पूर्वनिबद्धया तया सरागमस्या रसनागुणास्पदम् ॥१०॥

---

१. 'पुमान् स्त्रियै'त्येकशेषः ।   २. प्रसिद्धैर्भूषितैः । द्र० रघु० १८।४१

विसृष्टरागादधरान्निवर्तितः स्तनाङ्गरागारुणिताच्च कन्दुकात् ।
कुशाङ्कुरादानपरिक्षताङ्गुलिः कृतोऽक्षसूत्रप्रणयी तया करः ।।११।।

महार्हशय्यापरिवर्तनच्युतैः स्वकेशपुष्पैरपि या स्म दूयते ।
अशेत सा बाहुलतोपधायिनी निषेदुषी स्थण्डिल एव केवले ।।१२।।

पुनर्ग्रहीतुं नियमस्थया तया द्वयेऽपि निक्षेप इवार्पितं द्वयम् ।
लतासु तन्वीषु विलासचेष्टितं विलोलदृष्टं हरिणाङ्गनासु च ।।१३।।

अतन्द्रिता सा स्वयमेव वृक्षकान् घटस्तनप्रस्रवणैर्व्यवर्धयत् ।
गुहोऽपि येषां प्रथमाप्तजन्मनां न पुत्रवात्सल्यमपाकरिष्यति ।।१४।।

अरण्यबीजाञ्जलिदानलालितास्तथा च तस्यां हरिणा विशश्वसुः ।
यथा तदीयैर्नयनैः कुतूहलात् पुरः सखीनाममिमीत लोचने ।।१५।।

कृताभिषेकां हुतजातवेदसं त्वगुत्तरासङ्गवतीमधीतिनीम् ।
दिदृक्षवस्तामृषयोऽभ्युपागमन् न धर्मवृद्धेषु वयः समीक्ष्यते ।।१६।।

विरोधिसत्त्वोज्झितपूर्वमत्सरं द्रुमैरभीष्टप्रसवार्चितातिथि ।
नवोटजाभ्यन्तरसंभृतानलं तपोवनं तच्च बभूव पावनम् ।।१७।।

यदा फलं पूर्वतपःसमाधिना न तावता लभ्यममंस्त काङ्क्षितम् ।
तदानपेक्ष्य स्वशरीरमार्दवं तपो महत् सा चरितुं प्रचक्रमे ।।१८।।

क्लमं ययौ कन्दुकलीलयापि या तया मुनीनां चरितं व्यगाह्यत ।
ध्रुवं वपुः काञ्चनपद्मनिर्मितं मृदु प्रकृत्या च ससारमेव च ।।१९।।

शुचौ चतुर्णां ज्वलतां हविर्भुजां शुचिस्मिता मध्यगता सुमध्यमा ।
विजित्य नेत्रप्रतिघातिनीं प्रभामनन्यदृष्टिः सवितारमैक्षत ।।२०।।

तथातितप्तं सवितुर्गभस्तिभिर्मुखं तदीयं कमलश्रियं दधौ ।
अपाङ्गयोः केवलमस्य दीर्घयोः शनैः शनैः श्यामिकया कृतं पदम् ।।२१।।

अयाचितोपस्थितमम्बु केवलं रसात्मकस्योडुपतेश्च रश्मयः ।
बभूव तस्याः किल पारणाविधिर्न वृक्षवृत्तिव्यतिरिक्तसाधनः ।।२२।।

निकामतप्ता विविधेन वह्निना नभश्चरेणेन्धनसंभृतेन च ।
तपात्यये वारिभिरुक्षिता नवैर्भुवा सहोष्माणममुञ्चदूर्ध्वगम् ।।२३।।

स्थिताः क्षणं पक्ष्मसु ताडिताधराः पयोधरोत्सेधनिपातचूर्णिताः ।
वलीषु तस्याः स्खलिताः प्रपेदिरे चिरेण नाभिं प्रथमोदबिन्दवः ॥२४॥

शिलाशयां तामनिकेतवासिनीं निरन्तरास्वन्तरवातवृष्टिषु ।
व्यलोकयन्नुन्मिषितैस्तडिन्मयैर्महातपःसाक्ष्य इव स्थिताः क्षपाः ॥२५॥

निनाय सात्यन्तहिमोत्किरानिलाः सहस्यरात्रीरुदवासतत्परा ।
परस्पराक्रन्दिनि चक्रवाकयोः पुरो वियुक्ते मिथुने कृपावती ॥२६॥

मुखेन सा पद्मसुगन्धिना निशि प्रवेपमानाधरपत्रशोभिना ।
तुषारवृष्टिक्षतपद्मसंपदां सरोजसन्धानमिवाकरोदपाम् ॥२७॥

स्वयं-विशीर्णद्रुमपर्णवृत्तिता परा हि काष्ठा तपसस्तया पुनः ।
तदप्यपाकीर्णमतः प्रियम्वदां वदन्त्यपर्णेति च तां पुराविदः ॥२८॥

मृणालिकापेलवमेवमादिभिर्व्रतैः स्वमङ्गं ग्लपयन्त्यहर्निशम् ।
तपः शरीरैः कठिनैरुपार्जितं तपस्विनां दूरमधश्चकार सा ॥२९॥

अथाजिनाषाढधरः प्रगल्भवाग् ज्वलन्निव ब्रह्ममयेन तेजसा ।
विवेश कश्चिज्जटिलस्तपोवनं शरीरबद्धः प्रथमाश्रमो यथा ॥३०॥

तमातिथेयी बहुमानपूर्वया सपर्यया प्रत्युदियाय पार्वती ।
भवन्ति साम्येऽपि निविष्टचेतसां वपुर्विशेषेष्वतिगौरवाः क्रियाः ॥३१॥

विधिप्रयुक्तां परिगृह्य सत्क्रियां परिश्रमं नाम विनीय च क्षणम् ।
उमां स पश्यन्नृजुनैव चक्षुषा प्रचक्रमे वक्तुमनुज्झितक्रमः ॥३२॥

अपि क्रियार्थं सुलभं समित्कुशं जलान्यपि स्नानविधिक्षमाणि ते ।
अपि स्वशक्त्या तपसि प्रवर्तसे शरीरमाद्यं खलु धर्मसाधनम् ॥३३॥

अपि त्वदावर्जितवारिसंभृतं प्रवालमासामनुबन्धि वीरुधाम् ।
चिरोज्झितालक्तकपाटलेन ते तुलां यदारोहति दन्तवाससा ॥३४॥

अपि प्रसन्नं हरिणेषु ते मनः करस्थदर्भप्रणयापहारिषु ।
य उत्पलाक्षि प्रचलैर्विलोचनैस्तवाक्षिसादृश्यमिव प्रयुञ्जते ॥३५॥

यदुच्यते पार्वति पापवृत्तये न रूपमित्यव्यभिचारि तद् वचः ।
तथाहि ते शीलमुदारदर्शने तपस्विनामप्युपदेशतां गतम् ॥३६॥

विकीर्णसप्तर्षिबलिप्रहासिभिस्तथा न गाङ्गैः सलिलैर्दिवश्च्युतैः ।
यथा त्वदीयैश्चरितैरनाविलैर्महीधरः पावित एष सान्वयः ॥३७॥

अनेन धर्मः सविशेषमद्य मे त्रिवर्गसारः प्रतिभाति भाविनि ।
त्वया मनोनिर्विषयार्थकामया यदेक एव प्रतिगृह्य सेव्यते ॥३८॥

प्रयुक्तसत्कारविशेषमात्मना न मां परं संप्रतिपत्तुमर्हसि ।
यतः सतां सन्नतगात्रि संगतं मनोषिभिः साप्तपदीनमुच्यते ॥३९॥

अतोऽत्र किंचिद् भवतीं बहुक्षमां द्विजातिभावादुपपन्नचापलः ।
अयं जनः प्रष्टुमनास्तपोधने न चेद् रहस्यं प्रतिवक्तुमर्हसि ॥४०॥

कुले प्रसूतिः प्रथमस्य वेधसस्त्रिलोकसौन्दर्यमिवोदितं वपुः ।
अमृग्यमैश्वर्यसुखं नवं वयस्तपःफलं स्यात् किमतः परं वद ॥४१॥

भवत्यनिष्टादपि नाम दुःसहान्मनस्विनीनां प्रतिपत्तिरीदृशी ।
विचारमार्गप्रहितेन चेतसा न दृश्यते तच्च कृशोदरि त्वयि ॥४२॥

अलभ्यशोकाभिभवेयमाकृतिर्विमानना सुभ्रु कुतः पितुर्गृहे ।
पराभिमर्शो न तवास्ति कः करं प्रसारयेत् पन्नगरत्नसूचये ॥४३॥

किमित्यपास्याभरणानि यौवने धृतं त्वया वार्द्धकशोभि वल्कलम् ।
वद प्रदोषे स्फुटचन्द्रतारका विभावरी यद्यरुणाय कल्पते ॥४४॥

दिवं यदि प्रार्थयसे वृथा श्रमः पितुः प्रदेशास्तव देवभूमयः ।
अथोपयन्तारमलं समाधिना न रत्नमन्विष्यति मृग्यते हि तत् ॥४५॥

निवेदितं निश्वसितेन सोष्मणा मनस्तु मे संशयमेव गाहते ।
न दृश्यते प्रार्थयितव्य एव ते भविष्यति प्रार्थितदुर्लभः कथम् ॥४६॥

अहो स्थिरः कोऽपि तवेप्सितो युवा चिराय कर्णोत्पलशून्यतां गते ।
उपेक्षते यः श्लथलम्बिनीर्जटाः कपोलदेशे कलमाग्रपिङ्गलाः ॥४७॥

मुनिव्रतैस्त्वामतिमात्रकर्शितां दिवाकरप्लुष्टविभूषणास्पदाम् ।
शशाङ्कलेखामिव पश्यतो दिवा सचेतसः कस्य मनो न दूयते ॥४८॥

अवैमि सौभाग्यमदेन वञ्चितं तव प्रियं यश्चतुरावलोकिनः ।
करोति लक्ष्यं रविमस्य चक्षुषो न वक्त्रमात्मीयमरालपक्ष्मणः ॥४९॥

क्रियच्चिरं श्राम्यसि गौरि विद्यते ममापि पूर्वाश्रमसंचितं तपः ।
तदर्द्धभागेन लभस्व काङ्क्षितं वरं तमिच्छामि च साधु वेदितुम् ॥५०॥

इति प्रविश्याभिहिता द्विजन्मना मनोगतं सा न शशाक शंसितुम् ।
अथो वयस्यां परिपार्श्ववर्तिनीं विवर्तितानञ्जननेत्रमैक्षत ॥५१॥

सखी तदीया तमुवाच वर्णिनं निबोध साधो तव चेत् कुतूहलम् ।
यदर्थमम्भोजमिवोष्णवारणं कृतं तपः साधनमेतया वपुः ॥५२॥

इयं महेन्द्रप्रभृतीनधिश्रियश्चतुर्दिगीशानवमत्य मानिनी ।
अरूपहार्यं मदनस्य निग्रहात् पिनाकपाणिं पतिमाप्तुमिच्छति ॥५३॥

असह्यहुंकारनिवर्तितः पुरा पुरारिमप्राप्तमुखः शिलीमुखः ।
इमां हृदि व्यायतपातमक्षणोद् विशीर्णमूर्तेरपि पुष्पधन्वनः ॥५४॥

तदाप्रभृत्युन्मदना पितुर्गृहे ललाटिकाचन्दनधूसरालका ।
न जातु बाला लभते स्म निर्वृतिं तुषारसंघातशिलातलेष्वपि ॥५५॥

उपात्तवर्णे चरिते पिनाकिनः सबाष्पकण्ठस्खलितैः पदैरियम् ।
अनेकशः किन्नरराजकन्यका वनान्तसंगीतसखीररोदयत् ॥५६॥

त्रिभागशेषासु निशासु च क्षणं निमील्य नेत्रे सहसा व्यबुध्यत ।
क्व नीलकण्ठ व्रजसीत्यलक्ष्यवागसत्यकण्ठार्पितबाहुबन्धना ॥५७॥

यदा बुधैः सर्वगतस्त्वमुच्यसे न वेत्सि भावस्थमिमं जनं कथम् ।
इति स्वहस्तोल्लिखितश्च मुग्धया रहस्युपालभ्यत चन्द्रशेखरः ॥५८॥

यदा च तस्याधिगमे जगत्पतेरपश्यदन्यं न विधिं विचिन्वती ।
तदा सहास्माभिरनुज्ञया गुरोरियं प्रपन्ना तपसे तपोवनम् ॥५९॥

द्रुमेषु सख्या कृतजन्मसु स्वयं फलं तपःसाक्षिषु दृष्टमेष्वपि ।
न च प्ररोहाभिमुखोऽपि दृश्यते मनोरथोऽस्याः शशिमौलिसंश्रयः ॥६०॥

न वेद्मि स प्रार्थितदुर्लभः कदा सखीभिरस्रोत्तरमीक्षितामिमाम् ।
तपःकृशामभ्युपपत्स्यते सखीं वृषेव सीतां तदवग्रहक्षताम् ॥६१॥

अगूढसद्भावमितीङ्गितज्ञया निवेदितो नैष्ठिकसुन्दरस्तया ।
अयीदमेवं परिहास इत्युमामपृच्छदव्यञ्जितहर्षलक्षणः ॥६२॥

अथाग्रहस्ते मुकुलीकृताङ्गुलौ समर्पयन्ती स्फटिकाक्षमालिकाम् ।
कथञ्चिदद्रेस्तनया मिताक्षरं चिरव्यवस्थापितवागभाषत ।।६३।।

यथा श्रुतं वेदविदां वर त्वया जनोऽयमुच्चैः पद-लङ्घनोत्सुकः ।
तपः किलेदं तदवाप्तिसाधनं मनोरथानामगतिर्न विद्यते ।।६४।।

अथाह वर्णी विदितो महेश्वरस्तदर्थिनी त्वं पुनरेव वर्तसे ।
अमङ्गलाभ्यासरतिं विचिन्त्य तं तवानुवृत्तिं न च कर्तुमुत्सहे ।।६५।।

अवस्तुनिर्बन्धपरे कथं नु ते करोऽयमामुक्तविवाहकौतुकः ।
करेण शम्भोर्वलयीकृताहिना सहिष्यते तत्प्रथमावलम्बनम् ।।६६।।

त्वमेव तावत् परिचिन्तय स्वयं कदाचिदेते यदि योगमर्हतः ।
वधूदुकूलं कलहंसलक्षणं गजाजिनं शोणितबिन्दुवर्षि च ।।६७।।

चतुष्कपुष्पप्रकरावकीर्णयोः परोऽपि को नाम तवानुमन्यते ।
अलक्तकाङ्कानि पदानि पादयोर्विकीर्णकेशासु परेतभूमिषु ।।६८।।

अयुक्तरूपं किमतः परं वद त्रिनेत्रवक्षःसुलभं तवापि यत् ।
स्तनद्वयेऽस्मिन् हरिचन्दनाङ्किते पदं चिताभस्मरजः करिष्यति ।।६९।।

इयं च तेऽन्या पुरतो विडम्बना यदूढया वारणराजहार्यया ।
विलोक्य वृद्धोक्षमधिष्ठितं त्वया महाजनः स्मेरमुखो भविष्यति ।।७०।।

द्वयं गतं संप्रति शोचनीयतां समागमप्रार्थनया पिनाकिनः ।
कला च सा कान्तिमती कलावतस्त्वमस्य लोकस्य च नेत्रकौमुदी ।।७१।।

वपुर्विरूपाक्षमलक्ष्यजन्मता दिगम्बरत्वेन निवेदितं वसु ।
वरेषु यद् बालमृगाक्षि ! मृग्यते तदस्ति किं व्यस्तमपि त्रिलोचने ।।७२।।

निवर्तयास्मादसदीप्सितान्मनः क्व तद्विधस्त्वं क्व च पुण्यलक्षणा ।
अपेक्ष्यते साधुजनेन वैदिकी श्मशानशूलस्य न यूपसत्क्रिया ।।७३।।

इति द्विजातौ प्रतिकूलवादिनि प्रवेपमानाधरलक्ष्यकोपया ।
विकुञ्चितभ्रूलतमाहिते तया विलोचने तिर्यगुपान्तलोहिते ।।७४।।

उवाच चैनं परमार्थतो हरं न वेत्सि नूनं यत एवमात्थ माम् ।
अलोकसामान्यमचिन्त्यहेतुकं द्विषन्ति मन्दाश्चरितं महात्मनाम् ।।७५।।

विपत्प्रतीकारपरेण मङ्गलं निषेव्यते भूतिसमुत्सुकेन वा ।
जगच्छरण्यस्य निराशिषः सतः किमेभिराशोपहतात्मवृत्तिभिः ।।७६।।

अकिञ्चनः सन् प्रभवः स सम्पदां त्रिलोकनाथः पितृसद्मगोचरः ।
स भीमरूपः शिव इत्युदीर्यते न सन्ति याथार्थ्यविदः पिनाकिनः ॥७७॥

विभूषणोद्भासि पिनद्धभोगि वा गजाजिनालम्बि दुकूलधारि वा ।
कपालि वा स्यादथवेन्दुशेखरं न विश्वमूर्तेरवधार्यते वपुः ॥७८॥

तदङ्गसंसर्गमवाप्य कल्पते ध्रुवं चिताभस्मरजो विशुद्धये ।
तथाहि नृत्याभिनयक्रियाच्युतं विलिप्यते मौलिभिरम्बरौकसाम् ॥७९॥

असम्पदस्तस्य वृषेण गच्छतः प्रभिन्नदिग्वारणवाहनो वृषा ।
करोति पादावुपगम्य मौलिना विनिद्रमन्दाररजोरुणाङ्गुली ॥८०॥

विवक्षता दोषमपि च्युतात्मना त्वयैकमीशं प्रति साधु भाषितम् ।
यमामनन्त्यात्मभुवोऽपि कारणं कथं स लक्ष्यप्रभवो भविष्यति ॥८१॥

अलं विवादेन यथा श्रुतस्त्वया तथाविधस्तावदशेषमस्तु सः ।
ममात्र भावैकरसं मनः स्थितं न कामवृत्तिर्वचनीयमीक्षते ॥८२॥

निवार्यतामालि किमप्ययं वटुः पुनर्विवक्षुः स्फुरितोत्तराधरः ।
न केवलं यो महतोऽपभाषते शृणोति तस्मादपि यः स पापभाक् ॥८३॥

इतो गमिष्याम्यथवेति वादिनी चचाल [1]बाला स्तनभिन्नवल्कला ।
स्वरूपमास्थाय च तां कृतस्मितः समाललम्बे वृषराजकेतनः ॥८४॥

तं वीक्ष्य वेपथुमती सरसाङ्गयष्टि-
निक्षेपणाय पदमुद्धृतमुद्वहन्ती ।
मार्गाच[2]लव्यतिकराकुलितेव सिन्धुः
शैलाधिराजतनया न ययौ न तस्थौ ॥८५॥

अद्यप्रभृत्यवनताङ्गि तवास्मि दासः
क्रीतस्तपोभिरिति वादिनि चन्द्रमौलौ ।
अह्नाय सा नियमजं क्लममुत्ससर्ज
क्लेशः फलेन हि पुनर्नवतां विधत्ते ॥८६॥

॥ इति श्रीमहाकविकालिदासकृतौ कुमारसंभवे महाकाव्ये
पार्वतीतपःफलोदयो नाम पञ्चमः सर्गः ॥



---

१. सा च, साग्र-सा०　　२. अत्राप्यचलो हिमाचलः । द्र० ६।१।

षष्ठः सर्गः

अथ विश्वात्मने गौरी संदिदेश मिथः सखीम् ।
दाता मे भूभृतां नाथः प्रमाणीक्रियतामिति ।।१।।

तया व्याहृतसंदेशा सा बभौ निभृता प्रिये ।
चूतयष्टिरिवाभ्याशे मधौ परभृतोन्मुखी ।।२।।

स तथेति प्रतिज्ञाय विसृज्य कथमप्युमाम् ।
ऋषीञ्ज्योतिर्मयान् सप्त सस्मार स्मरशासनः ।।३।।

ते प्रभामण्डलैर्व्योम द्योतयन्तस्तपोधनाः ।
सारुन्धतीकाः सपदि प्रादुरासन् पुरः प्रभोः ।।४।।

आप्लुतास्तीर-मन्दार-कुसुमोत्कर-वीचिषु ।
व्योमगङ्गाप्रवाहेषु दिङ्नाग-मदगन्धिषु ।।५।।

मुक्तायज्ञोपवीतानि बिभ्रतो हैमवल्कलाः ।
रत्नाक्षसूत्राः प्रव्रज्यां कल्पवृक्षा इवाश्रिताः ।।६।।

अधः-प्रवर्त्तिताश्वेन समावर्जितकेतुना ।
सहस्ररश्मिना साक्षात् सप्रमाणमुदीक्षिताः ।।७।।

आसक्तबाहु-लतया सार्धमुद्धृतया भुवा ।
महावराहदंष्ट्रायां विश्रान्ताः प्रलयापदि ।।८।।

सर्गशेषप्रणयनाद् विश्वयोनेरनन्तरम् ।
पुरातनाः पुराविद्भिर्धातार इति कीर्तिताः ।।९।।

प्राक्तनानां विशुद्धानां परिपाकमुपेयुषाम् ।
तपसामुपभुञ्जानाः फलान्यपि तपस्विनः ।।१०।।

तेषां मध्यगता साध्वी पत्युः पादार्पितेक्षणा ।
साक्षादिव तपःसिद्धिर्बभासे बह्वरुन्धती ।।११।।

तामगौरवभेदेन मुनींश्चापश्यदीश्वरः ।
स्त्रीपुमानित्यनास्थैषा वृत्तं हि महितं सताम् ॥१२॥

तद्दर्शनादभूच्छम्भोर्भूयान् दारार्थमादरः ।
क्रियाणां खलु धर्म्याणां [1]सत्पत्न्यो मूलकारणम् ॥१३॥

धर्मेणापि पदं शर्वे कारिते पार्वतीं प्रति ।
पूर्वापराधभीतस्य कामस्योच्छ्वसितं मनः ॥१४॥

अथ ते मुनयः सर्वे मानयित्वा जगद्गुरुम् ।
इदमूचुरनूचानाः प्रीतिकण्टकितत्वचः ॥१५॥

यद् ब्रह्म सम्यगाम्नातं यदग्नौ विधिना हुतम् ।
यच्च तप्तं तपस्तस्य विपक्वं फलमद्य नः ॥१६॥

यदध्यक्षेण जगतां वयमारोपितास्त्वया ।
मनोरथस्याविषयं मनोविषयमात्मनः ॥१७॥

यस्य चेतसि वर्तेथाः स तावत् कृतिनां वरः ।
किं पुनर्ब्रह्मयोनेर्यस्तव चेतसि वर्तते ॥१८॥

सत्यमर्काच्च सोमाच्च परमध्यास्महे पदम् ।
अद्य तूच्चैस्तरं ताभ्यां स्मरणानुग्रहात् तव ॥१९॥

त्वत्संभावितमात्मानं बहु मन्यामहे वयम् ।
प्रायः प्रत्ययमाधत्ते स्वगुणेषूत्तमादरः ॥२०॥

या नः प्रीतिर्विरूपाक्ष त्वदनुध्यानसंभवा ।
सा किमावेद्यते तुभ्यमन्तरात्मासि देहिनाम् ॥२१॥

साक्षाद् दृष्टोऽसि न पुनर्विद्मस्त्वां वयमञ्जसा ।
प्रसीद कथयात्मानं न धियां पथि वर्तसे ॥२२॥

किं येन सृजसि व्यक्तमुत येन बिभर्षि तत् ।
अथ यस्तस्य संहर्ता भागः कतम एष ते ॥२३॥

१. दाम्पत्यं मूलसाधनम्—सा.

अथवा सुमहत्येषा प्रार्थना देव तिष्ठतु ।
चिन्तितोपस्थितांस्तावच्छाधि नः करवाम किम् ॥२४॥

अथ मौलिगतस्येन्दोर्विशदैर्दशनांशुभिः ।
उपचिन्वन् प्रभां तन्वीं प्रत्याह परमेश्वरः ॥२५॥

विदितं वो यथा स्वार्था न मे काश्चित् प्रवृत्तयः ।
ननु मूर्तिभिरष्टाभिरित्थंभूतोऽस्मि सूचितः ॥२६॥

सोऽहं तृष्णातुरैर्वृष्टिं विद्युत्वानिव चातकैः ।
अरिविप्रकृतैर्देवैः प्रसूतिं प्रति याचितः ॥२७॥

अत आहर्तुमिच्छामि पार्वतीमात्मजन्मने ।
उत्पत्तये हविर्भोक्तुर्यजमान इवारणिम् ॥२८॥

तामस्मदर्थे युष्माभिर्याचितव्यो हिमालयः ।
विक्रियायै न कल्पन्ते संबन्धाः सदनुष्ठिताः ॥२९॥

उन्नतेन स्थितिमता धुरमुद्वहता भुवः ।
तेन योजितसंबन्धं वित्त मामप्यवञ्चितम् ॥३०॥

एवं वाच्यः स कन्यार्थमिति वो नोपदिश्यते ।
भवत्प्रणीतमाचारमामनन्ति हि साधवः ॥३१॥

आर्याप्यरुन्धती तत्र व्यापारं कर्तुमर्हति ।
प्रायेणैवंविधे कार्ये पुरन्ध्रीणां प्रगल्भता ॥३२॥

तत्प्रयातौषधिप्रस्थं सिद्धये हिमवत्पुरम् ।
महाकोशीप्रपातेऽस्मिन् संगमः पुनरेव नः ॥३३॥

तस्मिन् संयमिनामाद्ये जाते परिणयोन्मुखे ।
जहुः परिग्रहव्रीडां प्राजापत्यास्तपस्विनः ॥३४॥

ततः परममित्युक्त्वा प्रतस्थे मुनिमण्डलम् ।
भगवानपि संप्राप्तः प्रथमोद्दिष्टमास्पदम् ॥३५॥

ते चाकाशमसिश्यामम् उत्पत्य परमर्षयः ।
आसेदुरोषधिप्रस्थं मनसा समरंहसः ॥३६॥

अलकामतिवाह्येव वसतिं वसुसंपदाम् ।
स्वर्गाभिष्यन्दवमनं कृत्वेवोपनिवेशितम् ॥३७॥

गङ्गास्रोतःपरिक्षिप्तं वप्रान्तर्ज्वलितौषधि ।
बृहन्मणिशिलासालं गुप्तावपि मनोहरम् ॥३८॥

जितसिंहभया नागा यत्राश्वा विलयोनयः ।
यक्षाः किम्पुरुषाः पौरा योषितो वनदेवताः ॥३९॥

शिखरासक्तमेघानां व्यज्यन्ते यत्र वेश्मनाम् ।
अनुगर्जितसंदिग्धाः करणैर्मुरजस्वनाः ॥४०॥

यत्र कल्पद्रुमैरेव विलोलविटपांशुकैः ।
गृहयन्त्र-पताकाश्रीरपौरादर-निर्मिता ॥४१॥

यत्र स्फटिकहर्म्येषु नक्तमापानभूमिषु ।
ज्योतिषां प्रतिबिम्बानि प्राप्नुवन्त्युप[1]हारताम् ॥४२॥

यत्रौषधीप्रकाशेन नक्तं दर्शितसंचराः ।
अनभिज्ञास्तमिस्राणां दुर्दिनेष्वभिसारिकाः ॥४३॥

यौवनान्तं वयो यस्मिन्नान्तकः कुसुमायुधात् ।
रतिखेदसमुत्पन्ना निद्रा संज्ञाविपर्ययः ॥४४॥

भ्रूभेदिभिः सकम्पोष्ठैर्ललिताङ्गुलितर्जनैः ।
यत्र कोपैः कृताः स्त्रीणामाप्रसादार्थिनः प्रियाः ॥४५॥

संतानक-तरुच्छायाऽऽसुप्तविद्याधराध्वगम् ।
यस्य चोपवनं बाह्यं गन्धवद् गन्धमादनम् ॥४६॥

अथ ते मुनयो दिव्याः प्रेक्ष्य हैमवतं पुरम् ।
स्वर्गाभिसंधिसुकृतं वञ्चनामिव मेनिरे ॥४७॥

ते सद्मनि गिरेर्वेगादुन्मुखद्वाःस्थवीक्षिताः ।
अवतेरुर्जटाभारैर्लिखितानलनिश्चलैः ॥४८॥

---

१. उपहारा हारच्छेदाः कुट्टिमादिषु चित्राद्याकृतिभिर्विरचिताः ।
द्र० र० ५।७६



गगनादवतीर्णा सा यथावृद्धपुरस्सरा ।
तोयान्तर्भास्करालीव रेजे मुनिपरम्परा ॥४९॥

तानर्घ्यानर्घ्यमादाय दूरात् प्रत्युद्ययौ गिरिः ।
नमयन् सारगुरुभिः पादन्यासैर्वसुन्धराम् ॥५०॥

धातुताम्राधरः प्रांशुर्देवदारुबृहद्भुजः ।
प्रकृत्यैव शिलोरस्कः सुव्यक्तो हिमवानिति ॥५१॥

विधिप्रयुक्तसत्कारैः स्वयं मार्गस्य दर्शकः ।
स तैराक्रमयामास शुद्धान्तं शुद्धकर्मभिः ॥५२॥

तत्र वेत्रासनासीनान् कृतासनपरिग्रहः ।
इत्युवाचेश्वरान् वाचं प्राञ्जलिर्भूधरेश्वरः ॥५३॥

अपमेघोदयं वर्षमदृष्टकुसुमं फलम् ।
अतर्कितोपपन्नं वो दर्शनं प्रतिभाति मे ॥५४॥

मूढं बुद्धमिवात्मानं हैमीभूतमिवायसम् ।
भूमेर्दिवमिवारूढं मन्ये भवदनुग्रहात् ॥५५॥

अद्यप्रभृति भूतानामधिगम्योऽस्मि शुद्धये ।
यदध्यासितमर्हद्भिस्तद्धि तीर्थं प्रचक्षते ॥५६॥

अवैमि पूतमात्मानं द्वयेनैव द्विजोत्तमाः ।
मूर्ध्नि गङ्गाप्रपातेन धौतपादाम्भसा च वः ॥५७॥

जङ्गमं प्रैष्यभावे वः स्थावरं चरणाङ्कितम् ।
विभक्तानुग्रहं मन्ये द्विरूपमपि मे वपुः ॥५८॥

भवत्संभावनोत्थाय परितोषाय मूर्च्छते ।
अपि व्याप्तदिगन्तानि नाङ्गानि प्रभवन्ति मे ॥५९॥

न केवलं दरीसंस्थं भास्वतां दर्शनेन वः ।
अन्तर्गतमपास्तं मे रजसोऽपि परं तमः ॥६०॥

कर्तव्यं वो न पश्यामि स्याच्चेत् किं नोपपद्यते ।
मन्ये मत्पावनायैव प्रस्थानं भवतामिह ॥६१॥

तथापि तावत् कस्मिंश्चिदाज्ञां मे दातु-मर्हथ ।
विनियोगप्रसादा हि किङ्कराः प्रभविष्णुषु ॥६२॥

एते वयममी दाराः कन्येयं कुलजीवितम् ।
ब्रूत येनात्र वः कार्यमनास्था बाह्यवस्तुषु ॥६३॥

इत्यूचिवाँस्तमेवार्थं गुहामुखविसर्पिणा ।
द्विरिव प्रतिशब्देन व्याजहार हिमालयः ॥६४॥

अथाङ्गिरसमग्रण्यमुदाहरणवस्तुषु ।
ऋषयश्चोदयामासुः [1]स च प्राह महीधरम् ॥६५॥

उपपन्नमिदं सर्वमतः परमपि त्वयि ।
मनसः शिखराणां च सदृशी ते समुन्नतिः ॥६६॥

स्थाने त्वां स्थावरात्मानं विष्णुमाहुस्तथाहि ते ।
चराचराणां भूतानां कुक्षिराधारतां गतः ॥६७॥

गामधास्यत् कथं नागो मृणालमृदुभिः फणैः ।
आरसातलमूलात् त्वमवालम्बिष्यथा न चेत् ॥६८॥

अच्छिन्नामलसंतानाः समुद्रोर्म्यनिवारिताः ।
पुनन्ति लोकान् पुण्यत्वात् कीर्तयः सरितश्च ते ॥६९॥

यथैव श्लाघ्यते गङ्गा पादेन परमेष्ठिनः ।
प्रभवेण द्वितीयेन तथैवोच्छ्रिरसा त्वया ॥७०॥

तिर्यगूर्ध्वमधस्ताच्च व्यापको महिमा हरेः ।
त्रिविक्रमोद्यतस्यासीत् स तु स्वाभाविकस्तव ॥७१॥

यज्ञभागभुजां मध्ये पदमातस्थुषा त्वया ।
उच्चैर्हिरण्मयं शृङ्गं सुमेरोर्वितथीकृतम् ॥७२॥

काठिन्यं स्थावरे काये भवता सर्वमर्पितम् ।
इदं तु ते भक्तिनम्रं सतामाराधनं वपुः ॥७३॥

---

१. प्रत्युवाच स भूधरम् म० सा० ।

तदागमनकार्यं नः शृणु कार्यं तवैव तत् ।
श्रेयसामुपदेशात् तु वयमत्रांशभागिनः ॥७४॥

अणिमादि—गुणोपेतमस्पृष्ट—पुरुषान्तरम् ।
शब्दमीश्वर इत्युच्चैः सार्द्धचन्द्रं विभर्ति यः ॥७५॥

कलितान्योन्यसामर्थ्यैः पृथिव्यादिभिरात्मभिः ।
येनेदं ध्रियते विश्वं धुर्यैर्यानमिवाध्वनि ॥७६॥

योगिनो यं विचिन्वन्ति क्षेत्राभ्यन्तरवर्तिनम् ।
अनावृत्तिभयं यस्य पदमाहुर्मनीषिणः ॥७७॥

स ते दुहितरं साक्षात् साक्षी विश्वस्य कर्मणाम् ।
वृणुते वरदः शम्भुरस्मत्संक्रामितैः पदैः ॥७८॥

तमर्थमिव भारत्या सुतया योक्तुमर्हसि ।
अशोच्या हि पितुः कन्या सद्भर्तृप्रतिपादिता ॥७९॥

यावन्त्येतानि भूतानि स्थावराणि चराणि च ।
मातरं कल्पयन्त्वेनामीशो हि जगतः पिता ॥८०॥

प्रणम्य शितिकण्ठाय विबुधास्तदनन्तरम् ।
चरणौ रञ्जयन्त्वस्याश्चूडामणिमरीचिभिः ॥८१॥

उमा वधूर्भवान् दाता याचितार इमे वयम् ।
वरः शम्भुरलं ह्येष त्वत्कुलोद्भूतये विधिः ॥८२॥

अस्तोतुः स्तूयमानस्य वन्द्यस्यानन्यवन्दिनः ।
सुतासंबन्धविधिना भव विश्वगुरोर्गुरुः ॥८३॥

एवंवादिनि देवर्षौ पार्श्वे पितुरधोमुखी ।
लीलाकमलपत्राणि गणयामास पार्वती ॥८४॥

शैलः संपूर्णकामोऽपि मेनामुखमुदैक्षत ।
प्रायेण गृहिणीनेत्राः कन्यार्थेषु कुटुम्बिनः ॥८५॥

मेने मेनापि तत्सर्वं पत्युः कार्यमभीप्सितम् ।
भवन्त्यव्यभिचारिण्यो भर्तुरिष्टे पतिव्रताः ॥८६॥

इदमत्रोत्तरं न्याय्यमिति बुद्ध्या विमृश्य सः ।
आददे वचसामन्ते मङ्गलालङ्कृतां सुताम् ।।८७।।

एहि विश्वात्मने वत्से भिक्षासि परिकल्पिता ।
अर्थिनो मुनयः प्राप्तं गृहमेधिफलं मया ।।८८।।

एतावदुक्त्वा तनयामृषीनाह महीधरः ।
इयं नमति वः सर्वांस्त्रिलोचनवधूरिति ।।८९।।

ईप्सितार्थक्रियोदारं तेऽभिनन्द्य गिरेर्वचः ।
आशीर्भिरेधयामासुः पुरःपाकाभिरम्बिकाम् ।।९०।।

तां प्रणामादर—स्रस्त—जाम्बूनद—वतंसकाम् ।
अङ्कमारोपयामास लज्जमानामरुन्धती ।।९१।।

तन्मातरं चाश्रुमुखीं दुहितृस्नेहविक्लवाम् ।
वरस्यानन्यपूर्वस्य विशोकामकरोद् गुणैः ।।९२।।

वैवाहिकीं तिथिं पृष्टास्तत्क्षणं हरबन्धुना ।
ते त्र्यहादूर्ध्वमाख्याय चेरुश्चीरपरिग्रहाः ।।९३।।

ते हिमालयमामन्त्र्य पुनः प्राप्य च शूलिनम् ।
सिद्धं चास्मै निवेद्यार्थं तद्विसृष्टाः खमुद्ययुः ।।९४।।

पशुपतिरपि तान्यहानि कृच्छ्रा-
दगमयदद्रिसुतासमागमोत्कः ।
कमपरमवशं न विप्रकुर्यु-
र्विभुमपि तं यदमी स्पृशन्ति भावाः ।।९५।।

।। इति श्रीमहाकविकालिदासकृतौ कुमारसंभवे महाकाव्ये
उमाप्रदानो नाम षष्ठः सर्गः ।।



सप्तमः सर्गः

अथौषधीनामधिपस्य वृद्धौ तिथौ च जामित्रगुणान्वितायाम् ।
समेतबन्धुर्हिमवान् सुताया विवाहदीक्षाविधिमन्वतिष्ठत् ॥१॥

वैवाहिकैः कौतुकसंविधानैर्गृहे गृहे व्यग्रपुरन्ध्रिवर्गम् ।
आसीत् पुरं सानुमतोऽनुरागादन्तःपुरं चैककुलोपमेयम् ॥२॥

संतानकाकीर्णमहा[1]पथं तच्चीनांशुकैः कल्पितकेतुमालम् ।
भासोज्ज्वलत्काञ्चनतोरणानां स्थानान्तरं स्वर्ग इवाबभासे ॥३॥

एकैव[2] सत्यामपि पुत्रपङ्क्तौ चिरस्य दृष्टेव मृतोत्थितेव ।
आसन्नपाणिग्रहणेति पित्रोरुमा विशेषोच्छ्वसितं बभूव ॥४॥

अङ्काद् ययावङ्कमुदीरिताशीः सा मण्डनान्मण्डनमन्वभुङ्क्त ।
संबन्धिभिन्नोऽपि गिरेः कुलस्य स्नेहस्तदेकायतनं जगाम ॥५॥

मैत्रे मुहूर्ते शशलाञ्छनेन योगं गतासूत्तरफल्गुनीषु ।
तस्याः शरीरे प्रतिकर्म चक्रुर्बन्धुस्त्रियो याः पतिपुत्रवत्यः ॥६॥

सा गौरसिद्धार्थनिवेशवद्भिर्दूर्वाप्रवालैः प्रतिभिन्नशोभम् ।
निर्नाभि कौशेयमुपात्तबाणमभ्यङ्गनेपथ्यमलञ्चकार ॥७॥

बभौ च संपर्कमुपेत्य बाला नवेव[3] दीक्षाविधिसायकेन ।
करेण भानोर्बहुलावसाने संधुक्ष्यमाणेव शशाङ्कलेखा ॥८॥

तां लोध्रकल्केन हृताङ्गतैलामाश्यानकालेयकृताङ्गरागाम् ।
वासो वसानामभिषेकयोग्यं नार्यश्चतुष्काभिमुखं व्यनैषुः ॥९॥

विन्यस्तवैदूर्यशिलातलेऽस्मिन्नाबद्धमुक्ताफलभक्तिचित्रे ।
आवर्जिताष्टापदकुम्भतोयैः सतूर्यमेनां स्नपयांबभूवुः ॥१०॥

---

१. चतुष्पथं-सा. २. एकेव-सा.

३. नवेन. म., विवाह-सा. अनयो-र्बहुलावसानीयत्वसमकोटिकमुपमेयपक्षे किमपि न ।

सा मङ्गलस्नानविशुद्धगात्री गृहीत[1]पत्युद्गमनीयवस्त्रा ।
निर्वृत्तपर्जन्यजलाभिषेका प्रफुल्लकाशा वसुधेव रेजे ॥११॥

तस्मात् प्रदेशाच्च वितानवन्तं युक्तं मणिस्तम्भचतुष्टयेन ।
पतिव्रताभिः परिगृह्य निन्ये क्लृप्तासनं कौतुकवेदिमध्यम् ॥१२॥

तां प्राङ्मुखीं तत्र निवेश्य तन्वीं क्षणं व्यलम्बन्त पुरोनिषण्णाः ।
भूतार्थशोभाह्रियमाणनेत्राः प्रसाधने सन्निहितेऽपि नार्यः ॥१३॥

धूपोष्मणा त्याजितमार्द्रभावं केशान्तमन्तःकुसुमं तदीयम् ।
पर्याक्षिपत् काचिदुदारबन्धं दूर्वावता पाण्डुमधूकदाम्ना ॥१४॥

विन्यस्तशुक्लागुरु चक्रुरङ्गं गोरोचनापत्रविभक्तमस्याः ।
सा चक्रवाकाङ्कितसैकतायास्त्रिस्रोतसः कान्तिमतीत्य तस्थौ ॥१५॥

लग्नद्विरेफं परिभूय पद्मं समेघलेखं शशिनश्च बिम्बम् ।
तदाननश्रीरलकैः [2]प्रसिद्धैश्चिच्छेद सादृश्यकथाप्रसङ्गम् ॥१६॥

कर्णार्पितो लोध्रकषायरूक्षे गोरोचनाक्षेपनितान्तगौरे ।
तस्याः कपोले परभागलाभाद् बबन्ध चक्षूंषि यवप्ररोहः ॥१७॥

रेखाविभक्तः सुविभक्तगात्र्याः किंचिन्मधूच्छिष्टविमृष्टरागः ।
कामप्यभिख्यां स्फुरितैरपुष्यदासन्नलावण्यफलोऽधरोष्ठः ॥१८॥

पत्युः शिरश्चन्द्रकलामनेन स्पृशेति सख्या परिहासपूर्वम् ।
सा रञ्जयित्वा चरणौ कृताशीर्माल्येन तां निर्वचनं जघान ॥१९॥

तस्याः सुजातोत्पलपत्रकान्ते प्रसाधिकाभिर्नयने निरीक्ष्य ।
न चक्षुषोः कान्तिविशेषबुद्धया कालाञ्जनं मङ्गलमित्युपात्तम् ॥२०॥

सा संभवद्भिः कुसुमैर्लतेव ज्योतिर्भिरुद्यद्भिरिव त्रियामा ।
सरिद् विहङ्गैरिव लीयमानैरामुच्यमानाभरणा चकासे ॥२१॥

आत्मानमालोक्य च शोभमानमादर्शबिम्बे स्तिमितायताक्षी ।
हरोपयाने त्वरिता बभूव स्त्रीणां प्रियालोकफलो हि वेषः ॥२२॥

---

१. प्रत्युद्गमनीयेति छन्दोमञ्जरीपाठः । दीर्घविकल्पाय द्र. रघु. १२।७१
२. प्रसिद्धैरलङ्कृतैः ।

अथाङ्गुलिभ्यां हरितालमार्द्रं माङ्गल्यमादाय मनःशिलां च।
कर्णावसक्तामलदन्तपत्रं माता तदीयं मुखमुन्नमय्य ॥२३॥

उमास्तनोद्भेदमनु प्रवृद्धो मनोरथो यः प्रथमं बभूव।
तमेव मेना दुहितुः कथंचिद् विवाहदीक्षातिलकं चकार ॥२४॥

बबन्ध चास्राकुलदृष्टिरस्याः स्थानान्तरे कल्पितसन्निवेशम्।
धात्र्यङ्गुलीभिः प्रतिसार्यमाणमूर्णामयं कौतुक-हस्तसूत्रम् ॥२५॥

क्षीरोदवेलेव सफेनपुञ्जा पर्याप्तचन्द्रेव शरत्त्रियामा।
नवं नवक्षौमनिवासिनी सा भूयो बभौ दर्पणमादधाना ॥२६॥

तामर्चिताभ्यः कुलदेवताभ्यः कुलप्रतिष्ठां प्रणमय्य माता।
अकारयत् कारयितव्यदक्षा क्रमेण पादग्रहणं सतीनाम् ॥२७॥

अखण्डितं प्रेम लभस्व पत्युरित्युच्यते ताभिरुमा स्म नम्रा।
तया तु तस्यार्द्धशरीरभाजा पश्चात्कृताः स्निग्धजनाशिषोऽपि ॥२८॥

इच्छाविभूत्योरनुरूपमद्रिस्तस्याः कृती कृत्यमशेषयित्वा।
सभ्यः सभायां सुहृदास्थितायां तस्थौ वृषाङ्कागमनप्रतीक्षः ॥२९॥

तावद् भवस्यापि कुबेरशैले तत्पूर्वपाणिग्रहणानुरूपम्।
प्रसाधनं मातृभिरादृताभिर्न्यस्तं पुरस्तात् पुरशासनस्य ॥३०॥

तद्गौरवान्मङ्गलमण्डनश्रीः सा पस्पृशे केवलमीश्वरेण॥
स एव वेषः परिणेतुरिष्टं भावान्तरं तस्य विभोः प्रपेदे ॥३१॥

बभूव भस्मैव सिताङ्गरागः कपालमेवामलशेखरश्रीः।
उपान्तभागेषु च रोचनाङ्को गजाजिनस्यैव दुकूलभावः ॥३२॥

[1]शङ्खान्तरद्योति विलोचनं यदन्तर्निविष्टामलपिङ्गतारम्।
सान्निध्यपक्षे हरितालमय्यास्तदेव जातं तिलकक्रियायाः ॥३३॥

यथाप्रदेशं भुजगेश्वराणां करिष्यतामाभरणान्तरत्वम्[2]।
शरीरमात्रं विकृतिं प्रपेदे तथैव तस्थुः फणरत्नशोभाः ॥३४॥

---

१. शङ्खः कपालास्थि.   २. अन्तरं भेदः।

दिवापि निष्ठ्यूतमरीचिभासा बाल्यादनाविष्कृतलाञ्छनेन ।
चन्द्रेण नित्यं प्रतिभिन्नमौलेश्चूडामणेः किं ग्रहणं हरस्य ॥३५॥

इत्यद्भुतैकप्रभवः प्रभावात् प्रसिद्धनेपथ्यविधेर्विधाता ।
आत्मानमासन्नगणोपनीते खड्गे निषक्तप्रतिमं ददर्श ॥३६॥

स गोपतिं नन्दिभुजावलम्बी शार्दूलचर्मान्तरितोरुपृष्ठम् ।
तद्भक्तिसंक्षिप्तबृहत्प्रमाणमारुह्य कैलासमिव प्रतस्थे ॥३७॥

तं मातरो देवमनुव्रजन्त्यः स्ववाहनक्षोभचलावतंसाः ।
मुखैः प्रभामण्डलरेणुगौरैः पद्माकरं चक्रुरिवान्तरीक्षम् ॥३८॥

तासां च पश्चात् कनकप्रभाणां काली कपालाभरणा चकासे ।
बलाकिनी नीलपयोदराजी दूरं पुरःक्षिप्तशतह्रदेव ॥३९॥

ततो गणैः शूलभृतः पुरोगैरुदीरितो मङ्गलतूर्यघोषः ।
विमानशृङ्गाण्यवगाहमानः शशंस सेवावसरं सुरेभ्यः ॥४०॥

उपाददे तस्य सहस्ररश्मिस्त्वष्ट्रा नवं निर्मितमातपत्रम् ।
स तद्दुकूलादविदूरमौलिर्बभौ पतद्गङ्ग इवोत्तमाङ्गे ॥४१॥

मूर्ते च गङ्गायमुने तदानीं सचामरे देवमसेविषाताम् ।
समुद्रगारूपविपर्ययेऽपि सहंसपाते इव लक्ष्यमाणे ॥४२॥

तमभ्यगच्छत् प्रथमो विधाता श्रीवत्सलक्ष्मा पुरुषश्च साक्षात् ।
जयेति वाचा महिमानमस्य संवर्द्धयन्तौ हविषेव वह्निम् ॥४३॥

एकैव मूर्तिर्बिभिदे त्रिधा सा सामान्यमेषां प्रथमावरत्वम् ।
विष्णोर्हरस्तस्य हरिः कदाचिद्वेधा[1]स्तयोस्तावपि धातुराद्यौ ॥४४॥

तं लोकपालाः पुरुहूतमुख्याः श्रीलक्षणोत्सर्गविनीतवेषाः ।
दृष्टिप्रदाने कृतनन्दिसंज्ञास्तद्दर्शिताः प्राञ्जलयः प्रणेमुः ॥४५॥

कम्पेन मूर्ध्नः शतपत्रयोनिं वाचा हरिं वृत्रहणं स्मितेन ।
आलोकमात्रेण सुरानशेषान् सम्भावयामास यथाप्रधानम् ॥४६॥

---

१. धातेति तूचितम् ।

तस्मै जयाशीः ससृजे पुरस्तात् सप्तर्षिभिस्तान् स्मितपूर्वमाह ।
विवाहयज्ञे विततेऽत्र यूयमध्वर्यवः पूर्ववृता मयेति ॥४७॥

विश्वावसुप्राग्रहरैः प्रवीणैः संगीयमानत्रिपुरावदानः ।
अध्वानमध्वान्तविकारलङ्घ्यस्ततार ताराधिपखण्डधारी ॥४८॥

खे खेलगामी तमुवाह वाहः सशब्दचामीकरकिङ्किणीकः ।
तटाभिघातादिव लग्नपङ्के धुन्वन् मुहुः प्रोतघने विषाणे ॥४९॥

स प्रापदप्राप्तपराभियोगं नगेन्द्रगुप्तं नगरं मुहूर्तात् ।
पुरोविलग्नैर्हरदृष्टिपातैः सुवर्णसूत्रैरिव कृष्यमाणः ॥५०॥

तस्योपकण्ठे घननीलकण्ठः कुतूहलादुन्मुखपौरदृष्टः ।
स्वबाणचिह्नादवतीर्य मार्गादासन्नभूपृष्ठमियाय देवः ॥५१॥

तमृद्धिमद्बन्धुजनाधिरूढैर्वृन्दैर्गजानां गिरिचक्रवर्ती ।
प्रत्युज्जगामागमनप्रतीतः प्रफुल्लवृक्षैः कटकैरिव स्वैः ॥५२॥

वर्गावुभौ देवमहीधराणां द्वारे पुरस्योद्घटितापिधाने ।
समीयतुर्दूरविसर्पिघोषौ भिन्नैकसेतू पयसामिवौघौ ॥५३॥

ह्रीमानभूद् भूमिधरो हरेण त्रैलोक्यवन्द्येन कृतप्रणामः ।
पूर्वं महिम्ना स हि तस्य दूरमावर्जितं नात्मशिरो विवेद ॥५४॥

स प्रीतियोगाद् विकसन्मुखश्रीर्जामातुरग्रेसरतामुपेत्य ।
प्रावेशयन्मन्दिरमृद्धमेनमागुल्फ—कीर्णापण—मार्ग—पुष्पम् ॥५५॥

तस्मिन् मुहूर्ते पुरसुन्दरीणामीशानसंदर्शनलालसानाम् ।
प्रासादमालासु बभूवुरित्थं त्यक्तान्यकार्याणि विचेष्टितानि ॥५६॥

आलोकमार्गं सहसा व्रजन्त्या कयाचिदुद्वेष्टनवान्तमाल्यः ।
बन्धुं न संभावित एव तावत् करेण रुद्धोऽपि न केशपाशः ॥५७॥

प्रसाधिकाऽऽलम्बितमग्रपादमाक्षिप्य काचिद् द्रवरागमेव ।
उत्सृष्टलीलागतिरागवाक्षादलक्तकाङ्कां पदवीं ततान ॥५८॥

विलोचनं दक्षिणमञ्जनेन संभाव्य तद्वञ्चितवामनेत्रा ।
तथैव वातायनसन्निकर्षं ययौ शलाकामपरा वहन्ती ॥५९॥

जालान्तरप्रेषितदृष्टिरन्या प्रस्थानभिन्नां न बबन्ध नीवीम् ।
नाभिप्रविष्टाभरणप्रभेण हस्तेन तस्थाववलम्ब्य वासः ॥६०॥

अर्द्धाचिता सत्वरमुत्थितायाः पदे पदे दुर्निमिते गलन्ती ।
कस्याश्चिदासीद् रसना तदानीमङ्गुष्ठमूलार्पितसूत्रशेषा ॥६१॥

तासां मुखैरासवगन्धगर्भैर्व्याप्तान्तराः सान्द्रकुतूहलानाम् ।
विलोलनेत्रभ्रमरैर्गवाक्षाः सहस्रपत्राभरणा इवासन् ॥६२॥

तावत् पताकाकुलमिन्दुमौलिरुत्तोरणं राजपथं प्रपेदे ।
प्रासादशृङ्गाणि दिवापि कुर्वञ्ज्योत्स्नाभिषेकद्विगुणद्युतीनि ॥६३॥

तमेकदृश्यं नयनैः पिबन्त्यो नार्यो न जग्मुर्विषयान्तराणि ।
तथाहि शेषेन्द्रियवृत्तिरासां सर्वात्मना चक्षुरिव प्रविष्टा ॥६४॥

स्थाने तपो दुश्चरमेतदर्थमपर्णया पेलवयापि तप्तम् ।
या दास्यमप्यस्य लभेत नारी सा स्यात् कृतार्था किमुताङ्कशय्याम् ।६५।

परस्परेण स्पृहणीयशोभं न चेदिदं द्वन्द्वमयोजयिष्यत् ।
अस्मिन् द्वये रूपविधानयत्नः पत्युः प्रजानां विफलोऽभविष्यत् ॥६६॥

न नूनमारूढरुषा शरीरमनेन दग्धं कुसुमायुधस्य ।
व्रीडादमुं देवमुदीक्ष्य मन्ये स न्यस्तदेहः स्वयमेव कामः ॥६७॥

अनेन संबन्धमुपेत्य दिष्टचा मनोरथप्रार्थितमीश्वरेण ।
मूर्द्धानमालि क्षितिधारणोच्चमुच्चैस्तरं वक्ष्यति शैलराजः ॥६८॥

इत्योषधिप्रस्थविलासिनीनां शृण्वन् कथाः श्रोत्रसुखास्त्रिनेत्रः ।
केयूरचूर्णीकृतलाजमुष्टिं हिमालयस्यालयमाससाद ॥६९॥

तत्रावतीर्याच्युतदत्तहस्तः शरद्घनाद्दीधितिमानिवोक्ष्णः ।
क्रान्तानि पूर्वं कमलासनेन कक्ष्यान्तराण्यद्रिपतेर्विवेश ॥७०॥

तमन्वगिन्द्रप्रमुखाश्च देवाः सप्तर्षिपूर्वाः परमर्षयश्च ।
गणाश्च गिर्यालयमभ्यगच्छन् प्रशस्तमारम्भमिवोत्तमार्थाः ॥७१॥

तत्रेश्वरो विष्टरभाग् यथावत् सरत्नमर्घ्यं मधुमच्च गव्यम् ।
नवे दुकूले च नगोपनीतं प्रत्यग्रहीत् सर्वममन्त्रवर्जम् ॥७२॥

दुकूलवासाः स वधूसमीपं निन्ये विनीतैरवरोधदक्षैः ।
वेलासमीपं स्फुटफेनराजिर्नवैरुदन्वानिव चन्द्रपादैः ॥७३॥

तया प्रवृद्धाननचन्द्रकान्त्या प्रफुल्लचक्षुःकुमुदः कुमार्या ।
प्रसन्नचेतःसलिलः शिवोऽभूत् संसृज्यमानः शरदेव लोकः ॥७४॥

तयोः समापत्तिषु कातराणि किंचिद् व्यवस्थापितसंहृतानि ।
ह्रीयन्त्रणां तत्क्षणमन्वभूवन्नन्योन्यलोलानि विलोचनानि ॥७५॥

तस्याः करं शैलगुरूपनीतं जग्राह ताम्राङ्गुलिमष्टमूर्तिः ।
उमातनौ गूढतनोः स्मरस्य तच्छङ्किनः पूर्वमिव प्ररोहम् ॥७६॥

रोमोद्गमः प्रादुरभूदुमायाः स्विन्नाङ्गुलिः पुङ्गवकेतुरासीत् ।
वृत्तिस्तयोः पाणिसमागमेन समं विभक्तेव मनोभवस्य ॥७७॥

प्रयुक्तपाणिग्रहणं यदन्यद् वधूवरं पुष्यति कान्तिमग्र्याम् ।
सान्निध्ययोगादनयोस्तदानीं किं कथ्यते श्रीरुभयस्य तस्य ॥७८॥

प्रदक्षिणप्रक्रमणात् कृशानोरुदर्चिषस्तन्मिथुनं चकासे ।
मेरोरुपान्तेष्विव वर्तमानमन्योन्यसंसक्तमहस्त्रियामम् ॥७९॥

तौ दम्पती त्रिः परिणीय वह्निमन्योन्यसंस्पर्शनिमीलिताक्षौ ।
स कारयामास वधूं पुरोधास्तस्मिन् समिद्धार्चिषि लाजमोक्षम् ॥८०॥

सा लाजधूमाञ्जलिमिष्टगन्धं गुरूपदेशाद् वदनं निनाय ।
कपोलसंसर्पिशिखः स तस्या मुहूर्तकर्णोत्पलतां प्रपेदे ॥८१॥

तदीषदार्द्रारुणगण्डलेखमुच्छ्वासिकालाञ्जनरागमक्ष्णोः ।
वधूमुखं क्लान्तयवावतंसमाचारधूमग्रहणाद् बभूव ॥८२॥

वधूं द्विजः प्राह तवैष वत्से वह्निर्विवाहं प्रति कर्मसाक्षी ।
शिवेन भर्त्रा सह धर्मचर्या कार्या त्वया मुक्तविचारयेति ॥८३॥

आलोचनान्तं श्रवणे वितत्य पीतं गुरोस्तद्वचनं भवान्या ।
निदाघकालोल्वणतापयेव माहेन्द्रमम्भः प्रथमं पृथिव्या ॥८४॥

ध्रुवेण भर्त्रा ध्रुवदर्शनाय प्रयुज्यमाना प्रियदर्शनेन ।
सा दृष्ट इत्याननमुन्नमय्य ह्रीसन्नकण्ठी कथमप्युवाच ॥८५॥

इत्थं विधिज्ञेन पुरोहितेन प्रयुक्तपाणिग्रहणोपचारौ ।
प्रणेमतुस्तौ पितरौ प्रजानां पद्मासनस्थाय पितामहाय ॥८६॥

वधूर्विधात्रा प्रतिनन्द्यते स्म कल्याणि वीरप्रसवा भवेति ।
वाचस्पतिः सन्नपि सोऽष्टमूर्तौ त्वाशास्यचिन्तास्तिमितो बभूव ॥८७॥

क्लृप्तोपचारां चतुरस्रवेदीं तावेत्य पश्चात् कनकासनस्थौ ।
जायापती लौकिकमेषणीयमार्द्राक्षतारोपणमन्वभूताम् ॥८८॥

पत्रान्तलग्नैर्जलबिन्दुजालैराकृष्ट–मुक्ताफल–जाल–शोभम् ।
तयोरुपर्यायितनालदण्डमाधत्त लक्ष्मीः कमलातपत्रम् ॥८९॥

द्विधा प्रयुक्तेन च वाङ्मयेन सरस्वती तन्मिथुनं नुनाव ।
संस्कारपूतेन वरं वरेण्यं वधूं सुखग्राह्यनिबन्धनेन ॥९०॥

तौ सन्धिषु व्यञ्जितवृत्तिभेदं रसान्तरेषु प्रतिबद्धरागम् ।
अपश्यतामप्सरसां मुहूर्तं प्रयोगमाद्यं ललिताङ्गहारम् ॥९१॥

देवास्तदन्ते हरमूढभार्यं किरीटबद्धाञ्जलयो निपत्य ।
शापावसाने प्रतिपन्नमूर्त्तेर्ययाचिरे पञ्चशरस्य सेवाम् ॥९२॥

तस्यानुमेने भगवान् विमन्युर्व्यापारमात्मन्यपि सायकानाम् ।
कालप्रयुक्ता खलु कार्यविद्भिर्विज्ञापना भर्तृषु सिद्धिमेति ॥९३॥

अथ विबुधगणाँस्तानिन्दुमौलिर्विसृज्य,
क्षितिधरपतिकन्यामाददानः करेण ।
कनक-कलशयुक्तं भक्तिशोभासनाथं,
क्षितिविरचितशय्यं कौतुकागारमागात् ॥९४॥

नवपरिणयलज्जाभूषणां तत्र गौरीं,
वदनमपहरन्तीं तत्कृताक्षेपमीशः ।
अपि शयनसखीभ्यो दत्तवाचं कथंचित्,
प्रमथमुखविकारैर्हासयामास गूढम् ॥९५॥

॥ इति श्रीमहाकविकालिदासकृतौ कुमारसंभवे महाकाव्ये
उमापरिणयो नाम सप्तमः सर्गः ॥



अष्टमः सर्गः

पाणिपीडनविधेरनन्तरं शैलराजदुहितुर्हरं प्रति ।
भावसाध्वसपरिग्रहादभूत् कामदोहदमनोहरं वपुः ॥१॥

व्याहृता प्रतिवचो न सन्दधे गन्तुमैच्छदवलम्बितांशुका ।
सेवते स्म शयनं पराङ्मुखी सा तथापि रतये पिनाकिनः ॥२॥

कैतवेन शयिते कुतूहलात् पार्वती प्रतिमुखं निपातितम् ।
चक्षुरुन्मिषति सस्मितं प्रिये विद्युताहतमिव न्यमीलयत् ॥३॥

नाभिदेशनिहितः सकम्पया शङ्करस्य रुरुधे तया करः ।
तद्दुकूलमथ चाभवत् स्वयं दूरमुच्छ्वसितनीविबन्धनम् ॥४॥

एवमालि निगृहीतसाध्वसं शङ्करो रहसि सेव्यतामिति ।
सा सखीभिरुपदिष्टमाकुला नास्मरत् प्रमुखवर्तिनि प्रिये ॥५॥

अप्यवस्तुनि कथाप्रवृत्तये प्रश्नतत्परमनङ्गशासनम् ।
वीक्षितेन परिवीक्ष्य पार्वती मूर्धकम्पमयमुत्तरं ददौ ॥६॥

शूलिनः करतलद्वयेन सा संनिरुध्य नयने हृतांशुका ।
तस्य पश्यति ललाटलोचने मोघयत्नविधुरा रहस्यभूत् ॥७॥

चुम्बनेष्वधरदानवर्जितं खिन्नहस्तसदयोपगूहनम् ।
क्लिष्टमन्मथमपि प्रियं प्रभोर्दुर्लभप्रतिकृतं वधूरतम् ॥८॥

यन्मुखग्रहणमक्षताधरं दानमव्रणपदं नखस्य यत् ।
यद् रतं च सदयं प्रियस्य तत् पार्वती विषहते स्म नेतरत् ॥९॥

रात्रिवृत्तमनुयोक्तुमुद्यतं सा प्रभातसमये सखीजनम् ।
नाकरोदपकुतूहलं ह्रिया शंसितुं तु हृदयेन तत्वरे ॥१०॥

दर्पणे च परिभोगदर्शिनीं पृष्ठतः प्रणयिनो निषेदुषः ।
प्रेक्ष्य बिम्बमुपबिम्बमात्मनः कानि कानि न चकार लज्जया ॥११॥

नीलकण्ठपरिभुक्तयौवनां तां विलोक्य जननी समाश्वसत् ।
भर्तृवल्लभतया हि मानसीं मातुरस्यति शुचं वधूजनः ।।१२।।

वासराणि कतिचित् कथञ्चन स्थाणुना रतमकारि चानया ।
ज्ञातमन्मथरसा शनैः शनैः सा मुमोच रतिदुःखशीलताम् ।।१३।।

सस्वजे प्रियमुरोनिपीडनं प्रार्थितं मुखमनेन नाहरत् ।
मेखलाप्रणयलोलतां गतं हस्तमस्य शिथिलं रुरोध सा ।।१४।।

भावसूचितमदृष्टविप्रियं दाढर्च्यभाक् क्षणवियोगकातरम् ।
कैश्चिदेव दिवसैस्तथा तयोः प्रेम गूढमितरेतराश्रयम् ।।१५।।

तं यथात्मसदृशं वरं वधूरन्वरज्यत वरस्तथैव ताम् ।
सागरादनपगा हि जाह्नवी सोऽपि तन्मुखरसैकवृत्तिभाक् ।।१६।।

शिष्यतां निधुवनोपदेशिनः शङ्करस्य रहसि प्रपन्नया ।
शिक्षितं युवतिनैपुणं तया यत्, तदेव गुरुदक्षिणीकृतम् ।।१७।।

दष्टमुक्तमधरोष्ठमम्बिका वेदनाविधुतहस्तपल्लवा ।
शीतलेन निरवापयत् क्षणं मौलिचन्द्रशकलेन शूलिनः ।।१८।।

चुम्बनादलकचूर्णदूषितं शङ्करोऽपि नयनं ललाटजम् ।
उच्छ्वसत्कमलगन्धये ददौ पार्वतीवदनगन्धवाहिने ।।१९।।

एवमिन्द्रियसुखस्य वर्त्मनः सेवनादनुगृहीतमन्मथः ।
शैलराजभवने सहोमया मासमात्रमवसद् वृषध्वजः ।।२०।।

सोऽनुमान्य हिमवन्तमात्मभूरात्मजाविरहदुःखखेदितम् ।
तत्र तत्र विजहार संपतन्नप्रमेयगतिना ककुद्मता ।।२१।।

मेरुमेत्य मरुदाशुगोक्षकः पार्वतीस्तनपुरस्कृतान् कृती ।
हेमपल्लवविभङ्गसंस्तरानन्वभूत् सुरतमर्दनक्षमान् ।।२२।।

पद्मनाभचरणाङ्किताश्मसु प्राप्तवत्स्वमृतविप्रुषो नवाः ।
मन्दरस्य कटकेषु चावसत् पार्वतीवदनपद्मषट्पदः ।।२३।।

रावणध्वनितभीतया तया कण्ठसक्तदृढबाहुबन्धनः ।
एकपिङ्गलगिरौ जगद्गुरुर्निर्विवेश विशदाः शशिप्रभाः ।।२४।।

तस्य जातु मलयस्थलीरते धूतचन्दनलतः प्रियाक्लमम् ।
आचचाम सलवङ्गकेसरश्चाटुकार इव दक्षिणानिलः ॥२५॥

हेमतामरसताडितप्रिया तत्कराम्बुविनिमीलितेक्षणा ।
सा व्यगाहत तरङ्गिणीमुमा मीनपङ्क्तिपुनरुक्तमेखला ॥२६॥

तां पुलोमतनयालकोचितैः पारिजातकुसुमैः प्रसाधयन् ।
नन्दने चिरमयुग्मलोचनः सस्पृहं सुरवधूभिरीक्षितः ॥२७॥

इत्यभौममनुभूय शङ्करः पार्थिवं च दयितासखः सुखम् ।
लोहितायति कदाचिदातपे गन्धमादनवनं व्यगाहत ॥२८॥

तत्र काञ्चनशिलातलाश्रयो नेत्रगम्यमवलोक्य भास्करम् ।
दक्षिणेतरभुजव्यपाश्रयां व्याजहार सहधर्मचारिणीम् ॥२९॥

पद्मकान्तिमरुणत्रिभागयोः संक्रमय्य तव नेत्रयोरिव ।
संक्षये जगदिव प्रजेश्वरः संहरत्यहरसावहर्पतिः ॥३०॥

सीकरव्यतिकरं मरीचिभिर्दूरयत्यवनते विवस्वति ।
इन्द्रचापपरिवेषशून्यतां निर्झरास्तव पितुर्व्रजन्त्यमी ॥३१॥

दष्टतामरसकेसरस्रजोः क्रन्दतोर्विपरिवृत्तकण्ठयोः ।
निघ्नयोः सरसि चक्रवाकयोरल्पमन्तरमनल्पतां गतम् ॥३२॥

स्थानमाह्निकमपास्य दन्तिनः सल्लकीविटपभङ्गवासितम् ।
आविभातचरणाय गृह्णते वारि वारिरुहवद्धषट्पदम् ॥३३॥

पश्य पश्चिमदिगन्तलम्बिना निर्मितं मितकथे विवस्वता ।
लब्धया प्रतिमया सरोऽम्भसां तापनीयमिव सेतुवन्धनम् ॥३४॥

उत्तरन्ति विनिकीर्य पल्वलं गाढपङ्कमतिवाहितातपाः ।
दंष्ट्रिणो वनवराहयूथपा दष्टभङ्गुरविसाङ्कुरा इव ॥३५॥

एष वृक्षशिखरे कृतास्पदो जातरूपरसगौरमण्डलम् ।
हीयमानमहरत्ययातापं पीवरोरु पिबतीव वर्हिणः ॥३६॥

पूर्वभागतिमिरप्रवृत्तिभिर्व्यक्तपङ्कमिव जातमेकतः ।
खं हृतातपजलं विवस्वता भाति किञ्चिदिव शेषवत्सरः ॥३७॥

आविशद्भिरुटजाङ्गणं मृगैर्मूल-सेक-सरसैश्च वृक्षकैः ।
आश्रमाः प्रविशदग्रधेनवो बिभ्रति श्रियमुदीरिताग्नयः ॥३८॥

बद्धकोशमपि तिष्ठति क्षणं सावशेषविवरं कुशेशयम् ।
षट्पदाय वसतिं ग्रहीष्यते प्रीतिपूर्वमिव दातुमन्तरम् ॥३९॥

दूरमग्रपरिमेयरश्मिना वारुणी दिगरुणेन भानुना ।
भाति केसरवतेव मण्डिता बन्धुजीवतिलकेन कन्यका ॥४०॥

सामभिः सहचराः सहस्रशः स्यन्दनाश्वहृदयङ्गमस्वनैः ।
भानुमग्निपरिकीर्णतेजसं संस्तुवन्ति किरणोष्मपायिनः ॥४१॥

सोऽयमानतशिरोधरैर्हयैः कर्णचामरविघट्टितेक्षणैः ।
अस्तमेति युगभुग्नकेसरैः सन्निधाय दिवसं महोदधौ ॥४२॥

खं प्रसुप्तमिव संस्थिते रवौ तेजसो महत ईदृशी गतिः ।
तत् प्रकाशयति यावदुद्गतं मीलनाय खलु तावतश्च्युतम् ॥४३॥

संध्ययाप्यनुगतं रवेर्वपुर्वन्द्यमस्तशिखरे समर्पितम् ।
येन पूर्वमुदये पुरस्कृता नानुयास्यति कथं तमापदि ॥४४॥

रक्तपीतकपिशाः पयोमुचां कोटयः कुटिलकेशि भान्त्यमूः ।
द्रक्ष्यसि त्वमिति संध्ययानया वर्तिकाभिरिव साधुमण्डिताः ॥४५॥

सिंहकेसरसटासु भूभृतां पल्लवप्रसविषु द्रुमेषु च ।
पश्य धातुशिखरेषु भानुना संविभक्तमिव सांध्यमातपम् ॥४६॥

अद्रिराजतनये तपस्विनः पावनाम्बुविहिताञ्जलिक्रियाः ।
ब्रह्म गूढमभिसंध्यमादृताः शुद्धये विधिविदो गृणन्त्यमी ॥४७॥

तन्मुहूर्त्तमनुमन्तुमर्हसि प्रस्तुताय नियमाय मामपि ।
त्वां विनोदनिपुणः सखीजनो वल्गुवादिनि विनोदयिष्यति ॥४८॥

निर्विभुज्य दशनच्छदं ततो वाचि भर्तुरवधीरणापरा ।
शैलराजतनया समीपगामाललाप विजयामहेतुकम् ॥४९॥

ईश्वरोऽपि दिवसात्ययोचितं मन्त्रपूर्वमनुतस्थिवान् विधिम् ।
पार्वतीमवचनामसूयया प्रत्युपेत्य पुनराह सस्मितम् ॥५०॥

मुञ्च कोपमनिमित्तकोपने संध्यया प्रणमितोऽस्मि नान्यया ।
किं न वेत्सि सहधर्मचारिणं चक्रवाकसमवृत्तिमात्मनः ॥५१॥

निर्मितेषु पितृषु स्वयंभुवा या तनुः सुतनु पूर्वमुज्झिता ।
सेयमस्तमुदयं च सेवते तेन मानिनि ममात्र गौरवम् ॥५२॥

तामिमां तिमिरवृद्धिपीडितां शैलराजतनयेऽधुना स्थिताम् ।
एकतस्तटतमालमालिनीं पश्य धातुरसनिम्नगामिव ॥५३॥

सान्ध्यमस्तमितशेषमातपं रक्तलेखमपरा बिभर्ति दिक् ।
सांपरायवसुधा सशोणितं मण्डलाग्रमिव तिर्यगुज्झितम् ॥५४॥

यामिनीदिवससन्धिसम्भवे तेजसि व्यवहिते सुमेरुणा ।
एतदन्धतमसं निरङ्कुशं दिक्षु दीर्घनयने विजृम्भते ॥५५॥

नोर्ध्वमीक्षणगतिर्न चाप्यधो नाभितो न पुरतो न पृष्ठतः ।
लोक एष तिमिरौघवेष्टितो गर्भवास इव वर्तते निशि ॥५६॥

शुद्धमाविलमवस्थितं चलं वक्रमार्जवगुणान्वितं च यत् ।
सर्वमेव तमसा समीकृतं धिङ् महत्त्वमसतां हृतान्तरम् ॥५७॥

नूनमुन्नमति यज्वनां पतिः शार्वरस्य तमसो निषिद्धये ।
पुण्डरीकमुखि पूर्वदिङ्मुखं केतकैरिव रजोभिराहतम् ॥५८॥

मन्दरान्तरितमूर्तिना निशा लक्ष्यते शशभृता सतारका ।
त्वं मया प्रियसखीसमागता श्रोष्यतेव वचनानि पृष्ठतः ॥५९॥

रुद्धनिर्गमनमादिनक्षयात् पूर्वदृष्टतनु चन्द्रिकास्मितम् ।
एतदुद्गिरति चन्द्रमण्डलं दिग्रहस्यमिव रात्रिचोदितम् ॥६०॥

पश्य पक्वफलिनीफलत्विषा बिम्बलाञ्छितवियत्सरोम्भसा ।
विप्रकृष्टविवरं हिमांशुना चक्रवाकमिथुनं विडम्ब्यते ॥६१॥

शक्यमोषधिपतेर्नवोदयाः कर्णपूररचनाकृते तव ।
अप्रगल्भयवसूचिकोमलाश्छेत्तुमग्रनखसम्पुटैः कराः ॥६२॥

अङ्गुलीभिरिव केशसंचयं सन्निगृह्य तिमिरं मरीचिभिः ।
कुड्मलीकृतसरोजलोचनं चुम्बतीव रजनीमुखं शशी ॥६३॥

पश्य पार्वति नवेन्दुरश्मिभिर्भिन्नसान्द्रतिमिरं नभस्तलम् ।
लक्ष्यते द्विरदभोगदूषितं सप्रसादमिव मानसं सरः ॥६४॥

रक्तभावमपहाय चन्द्रमा जात एष परिशुद्धमण्डलः ।
विक्रिया न खलु कालदोषजा निर्मलप्रकृतिषु स्थिरोदया ॥६५॥

उन्नतेषु शशिनः प्रभा स्थिता निम्नसंश्रयपरं निशातमः ।
नूनमात्मसदृशी प्रकल्पिता वेधसा हि गुणदोषयोर्गतिः ॥६६॥

चन्द्रपाद—जनित—प्रवृत्तिभिश्चन्द्रकान्तजलविन्दुभिर्गिरिः ।
मेखलातरुषु निद्रितानमून् बोधयत्यसमये शिखण्डिनः ॥६७॥

कल्पवृक्षशिखरेषु संप्रति प्रस्फुरद्भिरिव पश्य सुन्दरि ।
हारयष्टिरचनामिवांशुभिः कर्तुमागतकुतूहलः शशी ॥६८॥

उन्नतावनतभाववत्तया चन्द्रिका सतिमिरा गिरेरियम् ।
भक्तिभिर्बहुविधाभिरर्पिता भाति भूतिरिव मत्तहस्तिनः ॥६९॥

एतदुच्छ्वसितपीतमैन्दवं वोढुमक्षममिव प्रभारसम् ।
मुक्तषट्पदविरावमञ्जसा भिद्यते कुमुदमानिबन्धनात् ॥७०॥

पश्य कल्पतरुलम्बि शुद्धया ज्योत्स्नया जनितरूपसंशयम् ।
मारुते चलति चण्डिके बलाद् व्यज्यते विपरिवृत्तमंशुकम् ॥७१॥

शक्यमङ्गुलिभिरुत्थितैरधः शाखिनां पतितपुष्पपेशलैः ।
पत्रजर्जरशशिप्रभालवैरेभिरुत्कचयितुं तवालकान् ॥७२॥

एष चारुमुखि योगतारया युज्यते तरल-विम्बया शशी ।
साध्वसादुपगतप्रकम्पया कन्ययेव नवदीक्षया वरः ॥७३॥

पाक—भिन्न—शरकाण्ड—गौरयोरुल्लसत्प्रकृतिज—प्रसादयोः ।
रोहतीव तव गण्डलेखयोश्चन्द्रबिम्बनिहिताक्षि ! चन्द्रिका ॥७४॥

लोहितार्कमणिभाजनार्पितं कल्पवृक्षमधु बिभ्रती स्वयम् ।
त्वामियं स्थितिमतीमुपागता गन्धमादनवनाधिदेवता ॥७५॥

आर्द्रकेसरसुगन्धि ते मुखं मत्तरक्तनयनं स्वभावतः ।
अत्र लब्धवसतिर्गुणान्तरं किं विलासिनि मदः करिष्यति ।।७६।।

मान्यभक्तिरथवा सखीजनः सेव्यतामिदमनङ्गदीपनम् ।
इत्युदारमभिधाय शङ्करस्तामपाययत पानमम्बिकाम् ।।७७।।

पार्वती तदुपयोगसम्भवां विक्रियामपि सतां मनोहराम् ।
अप्रतर्क्यविधियोगनिर्मितामाम्रतेव सहकारतां ययौ ।।७८।।

तत्क्षणं विपरिवर्तितह्रियोर्नेष्यतोः शयनमिद्धरागयोः ।
सा बभूव वशवर्तिनी द्वयोः शूलिनः सुवदना मदस्य च ।।७९।।

घूर्णमाननयनं स्खलत्कथं स्वेदबिन्दु मदकारणस्मितम् ।
आननेन न तु तावदीश्वरश्चक्षुषा चिरमुमामुखं पपौ ।।८०।।

तां विलम्बि-तपनीयमेखलामुद्वहज्जघनभारदुर्वहाम् ।
ध्यानसंभृतविभूतिरीश्वरः प्राविशन्मणिशिलागृहं रहः ।।८१।।

तत्र हंसधवलोत्तरच्छदं जाह्नवीपुलिनचारुदर्शनम् ।
अध्यशेत शयनं प्रियासखः शारदाभ्रमिव रोहिणीपतिः ।।८२।।

क्लिष्टकेशमवलुप्तचन्दनं व्यत्ययार्पितनखं समत्सरम् ।
तस्य तच्छिदुरमेखलागुणं पार्वतीरतमभून्न तृप्तये ।।८३।।

केवलं प्रियतमादयालुना ज्योतिषामवनतासु पङ्क्तिषु ।
तेन तत्प्रतिगृहीतवक्षसा नेत्रमीलनकुतूहलं कृतम् ।।८४।।

स व्यबुध्यत बुधस्तवोचितः शातकुम्भकमलाकरैः समम् ।
मूर्च्छनापरिगृहीतकैशिकैः किन्नरैरुषसि गीतमङ्गलः ।।८५।।

तौ क्षणं शिथिलितोपगूहनौ दम्पती चलितमानसोर्मयः ।
पद्मभेदपिशुनाः सिषेविरे गन्धमादनवनान्तमारुताः ।।८६।।

ऊरुमूलनखमार्गराजिभिस्तत्क्षणं हृतविलोचनो हरः ।
वाससः प्रशिथिलस्य संयमं कुर्वतीं प्रियतमामवारयत् ।।८७।।

स प्रजागरकषायलोचनं गाढदन्तपरिताडिताधरम् ।
आकुलालकमरंस्त रागवान् प्रेक्ष्य भिन्नतिलकं प्रियामुखम् ।।८८।।

तेन भिन्नविषमोत्तरच्छदं मध्यपिण्डितविसूत्रमेखलम् ।
निर्मलेऽपि शयनं निशात्यये नोज्झितं चरणरागलाञ्छितम् ।।८९।।

स प्रियामुखरसं दिवानिशं हर्षवृद्धिजननं सिषेविषुः ।
दर्शनप्रणयिनामदृश्यतामाजगाम विजयानिवेदनात् ।।९०।।

समदिवसनिशीथं सङ्गिनस्तत्र शम्भोः
शतमगमदृतूनां साग्रमेका निशेव ।
न तु सुरतसुखेभ्यश्छिन्नतृष्णो बभूव
ज्वलन इव समुद्रान्तर्गतस्तज्जलौघैः ।।९१।।

।। इति श्रीमहाकविकालिदासकृतौ कुमारसंभवे महाकाव्ये
पार्वतीपरमेश्वरवर्णनो नामाष्टमः सर्गः[1] ।।

[समाप्तमिदं कुमारसंभवं नाम महाकाव्यम्]



१. इतः परं ये सर्गाः, ते कालिदासबाह्याः । तत्र हेतवः अस्पृष्टकालिदासप्रतिभाकत्वाद् वाक्यवक्रोक्तिभेदः, दुःशकस्य परमेश्वरोद्वाहस्य संपत्तौ कार्तिकेयसंभवस्य तत्कर्तृकस्य तारकवधस्य चौत्सर्गिकत्वम्, अग्रिमस्य वस्तुनोऽश्लीलप्रायत्वादकाव्योचितत्वं च । भगवतस्तेजसस्तत्र तत्र संक्रान्तिर्हि पुराणमात्रे स्थानं लभेत, न तूचितत्वमात्रप्राणे काव्ये । श्रूयते चात्र शप्तः कविः । ततश्च कथमसावग्रतः प्रवर्त्तेत ।

रघुवंशम्

रघुवंशम्

प्रथमः सर्गः

[1]वागर्थाविव संपृक्तौ वागर्थप्रतिपत्तये ।
जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ ॥१॥

क्व सूर्यप्रभवो वंशः क्व चाल्पविषया मतिः ।
तितीर्षुर्दुस्तरं मोहादुडुपेनास्मि सागरम् ॥२॥

मन्दः कवियशःप्रार्थी गमिष्याम्युपहास्यताम् ।
प्रांशुलभ्ये फले लोभादुद्बाहुरिव वामनः ॥३॥

अथवा कृतवाग्द्वारे वंशेऽस्मिन् पूर्वसूरिभिः ।
मणौ वज्रसमुत्कीर्णे सूत्रस्येवास्ति मे गतिः ॥४॥

सोऽहमा[1]जन्मशुद्धानामा[2]फलोदयकर्मणाम् ।
[3]आसमुद्रक्षितीशानामा[4]नाकरथवर्त्मनाम् ॥५॥

[5]यथाविधिहुताग्नीनां [6]यथाकामार्चितार्थिनाम् ।
[7]यथापराधदण्डानां [8]यथाकालप्रबोधिनाम् ॥६॥

[9]त्यागाय संभृतार्थानां [10]सत्याय मितभाषिणाम् ।
[11]यशसे विजिगीषूणां [12]प्रजायै गृहमेधिनाम् ॥७॥

[13]शैशवेऽभ्यस्तविद्यानां [14]यौवने विषयैषिणाम् ।
[15]वार्द्धके मुनिवृत्तीनां [16]योगेनान्ते तनुत्यजाम्[a] ॥८॥

रघूणामन्वयं वक्ष्ये तनुवाग्विभवोऽपि सन् ।
तद्गुणैः कर्णमागत्य चापलाय प्रचोदितः ॥९॥

---

१. पद्यमिदं प्रक्षिप्तमिति दक्षिणात्याः ।

a. एते सर्वे गुणा रघावेव दर्शिता इति रघुरेवात्र नायकः । अजप्रभृतिष्वेतेषां क्रमेण ह्रासात् तेषां रघुमाहात्म्यपर्यवसायित्वमेव व्यतिरेकविधया । मानुषवध्यस्य रावणस्य दशरथेनापि हन्तुं शक्यत्वे रामाद्यवतारः पुरुषदौर्बल्यसूचनमेव ।

तं सन्तः श्रोतुमर्हन्ति सदसद्व्यक्तिहेतवः ।
हेम्नः संलक्ष्यते ह्यग्नौ विशुद्धिः श्यामिकापि वा ॥१०॥

वैवस्वतो मनुर्नाम माननीयो मनीषिणाम् ।
आसीन्महीक्षितामाद्यः प्रणवश्छन्दसामिव ॥११॥

तदन्वये शुद्धिमति प्रसूतः शुद्धिमत्तरः ।
दिलीप इति राजेन्दुरिन्दुः क्षीरनिधाविव ॥१२॥

व्यूढोरस्को वृषस्कन्धः शालप्रांशुर्महाभुजः ।
आत्मकर्मक्षमं देहं क्षात्रो धर्म इव श्रितः ॥१३॥

सर्वातिरिक्तसारेण सर्वतेजोऽभिभाविना ।
स्थितः सर्वोन्नतेनोर्वीं क्रान्त्वा मेरुरिवात्मना ॥१४॥

आकारसदृशप्रज्ञः प्रज्ञया सदृशागमः ।
आगमैः सदृशारम्भ आरम्भसदृशोदयः ॥१५॥

भीमकान्तैर्नृपगुणैः स बभूवोपजीविनाम् ।
अधृष्यश्चाभिगम्यश्च यादोरत्नैरिवार्णवः ॥१६॥

रेखामात्रमपि क्षुण्णादामनोर्वर्त्मनः परम् ।
न व्यतीयुः प्रजास्तस्य नियन्तुर्नेमिवृत्तयः ॥१७॥

प्रजानामेव भूत्यर्थं स ताभ्यो बलिमग्रहीत् ।
सहस्रगुणमुत्स्रष्टुमादत्ते हि रसं रविः ॥१८॥

सेना परिच्छदस्तस्य द्वयमेवार्थसाधनम् ।
शास्त्रेष्वकुण्ठिता बुद्धिर्मौर्वी धनुषि चातता ॥१९॥

तस्य संवृतमन्त्रस्य गूढाकारेङ्गितस्य च ।
फलानुमेयाः प्रारम्भाः संस्काराः प्राक्तना इव ॥२०॥

जुगोपात्मानमत्रस्तो भेजे धर्ममनातुरः ।
अगृध्नुराददे सोऽर्थमसक्तः सुखमन्वभूत् ॥२१॥

ज्ञाने मौनं क्षमा शक्तौ त्यागे श्लाघाविपर्ययः ।
गुणा गुणानुवन्धित्वात् तस्य सप्रसवा इव ।।२२।।

अनाकृष्टस्य विषयैर्विद्यानां पारदृश्वनः ।
तस्य धर्मरतेरासीद् वृद्धत्वं जरसा विना ।।२३।।

प्रजानां विनयाधानाद् रक्षणाद् भरणादपि ।
स पिता पितरस्तासां केवलं जन्महेतवः ।।२४।।

स्थित्यै दण्डयतो दण्ड्यान् परिणेतुः प्रसूतये ।
अप्यर्थकामौ तस्याऽऽस्तां धर्म एव मनीषिणः ।।२५।।

दुदोह गां स यज्ञाय सस्याय मघवा दिवम् ।
संपद्विनिमयेनोभौ दधतुर्भुवनद्वयम् ।।२६।।

न किलानुययुस्तस्य राजानो रक्षितुर्यशः ।
व्यावृत्ता यत् परस्वेभ्यः श्रुतौ तस्करता स्थिता ।।२७।।

द्वेष्योऽपि संमतः शिष्टस्तस्यार्तस्य यथौषधम् ।
त्याज्यो दुष्टः प्रियोऽप्यासीदङ्गुलीवोरगक्षता ।।२८।।

तं वेधा विदधे नूनं महाभूतसमाधिना ।
तथाहि सर्वे तस्यासन् परार्थैकफला गुणाः ।।२९।।

स वेला-वप्र-वलयां परिखीकृतसागराम् ।
अनन्यशासनामुर्वीं शशासैकपुरीमिव ।।३०।।

तस्य दाक्षिण्यरूढेन नाम्ना मगधवंशजा ।
पत्नी सुदक्षिणेत्यासीदध्वरस्येव दक्षिणा ।।३१।।

कलत्रवन्तमात्मानमवरोधे महत्यपि ।
तया मेने मनस्विन्या लक्ष्म्या च वसुधाधिपः ।।३२।।

तस्यामात्मानुरूपायामात्मजन्म-समुत्सुकः ।
विलम्बितफलैः कालं स निनाय मनोरथैः ।।३३।।

संतानार्थाय विधये स्वभुजादवतारिता ।
तेन धूर्जगतो गुर्वी सचिवेषु निचिक्षिपे ॥३४॥

अथाभ्यर्च्य विधातारं प्रयतौ पुत्रकाम्यया ।
तौ दम्पती वसिष्ठस्य गुरोर्जग्मतुराश्रमम् ॥३५॥

स्निग्धगम्भीर—निर्घोषमेकं स्यन्दनमास्थितौ ।
प्रावृषेण्यं पयोवाहं विद्युदैरावताविव ॥३६॥

मा भूदाश्रमपीडेति परिमेयपुरःसरौ ।
अनुभावविशेषात् तु सेनापरिवृताविव ॥३७॥

सेव्यमानौ सुखस्पर्शैः सालनिर्यासगन्धिभिः ।
पुष्परेणूत्किरैर्वातैराधूतवनराजिभिः ॥३८॥

मनोभिरामाः शृण्वन्तौ रथनेमिस्वनोन्मुखैः ।
षड्जसंवादिनीः केका द्विधा भिन्नाः शिखण्डिभिः ॥३९॥

परस्पराक्षि – सादृश्य – मदूरोज्झित – वर्त्मसु ।
मृगद्वन्द्वेषु पश्यन्तौ स्यन्दनाबद्धदृष्टिषु ॥४०॥

श्रेणीबन्धाद् वितन्वद्भिरस्तम्भां तोरणस्रजम् ।
सारसैः कलनिर्ह्रादैः क्वचिदुन्नमिताननौ ॥४१॥

पवनस्यानुकूलत्वात् प्रार्थनासिद्धिशंसिनः ।
रजोभिस्तुरगोत्कीर्णैरस्पृष्टालकवेष्टनौ ॥४२॥

सरसीष्वरविन्दानां वीचिविक्षोभशीतलम् ।
आमोदमुपजिघ्रन्तौ स्वनिःश्वासानुकारिणम् ॥४३॥

ग्रामेष्वात्मविसृष्टेषु यूपचिह्नेषु यज्वनाम् ।
अमोघाः प्रतिगृह्णन्तावर्घ्यानुपदमाशिषः ॥४४॥

हैयङ्गवीनमादाय घोषवृद्धानुपस्थितान् ।
नामधेयानि पृच्छन्तौ वन्यानां मार्गशाखिनाम् ॥४५॥

काप्यभिख्या तयोरासीद् व्रजतोः शुद्धवेषयोः ।
हिमनिर्मुक्तयोर्योगे चित्राचन्द्रमसोरिव ॥४६॥

तत् तद् भूमिपतिः पत्न्यै दर्शयन् प्रियदर्शनः ।
अपि लङ्घितमध्वानं बुबुधे न बुधोपमः ॥४७॥

स दुष्प्रापयशाः प्रापदाश्रमं श्रान्तवाहनः ।
सायं संयमिनस्तस्य महर्षेर्महिषीसखः ॥४८॥

वनान्तरादुपावृत्तैः समित्कुशफलाहरैः ।
पूर्यमाणमदृश्याग्नि – प्रत्युद्यातैस्तपस्विभिः ॥४९॥

आकीर्णमृषिपत्नीनामुटजद्वाररोधिभिः ।
अपत्यैरिव नीवारभागधेयोचितैर्मृगैः ॥५०॥

सेकान्ते मुनिकन्याभिस्तत्क्षणोज्झितवृक्षकम् ।
विश्वासाय विहङ्गानामालवालाम्बुपायिनाम् ॥५१॥

आतपात्ययसंक्षिप्तनीवारासु निषादिभिः ।
मृगैर्वर्तित – रोमन्थ – मुटजाङ्गन – भूमिषु ॥५२॥

अभ्युत्थिताग्निपिशुनैरतिथीनाश्रमोन्मुखान् ।
पुनानं पवनोद्धूतैर्धूमैराहुतिगन्धिभिः ॥५३॥

अथ यन्तारमादिश्य धुर्यान् विश्रामयेति सः ।
तामवारोहयत् पत्नीं रथादवततार च ॥५४॥

तस्मै सभ्याः सभार्याय गोप्त्रे गुप्ततमेन्द्रियाः ।
अर्हणामर्हते चक्रुर्मुनयो नयचक्षुषे ॥५५॥

विधेः सायंतनस्यान्ते स ददर्श तपोनिधिम् ।
अन्वासितमरुन्धत्या स्वाहयेव हविर्भुजम् ॥५६॥

तयोर्जगृहतुः पादान् राजा राज्ञी च मागधी ।
तौ गुरुर्गुरुपत्नी च प्रीत्या प्रतिननन्दतुः ॥५७॥

तमातिथ्यक्रिया-शान्त-रथ-क्षोभ-परिश्रमम् ।
पप्रच्छ कुशलं राज्ये राज्याश्रममुनिं मुनिः ॥५८॥

अथाथर्वनिधेस्तस्य विजितारिपुरः पुरः ।
अर्थ्यामर्थपतिर्वाचमाददे वदतां वरः ॥५९॥

उपपन्नं ननु शिवं सप्तस्वङ्गेषु यस्य मे ।
दैवीनां मानुषीणां च प्रतिहर्ता त्वमापदाम् ॥६०॥

तव मन्त्रकृतो मन्त्रैर्दूरात् प्रशमितारिभिः ।
प्रत्यादिश्यन्त इव मे दृष्टलक्ष्यभिदः शराः ॥६१॥

हविरावर्जितं होतस्त्वया विधिवदग्निषु ।
वृष्टिर्भवति सस्यानामवग्रहविशोषिणाम् ॥६२॥

पुरुषायुषजीविन्यो निरातङ्का निरीतयः ।
यन्मदीयाः प्रजास्तस्य हेतुस्त्वद्ब्रह्मवर्चसम् ॥६३॥

त्वयैवं चिन्त्यमानस्य गुरुणा ब्रह्मयोनिना ।
सानुबन्धाः कथं न स्युः संपदो मे निरापदः ॥६४॥

किन्तु वध्वां तवैतस्यामदृष्टसदृशप्रजम् ।
न मामवति सद्वीपा रत्नसूरपि मेदिनी ॥६५॥

नूनं मत्तः परं वंश्याः पिण्डविच्छेददर्शिनः ।
न प्रकामभुजः श्राद्धे स्वधासंग्रहतत्पराः ॥६६॥

मत्परं दुर्लभं मत्वा नूनमावर्जितं मया ।
पयः पूर्वैः स्वनिःश्वासैः कवोष्णमुपभुज्यते ॥६७॥

सोऽहमिज्याविशुद्धात्मा प्रजालोपनिमीलितः ।
प्रकाशश्चाप्रकाशश्च लोकालोक इवाचलः ॥६८॥

लोकान्तरसुखं पुण्यं तपोदानसमुद्भवम् ।
संततिः शुद्धवंश्या हि परत्रेह च शर्मणे ॥६९॥

तया हीनं विधातर्मां कथं पश्यन् न दूयसे ।
सिक्तं स्वयमिव स्नेहाद् वन्ध्यमाश्रमवृक्षकम् ।।७०।।

असह्यपीडं भगवन्नृणमन्त्यमवेहि मे ।
अरुन्तुदमिवालानमनिर्वाणस्य दन्तिनः ।।७१।।

तस्मान्मुच्ये यथा तात संविधातुं तथार्हसि ।
इक्ष्वाकूणां दुरापेऽर्थे त्वदधीना हि सिद्धयः ।।७२।।

इति विज्ञापितो राज्ञा ध्यानस्तिमितलोचनः ।
क्षणमात्रमृषिस्तस्थौ सुप्तमीन इव ह्रदः ।।७३।।

सोऽपश्यत् प्रणिधानेन संततेः स्तम्भकारणम् ।
भावितात्मा भुवो भर्तुरथैनं प्रत्यबोधयत् ।।७४।।

पुरा शक्रमुपस्थाय तवोर्वीं प्रति यास्यतः ।
आसीत् कल्पतरुच्छायामाश्रिता सुरभिः पथि ।।७५।।

धर्मलोपभयाद् राज्ञीमृतुस्नातामिमां स्मरन् ।
प्रदक्षिणक्रियार्हायां तस्यां त्वं साधु नाचरः ।।७६।।

[1]अवजानासि मां यस्मादतस्ते न भविष्यति ।
मत्प्रसूतिमनाराध्य प्रजेति त्वां शशाप सा ।।७७।।

स शापो न त्वया राजन् न च सारथिना श्रुतः ।
नदत्याकाशगङ्गायाः स्रोतस्युद्दामदिग्गजे ।।७८।।

ईप्सितं तदवज्ञानाद् विद्धि सार्गलमात्मनः ।
प्रतिबध्नाति हि श्रेयः पूज्यपूजाव्यतिक्रमः ।।७९।।

हविषे दीर्घसत्रस्य सा चेदानीं प्रचेतसः ।
भुजङ्गपिहितद्वारं पातालमधितिष्ठति ।।८०।।

---

१. पद्यमिदं त्याज्यमित्यरहस्यज्ञाः । मेघविद्युदिव कामधेनुः प्रकृतिः । अतएव 'भुजङ्गपिहिता' रघु० १।८०। मनुष्यस्तद्विकृतिमेव सेवेत । अत्रास्मल्लेखः 'नन्दिनीविद्ये'ति ।

स त्वमेकान्तरां तस्याः मदीयां वत्समातरम् ।[1]
आराधय सपत्नीकः प्रीता कामदुघा हि सा ॥८१॥

इति वादिन एवास्य होतुराहुतिसाधनम् ।
अनिन्द्या नन्दिनी नाम धेनुराववृते वनात् ॥८२॥

ललाटोदयमाभुग्नं पल्लवस्निग्धपाटला ।
बिभ्रती श्वेतरोमाङ्कं संध्येव शशिनं नवम् ॥८३॥

भुवं कोष्णेन कुण्डोध्नी मेध्येनावभृथादपि ।
प्रस्नवेनाभिवर्षन्ती वत्सालोकप्रवर्तिना ॥८४॥

रजःकणैः खुरोद्धूतैः स्पृशद्भिर्गात्रमन्तिकात् ।
तीर्थाभिषेकजां शुद्धिमादधाना महीक्षितः ॥८५॥

तां पुण्यदर्शनां दृष्ट्वा निमित्तज्ञस्तपोनिधिः ।
याज्यमाशंसितावन्ध्यप्रार्थनं पुनरब्रवीत् ॥८६॥

अदूरवर्तिनीं सिद्धिं राजन् विगणयात्मनः ।
उपस्थितेयं कल्याणी नाम्नि कीर्तित एव यत् ॥८७॥

वन्यवृत्तिरिमां शश्वदात्मानुगमनेन गाम् ।
[2]विद्यामभ्यसनेनेव प्रसादयितुमर्हसि ॥८८॥

प्रस्थितायां प्रतिष्ठेथाः स्थितायां स्थितिमाचरेः ।
निषण्णायां निषीदास्यां पीताम्भसि पिबेरपः ॥८९॥

वधूर्भक्तिमती चैनामर्चितामातपोवनात् ।
प्रयता प्रातरन्वेतु सायं [3]प्रत्युद्व्रजेदपि ॥९०॥

---

१. उदयपुरादिहस्तलेखेष्वयमेव पाठः । 'सुतां तदीयां सुरभेः कृत्वा प्रतिनिधिं शुचिः'—म.

२. गां विद्यां च यौगपद्येन प्रसादयेति गुरोरादेशः । एवं च 'नन्दिनी' नाम धेनुविशेषो विद्याविशेषश्च । तदत्र प्रासंगिकोभयोपमा ।

३. प्रत्युत्प्रयातु चेति युज्येत वक्तुम् ।

इत्याप्रसादादस्यास्त्वं परिचर्यापरो भव ।
अविघ्नमस्तु ते स्थेयाः पितेव धुरि पुत्रिणाम् ।।९१।।

तथेति प्रतिजग्राह प्रीतिमान् सपरिग्रहः ।
आदेशं देशकालज्ञः शिष्यः शासितुरानतः ।।९२।।

अथ प्रदोषे दोषज्ञः संवेशाय विशांपतिम् ।
सूनुः सूनृतवाक् स्रष्टुर्विससर्जोर्जितश्रियम् ।।९३।।

सत्यामपि तपःसिद्धौ नियमापेक्षया मुनिः ।
कल्पवित् कल्पयामास वन्यामेवास्य संविधाम् ।।९४।।

निर्दिष्टां कुलपतिना स पर्णशाला-
मध्यास्य प्रयतपरिग्रहद्वितीयः ।
तच्छिष्याध्ययननिवेदितावसानां
संविष्टः कुशशयने निशां निनाय ।।९५।।

इति श्रीमहाकविकालिदासकृतौ रघुवंशे महाकाव्ये वसिष्ठाश्रमे
नन्दिनीविद्याधिगमो नाम प्रथमः सर्गः ।।



द्वितीयः सर्गः

अथ प्रजानामधिपः प्रभाते जायाप्रतिग्राहितगन्धमाल्याम् ।
वनाय प्रीतप्रतिबद्धवत्सां यशोधनो धेनुमृषेर्मुमोच ॥१॥

तस्याः खुरन्यासपवित्रपांसुमपांसुलानां धुरि कीर्तनीया ।
मार्गं मनुष्येश्वरधर्मपत्नी श्रुतेरिवार्थं स्मृतिरन्वगच्छत् ॥२॥

निवर्त्य राजा दयितां दयालुस्तां सौरभेयीं सुरभिर्यशोभिः ।
पयोधरीभूतचतुःसमुद्रां जुगोप गोरूपधरामिवोर्वीम् ॥३॥

व्रताय तेनानुचरेण धेनोर्न्यषेधि शेषोऽप्यनुयायिवर्गः ।
न चान्यतस्तस्य शरीररक्षा स्ववीर्यगुप्ता हि मनोः प्रसूतिः ॥४॥

आस्वादवद्भिः कवलैस्तृणानां कण्डूयनैर्दंशनिवारणैश्च ।
अव्याहतैः स्वैरगतैः स तस्याः सम्राट् समाराधनतत्परोऽभूत् ॥५॥

स्थितः स्थितामुच्चलितः प्रयातां निषेदुषीमासनबन्धधीरः ।
जलाभिलाषी जलमाददानां छायेव तां भूपतिरन्वगच्छत् ॥६॥

स न्यस्तचिह्नामपि राजलक्ष्मीं तेजोविशेषानुमितां दधानः ।
आसीदनाविष्कृतदानराजिरन्तर्मदावस्थ इव द्विपेन्द्रः ॥७॥

लताप्रतानोद्ग्रथितैः स केशैरधिज्यधन्वा विचचार दावम् ।
रक्षापदेशान्मुनिहोमधेनोर्वन्यान् विनेष्यन्निव दुष्टसत्त्वान् ॥८॥

विसृष्टपार्श्वानुचरस्य तस्य पार्श्वद्रुमाः पाशभृता समस्य ।
उदीरयामासुरिवोन्मदानामालोकशब्दं वयसां विरावैः ॥९॥

मरुत्प्रयुक्ताश्च मरुत्सखाभं तमर्च्यमारादभिवर्त्तमानम् ।
अवाकिरन् बाललताः प्रसूनैराचारलाजैरिव पौरकन्याः ॥१०॥

धनुर्भृतोऽप्यस्य दयार्द्रभावमाख्यातमन्तःकरणैर्विशङ्कैः ।
विलोकयन्त्यो वपुरापुरक्ष्णां प्रकामविस्तारफलं हरिण्यः ॥११॥

स कीचकैर्मारुतपूर्णरन्ध्रैः कूजद्भिरापादितवंशकृत्यम् ।
शुश्राव कुञ्जेषु यशः स्वमुच्चैरुद्गीयमानं वनदेवताभिः ॥१३॥

पृक्तस्तुषारैर्गिरिनिर्झराणामनोकहाकम्पितपुष्पगन्धिः ।
तमातपक्लान्तमनातपत्रमाचारपूतं पवनः सिषेवे ॥१२॥

शशाम वृष्टचापि विना दवाग्निरासीद् विशेषा फलपुष्पवृद्धिः ।
ऊनं न सत्त्वेष्वधिको ववाधे तस्मिन् वनं गोप्तरि गाहमाने ॥१४॥

संचारपूतानि दिगन्तराणि कृत्वा दिनान्ते निलयाय गन्तुम् ।
प्रचक्रमे पल्लवरागताम्रा प्रभा पतङ्गस्य मुनेश्च [१]धेनुः ॥१५॥

तां देवतापित्रतिथिक्रियार्थामन्वग्ययौ मध्यमलोकपालः ।
वभौ च सा तेन सतां मतेन श्रद्धेव साक्षाद् विधिनोपपन्ना ॥१६॥

स पल्वलोत्तीर्णवराहयूथान्यावासवृक्षोन्मुखवर्हिणानि ।
ययौ मृगाध्यासितशाद्वलानि श्यामायमानानि वनानि पश्यन् ॥१७॥

आपीनभारोद्वहनप्रयत्नाद् गृष्टिर्गुरुत्वाद् वपुषो नरेन्द्रः ।
उभावलञ्चक्रतुरञ्चिताभ्यां तपोवनावृत्तिपथं गताभ्याम् ॥१८॥

वसिष्ठधेनोरनुयायिनं तमावर्त्तमानं वनिता वनान्तात् ।
पपौ निमेषालसपक्ष्मपङ्क्तिरुपोषिताभ्यामिव लोचनाभ्याम् ॥१९॥

पुरस्कृता वर्त्मनि पार्थिवेन प्रत्युद्गता पार्थिवधर्मपत्न्या ।
तदन्तरे सा विरराज धेनुर्दिनक्षपामध्यगतेव सन्ध्या ॥२०॥

प्रदक्षिणीकृत्य पयस्विनीं तां सुदक्षिणा साक्षतपात्रहस्ता ।
प्रणम्य चानर्च विशालमस्याः शृङ्गान्तरं द्वारमिवार्थसिद्धेः ॥२१॥

---

१. प्रस्तुतोभयोपमा । तत्रापि धेनुः पूर्वप्रसङ्गागतेति दीपकमेवात्र युक्तम् ।

वत्सोत्सुकापि स्तिमिता सपर्यां प्रत्यग्रहीत् सेति ननन्दतुस्तौ ।
भक्त्योपपन्नेषु हि तद्विधानां प्रसादचिह्नानि पुरःफलानि ।।२२।।

गुरोः सदारस्य निपीड्य पादौ समाप्य सान्ध्यं च विधिं दिलीपः ।
दोहावसाने पुनरेव दोग्ध्रीं भेजे भुजोच्छिन्नरिपुर्निषण्णाम् ।।२३।।

तामन्तिकन्यस्तबलिप्रदीपामन्वास्य गोप्ता गृहिणीसहायः ।
क्रमेण सुप्तामनु संविवेश सुप्तोत्थितां प्रातरनूदतिष्ठत्[1] ।।२४।।

इत्थं व्रतं धारयतः प्रजार्थं समं महिष्या महनीयकीर्त्तेः ।
सप्त व्यतीयुस्त्रिगुणानि तस्य दिनानि दीनोद्धरणोचितस्य ।।२५।।

अन्येद्युरात्मानुचरस्य भावं जिज्ञासमाना मुनिहोमधेनुः ।
गङ्गाप्रपातान्तविरूढशष्पं गौरीगुरोर्गह्वरमाविवेश ।।२६।।

सा दुष्प्रधर्षा मनसापि हिंस्रैरित्यद्रिशोभाप्रहितेक्षणेन ।
अलक्षिताभ्युत्पतनो नृपेण प्रसह्य सिंहः किल तां चकर्ष ।।२७।।

तदीयमाक्रन्दितमार्तसाधो-र्गुहानिबद्ध-प्रतिशब्ददीर्घम् ।
रश्मिष्विवादाय नगेन्द्रसक्तां निवर्तयामास नृपस्य दृष्टिम् ।।२८।।

स पाटलायां गवि तस्थिवांसं धनुर्धरः केसरिणं ददर्श ।
अधित्यकायामिव धातुमय्यां लोध्रद्रुमं सानुमतः प्रफुल्लम् ।।२९।।

ततो मृगेन्द्रस्य मृगेन्द्रगामी वधाय वध्यस्य शरं शरण्यः ।
जाताभिषङ्गो नृपतिर्निषङ्गादुद्धर्तुमैच्छत् प्रसभोद्धृतारिः ।।३०।।

वामेतरस्तस्य करः प्रहर्तुर्नखप्रभाभूषितकङ्कपत्रे ।
सक्ताङ्गुलिः सायकपुङ्ख एव चित्रार्पितारम्भ इवावतस्थे ।।३१।।

बाहु-प्रतिष्टम्भ-विवृद्ध--मन्युरभ्यर्णमागस्कृतमस्पृशद्भिः ।
राजा स्वतेजोभिरदह्यतान्तर्भोगीव मन्त्रौषधिरुद्धवीर्यः ।।३२।।

तमार्यगृह्यं निगृहीतधेनुर्मनुष्यवाचा मनुवंशकेतुम् ।
विस्माययन् विस्मितमात्मवृत्तौ सिंहोरुसत्त्वं निजगाद सिंहः ।।३३।।

---

१. नन्दिनी हि विद्या। सा च बुद्धिः। बुद्धिर्हि पूर्वमेव जागर्त्ति, पश्चात् पुमान्।

अलं महीपाल तव श्रमेण प्रयुक्तमप्यस्त्रमितो वृथा स्यात् ।
न पादपोन्मूलनशक्ति रंहः शिलोच्चये मूर्च्छति मारुतस्य ।।३४।।

कैलासगौरं वृषमारुरुक्षोः पादार्पणानुग्रहपूतपृष्ठम् ।
अवेहि मां किंकरमष्टमूर्त्तेः कुम्भोदरं नाम निकुम्भमित्रम् ।।३५।।

अमुं पुरः पश्यसि देवदारुं [1]पुत्रीकृतोऽसौ वृषभध्वजेन ।
यो हेमकुम्भस्तननिःसृतानां स्कन्दस्य मातुः पयसां रसज्ञः ।।३६।।

कण्डूयमानेन कटं कदाचिद् वन्यद्विपेनोन्मथिता त्वगस्य ।
अथैनमद्रेस्तनया शुशोच सेनान्यमालोढमिवासुरास्त्रैः ।।३७।।

तदाप्रभृत्येव वनद्विपानां त्रासार्थमस्मिन्नहमद्रिकुक्षौ ।
व्यापारितः शूलभृता विधाय सिंहत्वमङ्कागतसत्त्ववृत्ति ।।३८।।

तस्यालमेषा क्षुधितस्य तृप्त्यै प्रदिष्टकाला परमेश्वरेण ।
उपस्थिता शोणितपारणा मे सुरद्विषश्चान्द्रमसी सुधेव ।।३९।।

स त्वं निवर्तस्व विहाय लज्जां गुरोर्भवान् दर्शितशिष्यभक्तिः ।
शस्त्रेण रक्ष्यं यदशक्यरक्षं न तद् यशः शस्त्रभृतां क्षिणोति ।।४०।।

इति प्रगल्भं पुरुषाधिराजो मृगाधिराजस्य वचो निशम्य ।
प्रत्याहतास्त्रो गिरिशप्रभावादात्मन्यवज्ञां शिथिलीचकार ।।४१।।

प्रत्यब्रवीच्चैनमिषुप्रयोगे तत्पूर्वभङ्गे वितथप्रयत्नः ।
जडीकृतस्त्र्यम्बकवीक्षणेन वज्रं मुमुक्षन्निव वज्रपाणिः ।।४२।।

संरुद्धचेष्टस्य मृगेन्द्र कामं हास्यं वचस्तद् यदहं विवक्षुः ।
अन्तर्गतं प्राणभृतां हि वेद सर्वं भवान् भावमतोऽभिधास्ये ।।४३।।

मान्यः स मे स्थावरजङ्गमानां सर्गस्थितिप्रत्यवहारहेतुः ।
गुरोरपीदं धनमाहिताग्नेर्नश्यत् पुरस्तादनुपेक्षणीयम् ।।४४।।

---

१. अनेन कुमारसंभवं प्रागरच्यतेत्यनुमीयेत, तत्र ५।१४ पद्ये 'गुहोऽपि येषामि'-त्याद्युक्तेः ।

स त्वं मदीयेन शरीरवृत्तिं देहेन निर्वर्तयितुं प्रसीद ।
दिनावसानोत्सुकबालवत्सा विसृज्यतां धेनुरियं महर्षेः ॥४५॥

अथान्धकारं गिरिगह्वराणां दंष्ट्रामयूखैः शकलानि कुर्वन् ।
भूयः स भूतेश्वरपार्श्ववर्ती किंचिद् विहस्यार्थपतिं बभाषे ॥४६॥

एकातपत्रं जगतः प्रभुत्वं नवं वयः कान्तमिदं वपुश्च ।
अल्पस्य हेतोर्बहु हातुमिच्छन् विचारविमूढः प्रतिभासि मे त्वम् ॥४७॥

भूतानुकम्पा तव चेदियं गौरेका भवेत् स्वस्तिमती त्वदन्ते ।
जीवन् पुनः शश्वदुपप्लवेभ्यः प्रजाः प्रजानाथ पितेव पासि ॥४८॥

अथैकधेनोरपराधचण्डाद् गुरोः कृशानुप्रतिमाद् बिभेषि ।
शक्योऽस्य मन्युर्भवता विनेतुं गाः कोटिशः स्पर्शयता घटोध्नीः ॥४९॥

तद् रक्ष कल्याणपरम्पराणां भोक्तारमूर्जस्वलमात्मदेहम् ।
महीतलस्पर्शनमात्रभिन्नमृद्धं हि राज्यं पदमैन्द्रमाहुः ॥५०॥

एतावदुक्त्वा विरते मृगेन्द्रे प्रतिस्वनेनास्य गुहागतेन ।
शिलोच्चयोऽपि क्षितिपालमुच्चैः प्रीत्या तमेवार्थमभाषतेव ॥५१॥

निशम्य देवानुचरस्य वाचं मनुष्यदेवः पुनरप्युवाच ।
धेन्वा तदध्यासितकातराक्ष्या निरीक्ष्यमाणः सुतरां दयालुः ॥५२॥

क्षतात् किल त्रायत इत्युदग्रः क्षत्रस्य शब्दो भुवनेषु रूढः ।
राज्येन किं तद्विपरीतवृत्तेः प्राणैरुपक्रोशमलीमसैर्वा ॥५३॥

कथं नु शक्योऽनुनयो महर्षेर्विश्राणनाच्चान्यपयस्विनीनाम् ।
इमामनूनां सुरभेरवेहि रुद्रौजसा तु प्रहृतं त्वयाऽस्याम् ॥५४॥

सेयं स्वदेहार्पणनिष्क्रयेण न्याय्या मया मोचयितुं भवत्तः ।
न पारणा स्याद् विहता तवैवं भवेदलुप्तश्च मुनेः क्रियार्थः ॥५५॥

भवानपीदं परवानवैति महान् हि यत्नस्तव देवदारौ ।
स्थातुं नियोक्तुर्नहि शक्यमग्रे विनाश्य रक्ष्यं स्वयमक्षतेन ॥५६॥

किमप्यहिंस्यस्तव चेन्मतोऽहं यशःशरीरे भव मे दयालुः ।
एकान्तविध्वंसिषु मद्विधानां पिण्डेष्वनास्था खलु भौतिकेषु ।।५७।।

संबन्धमाभाषणपूर्वमाहुर्वृत्तः स नौ संगतयोर्वनान्ते ।
तद् भूतनाथानुग नार्हसि त्वं सम्बन्धिनो मे प्रणयं विहन्तुम् ।।५८।।

तथेति गामुक्तवते दिलीपः सद्यःप्रतिष्टम्भविमुक्तबाहुः ।
स न्यस्तशस्त्रो हरये स्वदेहमुपानयत् पिण्डमिवामिषस्य ।।५९।।

तस्मिन् क्षणे पालयितुः प्रजानामुत्पश्यतः सिंहनिपातमुग्रम् ।
अवाङ्मुखस्योपरि पुष्पवृष्टिः पपात विद्याधरहस्तमुक्ता ।।६०।।

उत्तिष्ठ वत्सेत्यमृतायमानं वचो निशम्योत्थितमुत्थितः सन् ।
ददर्श राजा जननीमिव स्वां गामग्रतः प्रस्रविणीं न सिंहम् ।।६१।।

तं विस्मितं धेनुरुवाच साधो मायां मयोद्भाव्य परीक्षितोऽसि ।
ऋषिप्रभावान्मयि नान्तकोऽपि प्रभुः प्रहर्तुं किमुतान्यहिंस्राः ।।६२।।

भक्त्या गुरौ मय्यनुकम्पया च प्रीतास्मि ते पुत्र वरं वृणीष्व ।
न केवलानां पयसां प्रसूतिमवेहि मां कामदुघां प्रसन्नाम् ।।६३।।

ततः समानीय स मानितार्थी हस्तौ स्वहस्तार्जितवीरशब्दः ।
वंशस्य कर्तारमनन्तकीर्त्तिं सुदक्षिणायां तनयं ययाचे ।।६४।।

संतानकामाय तथेति कामं राज्ञे प्रतिश्रुत्य पयस्विनी सा ।
दुग्ध्वा पयः पत्रपुटे मदीयं पुत्रोपभुङ्क्ष्वेति तमादिदेश ।।६५।।

वत्सस्य होमार्थविधेश्च शेषमृषेरनुज्ञामधिगम्य मातः ।
औधस्यमिच्छामि तवोपभोक्तुं षष्ठांशमुर्व्या इव रक्षितायाः ।।६६।।

इत्थं क्षितीशेन वसिष्ठधेनुर्विज्ञापिता प्रीततरा बभूव ।
तदन्विता हैमवताच्च कुक्षेः प्रत्याययावाश्रममश्रमेण ।।६७।।

तस्याः प्रसन्नेन्दुमुखः प्रसादं गुरुर्नृपाणां गुरवे निवेद्य ।
प्रहर्षचिह्नानुमितं प्रियायै शशंस वाचा पुनरुक्तयेव ।।६८।।

स नन्दिनीस्तन्यमनिन्दितात्मा सद्वत्सलो वत्सहुतावशेषम् ।
पपौ वसिष्ठेन कृताभ्यनुज्ञः शुभ्रं यशो मूर्त्तमिवातितृष्णः ॥६९॥

प्रातर्यथोक्तव्रतपारणान्ते प्रास्थानिकं स्वस्त्ययनं प्रयुज्य ।
तौ दम्पती स्वां प्रति राजधानीं प्रस्थापयामास वशी वसिष्ठः ॥७०॥

प्रदक्षिणीकृत्य हुतं हुताशमनन्तरं भर्तुररुन्धतीं च ।
धेनुं सवत्सां च नृपः प्रतस्थे सन्मङ्गलोदग्रतरप्रभावः ॥७१॥

श्रोत्राभिरामध्वनिना रथेन स धर्मपत्नीसहितः सहिष्णुः ।
ययावनुद्घातसुखेन मार्गं स्वेनेव पूर्णेन मनोरथेन ॥७२॥

तमाहितौत्सुक्यमदर्शनेन प्रजाः प्रजार्थव्रतकर्शिताङ्गम् ।
नेत्रैः पपुस्तृप्तिमनाप्नुवद्भिर्नवोदयं नाथमिवौषधीनाम् ॥७३॥

पुरन्दरश्रीः पुरमुत्पताकं प्रविश्य पौरैरभिनन्द्यमानः ।
भुजे भुजङ्गेन्द्रसमानसारे भूयः स भूमेर्धुरमाससञ्ज ॥७४॥

अथ नयनसमुत्थं ज्योतिरत्रेरिव द्यौः
सुरसरिदिव तेजो वह्निनिष्ठ्यूतमैशम् ।
नरपतिकुलभूत्यै गर्भमाधत्त राज्ञी
गुरुभिरभिनिविष्टं लोकपालानुभावैः ॥७५॥

॥ इति श्रीमहाकविकालिदासकृतौ रघुवंशे महाकाव्ये
सुदक्षिणागर्भाधानो नाम द्वितीयः सर्गः ॥

तृतीयः सर्गः

अथेप्सितं भर्तुरुपस्थितोदयं सखीजनोद्वीक्षणकौमुदीमुख(मह)म् ।
निदानमिक्ष्वाकुकुलस्य संततेः सुदक्षिणा दौर्हृदलक्षणं दधौ ॥१॥

शरीरसादादसमग्रभूषणा मुखेन सालक्ष्यत लोध्रपाण्डुना ।
तनुप्रकाशेन विचेयतारका प्रभातकल्पा शशिनेव शर्वरी ॥२॥

तदाननं मृत्सुरभि क्षितीश्वरो रहस्युपाघ्राय न तृप्तिमाययौ ।
करीव सिक्तं पृषतैः पयोमुचां शुचिव्यपाये वनराजिपल्वलम् ॥३॥

दिवं मरुत्वानिव भोक्ष्यते भुवं दिगन्तविश्रान्तरथो हि तत्सुतः ।
अतोऽभिलाषे प्रथमं तथाविधे मनो बबन्धान्यरसान् विलङ्घ्य सा ॥४॥

न मे ह्रिया शंसति किंचिदीप्सितं स्पृहावती वस्तुषु केषु मागधी ।
इति स्म पृच्छत्यनुवेलमादृतः प्रियासखीरुत्तरकोसलेश्वरः ॥५॥

उपेत्य सा दोहददुःखशीलतां यदेव वव्रे तदपश्यदाहृतम् ।
न हीष्टमस्य त्रिदिवेऽपि भूपतेरभूदनासाद्यमधिज्यधन्वनः ॥६॥

क्रमेण निस्तीर्य च दोहदव्यथां प्रचीयमानावयवा रराज सा ।
पुराणपत्रापगमादनन्तरं लतेव संनद्धमनोज्ञपल्लवा ॥७॥

दिनेषु गच्छत्सु नितान्तपीवरं तदीयमानीलमुखं स्तनद्वयम् ।
तिरश्चकार भ्रमराभिलीनयोः सुजातयोः पङ्कजकोशयोः श्रियम् ॥८॥

निधानगर्भामिव सागराम्बरां शमीमिवाभ्यन्तरलीनपावकाम् ।
नदीमिवान्तःसलिलां सरस्वतीं नृपः ससत्त्वां महिषीममन्यत ॥९॥

प्रियानुरागस्य मनःसमुन्नतेर्भुजार्जितानां च दिगन्तसंपदाम् ।
यथाक्रमं पुंसवनादिकाः क्रिया धृतेश्च धीरः सदृशीर्व्यधत्त सः ॥१०॥

सुरेन्द्रमात्राश्रितगर्भगौरवात् प्रयत्नमुक्तासनया गृहागतः ।
तयोपचाराञ्जलिखिन्नहस्तया ननन्द परिप्लवनेत्रया नृपः ॥११॥

कुमारभृत्याकुशलैरनुष्ठिते भिषग्भिराप्तैरथ गर्भभर्मणि ।
पतिः प्रतीतः प्रसवोन्मुखीं प्रियां ददर्श काले दिवमभ्रितामिव ॥१२॥

ग्रहैस्ततः पञ्चभिरुच्चसंश्रयैरसूर्यगैः सूचितभाग्यसंपदम् ।
असूत पुत्रं समये शचीसमा त्रिसाधना शक्तिरिवार्थमक्षयम् ॥१३॥

दिशः प्रसेदुर्मरुतो ववुः सुखाः प्रदक्षिणार्चिर्हविरग्निराददे ।
बभूव सर्वं शुभशंसि तत्क्षणं भवो हि लोकाभ्युदयाय तादृशाम् ॥१४॥

अरिष्टशय्यां परितो विसारिणा सुजन्मनस्तस्य निजेन तेजसा ।
निशीथदीपाः सहसा हतत्विषो बभूवुरालेख्यसमर्पिता इव ॥१५॥

जनाय शुद्धान्तचराय शंसते कुमारजन्मामृतसंमिताक्षरम् ।
अदेयमासीत् त्रयमेव भूपतेः शशिप्रभं छत्रमुभे च चामरे ॥१६॥

निवातपद्मस्तिमितेन चक्षुषा नृपस्य कान्तं पिबतः सुताननम् ।
महोदधेः पूर इवेन्दुदर्शनाद् गुरुः प्रहर्षः प्रबभूव नात्मनि ॥१७॥

स जातकर्मण्यखिले तपस्विना तपोवनादेत्य पुरोधसा कृते ।
दिलीपसूनुर्मणिराकरोद्भवः प्रयुक्तसंस्कार इवाधिकं बभौ ॥१८॥

सुखश्रवा मङ्गलतूर्यनिस्वनाः प्रमोदनृत्यैः सह वारयोषिताम् ।
न केवलं सद्मनि मागधीपतेः पथि व्यजृम्भन्त दिवौकसामपि ॥१९॥

न संयतस्तस्य बभूव रक्षितुर्विसर्जयेद् यं सुतजन्महर्षितः ।
ऋणाभिधानात् स्वयमेव केवलं तदा पितॄणां मुमुचे स बन्धनात् ॥२०॥

श्रुतस्य यायादयमन्तमर्भकस्तथा परेषां युधि चेति पार्थिवः ।
अवेक्ष्य धातोर्गमनार्थमर्थविच्चकार नाम्ना रघुमात्मसंभवम् ॥२१॥

पितुः प्रयत्नात् स समग्रसंपदः शुभैः शरीरावयवैर्दिने दिने ।
पुपोष वृद्धिं हरिदश्वदीधितेरनुप्रवेशादिव बालचन्द्रमाः ॥२२॥

उमावृषाङ्कौ शरजन्मना यथा यथा जयन्तेन शचीपुरन्दरौ ।
तथा नृपः सा च सुतेन मागधी ननन्दतुस्तत्सदृशेन तत्समौ ॥२३॥

रथाङ्गनाम्नोरिव भाववन्धनं वभूव यत् प्रेम परस्पराश्रयम् ।
विभक्तमप्येकसुतेन तत् तयोः परस्परस्योपरि पर्यचीयत ॥२४॥

उवाच धात्र्या प्रथमोदितं वचो ययौ तदीयामवलम्ब्य चाङ्गुलिम् ।
अभूच्च नम्रः प्रणिपातशिक्षया पितुर्मुद तेन ततान सोऽर्भकः ॥२५॥

तमङ्कमारोप्य शरीरयोगजैः सुखैर्निषिञ्चन्तमिवामृतं त्वचि ।
उपान्तसंमीलितलोचनो नृपश्चिरात् सुतस्पर्शरसज्ञतां ययौ ॥२६॥

अमंस्त चानेन परार्ध्यजन्मना स्थितेरभेत्ता स्थितिमन्तमन्वयम् ।
स्वमूर्तिभेदेन गुणाग्र्यवर्तिना पतिः प्रजानामिव सर्गमात्मनः ॥२७॥

स वृत्तचूलश्चलकाकपक्षकैरमात्यपुत्रैः सवयोभिरन्वितः ।
लिपेर्यथावद् ग्रहणेन वाङ्मयं नदीमुखेनेव समुद्रमाविशत् ॥२८॥

अथोपनीतं विधिवद् विपश्चितो विनिन्युरेनं गुरवो गुरुप्रियम् ।
अवन्ध्ययत्नाश्च बभूवुरत्र ते क्रिया हि वस्तूपहिता प्रसीदति ॥२९॥

धियः समग्रैः स गुणैरुदारधीः क्रमाच्चतस्रश्चतुरर्णवोपमाः ।
ततार विद्याः पवनातिपातिभिर्दिशो हरिद्भिर्हरितामिवेश्वरः ॥३०॥

त्वचं स मेध्यां परिधाय रौरवीमशिक्षतास्त्रं पितुरेव मन्त्रवत् ।
न केवलं तद्गुरुरेकपार्थिवः क्षितावभूदेकधनुर्धरोऽपि सः ॥३१॥

महोक्षतां वत्सतरः स्पृशन्निव द्विपेन्द्रभावं कलभः श्रयन्निव ।
रघुः क्रमाद् यौवनभिन्नशैशवः पुपोष गाम्भीर्यमनोहरं वपुः ॥३२॥

अथास्य गोदानविधेरनन्तरं विवाहदीक्षां निरवर्तयद् गुरुः ।
नरेन्द्रकन्यास्तमवाप्य सत्पतिं तमोनुदं दक्षसुता इवाबभुः ॥३३॥

युवा युगव्यायतबाहुरंसलः कपाटवक्षाः परिणद्धकन्धरः ।
वपुःप्रकर्षादजयद् गुरुं रघुस्तथापि नीचैर्विनयाददृश्यत ॥३४॥

ततः प्रजानां चिरमात्मना धृतां नितान्तगुर्वीं लघयिष्यता धुरम् ।
निसर्गसंस्कारविनीत इत्यसौ नृपेण चक्रे युवराजशब्दभाक् ॥३५॥

नरेन्द्रमूलायतनादनन्तरं तदास्पदं श्रीर्युवराजसंज्ञितम् ।
अगच्छदंशेन गुणाभिलाषिणी नवावतारं कमलादिवोत्पलम् ॥३६॥

विभावसुः सारथिनेव वायुना घनव्यपायेन गभस्तिमानिव ।
बभूव तेनातितरां सुदुःसहः कटप्रभेदेन करीव पार्थिवः ॥३७॥

नियुज्य तं होमतुरङ्गरक्षणे धनुर्धरं राजसुतैरनुद्रुतम् ।
अपूर्णमेकेन शतक्रतूपमः शतं क्रतूनामपविघ्नमाप सः ॥३८॥

ततः परं तेन मखाय यज्वना तुरङ्गमुत्सृष्टमनर्गलं पुनः ।
धनुर्भृतामग्रत एव रक्षिणां जहार शक्रः किल गूढविग्रहः ॥३९॥

विषादलुप्तप्रतिपत्ति विस्मितं कुमारसैन्यं सपदि स्थितं च तत् ।
वसिष्ठधेनुश्च यदृच्छयाऽऽगता श्रुतप्रभावा ददृशेऽथ नन्दिनी ॥४०॥

तदङ्गनिस्यन्दजलेन लोचने प्रमृज्य पुण्येन पुरस्कृतः सताम् ।
अतीन्द्रियेष्वप्युपपन्नदर्शनो बभूव भावेषु दिलीपनन्दनः ॥४१॥

स पूर्वतः पर्वतपक्षशातनं ददर्श देवं नरदेवसंभवः ।
पुनः पुनः सूतनिषिद्धचापलं हरन्तमश्वं रथरश्मिसंयतम् ॥४२॥

शतैस्तमक्ष्णामनिमेषवृत्तिभिर्हरिं विदित्वा हरिभिश्च वाजिभिः ।
अवोचदेनं गगनस्पृशा रघुः स्वरेण धीरेण निवर्तयन्निव ॥४३॥

मखांशभाजां प्रथमो मनीषिभिस्त्वमेव देवेन्द्र सदा निगद्यसे ।
अजस्रदीक्षाप्रयतस्य मद्गुरोः क्रियाविघाताय कथं प्रवर्तसे ॥४४॥

त्रिलोकनाथेन सदा मखद्विषस्त्वया नियम्या ननु दिव्यचक्षुषा ।
स चेत् स्वयं कर्मसु धर्मचारिणां त्वमन्तरायो भवसि च्युतो विधिः ॥४५॥

तदङ्गमग्र्यं मघवन् महाक्रतोरमुं तुरङ्गं प्रतिमोक्तुमर्हसि ।
पथः श्रुतेर्दर्शयितार ईश्वरा मलीमसामाददते न पद्धतिम् ॥४६॥

इति प्रगल्भं रघुणा समीरितं वचो निशम्याधिपतिर्दिवौकसाम् ।
निवर्तयामास रथं सविस्मयः प्रचक्रमे च प्रतिवक्तुमुत्तरम् ॥४७॥

यदात्थ राजन्यकुमार तत् तथा यशस्तु रक्ष्यं परतो यशोधनैः ।
जगत्प्रकाशं तदशेषमिज्यया भवद्गुरुर्लङ्घयितुं ममोद्यतः ॥४८॥

हरिर्यथैकः पुरुषोत्तमः स्मृतो महेश्वरस्त्र्यम्बक एव नापरः ।
तथा विदुर्मां मुनयः शतक्रतुं द्वितीयगामी न हि शब्द एष नः ॥४९॥

अतोऽयमश्वः कपिलानुकारिणा पितुस्त्वदीयस्य मयापहारितः ।
अलं प्रयत्नेन तवात्र मा निधाः पदं पदव्यां सगरस्य सन्ततेः ॥५०॥

ततः प्रहस्यापभयः पुरन्दरं पुनर्बभाषे तुरगस्य रक्षिता ।
गृहाण शस्त्रं यदि सर्ग एष ते न खल्वनिर्जित्य रघुं कृती भवान् ॥५१॥

स एवमुक्त्वा मघवन्तमुन्मुखः करिष्यमाणः सशरं शरासनम् ।
अतिष्ठदालीढविशेषशोभिना वपुःप्रकर्षेण विडम्बितेश्वरः ॥५२॥

रघोरवष्टम्भमयेन[1] पत्रिणा हृदि क्षतो गोत्रभिदप्यमर्षणः ।
नवाम्बुदानीकमुहूर्तलाञ्छने धनुष्यमोघं समधत्त सायकम् ॥५३॥

दिलीपसूनोः स बृहद् भुजान्तरं प्रविश्य भीमासुरशोणितोचितः ।
पपावनास्वादितपूर्वमाशुगः कुतूहलेनेव मनुष्यशोणितम् ॥५४॥

हरेः कुमारोऽपि कुमारविक्रमः सुरद्विपास्फालनकर्कशाङ्गुलौ ।
भुजे शचीपत्रविशेषकाङ्किते स्वनामचिह्नं निचखान सायकम् ॥५५॥

जहार चान्येन मयूरपत्रिणा शरेण शक्रस्य महाशनिध्वजम् ।
चुकोप तस्मै स भृशं सुरश्रियः प्रसह्य केशव्यपरोपणादिव ॥५६॥

तयोरुपान्तस्थितसिद्धसैनिकं गरुत्मदाशीविषभीमदर्शनैः ।
बभूव युद्धं तुमुलं जयैषिणोरधोमुखैरूर्ध्वमुखैश्च पत्रिभिः ॥५७॥

---

१. अवष्टम्भः स्वर्णम् । 'अवष्टम्भः सुवर्णेऽपी'-ति विश्वः म.

अतिप्रबन्धप्रहितास्त्रवृष्टिभिस्तमाश्रयं दुष्प्रसहस्य तेजसः ।
शशाक निर्वापयितुं न वासवः स्वतश्च्युतं वह्निमिवाद्भिरम्बुदः ।।५८।।

ततः प्रकोष्ठे हरिचन्दनाङ्किते प्रमथ्यमानार्णवधीरनादिनीम् ।
रघुः शशाङ्कार्धमुखेन पत्त्रिणा शरासनज्यामलुनाद् विडौजसः ।।५९।।

स चापमुत्सृज्य विवृद्धमत्सरः प्रणाशनाय प्रबलस्य विद्विषः ।
महीध्रपक्षव्यपरोपणोचितं स्फुरत्प्रभामण्डलमस्त्रमाददे ।।६०।।

रघुर्भृशं वक्षसि तेन ताडितः पपात भूमौ सह सैनिकाश्रुभिः ।
निमेषमात्रादवधूय तद्व्यथां सहोत्थितः सैनिकहर्षनिःस्वनैः ।।६१।।

तथापि शस्त्रव्यवहारनिष्ठुरे विपक्षभावे चिरमस्य तस्थुषः ।
तुतोष वीर्यातिशयेन वृत्रहा पदं हि सर्वत्र गुणैर्निधीयते ।।६२।।

असङ्गमद्रिष्वपि सारवत्तया न मे त्वदन्येन विसोढमायुधम् ।
अवेहि मां प्रीतमृते तुरङ्गमात् किमिच्छसीति स्फुटमाह वासवः ।।६३।।

ततो निषङ्गादसमग्रमुद्धृतं सुवर्णपुङ्खद्युतिरञ्जिताङ्गुलिम् ।
नरेन्द्रसूनुः प्रतिसंहरन्निषुं प्रियम्वदः प्रत्यवदत् सुरेश्वरम् ।।६४।।

अमोच्यमश्वं यदि मन्यसे प्रभो ततः समाप्ते विधिनैव कर्मणि ।
अजस्रदीक्षाप्रयतः स मद्गुरुः क्रतोरशेषेण फलेन युज्यताम् ।।६५।।

यथा च वृत्तान्तमिमं सदोगतस्त्रिलोचनैकांशतया दुरासदः ।
तवैव संदेशहराद् विशांपतिः शृणोति लोकेश तथा विधीयताम् ।।६६।।

तथेति कामं प्रतिशुश्रुवान् रघोर्यथागतं मातलिसारथिर्ययौ ।
नृपस्य नातिप्रमनाः सदोगृहं सुदक्षिणासूनुरपि न्यवर्तत ।।६७।।

तमभ्यनन्दत् प्रथमं प्रबोधितः प्रजेश्वरः शासनहारिणा हरेः ।
परामृशन् हर्षजडेन पाणिना तदीयमङ्गं कुलिशव्रणाङ्कितम् ।।६८।।

इति क्षितीशो नवतिं नवाधिकां महाक्रतूनां महनीयशासनः ।
समारुरुक्षुर्दिवमायुषः क्षये ततान सोपानपरम्परामिव ।।६९।।

अथ स विषयव्यावृत्तात्मा यथाविधि सूनवे
नृपतिककुदं यूने दत्त्वा सितातपवारणम्।
मुनिवनतरुच्छायां देव्या तया सह शिश्रिये
गलितवयसामिक्ष्वाकूणामिदं हि कुलव्रतम् ॥७०॥

॥ इति श्रीमहाकविकालिदासकृतौ रघुवंशे महाकाव्ये
रघुराज्याभिषेको नाम तृतीयः सर्गः ॥



चतुर्थः सर्गः

स राज्यं गुरुणा दत्तं प्रतिपद्याधिकं बभौ ।
दिनान्ते निहितं तेजः सवित्रेव हुताशनः ।।१।।

दिलीपानन्तरं राज्ये तं निशम्य प्रतिष्ठितम् ।
पूर्वं प्रधूमितो राज्ञां हृदयेऽग्निरिवोत्थितः ।।२।।

पुरूहूतध्वजस्येव तस्योन्नयनपङ्क्तयः ।
नवाभ्युत्थानदर्शिन्यो ननन्दुः सप्रजाः प्रजाः ।।३।।

सममेव समाक्रान्तं द्वयं द्विरदगामिना ।
तेन सिंहासनं पित्र्यमखिलं चारिमण्डलम् ।।४।।

छायामण्डललक्ष्येण तमदृश्या किल स्वयम् ।
पद्मा पद्मातपत्रेण भेजे साम्राज्यदीक्षितम् ।।५।।

परिकल्पितसान्निध्या काले काले च वन्दिषु ।
स्तुत्यं स्तुतिभिरर्थ्याभिरुपतस्थे सरस्वती ।।६।।

मनुप्रभृतिभिर्मान्यैर्भुक्ता यद्यपि राजभिः ।
तथाप्यनन्यपूर्वेव तस्मिन्नासीद् वसुन्धरा ।।७।।

स हि सर्वस्य लोकस्य युक्तदण्डतया मनः ।
आददे नातिशीतोष्णो नभस्वानिव दक्षिणः ।।८।।

मन्दोत्कण्ठाः कृतास्तेन गुणाधिकतया गुरौ ।
फलेन सहकारस्य पुष्पोद्गम इव प्रजाः ।।९।।

नयविद्भिर्नवे राज्ञि सदसच्चोपदर्शितम् ।
पूर्वं एवाभवत् पक्षस्तस्मिन्नाभवदुत्तरः ।।१०।।

पञ्चानामपि भूतानामुत्कर्षं पुपुषुर्गुणाः ।
नवे तस्मिन् महीपाले सर्वं नवमिवाभवत् ।।११।।

यथा प्रह्लादनाच्चन्द्रः प्रतापात् तपनो यथा ।
तथैव सोऽभूदन्वर्थो राजा प्रकृतिरञ्जनात् ।।१२।।

कामं कर्णान्तविश्रान्ते विशाले तस्य लोचने ।
चक्षुष्मत्ता तु शास्त्रेण सूक्ष्मकार्यार्थदर्शिना ।।१३।।

लब्धप्रशमनस्वस्थमथैनं समुपस्थिता ।
पार्थिवश्रीर्द्वितीयेव शरत् पङ्कजलक्षणा ।।१४।।

निर्वृष्टलघुभिर्मेघैर्मुक्तवर्त्मा सुदुःसहः ।
प्रतापस्तस्य भानोश्च युगपद् व्यानशे दिशः ।।१५।।

वार्षिकं संजहारेन्द्रो धनुर्जैत्रं रघुर्दधौ ।
प्रजार्थसाधने तौ हि पर्यायोद्यतकार्मुकौ ।।१६।।

पुण्डरीकातपत्रस्तं विकसत्काशचामरः ।
ऋतुर्विडम्बयामास न पुनः प्राप तच्छ्रियम् ।।१७।।

प्रसादसुमुखे तस्मिंश्चन्द्रे च विशदप्रभे ।
तदा चक्षुष्मतां प्रीतिरासीत् समरसा द्वयोः ।।१८।।

हंसश्रेणीषु तारासु कुमुद्वत्सु च वारिषु ।
विभूतयस्तदीयानां पर्यस्ता यशसामिव ।।१९।।

इक्षुच्छायनिषादिन्यस्तस्य गोप्तुर्गुणोदयम् ।
आकुमारकथोद्घातं शालिगोप्यो जगुर्यशः ।।२०।।

प्रससादोदयादम्भः कुम्भयोनेर्महौजसः ।
रघोरभिभवाशङ्कि चुक्षुभे द्विषतां मनः ।।२१।।

मदोदग्राः ककुद्मन्तः सरितां कूलमुद्रुजाः ।
लीलाखेलमनुप्रापुर्महोक्षास्तस्य विक्रमम् ।।२२।।

प्रसवैः सप्तपर्णानां मदगन्धिभिराहताः ।
असूययेव तन्नागाः सप्तधैव प्रसुस्रुवुः ।।२३।।

सरितः कुर्वती गाधाः पथश्चाश्यानकर्दमान् ।
यात्रायै चोदयामास तं शक्तेः प्रथमं शरत् ।।२४।।

तस्मै सम्यग्घुतो वह्निर्वाजिनीराजनाविधौ ।
प्रदक्षिणार्चिर्व्याजेन हस्तेनेव जयं ददौ ।।२५।।

स गुप्तमूलप्रत्यन्तः शुद्धपार्ष्णिरयान्वितः ।
षड्विधं बलमादाय प्रतस्थे दिग्जिगीषया ।।२६।।

अवाकिरन् वयोवृद्धास्तं लाजैः पौरयोषितः ।
पृषतैर्मन्दरोद्धूतैः क्षीरोर्मय इवाच्युतम् ।।२७।।

स ययौ प्रथमं प्राचीं तुल्यः प्राचीनबर्हिषा ।
अहिताननिलोद्धूतैस्तर्जयन्निव केतुभिः ।।२८।।

रजोभिः स्यन्दनोद्धूतैर्गजैश्च घनसंनिभैः ।
भुवस्तलमिव व्योम कुर्वन् व्योमेव भूतलम् ।।२९।।

प्रतापोऽग्रे ततः शब्दः परागस्तदनन्तरम् ।
ययौ पश्चाद् रथादीति चतुःस्कन्धेव सा चमूः ।।३०।।

मरुपृष्ठान्युदम्भांसि नाव्याः सुप्रतरा नदीः ।
विपिनानि प्रकाशानि शक्तिमत्त्वाच्चकार सः ।।३१।।

स सेनां महतीं कर्षन् पूर्वसागरगामिनीम् ।
बभौ हरजटाभ्रष्टां गङ्गामिव भगीरथः ।।३२।।

त्याजितैः फलमुत्खातैर्भग्नैश्च बहुधा नृपैः ।
तस्यासीदुल्बणो मार्गः पादपैरिव दन्तिनः ।।३३।।

पौरस्त्यानेवमाक्रामंस्तांस्ताञ्जनपदाञ्जयी ।
प्राप तालीवनश्याममुपकण्ठं महोदधेः ।।३४।।

अनम्राणां समुद्धर्तुस्तस्मात् सिन्धुरयादिव ।
आत्मा संरक्षितः सुह्मैर्वृत्तिमाश्रित्य वैतसीम् ॥३५॥

वङ्गानुत्खाय तरसा नेता नौसाधनोद्यतान् ।
निचखान जयस्तम्भान् गङ्गास्रोतोन्तरेषु सः ॥३६॥

आपादपद्मप्रणताः कलमा इव ते रघुम् ।
फलैः संवर्धयामासुरुत्खातप्रतिरोपिताः ॥३७॥

स तीर्त्वा कपिशां सैन्यैर्बद्धद्विरदसेतुभिः ।
उत्कलादर्शितपथः कलिङ्गाभिमुखो ययौ ॥३८॥

स प्रतापं महेन्द्रस्य मूर्ध्नि तीक्ष्णं न्यवेशयत् ।
अङ्कुशं द्विरदस्येव यन्ता गम्भीरवेदिनः ॥३९॥

प्रतिजग्राह कालिङ्गस्तमस्त्रैर्गजसाधनः ।
पक्षच्छेदोद्यतं शक्रं शिलावर्षीव पर्वतः ॥४०॥

द्विषां विषह्य काकुत्स्थस्तत्र नाराचदुर्दिनम् ।
सन्मङ्गलस्नात इव प्रतिपेदे जयश्रियम् ॥४१॥

ताम्बूलीनां दलैस्तत्र रचिताऽऽपानभूमयः ।
नारिकेलासवं योधाः शात्रवं च पपुर्यशः ॥४२॥

गृहीतप्रतिमुक्तस्य स धर्मविजयी नृपः ।
श्रियं महेन्द्रनाथस्य जहार न तु मेदिनीम् ॥४३॥

ततो वेलातटेनैव फलवत्पूगमालिना ।
अगस्त्याचरितामाशामनाशास्यजयो ययौ ॥४४॥

स सैन्यपरिभोगेण गजदानसुगन्धिना ।
कावेरीं सरितां पत्युः शङ्कनीयामिवाकरोत् ॥४५॥

बलैरध्युषितास्तस्य विजिगीषोर्गताध्वनः ।
मारीचोद्भ्रान्तहारीता मलयाद्रेरुपत्यकाः ॥४६॥

ससञ्जुरश्वक्षुण्णानामेलानामुत्पतिष्णवः ।
तुल्यगन्धिषु मत्तेभकटेषु फलरेणवः ॥४७॥

भोगिवेष्टनमार्गेषु चन्दनानां समर्पितम् ।
नास्रसत् करिणां ग्रैवं त्रिपदीछेदिनामपि ॥४८॥

दिशि मन्दायते तेजो दक्षिणस्यां रवेरपि ।
तस्यामेव रघोः पाण्ड्याः प्रतापं न विषेहिरे ॥४९॥

ताम्रपर्णीसमेतस्य मुक्तासारं महोदधेः ।
ते निपत्य ददुस्तस्मै यशः स्वमिव संचितम् ॥५०॥

स निर्विश्य यथाकामं तटेष्वालीनचन्दनौ ।
स्तनाविव दिशस्तस्याः शैलौ मलयदर्दुरौ ॥५१॥

असह्यविक्रमः सह्यं दूरान् मुक्तमुदन्वता ।
नितम्बमिव मेदिन्याः स्रस्तांशुकमलङ्घयत् ॥५२॥

तस्यानीकैर्विसर्पद्भिरपरान्तजयोद्यतैः ।
रामास्त्रोत्सारितोऽप्यासीत् सह्यलग्न इवार्णवः ॥५३॥

भयोत्सृष्टविभूषाणां तेन केरलयोषिताम् ।
अकलेषु चमूरेणुश्चूर्णप्रतिनिधीकृतः ॥५४॥

मुरलामारुतोद्धूतमगमत् कैतकं रजः ।
तद्योधवारवाणानामयत्नपटवासताम् ॥५५॥

अभ्यभूयत वाहानां चरतां गात्रशिञ्जितैः ।
वर्मभिः पवनोद्धूत-राजताली-वन ध्वनिः ॥५६॥

खर्जूरीस्कन्धनद्धानां मदोद्गारसुगन्धिषु ।
कटेषु करिणां पेतुः पुन्नागेभ्यः शिलीमुखाः ॥५७॥

अवकाशं किलोदन्वान् रामायाभ्यर्थितो ददौ ।
अपरान्तमहीपालव्याजेन रघवे करम् ॥५८॥

मत्तेभ-रदनोत्कीर्ण-व्यक्त-विक्रम-लक्षणम् ।
त्रिकूटमेव तत्रोच्चैर्जयस्तम्भं चकार सः ॥५९॥

पारसीकाँस्ततो जेतुं प्रतस्थे स्थलवर्त्मना ।
इन्द्रियाख्यानिव रिपूँस्तत्त्वज्ञानेन संयमी ॥६०॥

यवनीमुखपद्मानां सेहे मधुमदं न सः ।
बालातपमिवाब्जानामकाल-जलदोदयः ॥६१॥

संग्रामस्तुमुलस्तस्य पाश्चात्त्यैरश्वसाधनैः ।
शार्ङ्गकूजितविज्ञेयप्रतियोधे रजस्यभूत् ॥६२॥

भल्लापवर्जितैस्तेषां शिरोभिः श्मश्रुलैर्महीम् ।
तस्तार सरघाव्याप्तैः स क्षौद्रपटलैरिव ॥६३॥

अपनीतशिरस्त्राणाः शेषास्तं शरणं ययुः ।
प्रणिपातप्रतीकारः संरम्भो हि महात्मनाम् ॥६४॥

विनयन्ते स्म तद्योधा मधुभिर्विजयश्रमम् ।
आस्तीर्णाजिनरत्नासु द्राक्षावलयभूमिषु ॥६५॥

ततः प्रतस्थे कौवेरीं भास्वानिव रघुर्दिशम् ।
शरैरुस्रैरिवोदीच्यानुद्धरिष्यन् रसानिव ॥६६॥

विनीताध्वश्रमास्तस्य [1]वङ्क्षुतीरविचेष्टनैः ।
दुधुवुर्वाजिनः स्कन्धाँल्लग्नकुङ्कुमकेसरान् ॥६७॥

तत्र हूणावरोधानां भर्तृषु व्यक्तविक्रमम् ।
कपोल-[2]पाटनादेशि बभूव रघुचेष्टितम् ॥६८॥

काम्बोजाः समरे सोढुं तस्य वीर्यमनीश्वराः ।
गजालानपरिक्लिष्टैरक्षोटैः सार्धमानताः ॥६९॥

---

१. वङ्क्षू—, वक्षु—, पा० सिन्धु म.
२. पाटला पा. मृतभर्तृकाणां कपोलपाटनं हूणजातिरितीतिहासविदः ।

तेषां सदश्वभूयिष्ठास्तुङ्गा द्रविणराशयः ।
उपदा विविशुः शश्वन्नोत्सेकाः कोसलेश्वरम् ॥७०॥

ततो गौरीगुरुं शैलमारुरोहाश्वसाधनः ।
वर्धयन्निव तत्कूटानुद्धूतैर्धातुरेणुभिः ॥७१॥

शशंस तुल्यसत्त्वानां सैन्यघोषेऽप्यसंभ्रमम् ।
गुहाशयानां सिंहानां परिवृत्त्यावलोकितम् ॥७२॥

भूर्जेषु मर्मरीभूताः कीचकध्वनिहेतवः ।
गङ्गासीकरिणो मार्गे मरुतस्तं सिषेविरे ॥७३॥

विशश्रमुर्नमेरूणां छायास्वध्यास्य सैनिकाः ।
दृषदो वासितोत्सङ्गा निषण्णमृगनाभिभिः ॥७४॥

सरलासक्त-मातङ्ग-ग्रैवेय-स्फुरित-त्विषः ।
आसन्नोषधयो नेतुर्नक्तमस्नेहदीपिकाः ॥७५॥

तस्योत्सृष्टनिवेशेषु[1] कण्ठरज्जुक्षतत्वचः ।
गजवर्ष्म किरातेभ्यः शशंसुर्देवदारवः ॥७६॥

तत्र जन्यं रघोर्घोरं पर्वतीयैर्गणैरभूत् ।
नाराच-क्षेपणीयाश्म-निष्पेषोत्पतितानलम् ॥७७॥

शरैरुत्सवसंकेतान् स कृत्वा विरतोत्सवान् ।
जयोदाहरणं[2] बाह्वोर्गापयामास किन्नरान् ॥७८॥

परस्परेण विज्ञातस्तेषूपायनपाणिषु ।
राज्ञा हिमवतः सारो राज्ञः सारो हिमाद्रिणा ॥७९॥

तत्राक्षोभ्यं यशोराशिं निवेश्यावरुरोह सः ।
पौलस्त्यतुलितस्याद्रेरादधान इव ह्रियम् ॥८०॥

चकम्पे तीर्णलौहित्ये तस्मिन् प्राग्ज्योतिषेश्वरः ।
तद्गजालानतां प्राप्तैः सह कालागुरुद्रुमैः ॥८१॥

---

१. निवासेषु. पा. २. उदाहरणं गीतबन्धः । द्र. वि २।१३.

न प्रसेहे स रुद्धार्कमधारावर्षदुर्दिनम् ।
रथवर्त्मरजोऽप्यस्य कुत एव पताकिनीम् ॥८२॥

तमीशः कामरूपाणामत्याखण्डलविक्रमम् ।
भेजे भिन्नकटैर्नागैरन्यानुपरुरोध यैः ॥८३॥

कामरूपेश्वरस्तस्य हेमपीठाधिदेवताम् ।
रत्नपुष्पोपहारेण च्छायामानर्च पादयोः ॥८४॥

इति जित्वा दिशो जिष्णुर्न्यवर्तत रथोद्धतम् ।
रजो विश्रामयन् राज्ञां छत्रशून्येषु मौलिषु ॥८५॥

स विश्वजितमाजह्रे यज्ञं सर्वस्वदक्षिणम् ।
आदानं हि विसर्गाय सतां वारिमुचामिव ॥८६॥

सत्रान्ते सचिवसखः पुरस्क्रियाभि-
र्गुर्वीभिः शमितपराजयव्यलीकान् ।
काकुत्स्थश्चिरविरहोत्सुकावरोधान्
राजन्यान् स्वपुरनिवृत्तयेऽनुमेने ॥८७॥

ते रेखाध्वजकुलिशातपत्रचिह्नं
सम्राजश्चरणयुगं प्रसादलभ्यम् ।
प्रस्थानप्रणतिभिरङ्गुलीषु चक्रु-
र्मौलिस्रक्च्युतमकरन्दरेणुगौरम् ॥८८॥

॥ इति श्रीमहाकविकालिदासकृतौ रघुवंशे महाकाव्ये
रघुविश्वजिद्यज्ञानुष्ठानो नाम चतुर्थः सर्गः ॥

पञ्चमः सर्गः

तमध्वरे विश्वजिति क्षितीशं निःशेषविश्राणितकोषजातम् ।
उपात्तविद्यो गुरुदक्षिणार्थी कौत्सः प्रपेदे वरतन्तुशिष्यः ॥१॥

स मृण्मये वीतहिरण्मयत्वात् पात्रे निधायार्घ्यमनर्घशीलः ।
श्रुतप्रकाशं यशसा प्रकाशः प्रत्युज्जगामातिथिमातिथेयः ॥२॥

तमर्चयित्वा विधिवद् विधिज्ञस्तपोधनं मानधनाग्रयायी ।
विशांपतिर्विष्टरभाजमारात् कृताञ्जलिः कृत्यविदित्युवाच ॥३॥

अप्यग्रणीर्मन्त्रकृतामृषीणां कुशाग्रबुद्धे कुशली गुरुस्ते ।
यतस्त्वया ज्ञानमशेषमाप्तं चैतन्यमुग्रादिव दीक्षितेन[1] ॥४॥

कायेन वाचा मनसापि शश्वद् यत् संभृतं वासवधैर्यलोपि ।
आपाद्यते न व्ययमन्तरायैः कच्चिन्महर्षेस्त्रिविधं तपस्तत् ॥५॥

आधारबन्धप्रमुखैः प्रयत्नैः संवर्धितानां सुतनिर्विशेषम् ।
कच्चिन्न वाय्वादिरुपप्लवो वः श्रमच्छिदामाश्रमपादपानाम् ॥६॥

क्रियानिमित्तेष्वपि वत्सलत्वादभग्नकामा मुनिभिः कुशेषु ।
तदङ्कशय्याच्युतनाभिनाला कच्चिन्मृगीणामनघा प्रसूतिः ॥७॥

निर्वर्त्यते यैर्नियमाभिषेको येभ्यो निवापाञ्जलयः पितॄणाम् ।
तान्युञ्छषष्ठाङ्कितसैकतानि शिवानि वस्तीर्थजलानि कच्चित् ॥८॥

नीवारपाकादि कडङ्गरीयैरामृश्यते जानपदैर्न कच्चित् ।
कालोपपन्नातिथिकल्प्यभागं वन्यं शरीरस्थितिसाधनं वः ॥९॥

---

१. लोकेन चैतन्यमिवोष्णरश्मेः म, चैतन्यमर्कादिव जीवलोकः हे, ज्ञानं यतस्त्वां प्रविवेश पुण्यं चैतन्यमुग्रादिव यायजूकम्' पाठान्तरम् हे । उग्रः अष्टमूर्त्तेः शिवस्य मूर्त्तिभेदः । दीक्षितो यज्ञलग्नो यजमानः । दीक्षितो हि प्रथमं चेतनां जुहोति पुनः उग्रात् तां भजत इत्यागमः हे । द्र० अत्रैव ३।६६, ९।२१, शा० १।१.

अपि प्रसन्नेन महर्षिणा त्वं सम्यग् विनीयानुमतो गृहाय।
कालो ह्ययं संक्रमितुं द्वितीयं सर्वोपकारक्षममाश्रमं ते ॥१०॥

तवार्हतो नाभिगमेन तृप्तं मनो नियोगक्रिययोत्सुकं मे।
अप्याज्ञया शासितुरात्मना वा प्राप्तोऽसि संभावयितुं वनान्माम् ॥११॥

इत्यर्घ्यपात्रानुमितव्ययस्य रघोरुदारामपि गां निशम्य।
स्वार्थोपपत्तिं प्रति दुर्बलाशस्तमित्यवोचद् वरतन्तुशिष्यः ॥१२॥

सर्वत्र नो वार्तमवेहि राजन् नाथे कुतस्त्वय्यशुभं प्रजानाम्।
सूर्ये तपत्यावरणाय दृष्टेः कल्पेत लोकस्य कथं तमिस्रा ॥१३॥

भक्तिः प्रतीक्ष्येषु कुलोचिता ते पूर्वान् महाभाग तयातिशेषे।
व्यतीतकालस्त्वहमभ्युपेतस्त्वामर्थिभावादिति मे विषादः ॥१४॥

शरीरमात्रेण नरेन्द्र तिष्ठन्नाभासि तीर्थप्रतिपादितर्द्धिः।
आरण्यकोपात्तफलप्रसूतिः स्तम्बेन नीवार इवावशिष्टः ॥१५॥

स्थाने भवानेकनराधिपः सन्नकिंचनत्वं मखजं व्यनक्ति।
पर्यायपीतस्य सुरैर्हिमांशोः कलाक्षयः श्लाघ्यतरो हि वृद्धेः ॥१६॥

तदन्यतस्तावदनन्यकार्यो गुर्वर्थमाहर्तुमहं यतिष्ये।
स्वस्त्यस्तु ते निर्गलिताम्बुगर्भं शरद्घनं नार्दति चातकोऽपि ॥१७॥

एतावदुक्त्वा प्रतियातुकामं शिष्यं महर्षेर्नृपतिर्निषिध्य।
किं वस्तु विद्वन् गुरवे प्रदेयं त्वया कियद् वेति तमन्वयुङ्क्त ॥१८॥

ततो यथावद् विहिताध्वराय तस्मै स्मयावेशविवर्जिताय।
वर्णाश्रमाणां गुरवे स वर्णी विचक्षणः प्रस्तुतमाचचक्षे ॥१९॥

समाप्तविद्येन मया महर्षिर्विज्ञापितोऽभूद् गुरुदक्षिणायै।
स मे चिरायास्खलितोपचारां तां भक्तिमेवागणयत् पुरस्तात् ॥२०॥

निर्बन्धसंजातरुषार्थकार्श्यमचिन्तयित्वा गुरुणाऽहमुक्तः।
वित्तस्य विद्यापरिसंख्यया मे कोटीश्चतस्रो दश चाहरेति ॥२१॥

सोऽहं सपर्याविधिभाजनेन मत्वा भवन्तं प्रभुशब्दशेषम् ।
अभ्युत्सहे संप्रति नोपरोद्धुमल्पेतरत्वाच्छ्रुतनिष्क्रयस्य ॥२२॥

इत्थं द्विजेन द्विजराजकान्तिरावेदितो वेदविदां वरेण ।
एनोनिवृत्तेन्द्रियवृत्तिरेनं जगाद भूयो जगदेकनाथः ॥२३॥

गुर्वर्थमर्थी श्रुतपारदृश्वा रघोः सकाशादनवाप्य कामम् ।
गतो वदान्यान्तरमित्ययं मे मा भूत् परीवाद-नवावतारः ॥२४॥

स त्वं प्रशस्ते महिते मदीये वसँश्चतुर्थोऽग्निरिवाग्न्यगारे ।
द्वित्राण्यहान्यर्हसि सोढुमर्हन् यावद् यते साधयितुं त्वदर्थम् ॥२५॥

तथेति तस्यावितथं प्रतीतः प्रत्यग्रहीत् संगरमग्रजन्मा ।
गामात्तसारां रघुरप्यवेक्ष्य निष्क्रष्टुमर्थं चकमे कुवेरात् ॥२६॥

वसिष्ठमन्त्रोक्षणजात् प्रभावादुदन्वदाकाशमहीधरेषु ।
मरुत्सखस्येव वलाहकस्य गतिर्विजघ्ने न हि तद्-रथस्य ॥२७॥

अथाधिशिश्ये प्रयतः प्रदोषे रथं रघुः कल्पितशस्त्रगर्भम् ।
सामन्तसंभावनयैव धीरः कैलासनाथं तरसा जिगीषुः ॥२८॥

प्रातः प्रयाणाभिमुखाय तस्मै सविस्मयाः कोषगृहे नियुक्ताः ।
हिरण्मयीं कोषगृहस्य मध्ये वृष्टिं शशंसुः पतितां नभस्तः ॥२९॥

तं भूपतिर्भासुरहेमराशिं लब्धं कुबेरादभियास्यमानात् ।
दिदेश कौत्साय समस्तमेव [1]शृङ्गं सुमेरोरिव वज्रभिन्नम् ॥३०॥

जनस्य साकेतनिवासिनस्तौ द्वावप्यभूतामभिनन्द्यसत्त्वौ ।
गुरुप्रदेयाधिकनिःस्पृहोऽर्थी नृपोऽर्थिकामादधिकप्रदश्च ॥३१॥

अथोष्ट्रवामीशतवाहितार्थं प्रजेश्वरं प्रीतमना महर्षिः ।
स्पृशन् करेणानतपूर्वकायं संप्रस्थितो वाचमुवाच कौत्सः ॥३२॥

किमत्र चित्रं यदि कामसूर्भूर्वृत्ते स्थितस्याधिपतेः प्रजानाम् ।
अचिन्तनीयस्तु तव प्रभावो मनीषितं द्यौरपि येन दुग्धा ॥३३॥

---

१. पादम् म.

आशास्यमन्यत् पुनरुक्तभूतं श्रेयांसि सर्वाण्यधिजग्मुषस्ते ।
पुत्रं लभस्वात्मगुणानुरूपं भवन्तमीड्यं भवतः पितेव ॥३४॥

इत्थं प्रयुज्याशिषमग्रजन्मा राज्ञे प्रतीयाय गुरोः सकाशम् ।
राजापि लेभे सुतमाशु तस्मादालोकमर्कादिव जीवलोकः ॥३५॥

[1]ब्राह्मे मुहूर्ते किल तस्य देवी कुमारकल्पं सुषुवे कुमारम् ।
अतः पिता ब्रह्मण एव नाम्ना तमात्मजन्मानमजं चकार ॥३६॥

रूपं तदोजस्वि तदेव वीर्यं तदेव नैसर्गिकमुन्नतत्वम् ।
न कारणात् स्वाद् विभिदे कुमारः प्रवर्तितो दीप इव प्रदीपात् ॥३७॥

उपात्तविद्यं विधिवद् गुरुभ्यस्तं यौवनोद्भेदविशेषकान्तम् ।
श्रीः साभिलाषापि गुरोरनुज्ञां धीरेव कन्या पितुराचकाङ्क्ष ॥३८॥

अथेश्वरेण क्रथकैशिकानां स्वयंवरार्थं स्वसुरिन्दुमत्याः ।
आप्तः कुमारानयनोत्सुकेन भोजेन दूतो रघवे विसृष्टः ॥३९॥

तं श्लाघ्यसंबन्धमसौ विचिन्त्य दारक्रियायोग्यदशं च पुत्रम् ।
प्रस्थापयामास ससैन्यमेनमृद्धां विदर्भाधिपराजधानीम् ॥४०॥

तस्योपकार्यारचितोपचारा वन्येतरा जानपदोपदाभिः ।
मार्गे निवासा मनुजेन्द्रसूनोर्बभूवुरुद्यानविहारकल्पाः ॥४१॥

स नर्मदारोधसि सीकरार्द्रैर्मरुद्भिरानर्तित-नक्तमाले ।
निवेशयामास विलङ्घिताध्वा क्लान्तं रजोधूसरकेतु सैन्यम् ॥४२॥

अथोपरिष्टाद् भ्रमरैर्भ्रमद्भिः प्राक्सूचितान्तःसलिलप्रवेशः ।
निर्धौतदानामलगण्डभित्तिर्वन्यः सरित्तो गज उन्ममज्ज ॥४३॥

निःशेषविक्षालितधातुनापि वप्रक्रियामृक्षवतस्तटेषु ।
नीलोर्ध्वरेखाशबलेन शंसन् दन्तद्वयेनाश्मविकुण्ठितेन ॥४४॥

संहारविक्षेपलघुक्रियेण हस्तेन तीराभिमुखः सशब्दम् ।
बभौ स भिन्दन् बृहतस्तरङ्गान् वार्यर्गलाभङ्ग इव प्रवृत्तः ॥४५॥

---

१. ब्रह्मदैवत्ये दिनमध्यभागीयेऽभिजिन्नाम्नि मुहूर्ते—हे.

शैलोपमः शैवलमञ्जरीणां जालानि कर्षन्नुरसा स पश्चात् ।
पूर्वं तदुत्पीडितवारिराशिः सरित्प्रवाहस्तटमुत्ससर्प ।।४६।।

तस्यैकनागस्य कपोलभित्त्योर्जलावगाहक्षणमात्रशान्ता ।
वन्येतरानेकपदर्शनेन पुनर्दिदीपे मददुर्दिनश्रीः ।।४७।।

सप्तच्छदक्षीरकटुप्रवाहमसह्यमाघ्राय मदं तदीयम् ।
विलङ्घिताधोरणतीव्रयत्नाः सेनागजेन्द्रा विमुखा बभूवुः ।।४८।।

स च्छिन्नबन्धद्रुतयुग्यशून्यं भग्नाक्षपर्यस्तरथं क्षणेन ।
रामापरित्राणविहस्तयोधं सेनानिवेशं तुमुलं चकार ।।४९।।

तमापतन्तं नृपतेरवध्यो वन्यः करीति श्रुतवान् कुमारः ।
निवर्तयिष्यन् विशिखेन कुम्भे जघान नात्यायतकृष्टशार्ङ्गः ।।५०।।

स विद्धमात्रः किल नागरूपमुत्सृज्य तद्विस्मितसैन्यदृष्टः ।
स्फुरत्प्रभामण्डलमध्यवर्त्ति कान्तं वपुर्व्योमचरं प्रपेदे ।।५१।।

अथ प्रभावोपनतैः कुमारं कल्पद्रुमोत्थैरवकीर्य पुष्पैः ।
उवाच वाग्मी दशनप्रभाभिः संवर्धितोरःस्थलतारहारः ।।५२।।

मतङ्गशापादवलेपमूलादवाप्तवानस्मि मतङ्गजत्वम् ।
अवेहि गन्धर्वपतेस्तनूजं प्रियम्वदं मां प्रियदर्शनस्य ।।५३।।

स चानुनीतः प्रणतेन पश्चान्मया महर्षिर्मृदुतामगच्छत् ।
उष्णत्वमग्न्यातपसंप्रयोगाच्छैत्यं हि यत् सा प्रकृतिर्जलस्य ।।५४।।

इक्ष्वाकुवंशप्रभवो यदा ते भेत्स्यत्यजः कुम्भमयोमुखेन ।
संयोक्ष्यसे स्वेन वपुर्महिम्ना तदेत्यवोचत् स तपोनिधिर्माम् ।।५५।।

संमोचितः सत्त्ववता त्वयाहं शापाच्चिरप्रार्थितदर्शनेन ।
प्रतिप्रियं चेद् भवतो न कुर्यां वृथा हि मे स्यात् स्वपदोपलब्धिः ।।५६।।

संमोहनं नाम सखे ममास्त्रं प्रयोगसंहारविभक्तमन्त्रम् ।
गान्धर्वमादत्स्व यतः प्रयोक्तुर्न चारिहिंसा विजयश्च हस्ते ।।५७।।

अलं ह्रिया मां प्रति यन्मुहूर्तं दयापरोऽभूः प्रहरन्नपि त्वम् ।
तस्मादुपच्छन्दयति प्रयोज्यं मयि त्वया न प्रतिषेधरौक्ष्यम् ॥५८॥

तथेत्युपस्पृश्य पयः पवित्रं सोमोद्भवायाः सरितो नृसोमः ।
उदङ्मुखः सोऽस्त्रविदस्त्रमन्त्रं जग्राह तस्मान्निगृहीतशापात् ॥५९॥

एवं तयोरध्वनि दैवयोगादासेदुषोः सख्यमचिन्त्यहेतु ।
एको ययौ चैत्ररथप्रदेशान् सौराज्यरम्यानपरो विदर्भान् ॥६०॥

तं तस्थिवांसं नगरोपकण्ठे तदागमारूढगुरुप्रहर्षः ।
प्रत्युज्जगाम क्रथकैशिकेन्द्रश्चन्द्रं प्रवृद्धोर्मिरिवोर्मिमाली ॥६१॥

प्रवेश्य चैनं पुरमग्रयायी नीचैस्तथोपाचरदर्पितश्रीः ।
मेने यथा तत्र जनः समेतो वैदर्भमागन्तुमजं गृहेशम् ॥६२॥

तस्याधिकारपुरुषैः प्रणतैः प्रदिष्टां
प्राग्द्वारवेदिविनिवेशितपूर्णकुम्भाम् ।
रम्यां रघुप्रतिनिधिः स नवोपकार्यां
बाल्यात् परामिव दशां मदनोऽध्युवास ॥६३॥

तत्र स्वयंवरसमाहृतराजलोकं
कन्याललाम कमनीयमजस्य लिप्सोः ।
भावावबोधकलुषा दयितेव रात्रौ
निद्रा चिरेण नयनाभिमुखी बभूव ॥६४॥

तं कर्णभूषणनिपीडितपीवरांसं
शय्योत्तरच्छदविमर्दकृशाङ्गरागम् ।
सूतात्मजाः सवयसः प्रथितप्रबोधं
प्राबोधयन्नुषसि वाग्भिरुदारवाचः ॥६५॥

रात्रिर्गता मतिमतां वर मुञ्च शय्यां
धात्रा द्विधैव ननु धूर्जगतो विभक्ता ।
तामेकतस्तव बिभर्ति गुरुर्विनिद्र-
स्तस्या भवानपरधुर्यपदावलम्बी ॥६६॥

निद्रावशेन भवताप्यनवेक्ष्यमाणा
पर्युत्सुकत्वमबला निशि खण्डितेव ।
लक्ष्मीर्विनोदयति येन दिगन्तलम्वी
सोऽपि त्वदाननरुचिं विजहाति चन्द्रः ॥६७॥

तद् वल्गुना युगपदुन्मिषितेन तावत्
सद्यः परस्परतुलामधिरोहतां द्वे ।
प्रस्पन्दमानपरुषेतरतारमन्त-
श्चक्षुस्तव प्रचलितभ्रमरं च पद्मम् ॥६८॥

वृन्ताच्छ्लथं हरति पुष्पमनोकहानां
संसृज्यते सरसिजैररुणांशुभिन्नैः ।
स्वाभाविकं परगुणेन विभातवायुः
सौरभ्यमीप्सुरिव ते मुखमारुतस्य ॥६९॥

ताम्रोदरेषु पतितं तरुपल्लवेषु
निर्धौतहारगुलिकाविशदं हिमाम्भः ।
आभाति लब्धपरभागतयाऽधरोष्ठे
लीलास्मितं सदशनार्चिरिव त्वदीयम् ॥७०॥

यावत् प्रतापनिधिराक्रमते न भानु-
रह्नाय तावदरुणेन तमो निरस्तम् ।
आयोधनाग्रसरतां त्वयि वीर याते
किं वा रिपूँस्तव गुरुः स्वयमुच्छिनत्ति? ॥७१॥

शय्यां जहत्युभयपक्षविनीतनिद्राः
स्तम्बेरमा मुखरश्रृङ्खलकर्षिणस्ते ।
येषां विभान्ति तरुणारुणरागयोगाद्
भिन्नाद्रिगैरिकतटा इव दन्तकोशाः ॥७२॥

दीर्घेष्वमी नियमिताः पटमण्डपेषु
निद्रां विहाय वनजाक्ष वनायुदेश्याः ।
वक्त्रोष्मणा मलिनयन्ति पुरोगतानि
लेह्यानि सैन्धवशिलाशकलानि वाहाः ।।७३।।

भवति विरलभक्तिर्म्लानपुष्पोपहारः
स्वकिरणपरिवेषोद्भेदशून्याः प्रदीपाः ।
अयमपि च गिरं नस्त्वत्प्रबोधप्रयुक्ता-
मनुवदति शुकस्ते मञ्जुवाक् पञ्जरस्थः ।।७४।।

इति विरचितवाग्भिर्वन्दिपुत्रैः कुमारः
सपदि विगतनिद्रस्तल्पमुज्झाञ्चकार ।
मदपटुनिनदद्भिर्बोधितो राजहंसैः
सुरगज इव गाङ्गं सैकतं सुप्रतीकः ।।७५।।

अथ विधिमवसाय्य शास्त्रदृष्टं दिवसमुखोचितमञ्चिताक्षिपक्ष्मा ।
कुशलविरचितानुकूलवेषः क्षितिप-समाजमगात् स्वयंवरस्थम् ।।७६।।

।। इति श्रीमहाकविकालिदासकृतौ रघुवंशे महाकाव्ये
अजस्वयंवराभिगमनो नाम पञ्चमः सर्गः ।।



षष्ठः सर्गः

स तत्र मञ्चेषु मनोज्ञवेषान् सिंहासनस्थानुपचारवत्सु ।
वैमानिकानां मरुतामपश्यदाकृष्टलीलान् नरलोकपालान् ॥१॥

रतेर्गृहीतानुनयेन कामं प्रत्यर्पितस्वाङ्गमिवेश्वरेण ।
काकुत्स्थमालोकयतां नृपाणां मनो बभूवेन्दुमतीनिराशम् ॥२॥

वैदर्भनिर्दिष्टमसौ कुमारः क्लृप्तेन सोपानपथेन मञ्चम् ।
शिलाविभङ्गैर्मृगराजशावस्तुङ्गं नगोत्संगमिवारुरोह ॥३॥

परार्ध्यवर्णास्तरणोपपन्नमासेदिवान् रत्नवदासनं सः ।
भूयिष्ठमासीदुपमेयकान्तिर्मयूरपृष्ठाश्रयिणा गुहेन ॥४॥

तासु श्रिया राजपरम्परासु प्रभाविशेषोदयदुर्निरीक्ष्यः ।
सहस्रधाऽऽत्मा व्यरुचद् विभक्तः पयोमुचां पङ्क्तिषु विद्युतेव ॥५॥

तेषां महार्हासनसंस्थितानामुदारनेपथ्यभृतां स मध्ये ।
रराज धाम्ना रघुसूनुरेव कल्पद्रुमाणामिव पारिजातः ॥६॥

नेत्रव्रजाः पौरजनस्य तस्मिन् विहाय सर्वान् नृपतीन् निपेतुः ।
मदोत्कटे रेचितपुष्पवृक्षा गन्धद्विपे वन्य इव द्विरेफाः ॥७॥

अथ स्तुते वन्दिभिरन्वयज्ञैः सोमार्कवंश्ये नरदेवलोके ।
संचारिते चागुरुसारयोनौ धूपे समुत्सर्पति वैजयन्तीः ॥८॥
पुरोपकण्ठोपवनाश्रयाणां कलापिनामुद्धतनृत्तहेतौ ।
प्रध्मातशङ्खे परितो दिगन्तांस्तूर्यस्वने मूर्च्छति मङ्गलार्थे ॥९॥
मनुष्यवाह्यं चतुरस्रयानमध्यास्य कन्या परिवारशोभि ।
विवेश मञ्चान्तरराजमार्गं पतिंवरा क्लृप्तविवाहवेषा ॥१०॥

तस्मिन् विधानातिशये विधातुः कन्यामये नेत्रशतैकलक्ष्ये ।
निपेतुरन्तःकरणैर्नरेन्द्रा देहैः स्थिताः केवलमासनेषु ॥११॥

तां प्रत्यभिव्यक्तमनोरथानां महीपतीनां प्रणयाग्रदूत्यः ।
प्रवालचेष्टा[1] इव पादपानां शृङ्गारचेष्टा विविधा बभूवुः ॥१२॥

कश्चित् कराभ्यामुपगूढनालमालोलपत्राभिहतद्विरेफम् ।
रजोभिरन्तःपरिवेषवन्ति लीलारविन्दं भ्रमयाञ्चकार ॥१३॥

विस्रस्तमंसादपरो विलासी रत्नानुविद्धाङ्गदकोटिलग्नम् ।
प्रालम्बमुत्कृष्य यथावकाशं निनाय साचीकृतचारुवक्त्रः ॥१४॥

आकुञ्चिताग्राङ्गुलिना ततोऽन्यः किंचित्समावर्जितनेत्रशोभः ।
तिर्यग् विसंसर्पिनखप्रभेण पादेन हैमं विलिलेख पीठम् ॥१५॥

निवेश्य वामं भुजमासनार्धे तत्संनिवेशादधिकोन्नतांसः ।
कश्चिद् विवृत्तत्रिकभिन्नहारः सुहृत्समाभाषणतत्परोऽभूत् ॥१६॥

विलासिनीविभ्रमदन्तपत्रमापाण्डुरं केतकबर्हमन्यः ।
प्रियानितम्बोचितसंनिवेशैर्विपाटयामास युवा नखाग्रैः ॥१७॥

कुशेशयाताम्रतलेन कश्चित् करेण रेखाध्वजलाञ्छनेन ।
रत्नाङ्गुलीयप्रभयानुविद्धानुदीरयामास सलीलमक्षान् ॥१८॥

कश्चिद् यथाभागमवस्थितेऽपि स्वसंनिवेशाद् व्यतिलङ्घिनीव ।
वज्रांशुगर्भाङ्गुलिरन्ध्रमेकं व्यापारयामास करं किरीटे ॥१९॥

[१]

ततो नृपाणां श्रुतवृत्तवंशा पुंवत्प्रगल्भा प्रतिहाररक्षी ।
प्राक् संनिकर्षं मगधेश्वरस्य नीत्वा कुमारीमवदत् सुनन्दा ॥२०॥

असौ शरण्यः शरणोन्मुखानामगाधसत्त्वो मगधप्रतिष्ठः ।
राजा प्रजारञ्जनलब्धवर्णः परन्तपो नाम यथार्थनामा ॥२१॥

---

१. शोभा म.

कामं नृपाः सन्तु सहस्रशोऽन्ये राजन्वतीं त्वाहुरनेन भूमिम् ।
नक्षत्रताराग्रहसंकुलापि ज्योतिष्मती चन्द्रमसैव रात्रिः ॥२२॥

क्रियाप्रबन्धा—दयमध्वराणा—मजस्रमाहूत—सहस्रनेत्रः ।
शच्याश्चिरं पाण्डुकपोललम्बान् मन्दारशून्यानलकाँश्चकार ॥२३॥

अनेन चेदिच्छसि गृह्यमाणं पाणिं वरेण्येन कुरु प्रवेशे ।
प्रासादवातायनसंस्थितानां नेत्रोत्सवं पुष्पपुराङ्गनानाम् ॥२४॥

एवं तयोक्ते तमवेक्ष्य किंचिद्-विस्रंसिदूर्वाङ्कमधूकमाला ।
ऋजुप्रणामक्रिययैव तन्वी प्रत्यादिदेशैनमभाषमाणा ॥२५॥

[२]

तां सैव वेत्रग्रहणे नियुक्ता राजान्तरं राजसुतां निनाय ।
समीरणोत्थेव तरङ्गलेखा पद्मान्तर मानसराजहंसीम् ॥२६॥

जगाद चैनामयमङ्गनाथो सुराङ्गनाप्रार्थितयौवनश्रीः ।
विनीतनागः किल सूत्रकारैरैन्द्रं पदं भूमिगतोऽपि भुङ्क्ते ॥२७॥

अनेन पर्यासयताश्रुबिन्दून् मुक्ताफलस्थूलतमान् स्तनेषु ।
प्रत्यर्पिताः शत्रुविलासिनीनामुन्मुच्य सूत्रेण विनैव हाराः ॥२८॥

निसर्गभिन्नास्पदमेकसंस्थमस्मिन् द्वयं श्रीश्च सरस्वती च ।
कान्त्या गिरा सूनृतया च योग्या त्वमेव कल्याणि तयोस्तृतीया ॥२९॥

अथाङ्गराजादवतार्य चक्षुर्याहीति जन्यामवदत् कुमारी ।
नासौ न काम्यो न च वेद सम्यग्द्रष्टुं न सा, भिन्नरुचिर्हि लोकः ॥३०॥

[३]

ततः परं दुष्प्रसहं द्विषद्भिर्नृपं नियुक्ता प्रतिहारभूमौ ।
निदर्शयामास विशेषदृश्यमिन्दुं नवोत्थानमिवेन्दुमत्यै ॥३१॥

अवन्तिनाथोऽयमुदग्रबाहु— र्विशालवक्षास्तनुवृत्तमध्यः ।
आरोप्य चक्रभ्रममुष्णतेजास्त्वष्ट्रेव यत्नोल्लिखितो विभाति ॥३२॥

अस्य प्रयाणेषु समग्रशक्तेरग्रेसरैर्वाजिभिरुत्थितानि ।
कुर्वन्ति सामन्तशिखामणीनां प्रभाप्ररोहास्तमयं रजांसि ।।३३।।

असौ महाकालनिकेतनस्य वसन्नदूरे किल चन्द्रमौलेः ।
तमिस्रपक्षेऽपि सह प्रियाभिर्ज्योत्स्नावतो निर्विशति प्रदोषान् ।।३४।।

अनेन यूना सह पार्थिवेन रम्भोरु कच्चिन्मनसो रुचिस्ते ।
सिप्रातरङ्गानिलकम्पितासु विहर्तुमुद्यानपरम्परासु ।।३५।।

तस्मिन्नभिद्योतितबन्धुपद्मे प्रतापसंशोषितशत्रुपङ्के ।
बबन्ध सा नोत्तमसौकुमार्या कुमुद्वती भानुमतीव भावम् ।।३६।।

[४]

तामग्रतस्तामरसान्तराभामनूपराजस्य गुणैरनूनाम् ।
विधाय सृष्टिं ललितां विधातुर्जगाद भूयः सुदतीं सुनन्दा ।।३७।।

सङ्ग्रामनिर्विष्टसहस्रबाहु—रष्टादशद्वीप—निखातयूपः ।
अनन्यसाधारणराजशब्दो बभूव योगी किल कार्त्तवीर्यः ।।३८।।

अकार्यचिन्तासमकालमेव प्रादुर्भवँश्चापधरः पुरस्तात् ।
अन्तःशरीरेष्वपि यः प्रजानां प्रत्यादिदेशाविनयं विनेता ।।३९।।

ज्याबन्धनिष्पन्दभुजेन यस्य विनिःश्वसद्वक्त्रपरम्परेण ।
कारागृहे निर्जितवासवेन लङ्केश्वरेणोषितमाप्रसादात् ।।४०।।

तस्यान्वये भूपतिरेष जातः [1]प्रदीप इत्यागमवृद्धसेवी ।
येन श्रियः संश्रयदोषरूढं स्वभावलोलेत्ययशः प्रमृष्टम् ।।४१।।

आयोधने कृष्णगतिं सहायमवाप्य यः क्षत्रियकालरात्रिम् ।
धारां शितां रामपरश्वधस्य संभावयत्युत्पलपत्रसाराम् ।।४२।।

अस्याङ्कलक्ष्मीर्भव दीर्घबाहोर्माहिष्मतीवप्रनितम्बकाञ्चीम् ।
प्रासादजालैर्जलवेणिरम्यां रेवां यदि प्रेक्षितुमस्ति कामः ।।४३।।

१. प्रतीप म.

तस्याः प्रकामं प्रियदर्शनोऽपि न स क्षितीशो रुचये बभूव ।
शरत्प्रमृष्टाम्बुधरोपरोधः शशीव पर्याप्तकलो नलिन्याः ॥४४॥

[५]

सा शूरसेनाधिपतिं सुषेणमुद्दिश्य लोकान्तरगीतकीर्तिम् ।
आचारशुद्धोभयवंशदीपं शुद्धान्तरक्ष्या जगदे कुमारी ॥४५॥

नीपान्वयः पार्थिव एष यज्वा गुणैर्यमाश्रित्य परस्परेण ।
सिद्धाश्रमं शान्तमिवैत्य सत्त्वैर्नैसर्गिकोऽप्युत्ससृजे विरोधः ॥४६॥

यस्यात्मगेहे नयनाभिरामा कान्तिर्हिमांशोरिव संनिविष्टा ।
हर्म्याग्रसंरूढतृणाङ्कुरेषु तेजोऽविषह्यं रिपुमन्दिरेषु ॥४७॥

यस्यावरोधस्तनचन्दनानां प्रक्षालनाद् वारिविहारकाले ।
कलिन्दकन्या [1]मधुरां गतापि गङ्गोर्मिसंसक्तजलेव भाति ॥४८॥

त्रस्तेन ताक्ष्यात् किल कालियेन मणिं विसृष्टं यमुनौकसा यः ।
वक्षःस्थलव्यापिरुचं दधानः सकौस्तुभं ह्रेपयतीव कृष्णम् ॥४९॥

संभाव्य भर्तारममुं युवानं मृदुप्रवालोत्तरपुष्पशय्ये ।
वृन्दावने चैत्ररथादनूने निर्विश्यतां सुन्दरि यौवनश्रीः ॥५०॥

अध्यास्य चाम्भःपृषतोक्षितानि शैलेयगन्धीनि शिलातलानि ।
कलापिनां प्रावृषि पश्य नृत्यं कान्तासु गोवर्धनकन्दरासु ॥५१॥

नृपं तमावर्त्तमनोज्ञनाभिः सा व्यत्यगादन्यवधूर्भवित्री ।
महीधरं मार्गवशादुपेतं स्रोतोवहा सागरगामिनीव ॥५२॥

[६]

अथाङ्गदाश्लिष्टभुजं भुजिष्या हेमाङ्गदं नाम कलिङ्गनाथम् ।
आसेदुषीं सादितशत्रुपक्षं बालामबालेन्दुमुखीं बभाषे ॥५३॥

असौ महेन्द्राद्रिसमानसारः पतिर्महेन्द्रस्य महोदधेश्च ।
यस्य क्षरत्सैन्यगजच्छलेन यात्रासु यातीव पुरो महेन्द्रः ॥५४॥

१. मथुराम्. म.

ज्याघातरेखे सुभुजो भुजाभ्यां बिभर्ति यश्चापभृतां पुरोगः ।
रिपुश्रियां साञ्जनवाष्पसेके वन्दीकृतानामिव पद्धती द्वे ॥५५॥

यमात्मनः सद्मनि संनिकृष्टो मन्द्रध्वनित्याजितयामतूर्यः ।
प्रासादवातायनदृश्यवीचिः प्रबोधयत्यर्णव एव सुप्तम् ॥५६॥

अनेन सार्धं विहराम्बुराशेस्तीरेषु तालीवनमर्मरेषु ।
द्वीपान्तरानीतलवङ्गपुष्पैरपाकृतस्वेदलवा मरुद्भिः ॥५७॥

प्रलोभिताप्याकृतिलोभनीया विदर्भराजावरजा तयैवम् ।
तस्मादपावर्तत दूरकृष्टा नीत्येव लक्ष्मीः प्रतिकूलदैवात् ॥५८॥

[७]

अथोरगाख्यस्य पुरस्य नाथं दौवारिकी देवसरूपमेत्य ।
इतश्चकोराक्षि विलोकयेति पूर्वानुशिष्टां निजगाद भोज्याम् ॥५९॥

पाण्ड्योऽयमंसार्पितलम्बहारः क्लृप्ताङ्गरागो हरिचन्दनेन ।
आभाति बालातपरक्तसानुः सनिर्झरोद्गार इवाद्रिराजः ॥६०॥

विन्ध्यस्य संस्तम्भयिता महाद्रेर्निःशेषपीतोज्झितसिन्धुराजः ।
प्रीत्याश्वमेधावभृथार्द्रमूर्तेः सौस्नातिको यस्य भवत्यगस्त्यः ॥६१॥

अस्त्रं हरादाप्तवता दुरापं येनेन्द्रलोकावजयाय दृप्तः ।
पुरा जनस्थानविमर्दशङ्की संधाय लङ्काधिपतिः प्रतस्थे ॥६२॥

अनेन पाणौ विधिवद् गृहीते महाकुलीनेन महीव गुर्वी ।
रत्नानुविद्धार्णवमेखलाया दिशः सपत्नी भव दक्षिणस्याः ॥६३॥

ताम्बूलवल्ली—परिणद्ध-पूगास्वेलालतालिङ्गित—चन्दनासु ।
तमालपत्रास्तरणासु रन्तुं प्रसीद शश्वन्मलयस्थलीषु ॥६४॥

इन्दीवरश्यामतनुर्नृपोऽसौ त्वं रोचनागौरशरीरयष्टिः ।
अन्योन्यशोभापरिवृद्धये वां योगस्तडित्तोयदयोरिवास्तु ॥६५॥

स्वसुर्विदर्भाधिपतेस्तदीयो लेभेऽन्तरं चेतसि नोपदेशः ।
दिवाकरादर्शनबद्धकोशे नक्षत्रनाथांशुरिवारविन्दे ।।६६।।

संचारिणी दीपशिखेव रात्रौ यं यं व्यतीयाय पतिम्वरा सा ।
नरेन्द्रमार्गाट्ट इव प्रपेदे विवर्णभावं स स भूमिपालः ।।६७।।

[८]

तस्यां रघोः सूनुरुपस्थितायां वृणीत मां नेति समाकुलोऽभूत् ।
वामेतरः संशयमस्य बाहुः केयूरबन्धोच्छ्वसितैर्नुनोद ।।६८।।

तं प्राप्य सर्वावयवानवद्यं व्यावर्त्ततान्योपगमात् कुमारी ।
न हि प्रफुल्लं सहकारमेत्य वृक्षान्तरं काङ्क्षति षट्पदाली ।।६९।।

तस्मिन् समावेशितचित्तवृत्तिमिन्दुप्रभामिन्दुमतीमवेक्ष्य ।
प्रचक्रमे वक्तुमनुक्रमज्ञा सविस्तरं वाक्यमिदं सुनन्दा ।।७०।।

इक्ष्वाकुवंश्यः ककुदं नृपाणां ककुत्स्थ इत्याहितलक्षणोऽभूत् ।
काकुत्स्थशब्दं यत उन्नतेच्छाः श्लाघ्यं दधत्युत्तरकोसलेन्द्राः ।।७१।।

महेन्द्रमास्थाय महोक्षरूपं यः संयति प्राप्तपिनाकिलीलः ।
चकार बाणैरसुराङ्गनानां गण्डस्थलीः प्रोषितपत्रलेखाः ।।७२।।

ऐरावतास्फालनविश्लथं यः संघट्टयन्नङ्गदमङ्गदेन ।
उपेयुषः स्वामपि मूर्तिमग्र्यामर्धासनं गोत्रभिदोऽधितष्ठौ ।।७३।।

जातः कुले तस्य किलोरुकीर्तिः कुलप्रदीपो नृपतिर्दिलीपः ।
अतिष्ठदेकोनशतक्रतुत्वे शक्राभ्यसूयाविनिवृत्तये यः ।।७४।।

यस्मिन् महीं शासति वाणिनीनां निद्रां विहारार्धपथे गतानाम् ।
वातोऽपि नास्रंसयदंशुकानि को लम्बयेदाहरणाय हस्तम् ।।७५।।

पुत्रो रघुस्तस्य पदं प्रशास्ति महाक्रतोर्विश्वजितः प्रयोक्ता ।
चतुर्दिगावर्जितसंभृतां यो मृत्पात्रशेषामकरोद् विभूतिम् ।।७६।।

आरूढमद्रीनुदधीन् वितीर्णं भुजङ्गमानां वसतिं प्रविष्टम् ।
ऊर्ध्वं गतं यस्य न चानुबन्धि यशः परिच्छेत्तुमियत्तयाऽलम् ॥७७॥

असौ कुमारस्तमजोऽनुजातस्त्रिविष्टपस्येव पतिं जयन्तः ।
गुर्वीं धुरं यो भुवनस्य पित्रा धुर्येण दम्यः सदृशीं बिभर्ति ॥७८॥

कुलेन कान्त्या वयसा नवेन गुणैश्च तैस्तैर्विनयप्रधानैः ।
त्वमात्मनस्तुल्यममुं वृणीष्व रत्नं समागच्छतु काञ्चनेन ॥७९॥

ततः सुनन्दावचनावसाने लज्जां तनूकृत्य नरेन्द्रकन्या ।
दृष्टया प्रसादामलया कुमारं प्रत्यग्रहीत् संवरणस्रजेव ॥८०॥

सा यूनि तस्मिन्नभिलाषबन्धं शशाक शालीनतया न वक्तुम् ।
रोमाञ्चलक्ष्येण स गात्रयष्टिं भित्वा निराक्रामदरालकेश्याः ॥८१॥

तथागतायां परिहासपूर्वं सख्यां सखी वेत्रभृदाबभाषे ।
आर्ये व्रजामोऽन्यत इत्यथैनां वधूरसूयाकुटिलं ददर्श ॥८२॥

सा चूर्णगौरं रघुनन्दनस्य धात्रीकराभ्यां करभोपमोरूः ।
आसञ्जयामास यथाप्रदेशं कण्ठे गुणं मूर्त्तमिवानुरागम् ॥८३॥

तया स्रजा मङ्गलपुष्पमय्या विशालवक्षःस्थललम्बयाऽजः ।
अमंस्त कण्ठार्पितबाहुपाशां विदर्भराजावरजां वरेण्यः ॥८४॥

शशिनमुपगतेयं कौमुदी मेघमुक्तं
जलनिधिमनुरूपं जह्नुकन्याऽवतीर्णा ।
इति समगुणयोगप्रीतयस्तत्र पौराः
श्रवणकटु नृपाणामेकवाक्यं विवव्रुः ॥८५॥

प्रमुदितवरपक्षमेकतस्तत् क्षितिपतिमण्डलमन्यतो वितानम् ।
उषसि सर इव प्रफुल्लपद्मं कुमुदवनप्रतिपन्ननिद्रमासीत् ॥८६॥

॥ इति श्रीमहाकविकालिदासकृतौ रघुवंशे महाकाव्ये
इन्दुमती-स्वयंवरो नाम षष्ठः सर्गः ॥



सप्तमः सर्गः

अथोपयन्त्रा सदृशेन युक्तां स्कन्देन साक्षादिव देवसेनाम् ।
स्वसारमादाय विदर्भनाथः पुरप्रवेशाभिमुखो बभूव ॥१॥

सेनानिवेशान् पृथिवीक्षितोऽपि जग्मुर्विभातग्रहमन्दभासः ।
भोज्यां प्रति व्यर्थमनोरथत्वाद् रूपेषु वेषेषु च साभ्यसूयाः ॥२॥

सांनिध्ययोगात् किल तत्र शच्याः स्वयंवरक्षोभकृतामभावः ।
काकुत्स्थमुद्दिश्य समत्सरोऽपि शशाम तेन क्षितिपाललोकः ॥३॥

तावत् प्रकीर्णाभिनवोपचारमिन्द्रायुधद्योतिततोरणाङ्कम् ।
वरः स वध्वा सह राजमार्गं प्राप ध्वजच्छायनिवारितोष्णम् ॥४॥

ततस्तदालोकनतत्पराणां सौधेषु चामीकरजालवत्सु ।
बभूवुरित्थं पुरसुन्दरीणां त्यक्तान्यकार्याणि विचेष्टितानि ॥५॥

आलोकमार्गं सहसा व्रजन्त्या कयाचिदुद्वेष्टन-[1]वान्तमाल्यः ।
बन्धुं न संभावित एव तावत् करेण रुद्धोऽपि न केशपाशः ॥६॥

प्रसाधिकालम्बितमग्रपादमाक्षिप्य काचिद् द्रवरागमेव ।
उत्सृष्टलीलागतिरागवाक्षादालक्तकाङ्कां पदवीं ततान ॥७॥

विलोचनं दक्षिणमञ्जनेन संभाव्य तद्वञ्चितवामनेत्रा ।
तथैव वातायनसंनिकर्षं ययौ शलाकामपरा वहन्ती ॥८॥

जालान्तरप्रेषितदृष्टिरन्या प्रस्थानभिन्नां न बबन्ध नीवीम् ।
नाभिप्रविष्टाभरणप्रभेण हस्तेन तस्थाववलम्ब्य वासः ॥९॥

अर्धाचिता[2] सत्वरमुत्थितायाः पदे पदे दुर्निमिते गलन्ती ।
कस्याश्चिदासीद् रसना तदानीमङ्गुष्ठमूलार्पितसूत्रशेषा ॥१०॥

---

१. च म. २. ञ्चिता म.

तासां मुखैरासवगन्धगर्भैर्व्याप्तान्तराः सान्द्रकुतूहलानाम् ।
विलोलनेत्रभ्रमरैर्गवाक्षाः सहस्रपत्राभरणा इवासन् ॥११॥

ता राघवं दष्टिभिरापिवन्त्यो नार्यो न जग्मुर्विषयान्तराणि ।
तथाहि शेषेन्द्रियवृत्तिरासां सर्वात्मना चक्षुरिव प्रविष्टा ॥१२॥

स्थाने वृता भूपतिभिः परोक्षैः स्वयंवरं साधुममंस्त भोज्या ।
पद्मेव नारायणमन्यथासौ लभेत कान्तं कथमात्मतुल्यम् ॥१३॥

परस्परेण स्पृहणीयशोभं न चेदिदं द्वन्द्वमयोजयिष्यत् ।
अस्मिन् द्वये रूपविधानयत्नः पत्युः प्रजानां वितथोऽभविष्यत् ॥१४॥

रतिस्मरौ नूनमिमावभूतां राज्ञां सहस्रेषु तथाहि बाला ।
गतेयमात्मप्रतिरूपमेव मनो हि जन्मान्तरसङ्गतिज्ञम् ॥१५॥

इत्युद्गताः पौरवधूमुखेभ्यः शृण्वन् कथाः श्रोत्रसुखाः कुमारः ।
उद्भासितं मङ्गलसंविधाभिः संबन्धिनः सद्म समाससाद ॥१६॥

ततोऽवतीर्याशु करेणुकायाः स कामरूपेश्वरदत्तहस्तः ।
वैदर्भनिर्दिष्टमथो विवेश नारीमनांसीव चतुष्कमन्तः ॥१७॥

महार्हसिंहासनसंस्थितोऽसौ सरत्नमर्घ्यं मधुपर्कमिश्रम् ।
भोजोपनीतं च दुकूलयुग्मं जग्राह सार्धं वनिताकटाक्षैः ॥१८॥

दुकूलवासाः स वधूसमीपं निन्ये विनीतैरवरोधदक्षैः ।
वेलासकाशं स्फुटफेनराजिर्नवैरुदन्वानिव चन्द्रपादैः ॥१९॥

तत्रार्चितो भोजपतेः पुरोधा हुत्वाग्निमाज्यादिभिरग्निकल्पः ।
तमेव चाधाय विवाहसाक्ष्ये बधूवरौ संगमयांचकार ॥२०॥

हस्तेन हस्तं परिगृह्य बध्वाः स राजसूनुः सुतरां चकासे ।
अनन्तराशोकलताप्रवालं प्राप्येव चूतः प्रतिपल्लवेन ॥२१॥

आसीद् वरः कण्टकितप्रकोष्ठः स्विन्नाङ्गुलिः संववृते कुमारी ।
तस्मिन् द्वये तत्क्षणमात्मवृत्तिः समं विभक्तेव मनोभवेन ॥२२॥

तयोरपाङ्गप्रतिसारितानि क्रियासमापत्तिषु[1] कातराणि ।
ह्रीयन्त्रणामानशिरे मनोज्ञामन्योन्यलोलानि विलोचनानि ॥२३॥

प्रदक्षिणप्रक्रमणात् कृशानोरुदर्चिषस्तन्मिथुनं चकासे ।
मेरोरुपान्तेष्विव वर्तमानमन्योन्यसंसक्तमहस्त्रियामम् ॥२४॥

नितम्बगुर्वी गुरुणा प्रयुक्ता वधूर्विधातृप्रतिमेन तेन ।
चकार सा मत्तचकोरनेत्रा लज्जावती लाजविसर्गमग्नौ ॥२५॥

हविःशमीपल्लवलाजगन्धी पुण्यः कृशानोरुदियाय धूमः ।
कपोलसंसर्पिशिखः स तस्या मुहूर्तकर्णोत्पलतां प्रपेदे ॥२६॥

तदञ्जनक्लेदसमाकुलाक्षं प्रम्लानबीजाङ्कुरकर्णपूरम् ।
वधूमुखं पाटलगण्डलेखमाचारधूमग्रहणाद् बभूव ॥२७॥

तौ स्नातकैर्बन्धुमता च राज्ञा पुरन्ध्रिभिश्च क्रमशः प्रयुक्तम् ।
कन्याकुमारौ कनकासनस्थावार्द्राक्षतारोपणमन्वभूताम् ॥२८॥

इति स्वसुर्भोजकुलप्रदीपः संपाद्य पाणिग्रहणं स राजा ।
महीपतीनां पृथगर्हणार्थं समादिदेशाधिकृतानधिश्रीः ॥२९॥

लिङ्गैर्मुदः संवृतविक्रियास्ते ह्रदाः प्रसन्ना इव गूढनक्राः ।
वैदर्भमामन्त्र्य ययुस्तदीयां प्रत्यर्प्य पूजामुपदाच्छलेन ॥३०॥

स राजलोकः कृतपूर्वसंविदारम्भसिद्धौ [2]समरोपलभ्यम् ।
आदास्यमानः प्रमदामिषं तदावृत्य पन्थानमजस्य तस्थौ ॥३१॥

भर्तापि तावत् क्रथकैशिकानामनुष्ठितानन्तरजाविवाहः ।
सत्त्वानुरूपाहरणी[3]-कृतश्रीः प्रास्थापयद् राघवमन्वगाच्च ॥३२॥

तिस्रस्त्रिलोकप्रथितेन सार्धमजेन मार्गे वसतीरुषित्वा ।
तस्मादपावर्तत कुण्डिनेशः पर्वात्यये सोम इवोष्णरश्मेः ॥३३॥

प्रमन्यवः प्रागपि कोसलेन्द्रे प्रत्येकमात्तस्वतया बभूवुः ।
अतो नृपाश्चक्षमिरे समेताः स्त्रीरत्नलाभं न तदात्मजस्य ॥३४॥

---

१. वर्त्तनिवर्त्तितानि म. २. समरो म.,
३. आहरणं यौतुकम्, लोके 'दहेज' इति ।

तमुद्वहन्तं पथि भोजकन्यां रुरोध राजन्यगणः स दृप्तः ।
बलिप्रदिष्टां श्रियमाददानं त्रैविक्रमं पादमिवेन्द्रशत्रुः ॥३५॥

तस्याः स रक्षार्थमनल्पयोधमादिश्य पित्र्यं सचिवं कुमारः ।
प्रत्यग्रहीत् पार्थिववाहिनीं तां [1]ज्योतीरथां शोण इवोत्तरङ्गः ॥३६॥

पत्तिः पदातिं रथिनं रथेशस्तुरङ्गसादी तुरगाधिरूढम् ।
यन्ता गजस्याभ्यपतद् गजस्थं तुल्यप्रतिद्वन्द्वि बभूव युद्धम् ॥३७॥

नदत्सु तूर्येष्वविभाव्यवाचो नोदीरयन्ति स्म कुलोपदेशान् ।
बाणाक्षरैरेव परस्परस्य नामोर्जितं चापभृतः शशंसुः ॥३८॥

उत्थापितः संयति रेणुरश्वैः सान्द्रीकृतः स्यन्दनवंशचक्रैः ।
विस्तारितः कुञ्जरकर्णतालै[2]रनुक्रमेणोपरुरोध सूर्यम् ॥३९॥

मत्स्यध्वजा वायुवशाद् विदीर्णैर्मुखैः प्रवृद्धध्वजिनीरजांसि ।
बभुः पिबन्तः परमार्थमत्स्याः पर्याविलानीव नवोदकानि ॥४०॥

रथो रथाङ्गध्वनिना विजज्ञे विलोलघण्टाक्वणितेन नागः ।
स्वभर्तृनामग्रहणाद् बभूव सान्द्रे रजस्यात्मपरावबोधः ॥४१॥

आवृण्वतो लोचनमार्गमाजौ रजोऽन्धकारस्य विजृम्भितस्य ।
शस्त्रक्षताश्वद्विपवीरजन्मा बालारुणोऽभूद् रुधिरप्रवाहः ॥४२॥

स च्छिन्नमूलः क्षतजेन रेणुस्तस्योपरिष्टात् पवनावधूतः ।
अङ्गारशेषस्य हुताशनस्य पूर्वोत्थितो धूम इवावभासे ॥४३॥

---

१. ज्योतिरथा—नदी मध्यप्रदेशस्य रीवाक्षेत्रे शोणगामिनी सरित् । भागीरथीमिति तु मल्लिनाथ-हेमाद्रिभट्टौ । प्राचीनटीकाकृत्सु पाण्डुग्रन्थेषु पुनर्ज्योतीरथेत्येव पाठः । एष एव चोचितः, शोणस्याज-स्थानीयत्वात् सरित्कर्तृकेऽभियोगे कर्मत्वेनान्वयस्यान्यथाऽसिद्धेः । भागीरथीपाठे पुनरभियोगे शोणकर्तृकत्वमेव प्रसिद्ध्येत्, शोणस्यैव भागीरथीगामित्वस्य दृश्यमानत्वात् ।

२. नेत्रक्रमेण म०, नेत्रं क्षौमं वास इति तत्समर्थकाः । अनुक्रमस्तु श्लोकार्थ एवोपनिद्धः ।

प्रहारमूर्च्छापगमे रथस्था यन्तॄनुपालभ्य निर्वर्तिताश्वान् ।
यैः सादिता लक्षितपूर्वकेतूंस्तानेव सामर्षतया निजघ्नुः ॥४४॥

अप्यर्धमार्गे परवाणलूना धनुर्भृतां हस्तवतां पृषत्काः ।
संप्रापुरेवात्म-जवानुवृत्त्या पूर्वार्धभागैः फलिभिः शरव्यम् ॥४५॥

आधोरणानां गजसंनिपाते शिरांसि चक्रैर्निशितैः क्षुराग्रैः ।
हृतान्यपि श्येननखाग्रकोटिव्यासक्तकेशानि चिरेण पेतुः ॥४६॥

पूर्वं प्रहर्ता न जघान भूयः प्रतिप्रहाराक्षममश्वसादी ।
तुरङ्गमस्कन्धनिषण्णदेहं प्रत्याश्वसन्तं रिपुमाचकाङ्क्ष ॥४७॥

तनुत्यजां वर्मभृतां विकोशैर्बृहत्सु दन्तेष्वसिभिः पतद्भिः ।
उद्यन्तमग्निं शमयांवभूवुर्गजा विविग्नाः करसीकरेण ॥४८॥

शिलीमुखोत्कृत्तशिरःफलाढ्या च्युतैः शिरस्त्रैश्चषकोत्तरेव ।
रणक्षितिः शोणितमद्यकुल्या रराज मृत्योरिव पानभूमिः ॥४९॥

उपान्तयोर्निष्कुषितं विहङ्गैराक्षिप्य तेभ्यः पिशितप्रियापि ।
केयूरकोटिक्षततालुदेशा शिवा भुजच्छेदमपाचकार ॥५०॥

कश्चिद् द्विषत्खड्गहृतोत्तमाङ्गः सद्यो विमानप्रभुतामुपेत्य ।
वामाङ्गसंसक्तसुराङ्गनः स्वं नृत्यत्कबन्धं समरे ददर्श ॥५१॥

अन्योन्यसूतोन्मथनादभूतां तावेव सूतौ रथिनौ च कौचित् ।
व्यश्वौ गदाव्यायतसंप्रहारौ भग्नायुधौ वाहुविमर्दनिष्ठौ ॥५२॥

परस्परेण क्षतयोः प्रहर्त्रोरुत्क्रान्तवाय्वोः समकालमेव ।
अमर्त्यभावेऽपि कयोश्चिदासीदेकाप्सरःप्रार्थितयोर्विवादः ॥५३॥

व्यूहावुभौ तावितरेतरस्माद् भङ्गं जयं चापतुरव्यवस्थम् ।
पश्चात्पुरोमारुतयोः प्रवृद्धौ पर्यायवृत्त्येव महार्णवोर्मी ॥५४॥

परेण भग्नेऽपि वले महौजा ययावजः प्रत्यरिसैन्यमेव ।
धूमो निवर्त्येत समीरणेन यतस्तु कक्षस्तत इव वह्निः ॥५५॥

रथी निषङ्गी कवची धनुष्मान् दृप्तः स राजन्यकमेकवीरः ।
निवारयामास महावराहः कल्पक्षयोद्वृत्तमिवार्णवाम्भः ॥५६॥

स दक्षिणं तूणमुखे च[1] वामं व्यापारयन् हस्तमलक्ष्यताजौ ।
आकर्णकृष्टा सकृदस्य योद्धुर्मौर्वीव बाणान् सुषुवे रिपुघ्नान् ॥५७॥

स रोषदष्टाधिकलोहितौष्ठैर्व्यक्तोर्ध्वरेखा भ्रुकुटीर्वहद्भिः ।
तस्तार गां भल्लनिकृत्तकण्ठैर्हुङ्कारगर्भैर्द्विषतां शिरोभिः ॥५८॥

सर्वैर्बलाङ्गैर्द्विरदप्रधानैः सर्वायुधैः कङ्कटभेदिभिश्च ।
सर्वप्रयत्नेन च भूमिपालास्तस्मिन् प्रजह्रुर्युधि सर्व एव ॥५९॥

सोऽस्त्रव्रजैश्छन्नरथः परेषां ध्वजाग्रमात्रेण बभूव लक्ष्यः ।
नीहारमग्नो दिनपूर्वभागः किंचित्प्रकाशेन विवस्वतेव ॥६०॥

प्रियम्वदात् प्राप्तमसौ कुमारः प्रायुङ्क्त राजस्वधिराजसूनुः ।
गान्धर्वमस्त्रं कुसुमास्त्रकान्तः प्रस्वापनं स्वप्ननिवृत्तलौल्यः ॥६१॥

ततो धनुष्कर्षणमूढहस्तमेकांसपर्यस्तशिरस्त्रजालम् ।
तस्थौ ध्वजस्तम्भनिषण्णदेहं निद्राविधेयं नरदेवसैन्यम् ॥६२॥

ततः प्रियोपात्तरसेऽधरोष्ठे निवेश्य दध्मौ जलजं कुमारः ।
तेन स्वहस्तार्जितमेकवीरः पिबन् यशो मूर्तमिवाबभासे ॥६३॥

शङ्खस्वनाभिज्ञतया निवृत्तास्तं सन्नशत्रुं ददृशुः स्वयोधाः ।
निमीलितानामिव पङ्कजानां मध्ये स्फुरन्तं प्रतिमाशशाङ्कम् ॥६४॥

सशोणितैस्तेन शिलीमुखाग्रैर्निक्षेपिताः केतुषु पार्थिवानाम् ।
यशो हृतं संप्रति राघवेण न जीवितं वः कृपयेति वर्णाः ॥६५॥

स चापकोटीनिहितैकबाहुः शिरस्त्रनिष्कर्षणभिन्नमौलिः ।
ललाटबद्धश्रमवारिबिन्दुर्भीतां प्रियामेत्य वचो बभाषे ॥६६॥

इतः परानर्भकहार्यशस्त्रान् वैदर्भि पश्यानुमता मयासि ।
एवंविधेनाहवचेष्टितेन त्वं प्रार्थ्यसे हस्तगता ममैभिः ॥६७॥

१. मुखेन म.

तस्याः प्रतिद्वन्द्विभवाद् विषादात् सद्यो विमुक्तं मुखमाबभासे।
निःश्वासबाष्पापगमात् प्रपन्नः प्रसादमात्मीयमिवात्मदर्शः ॥६८॥

हृष्टापि सा ह्रीविजिता न साक्षाद् वाग्भिः सखीनां प्रियमभ्यनन्दत्।
स्थली नवाम्भःपृषताभिवृष्टा मयूरकेकाभिरिवाभ्रवृन्दम्[1] ॥६९॥

इति शिरसि स वामं पादमाधाय राज्ञा-
मुदवहदनवद्यां तामवद्यादपेतः।
रथतुरगरजोभिस्तस्य रूक्षालकाग्रा
समरविजयलक्ष्मीः सैव मूर्त्ता बभूव ॥७०॥

प्रथमपरिगतार्थस्तं रघुः संनिवृत्तं
विजयिनमभिनन्द्य श्लाघ्यजायासमेतम्।
तदुपहितकुटुम्बः शान्तिमार्गोत्सुकोऽभू-
न्न हि सति कुलधुर्ये सूर्यवंश्या गृहाय ॥७१॥

॥ इति श्रीमहाकविकालिदासकृतौ रघुवंशे महाकाव्ये
अजविवाहो नाम सप्तमः सर्गः ॥



१. कु० ६।२

अष्टमः सर्गः

अथ तस्य विवाहकौतुकं ललितं बिभ्रत एव पार्थिवः ।
वसुधामपि हस्तगामिनीमकरोदिन्दुमतीमिवापराम् ॥१॥

दुरितैरपि कर्तुमात्मसात् प्रयतन्ते नृपसनवो हि यत् ।
तदुपस्थितमग्रहीदजः पितुराज्ञेति न भोगतृष्णया ॥२॥

अनुभूय वसिष्ठसंभृतैः सलिलैस्तेन सहाभिषेचनम् ।
विशदोच्छ्वसितेन मेदिनी कथयामास कृतार्थतामिव ॥३॥

स बभूव दुरासदः परैर्गुरुणाथर्ववविदा कृतक्रियः ।
पवनाग्निसमागमो ह्ययं सहितं ब्रह्म यदस्त्रतेजसा ॥४॥

रघुमेव निवृत्तयौवनं तममन्यन्त नवेश्वरं प्रजाः ।
स हि तस्य न केवलां श्रियं प्रतिपेदे सकलान् गुणानपि ॥५॥

अधिकं शुशुभे शुभंयुना द्वितयेन द्वयमेव सङ्गतम् ।
पदमृद्धमजेन पैतृकं विनयेनास्य नवं च यौवनम् ॥६॥

सदयं बुभुजे महाभुजः सहसोद्वेगमियं व्रजेदिति ।
अचिरोपनतां स मेदिनीं नवपाणिग्रहणां वधूमिव ॥७॥

अहमेव मतो महीपतेरिति सर्वः प्रकृतिष्वचिन्तयत् ।
उदधेरिव निम्नगाशतेष्वभवन्नास्य विमानना क्वचित् ॥८॥

न खरो न च भूयसा मृदुः पवमानः पृथिवीरुहानिव ।
स पुरस्कृतमध्यमक्रमो नमयामास नृपाननुद्धरन् ॥९॥

अथ वीक्ष्य रघुः प्रतिष्ठितं प्रकृतिष्वात्मजमात्मवत्तया ।
विषयेषु विनाशधर्मसु त्रिदिवस्थेष्वपि निःस्पृहोऽभवत् ॥१०॥

गुणवत्सुतरोपितश्रियः परिणामे हि दिलीपवंशजाः ।
पदवीं तरुवल्कवाससां प्रयताः संयमिनां प्रपेदिरे ।।११।।

तमरण्यसमाश्रयोन्मुखं शिरसा वेष्टनशोभिना सुतः ।
पितरं प्रणिपत्य पादयोरपरित्यागमयाचतात्मनः ।।१२।।

रघुरश्रुमुखस्य तस्य तत् कृतवानीप्सितमात्मजप्रियः ।
न तु सर्प इव त्वचं पुनः प्रतिपेदे व्यपवर्जितां श्रियम् ।।१३।।

स किलाश्रममन्त्यमाश्रितो निवसन्नावसथे पुराद् बहिः ।
समुपास्यत पुत्रभोग्यया स्नुषयेवाविकृतेन्द्रियः श्रिया ।।१४।।

प्रशमस्थितपूर्वपार्थिवं कुलमभ्युद्यतनूतनेश्वरम् ।
नभसा निभृतेन्दुना तुलामुदितार्केण समारुरोह तत् ।।१५।।

यतिपार्थिवलिङ्गधारिणौ ददृशाते रघुराघवौ जनैः ।
अपवर्गमहोदयार्थयोर्भुवमंशाविव धर्मयोर्गतौ ।।१६।।

अजिताधिगमाय मन्त्रिभिर्युयुजे नीतिविशारदैरजः ।
अनपायिपदोपलब्धये रघुराप्तैः समियाय योगिभिः ।।१७।।

नृपतिः प्रकृतीरवेक्षितुं व्यवहारासनमाददे युवा ।
परिचेतुमुपांशु धारणां कुशपूतं प्रवयास्तु विष्टरम् ।।१८।।

अनयत् प्रभुशक्तिसंपदा वशमेको नृपतीननन्तरान् ।
अपरः प्रणिधानयोग्यया मरुतः पञ्च शरीरगोचरान् ।।१९।।

अकरोदचिरेश्वरः क्षितौ द्विषदारम्भफलानि भस्मसात् ।
इतरो दहने स्वकर्मणां ववृते ज्ञानमयेन वह्निना ।।२०।।

पणबन्धमुखान् गुणानजः षडुपायुङ्क्त समीक्ष्य तत्फलम् ।
रघुरप्यजयद् गुणत्रयं प्रकृतिस्थं समलोष्टकाञ्चनः ।।२१।।

न नवः प्रभुराफलोदयात् स्थिरकर्मा विरराम कर्मणः ।
न च योगविधेर्नवेतरः स्थिरधी-रा परमात्मदर्शनात् ।।२२।।

इति शत्रुषु चेन्द्रियेषु च प्रतिषिद्धप्रसरेषु जाग्रतौ ।
प्रसितावुदयापवर्गयोरुभयीं सिद्धिमुभाववापतुः ॥२३॥

अथ काश्चिदजव्यपेक्षया गमयित्वा समदर्शनः समाः ।
तमसः परमापदव्ययं पुरुषं योगसमाधिना रघुः॥२४॥

श्रुतदेहविसर्जनः पितुश्चिरमश्रूणि विमुच्य राघवः ।
विदधे विधिमस्य नैष्ठिकं यतिभिः सार्धमनग्निमग्निचित् ॥२५॥

अकरोत् स तदौर्ध्वदैहिकं पितृभक्त्या पितृकार्यकल्पवित् ।
न हि तेन पथा तनुत्यजस्तनयावर्जितपिण्डकाङ्क्षिणः ॥२६॥

स परार्ध्यगतेरशोच्यतां पितुरुद्दिश्य सदर्थवेदिभिः ।
शमिताधिरधिज्यकार्मुकः कृतवानप्रतिशासनं जगत् ॥२७॥

क्षितिरिन्दुमती च भामिनी पतिमासाद्य तमग्र्यपौरुषम् ।
प्रथमा वहुरत्नसूरभूदपरा वीरमजीजनत् सुतम् ॥२८॥

दशरश्मिशतोपमद्युतिं यशसा दिक्षु दशस्वपि श्रुतम् ।
दशपूर्वरथं यमाख्यया दशकण्ठारिगुरुं विदुर्बुधाः ॥२९॥

ऋषिदेवगणस्वधाभुजां श्रुतयागप्रसवैः स पार्थिवः ।
अनृणत्वमुपेयिवान् वभौ परिधेर्मुक्त इवोष्णदीधितिः ॥३०॥

वलमार्तभयोपशान्तये विदुषां सत्कृतये बहुश्रुतम् ।
वसु तस्य विभोर्न केवलं गुणवत्तापि परप्रयोजना ॥३१॥

स कदाचिदवेक्षितप्रजः सह देव्या विजहार सुप्रजाः ।
नगरोपवने शचीसखो मरुतां पालयितेव नन्दने ॥३२॥

अथ रोधसि दक्षिणोदधेः श्रितगोकर्णनिकेतमीश्वरम् ।
उपवीणयितुं ययौ रवेरुदयावृत्तिपथेन नारदः ॥३३॥

कुसुमैर्ग्रथितामपार्थिवैः स्रजमातोद्यशिरोनिवेशिताम् ।
अहरत् किल तस्य वेगवानधिवासस्पृहयेव मारुतः ॥३४॥

भ्रमरैः कुसुमानुसारिभिः परिकीर्णा परिवादिनी मुनेः ।
ददृशे पवनावलेपजं सृजती बाष्पमिवाञ्जनाविलम् ॥३५॥

अभिभूय विभूतिमार्तवीं मधुगन्धातिशयेन वीरुधाम् ।
नृपतेरमरस्रगाप सा दयितोरुस्तनकोटि-[1]सुस्थितिम् ॥३६॥

क्षणमात्रसखीं सुजातयोः स्तनयोस्तामवलोक्य विह्वला ।
निमिमील नरोत्तमप्रिया हृतचन्द्रा [2]तमसेव कौमुदी ॥३७॥

वपुषा करणोज्झितेन सा निपतन्ती पतिमप्यपातयत् ।
ननु तैलनिषेकबिन्दुना सह दीपार्चिरुपैति मेदिनीम् ॥३८॥

उभयोरपि पार्श्ववर्तिनां तुमुलेनार्तरवेण वेजिताः ।
विहगाः कमलाकरालयाः समदुःखा इव तत्र चुक्रुशुः ॥३९॥

नृपतेर्व्यजनादिभिस्तमो नुनुदे सा तु तथैव संस्थिता ।
प्रतिकारविधानमायुषः सति शेषे हि फलाय कल्पते ॥४०॥

प्रतियोजयितव्यवल्लकीसमवस्थामथ सत्त्वविप्लवात् ।
स निनाय नितान्तवत्सलः परिगृह्योचितमङ्कमङ्गनाम् ॥४१॥

पतिरङ्कनिषण्णया तया करणापायविभिन्नवर्णया ।
समलक्ष्यत बिभ्रदाविलां मृगलेखामुषसीव चन्द्रमाः ॥४२॥

विललाप स वाष्पगद्गदं सहजामप्यपहाय धीरताम् ।
अभितप्तमयोऽपि मार्दवं भजते कैव कथा शरीरिषु ॥४३॥

कुसुमान्यपि गात्रसङ्गमात् प्रभवन्त्यायुरपोहितुं यदि ।
न भविष्यति हन्त साधनं किमिवान्यत् प्रहरिष्यतो विधेः ॥४४॥

अथवा मृदु वस्तु हिंसितुं मृदुनैवारभते प्रजान्तकः ।
हिमसेकविपत्तिरत्र मे नलिनी पूर्वनिदर्शनं मता ॥४५॥

स्रगियं यदि जीवितापहा हृदये किं निहिता न हन्ति माम् ।
विषमप्यमृतं क्वचिद् भवेदमृतं वा विषमीश्वरेच्छया ॥४६॥

---

१. '०रश्छदकोटिषु स्थि०' हे. अत्र बहुत्वं व्यर्थम् । २. तमसा राहुणा ।

अथवा मम भाग्यविप्लवादशनिः कल्पित एष वेधसा ।
यदनेन तरुर्न पातितः क्षपिता तद्विटपाश्रिता लता ॥४७॥

कृतवत्यसि नावधीरणामपराद्धेऽपि यदा चिरं मयि ।
कथमेकपदे निरागसं जनमाभाष्यमिमं न मन्यसे ॥४८॥

ध्रुवमस्मि शठः शुचिस्मिते विदितः कैतववत्सलस्तव ।
परलोकमसंनिवृत्तये यदनापृच्छ्य गतासि मामितः ॥४९॥

दयितां यदि तावदन्वगाद् विनिवृत्तं किमिदं तया विना ।
सहतां हतजीवितं मम प्रबलामात्मकृतां तु वेदनाम् ॥५०॥

सुरतश्रमसंभृतो मुखे ध्रियते स्वेदलवोद्गमोऽपि ते ।
अथ चास्तमिता त्वमात्मना धिगिमां देहभृतामसारताम् । ५१॥

मनसापि न विप्रियं मया कृतपूर्वं तव किं जहासि माम् ।
ननु शब्दपतिः क्षितेरहं त्वयि मे भावनिबन्धना रतिः ॥५२॥

कुसुमोत्खचितान् वलीभृतश्चलयन् भृङ्गरुचस्तवालकान् ।
करभोरु करोति मारुतस्त्वदुपावर्तनशङ्कि मे मनः ॥५३॥

तदपोहितुमर्हसि प्रिये प्रतिबोधेन विषादमाशु मे ।
ज्वलितेन गुहागतं तमस्तुहिनाद्रेरिव नक्तमोषधीः ॥५४॥

इदमुच्छ्वसितालकं मुखं तव विश्रान्तकथं दुनोति माम् ।
निशि सुप्तमिवैकपङ्कजं विरताभ्यन्तरषट्पदस्वनम् ॥५५॥

शशिनं पुनरेति शर्वरी दयिता द्वन्द्वचरं पतत्त्रिणम् ।
इति तौ विरहान्तरक्षमौ कथमत्यन्तगता न मां दहेः ॥५६॥

नवपल्लवसंस्तरेऽपि ते मृदु दूयेत यदङ्गमर्पितम् ।
तदिदं विषहिष्यते कथं वद वामोरु चिताधिरोहणम् ॥५७॥

इयमप्रतिबोधशायिनीं रसना त्वां प्रथमा रहःसखी ।
गतिविभ्रमसादनीरवा न शुचा नानुमृतेव लक्ष्यते ॥५८॥

कलमन्यभृतासु भाषितं कलहंसीषु मदालसं गतम् ।
पृषतीषु विलोलमीक्षितं पवनाधूतलतासु विभ्रमाः ॥५९॥

त्रिदिवोत्सुकयाप्यवेक्ष्य मां निहिताः सत्यममी गुणास्त्वया ।
विरहे तव मे गुरुव्यथं हृदयं न त्ववलम्बितुं क्षमाः ॥६०॥

मिथुनं परिकल्पितं त्वया सहकारः फलिनी च नन्विमौ ।
अविधाय विवाहसत्क्रियामनयोर्गम्यत इत्यसाम्प्रतम् ॥६१॥

कुसुमं कृतदोहदस्त्वया यदशोकोऽयमुदीरयिष्यति ।
अलकाभरणं कथं नु तत् तव नेष्यामि निवापमाल्यताम् ॥६२॥

स्मरतेव सशब्दनूपुरं चरणानुग्रहमन्यदुर्लभम् ।
अमुना कुसुमाश्रुवर्षिणा त्वमशोकेन सुगात्रि शोच्यसे ॥६३॥

तव निःश्वसितानुकारिभिर्बकुलैरर्धचितां समं मया ।
असमाप्य विलासमेखलां किमिदं किन्नरकण्ठि! सुप्यते ॥६४॥

समदुःखसुखः सखीजनः प्रतिपच्चन्द्रनिभोऽयमात्मजः ।
अहमेकरसस्तथापि ते व्यवसायः प्रतिपत्तिनिष्ठुरः ॥६५॥

धृतिरस्तमिता रतिश्च्युता विरतं गेयमृतुर्निरुत्सवः ।
गतमाभरणप्रयोजनं परिशून्यं शयनीयमद्य मे ॥६६॥

गृहिणी सचिवः सखा[1] मिथःप्रियशिष्या ललिते कलाविधौ ।
करुणाविमुखेन मृत्युना हरता त्वां वद किं न मे हृतम् ॥६७॥

मदिराक्षि मदाननार्पितं मधु पीत्वा रसवत् कथं नु मे ।
अनुपास्यसि बाष्पदूषितं परलोकोपनतं जलाञ्जलिम् ॥६८॥

विभवेऽपि सति त्वया विना सुखमेतावदजस्य गण्यताम् ।
अहृतस्य विलोभनान्तरैर्मम सर्वे विषयास्त्वदाश्रयाः ॥६९॥

विलपन्निति कोसलाधिपः करुणार्थग्रथितं प्रियां प्रति ।
अकरोत् पृथिवीरुहानपि स्रुतशाखारसबाष्पदूषितान् ॥७०॥

---

१. सखी म., सखा पाण्डुग्रन्थाः हेमाद्रिश्च, संवादी चात्र भासः ।

अथ तस्य कथञ्चिदङ्कतः स्वजनस्तामपनीय सुन्दरीम् ।
विससर्ज तदन्त्यमण्डनामनलायागुरुचन्दनैधसे ॥७१॥

प्रमदामनु संस्थितः शुचा नृपतिः सन्निति वाच्यदर्शनात् ।
न चकार शरीरमग्निसात् सह देव्या न तु जीविताशया ॥७२॥

अथ तेन दशाहतः परे गुणशेषामपदिश्य [1]गेहिनीम् ।
विदुषा विधयो महर्द्धयः पुर एवोपवने समापिताः ॥७३॥

स विवेश पुरीं तया विना क्षणदापायशशाङ्कदर्शनः ।
परिवाहमिवावलोकयन् स्वशुचः पौरवधूमुखाश्रुषु ॥७४॥

अथ तं सवनाय दीक्षितः प्रणिधानाद् गुरुराश्रमस्थितः ।
अभिषङ्गजडं विजज्ञिवानिति शिष्येण किलान्वबोधयत् ॥७५॥

असमाप्तविधिर्यतो मुनिस्तव विद्वानपि तापकारणम् ।
न भवन्तमुपस्थितः स्वयं प्रकृतौ स्थापयितुं [2]कृतस्थितिः ॥७६॥

मयि तस्य सुवृत्त वर्तते लघुसंदेशपदा सरस्वती ।
शृणु विश्रुतसत्त्वसार तां हृदि चैनामुपधातुमर्हसि ॥७७॥

पुरुषस्य पदेष्वजन्मनः समतीतं च भवच्च भावि च ।
स हि निष्प्रतिघेन चक्षुषा त्रितयं ज्ञानमयेन पश्यति ॥७८॥

चरतः किल दुश्चरं तपस्तृणविन्दोः परिशङ्कितः पुरा ।
प्रजिघाय समाधिभेदिनीं हरिरस्मै हरिणीं सुराङ्गनाम् ॥७९॥

स तपःप्रतिबन्धमन्युना प्रमुखाविष्कृतचारुविभ्रमाम् ।
अशपद् भव मानुषीति तां शमवेलाप्रलयोर्मिणा भुवि ॥८०॥

भगवन् परवानयं जनः प्रतिकूलाचरितं क्षमस्व मे ।
इति चोपनतां क्षितिस्पृशं कृतवा-ना सुरपुष्पदर्शनात् ॥८१॥

अथकैशिकवंशसंभवा तव भूत्वा महिषी चिराय सा ।
उपलब्धवती दिवश्च्युतं विवशा शापनिवृत्तिकारणम् ॥८२॥

---

१. भामिनीम् म. २. पथश्च्युतम्, ततश्च्युतम्-म.

तदलं तदपायचिन्तया विपदुत्पत्तिमतामुपस्थिता ।
वसुधेयमवेक्ष्यतां त्वया वसुमत्या हि नृपाः कलत्रिणः ॥८३॥

उदये मदवाच्यमुज्झता श्रुतमाविष्कृतमात्मवत्तया ।
मनसस्तदुपस्थिते ज्वरे पुनरक्लीवतया प्रकाश्यताम् ॥८४॥

रुदता कुत एव सा पुनर्भवता नानुमृतापि लभ्यते ।
परलोकजुषां स्वकर्मभिर्गतयो भिन्नपथा हि देहिनाम् ॥८५॥

अपशोकमनाः कुटुम्बिनीमनुगृह्णीष्व निवापदत्तिभिः ।
स्वजनाश्रु किलातिसंततं दहति प्रेतमिति प्रचक्षते ॥८६॥

मरणं प्रकृतिः शरीरिणां विकृतिर्जीवितमुच्यते बुधैः ।
क्षणमप्यवतिष्ठते श्वसन् यदि जन्तुर्ननु लाभवानसौ ॥८७॥

अवगच्छति मूढचेतनः प्रियनाशं हृदि शल्यमर्पितम् ।
स्थिरधीस्तु तदेव मन्यते कुशलद्वारतया समुद्धृतम् ॥८८॥

स्वशरीरशरीरिणावपि श्रुतसंयोगविपर्ययौ यदा ।
विरहः किमिवानुतापयेद् वद बाह्यैर्विषयैर्विपश्चितम् ॥८९॥

न पृथग्जनवच्छुचो वशं वशिनामुत्तम गन्तुमर्हसि ।
द्रुमसानुमतां किमन्तरं यदि वायौ द्वितयेऽपि ते चलाः ॥९०॥

स तथेति विनेतुरुदारमतेः प्रतिगृह्य वचो विससर्ज मुनिम् ।
तदलब्धपदं हृदि शोकघने प्रतियातमिवान्तिकमस्य गुरोः ॥९१॥

तेनाष्टौ परिगमिताः समाः कथंचिद्
बालत्वादवितथसूनृतेन सूनोः ।
सादृश्यप्रतिकृतिदर्शनैः प्रियायाः
स्वप्नेषु क्षणिकसमागमोत्सवैश्च ॥९२॥

तस्य प्रसह्य हृदयं किल शोकशङ्कुः
प्लक्षप्ररोह इव सौधतलं बिभेद ।
प्राणान्तहेतुमपि तं भिषजामसाध्यं
लाभं प्रियानुगमने त्वरया स मेने ॥९३॥

सम्यग्विनीतमथ वर्महरं कुमार-
मादिश्य रक्षणविधौ विधिवत् प्रजानाम् ।
रोगोपसृष्टतनुदुर्वसतिं मुमुक्षुः
प्रायोपवेशनमतिर्नृपतिर्बभूव ॥९४॥

तीर्थे तोयव्यतिकरभवे जह्नुकन्यासरय्वो-
र्देहत्यागादमरगणनालेख्यमासाद्य सद्यः ।
पूर्वाकाराधिकतररुचा संगतः कान्तयासौ
लीलागारेष्वरमत पुनर्नन्दनाभ्यन्तरेषु ॥९५॥

इति श्रीमहाकविकालिदासकृतौ रघुवंशे महाकाव्ये
अजविलापो नामाष्टमः सर्गः ॥



नवमः सर्गः

पितुरनन्तरमुत्तरकोसलान् समधिगम्य समाधिजितेन्द्रियः ।
दशरथः प्रशशास महारथो यमवतामवतां च धुरि स्थितः ॥१॥

अधिगतं विधिवद् यदपालयत् प्रकृतिमण्डलमात्मकुलोचितम् ।
अभवदस्य ततो गुणवत्तरं सनगरं नग-रन्ध्रकरौजसः ॥२॥

उभयमेव वदन्ति मनीषिणः समयवर्षितया कृतकर्मणाम् ।
बलनिषूदनमर्थपतिं च तं श्रमनुदं मनुदण्डधरान्वयम् ॥३॥

जनपदे न गदः पदमादधावभिभवः कुत एव सपत्नजः ।
क्षितिरभूत् फलवत्यजनन्दने शमरतेऽमरतेजसि पार्थिवे ॥४॥

दशदिगन्तजिता रघुणा यथा श्रियमपुष्यदजेन ततः परम् ।
तमधिगम्य तथैव पुनर्बभौ न न महीनमहीनपराक्रमम् ॥५॥

समतया [1]वसुवृष्टिविसर्जनैर्नियमनादसतां च नराधिपः ।
अनुययौ यमपुण्यजनेश्वरौ सवरुणावरुणाग्रसरं रुचा ॥६॥

न मृगयाभिरतिर्न दुरोदरं न च शशिप्रतिमाभरणं मधु ।
तमुदयाय न वा नवयौवना प्रियतमा यतमानमपाहरत् ॥७॥

न कृपणा प्रभवत्यपि वासवे न वितथा परिहासकथास्वपि ।
न च सपत्नजनेष्वपि तेन वागपरुषा परुषाक्षरमीरिता ॥८॥

उदयमस्तमयं च रघूद्वहादुभयमानशिरे वसुधाधिपाः ।
स हि निदेशमलङ्घयतामभूत् सुहृदयोहृदयः प्रतिगर्जताम् ॥९॥

---

१. वसु स्वर्णरत्नमपि । स्वर्णवृष्टेरत्रैव तृतीये सर्गे जातककथादिष्वपि च प्रसिद्धत्वात् ।

अजयदेकरथेन स मेदिनीमुदधिनेमिमधिज्यशरासनः ।
जयमघोषयदस्य तु केवलं गजवती जवतीव्रहया चमूः ॥१०॥

अवनिमेकरथेन वरूथिना जितवतः किल तस्य धनुर्भृतः ।
विजयदुन्दुभितां ययुरर्णवा घनरवा नरवाहनसंपदः ॥११॥

शमितपक्षवलः शतकोटिना शिखरिणां कुलिशेन पुरन्दरः ।
सशरवृष्टिमुचा धनुषा द्विषां स्वनवता नवतामरसाननः ॥१२॥

चरणयो·र्नखरागसमृद्धिभि-र्मुकुटरत्नमरीचिभिरस्पृशन् ।
नृपतयः शतशो मरुतो यथा शतमखं तमखण्डितपौरुषम् ॥१३॥

निववृते स महार्णवरोधसः सचिवकारितबालसुताञ्जलीन् ।
समनुकम्प्य सपत्नपरिग्रहाननलकानलकानवमां पुरीम् ॥१४॥

उपगतोऽपि च मण्डलनाभितामनुदितान्यसितातपवारणः ।
श्रियमवेक्ष्य स रन्ध्रचलामभूदनलसोऽनलसोमसमद्युतिः ॥१५॥

तमपहाय ककुत्स्थकुलोद्भवं पुरुषमात्मभुवं च पतिव्रता ।
नृपतिमन्यमसेवत देवता सकमला कमलाघवमर्थिषु ॥१६॥

तमलभन्त पतिं पतिदेवताः शिखरिणामिव सागरमापगाः ।
मगधकोसलकेकयशासिनां दुहितरोऽहितरोपितमार्गणम् ॥१७॥

प्रियतमाभिरसौ तिसृभिर्बभौ तिसृभिरेव भुवं सह शक्तिभिः ।
उपगतो विनिनीषुरिव प्रजा हरिहयोऽरिहयोगविचक्षणः ॥१८॥

स किल संयुगमूर्ध्नि सहायतां मघवतः प्रतिपद्य महारथः ।
स्वभुजवीर्यमगापयदुच्छ्रितं सुरवधूरवधूतभयाः शरैः ॥१९॥

क्रतुषु तेन विसर्जितमौलिना भुजसमाहृतदिग्वसुना कृताः ।
कनकयूपसमुच्छ्रयशोभिनो वितमसा तमसासरयूतटाः ॥२०॥

अजिनदण्डभृतं कुशमेखलां यतगिरं मृगशृङ्गपरिग्रहाम् ।
अधिवसंस्तनुमध्वर – दीक्षिता – मसमभासमभासयदीश्वरः ॥२१॥

अवभृथप्रयतो नियतेन्द्रियः सुरसमाजसमाक्रमणोचितः ।
नमयति स्म स केवलमुन्नतं वनमुचे नमुचेररये शिरः ॥२२॥

असकृदेकरथेन तरस्विना हरिहयाग्रसरेण धनुर्भृता ।
दिनकराभिमुखा रणरेणवो रुरुधिरे रुधिरेण सुरद्विषाम् ॥२३॥

अथ समाववृते कुसुमैर्नवैस्तमिव सेवितुमेकनराधिपम् ।
यमकुबेरजलेश्वरवज्रिणां समधुरं मधुरञ्चितविक्रमम् ॥२४॥

जिगमिषुर्धनदाध्युषितां दिशं रथयुजा परिवर्तितवाहनः ।
दिनमुखानि रविर्हिमनिग्रहैर्विमलयन्मलयन्नगमत्यजत् ॥२५॥

कुसुमजन्म ततो नवपल्लवास्तदनु षट्पदकोकिलकूजितम् ।
इति यथाक्रममाविरभून्मधुर्द्रुमवतीमवतीर्य वनस्थलीम् ॥२६॥

नयगुणोपचितामिव भूपतेः सदुपकारफलां श्रियमर्थिनः ।
अभिययुः सरसो मधुसंभृतां कमलिनीमलिनीरपतत्त्रिणः ॥२७॥

कुसुममेव न केवलमार्तवं नवमशोकतरोः स्मरदीपनम् ।
किसलयप्रसवोऽपि विलासिनां मदयिता दयिताश्रवणार्पितः ॥२८॥

विरचिता मधुनोपवनश्रियामभिनवा इव पत्रविशेषकाः ।
मधुलिहां मधुदानविशारदाः कुरवका रवकारणतां ययुः ॥२९॥

सुवदनावदनासवसंभृतस्तदनुवादिगुणः कुसुमोद्गमः ।
मधुकरैरकरोन्मधुलोलुपैर्बकुलमाकुलमायत-पङ्क्तिभिः ॥३०॥

[1]सुरभिसङ्गमजं वनमालया नवपलाशमधार्यत भङ्गुरम् ।
प्रणयिदत्तमिवार्द्रनखक्षतं प्रमदया मदयापितलज्जया ॥ ३१॥

---

१. उपहितं शिशिरापगमश्रिया मुकुलजालमशोभत किंशुके ।
प्रणयिनीव नखक्षतमण्डनं प्रमदया मदयापितलज्जया ॥ म.
स हि 'सुरभिसङ्गमे'-ति पद्यं न पठति पाठान्तरत्वेनापि । हेमाद्रिप्रभृतयस्तु पठन्ति । उद्धृतं चैतदेव पद्यं व्यक्तिविवेके । एतदेव च युक्तम्, पुरुषकर्तृकत्वमत्रैव सिद्ध्यति नखक्षतानामिति । संवादी चात्र कालिदासो 'बालेन्दु-वक्राणी'-ति ३।२९ कुमारसम्भवपद्ये ।

व्रणगुरुप्रमदाधरदुःसहं जघननिर्विषयीकृतमेखलम् ।
न खलु तावदशेषमपोहितुं रविरलं विरलं कृतवान् हिमम् ॥३२॥

अभिनयान् परिचेतुमिवोद्यता मलयमारुतकम्पितपल्लवा ।
अमदयत् सहकारलता मनः सकलिका कलिकामजितामपि ॥३३॥

प्रथममन्यभृताभिरुदीरिताः प्रविरला इव मुग्धवधूकथाः ।
सुरभिगन्धिषु शुश्रुविरे गिरः कुसुमितासु मिता वनराजिषु ॥३४॥

श्रुतिसुखभ्रमरस्वनगीतयः कुसुमकोमलदन्तरुचो बभुः ।
उपवनान्तलताः पवनाहतैः किसलयैः सलयैरिव पाणिभिः ॥३५॥

ललितविभ्रमबन्धविचक्षणं सुरभिगन्धपराजितकेसरम् ।
पतिषु निर्विविशुर्मधुमङ्गनाः स्मरसखं रसखण्डनवर्जितम् ॥३६॥

शुशुभिरे स्मितचारुतराननाः स्त्रिय इव श्लथशिञ्जितमेखलाः ।
विकचतामरसा गृहदीर्घिका मदकलोदकलोलविहङ्गमाः ॥३७॥

उपययौ तनुतां मधुखण्डिता हिमकरोदयपाण्डुमुखच्छविः ।
सदृशमिष्टसमागमनिर्वृतिं वनितयानितया रजनीवधूः ॥३८॥

अपतुषारतया विशदप्रभैः सुरतसङ्गपरिश्रमनोदिभिः ।
कुसुमचापमतेजयदंशुभिर्हिमकरो मकरोर्जितकेतनम् ॥३९॥

हुतहुताशनदीप्ति वनश्रियः प्रतिनिधिः कनकाभरणस्य यत् ।
युवतयः कुसुमं दधुराहितं तदलके दलकेसरपेशलम् ॥४०॥

अलिभिरञ्जनबिन्दुमनोहरैः कुसुमपङ्क्तिनिपातिभिरङ्कितः ।
न खलु शोभयति स्म वनस्थलीं न तिलकस्तिलकः प्रमदामिव ॥४१॥

अमदयन्मधुगन्धसनाथया किसलयाधरसंगतया मनः ।
कुसुमसंभृतया नवमल्लिका स्मितरुचा तरुचारुविलासिनी ॥४२॥

अरुणरागनिषेधिभिरंशुकैः श्रवणलब्धपदैश्च यवाङ्कुरैः ।
परभृताविरुतैश्च विलासिनः स्मरबलैरबलैकरसाः कृताः ॥४३॥

उपचितावयवा शुचिभिः कणैरलिकदम्बकयोगमुपेयुषी ।
सदृशकान्तिरलक्ष्यत मञ्जरी तिलकजालकजालकमौक्तिकैः ॥४४॥

ध्वजपटं मदनस्य धनुर्भृतश्छविकरं मुखचूर्णमृतुश्रियः ।
कुसुमकेसररेणुमलिव्रजाः सपवनोपवनोत्थितमन्वयुः ॥४५॥

अनुभवन्नवदोलमृतूत्सवं पटुरपि प्रियकण्ठजिघृक्षया ।
अनयदासनरज्जुपरिग्रहे भुजलतां जल(ड)तामबलाजनः ॥४६॥

त्यजत मानमलं बत विग्रहैर्न पुनरेति गतं चतुरं वयः ।
परभृताभिरितीव निवेदिते स्मरमते रमते स्म वधूजनः ॥४७॥

अथ यथासुखमार्तवमुत्सवं समनुभूय विलासवतीसखः ।
नरपतिश्चकमे मृगयारतिं स मधुमन्मधुमन्मथसंनिभः ॥४८॥

परिचयं चललक्ष्यनिपातने भयरुषोश्च तदिङ्गितबोधनम् ।
श्रमजयात् प्रगुणां च करोत्यसौ तनुमतोऽनुमतः सचिवैर्ययौ ॥४९॥

मृगवनोपगमक्षमवेषभृद् विपुलकण्ठनिषक्तशरासनः ।
गगनमश्वखुरोद्धतरेणुभिर्नृसविता सवितानमिवाकरोत् ॥५०॥

ग्रथितमौलिरसौ वनमालया तरुपलाशसवर्णतनुच्छदः ।
तुरगवल्गनचञ्चलकुण्डलो विरुरुचे रुरुचेष्टितभूमिषु ॥५१॥

तनुलताविनिवेशितविग्रहा भ्रमरसंक्रमितेक्षणवृत्तयः ।
ददृशुरध्वनि तं वनदेवताः सुनयनं नयनन्दितकोसलम् ॥५२॥

श्वगणिवागुरिकैः प्रथमास्थितं व्यपगतानलदस्यु विवेश सः ।
स्थिरतुरङ्गमभूमि निपानवन्मृगवयोगवयोपचितं वनम् ॥५३॥

अथ नभस्य इव त्रिदशायुधं कनकपिङ्गतडिद्गुणसंयुतम् ।
धनुरधिज्यमनाधिरुपाददे नरवरो रवरोषितकेसरी ॥५४॥

तस्य स्तनप्रणयिभिर्मुहुरेणशावै-
व्याहन्यमानहरिणीगमनं पुरस्तात् ।
आविर्बभूव कुशगर्भमुखं मृगाणां
यूथं तदाग्रसरगर्वितकृष्णशारम् ॥५५॥

तत् प्रार्थितं जवनवाजिगतेन राज्ञा
तूणीमुखोद्धृतशरेण विशीर्णपङ्क्ति ।
श्यामीचकार वनमाकुलदृष्टिपातै-
र्वातेरितोत्पलदलप्रकरैरिवार्द्रैः ।५६।।

लक्ष्यीकृतस्य हरिणस्य हरिप्रभावः
प्रेक्ष्य स्थितां सहचरीं व्यवधाय देहम् ।
आकर्णकृष्टमपि कामितया स धन्वी
बाणं कृपामृदुमनाः प्रतिसंजहार ।।५७।।

तस्यापरेष्वपि मृगेषु शरान्मुमुक्षोः
कर्णान्तमेत्य बिभिदे निबिडोऽपि मुष्टिः ।
त्रासातिमात्रचटुलैः स्मरयत्सु नेत्रैः
प्रौढप्रियानयनविभ्रमचेष्टितानि ।।५८।।

उत्तस्थुषः सपदि पल्वलपङ्कमध्या-
न्मुस्ताप्ररोहकवलावयवानुकीर्णम् ।
जग्राह स द्रुतवराहकुलस्य मार्गं
सुव्यक्तमार्द्रपदपङ्क्तिभिरायताभिः ।।५९।।

तं वाहनादवनतोत्तरकायमीषद्
विध्यन्तमुद्धतसटाः प्रतिहन्तुमीषुः ।
नात्मानमस्य विविदुः सहसा वराहा
वृक्षेषु विद्धमिषुभिर्जघनाश्रयेषुः ।।६०।।

तेनाभिघातरभसस्य विकृष्य पत्री
वन्यस्य नेत्रविवरे महिषस्य मुक्तः ।
निर्भिद्य विग्रहमशोणितलिप्तपुङ्ख-
स्तं पातयां [1]प्रथममास पपात पश्चात् ।।६१।।

---

१. व्यवहितप्रयोगोऽपाणिनियोऽप्यश्वघोषादिष्वपि न न प्रसिद्धः ।

प्रायो विषाणपरिमोक्षलघूत्तमाङ्गान्
खड्गाँश्चकार नृपतिर्निशितैः क्षुरप्रैः ।
शृङ्गं स दृप्तविनयाधिकृतः परेषा-
मत्युच्छ्रितं न ममृषे न तु दीर्घमायुः ॥६२॥

व्याघ्रानभीरभिमुखोत्पतितान् गुहाभ्यः
फुल्लासनाग्रविटपानिव वायुरुग्णान् ।
शिक्षाविशेषलघुहस्ततया निमेषात्
तूणीचकार शरपूरितवक्त्ररन्ध्रान् ॥६३॥

निर्घातोग्रैः कुञ्जलीनाञ्जिघांसु-
र्ज्यानिर्घोषैः क्षोभयामास सिंहान् ।
नूनं तेषामभ्यसूयापरोऽभूद्
वीर्योदग्रे राजशब्दे मृगेषु ॥६४॥

तान् हत्वा गजकुलबद्धतीव्रवैरान्
काकुत्स्थः कुटिलनखाग्रलग्नमुक्तान् ।
आत्मानं रणकृतकर्मणां गजाना-
मानृण्यं गतमिव मार्गणैरमंस्त ॥६५॥

चमरान् परितः प्रवर्तिताश्वः क्वचिदाकर्णविकृष्टभल्लवर्षी ।
नृपतीनिव तान् वियोज्य सद्यः सितवालव्यजनैर्जगाम शान्तिम् ॥६६॥

अपि तुरगसमीपादुत्पतन्तं मयूरं
न स रुचिरकलापं वाणलक्ष्यीचकार ।
सपदि गतमनस्कश्चित्रमाल्यानुकीर्णे
रतिविगलितबन्धे केशपाशे प्रियायाः ॥६७॥

तस्य कर्कशविहारसंभवं स्वेदमाननविलग्नजालकम् ।
आचचाम सतुषारसीकरो भिन्नपल्लवपुटो वनानिलः ॥६८॥

इति विस्मृतान्यकरणीयमात्मनः सचिवावलम्बितधुरं धराधिपम् ।
परिवृद्धरागमनुबन्धसेवया मृगया जहार चतुरेव कामिनी ॥६९॥

स ललितकुसुमप्रवालशय्यां ज्वलितमहौषधिदीपिकासनाथाम् ।
नरपतिरतिवाहयांबभूव क्वचिदसमेतपरिच्छदस्त्रियामाम् ॥७०॥

उषसि स गजयूथकर्णतालैः पटुपटहध्वनिभिर्विनीतनिद्रः ।
अरमत मधुराणि तत्र शृण्वन् विहगविकूजितवन्दिमङ्गलानि ॥७१॥

अथ जातु रुरोर्गृहीतवर्त्मा विपिने पार्श्वचरैरलक्ष्यमाणः ।
श्रमफेनमुचा तपस्विगाढां तमसां प्राप नदीं तुरङ्गमेण ॥७२॥

कुम्भपूरणभवः पटुरुच्चैरुच्चचार निनदोऽम्भसि तस्याः ।
तत्र स द्विरदबृंहितशङ्की शब्दपातिनमिषुं विससर्ज ॥७३॥

नृपतेः प्रतिषिद्धमेव तत् कृतवान् पङ्क्तिरथो विलङ्घ्य यत् ।
अपथे पदमर्पयन्ति हि श्रुतवन्तोऽपि रजोनिमीलिताः ॥७४॥

हा तातेति क्रन्दितमाकर्ण्य विषण्ण-
स्तस्यान्विष्यन् वेतसगूढं प्रभवं सः ।
शल्यप्रोतं प्रेक्ष्य सकुम्भं मुनिपुत्रं
तापादन्तःशल्य इवासीत् क्षितिपोऽपि ॥७५॥

तेनावतीर्य तुरगात् प्रथितान्वयेन
पृष्टान्वयः स जलकुम्भनिषण्णदेहः ।
तस्मै द्विजेतरतपस्विसुतं स्खलद्भि-
रात्मानमक्षरपदैः कथयांबभूव ॥७६॥

तच्चोदितश्च तमनुद्धृतशल्यमेव
पित्रोः सकाशमवसन्नदृशोर्निनाय ।
ताभ्यां तथागतमुपेत्य तमेकपुत्र-
मज्ञानतः स्वचरितं नृपतिः शशंस ॥७७॥

तौ दम्पती बहु विलप्य शिशोः प्रहर्त्रा
शल्यं निखातमुदहारयतामुरस्तः ।
सोऽभूत् परासुरथ भूमिपतिं शशाप
हस्तार्पितैर्नयनवारिभिरेव वृद्धः ॥७८॥

दिष्टान्तमाप्स्यति भवानपि पुत्रशोका-
दन्त्ये वयस्यहमिवेति तमुक्तवन्तम् ।
आक्रान्तपूर्वमिव मुक्तविषं भुजङ्गं
प्रोवाच कोसलपतिः प्रथमापराद्धः ॥७९॥

शापोऽप्यदृष्ट—तनयानन—पद्म—शोभे
सानुग्रहो भगवता मयि पातितोऽयम् ।
कृष्यां दहन्नपि खलु क्षितिमिन्धनेद्धो
बीजप्ररोहजननीं ज्वलनः करोति ॥८०॥

इत्थंगते गतघृणः किमयं विधत्तां
वध्यस्तवेत्यभिहितो वसुधाधिपेन ।
एधान् हुताशनवतः स मुनिर्ययाचे
पुत्रं परासुमनुगन्तुमनाः सदारः ॥८१॥

प्राप्तानुगः सपदि शासनमस्य राजा
संपाद्य पातकविलुप्तधृतिर्निवृत्तः ।
अन्तर्निविष्टपदमात्मविनाशहेतुं
शापं दधज्ज्वलनमौर्वमिवाम्बुराशिः ॥८२॥

॥ इति श्रीमहाकविकालिदासकृतौ रघुवंशे महाकाव्ये
मुनिशापप्रदानो नाम नवमः सर्गः ॥



दशमः सर्गः

पृथिवीं शासतस्तस्य पाकशासनतेजसः ।
किंचिदूनमनूनर्द्धेः शरदामयुतं ययौ ॥१॥

न चोपलेभे पूर्वेषामृणनिर्मोक्षसाधनम् ।
सुताभिधानं स ज्योतिः सद्यःशोकतमोपहम् ॥२॥

अतिष्ठत् [1]प्रत्ययापेक्षसंततिः स चिरं नृपः ।
प्राङ् मन्थादनभिव्यक्त-रत्नोत्पत्तिरिवार्णवः ॥३॥

ऋष्यशृङ्गादयस्तस्य सन्तः सन्तानकाङ्क्षिणः ।
आरेभिरे जितात्मनः पुत्रीयामिष्टिमृत्विजः ॥४॥

तस्मिन्नवसरे देवाः पौलस्त्योपप्लुता हरिम् ।
अभिजग्मुर्निदाघार्ता-श्छायावृक्षमिवाध्वगाः ॥५॥

ते च प्रापुरुदन्वन्तं बुबुधे[2] चादिपूरुषः ।
अव्याक्षेपो भविष्यन्त्याः कार्यसिद्धेर्हि लक्षणम् ॥६॥

भोगिभोगासनासीनं ददृशुस्तं दिवौकसः ।
तत्फणामण्डलोदर्चि-र्मणिद्योतित-विग्रहम् ॥७॥

श्रियः पद्मनिषण्णायाः क्षौमान्तरितमेखले ।
अङ्के निक्षिप्तचरणमास्तीर्णकरपल्लवे ॥८॥

---

१. प्रत्ययः कारणम् । द्र० कु० ३।१८, बौद्धग्रन्थाश्च ।

२. हरिप्रबोधतिथिः । स च कार्त्तिकशुक्ला ११ पूर्णिमा वा । प्रबोधपर्व च ११-१२-तिथिसन्धौ पूर्णिमारात्रौ वेति पौराणिकाः । मेघदूते शापान्ताय प्रबोधपर्व एवोद्दिष्टम्, न तु तिथिः । ततश्चाषाढस्य प्रथमतिथित्वं हरिशयनतिथित्वरूपम् । तच्च प्रबोधपर्वानुरुध्य निर्णेतव्यम् । स्थितं च प्रथमशब्दस्य प्रवरतापरत्वम् द्र.—र. १०।६७ । प्रसिद्धं च शयनतिथौ मेघदर्शनविधानं वाराहपुराणे ।

प्रबुद्धपुण्डरीकाक्षं बालातपनिभांशुकम् ।
दिवसं शारदमिव प्रारम्भसुखदर्शनम् ।।९।।

प्रभानुलिप्तश्रीवत्सं लक्ष्मीविभ्रमदर्पणम् ।
कौस्तुभाख्यमपां सारं बिभ्राणं बृहतोरसा ।।१०।।

बाहुभि-र्विटपाकारै- र्दिव्याभरणभूषितैः ।
आविर्भूतमपां मध्ये पारिजातमिवापरम् ।।११।।

दैत्यस्त्रीगण्डलेखानां मदरागविलोपिभिः ।
हेतिभिश्चेतनावद्भि— रुदीरितजयस्वनम् ।।१२।।

मुक्तशेषविरोधेन कुलिशव्रणलक्ष्मणा ।
उपस्थितं प्राञ्जलिना विनीतेन गरुत्मता ।।१३।।

योगनिद्रान्तविशदैः पावनैरवलोकनैः ।
भृग्वादीननुगृह्णन्तं सौखशायनिकानृषीन् ।।१४।।

प्रणिपत्य सुरास्तस्मै शमयित्रे सुरद्विषाम् ।
अथैनं तुष्टवुः स्तुत्यमवाङ्मनसगोचरम् ।।१५।।

नमो विश्वसृजे पूर्वं विश्वं तदनु बिभ्रते ।
अथ विश्वस्य संहर्त्रे तुभ्यं त्रेधास्थितात्मने ।।१६।।

रसान्तराण्येकरसं यथा दिव्यं पयोऽश्नुते ।
देशे देशे गुणेष्वेवमवस्थास्त्वमविक्रियः ।।१७।।

अमेयो मितलोकस्त्वमनर्थी प्रार्थनावहः ।
अजितो जिष्णुरत्यन्तमव्यक्तो व्यक्तकारणम् ।।१८।।

हृदयस्थमनासन्नमकामं त्वां तपस्विनम् ।
दयालुमनघस्पृष्टं पुराणमजरं विदुः ।।१९।।

सर्वज्ञस्त्वमविज्ञातः सर्वयोनिस्त्वमात्मभूः ।
सर्वप्रभुरनीशस्त्वमेकस्त्वं सर्वरूपभाक् ।।२०।।

सप्तसामोपगीतं त्वां सप्तार्णवजलेशयम् ।
सप्तार्चिर्मुखमाचख्युः सप्तलोकैकसंश्रयम् ॥२१॥

चतुर्वर्गफलं ज्ञानं कालावस्थाश्चतुर्युगाः ।
चतुर्वर्णमयो लोकस्त्वत्तः सर्वं चतुर्मुखात् ॥२२॥

अभ्यासनिगृहीतेन मनसा हृदयाश्रयम् ।
ज्योतिर्मयं विचिन्वन्ति योगिनस्त्वां विमुक्तये ॥२३॥

अजस्य गृह्णतो जन्म निरीहस्य हतद्विषः ।
स्वपतो जागरूकस्य याथार्थ्यं वेद कस्तव ॥२४॥

शब्दादीन् विषयान् भोक्तुं चरितुं दुश्चरं तपः ।
पर्याप्तोऽसि प्रजाः पातुमौदासीन्येन वर्तितुम् ॥२५॥

बहुधाप्यागमैर्भिन्नाः पन्थानः सिद्धहेतवः ।
त्वय्येव निपतन्त्योघा जाह्नवीया इवार्णवे ॥२६॥

त्वय्यावेशितचित्तानां त्वत्समर्पितकर्मणाम् ।
गतिस्त्वं वीतरागाणा-मभूयःसंनिवृत्तये ॥२७॥

प्रत्यक्षोऽप्यपरिच्छेद्यो मह्यादिर्महिमा तव ।
आप्तवागनुमानाभ्यां साध्यं त्वां प्रति का कथा ॥२८॥

केवलं स्मरणेनैव पुनासि पुरुषं यतः ।
अनेन वृत्तयः शेषा निवेदितफलास्त्वयि ॥२९॥

उदधेरिव रत्नानि तेजांसीव विवस्वतः ।
स्तुतिभ्यो व्यतिरिच्यन्ते दूराणि चरितानि ते ॥३०॥

अनवाप्तमवाप्तव्यं न ते किञ्चन विद्यते ।
लोकानुग्रह एवैको हेतुस्ते जन्मकर्मणोः ॥३१॥

महिमानं यदुत्कीर्त्य तव संह्रियते वचः ।
श्रमेण तदशक्त्या वा न गुणानामियत्तया ॥३२॥

इति प्रसादयामासुस्ते सुरास्तमधोक्षजम् ।
भूतार्थव्याहृतिः सा हि न स्तुतिः परमेष्ठिनः ।।३३।।

तस्मै कुशलसंप्रश्न-व्यञ्जितप्रीतये सुराः ।
भयमप्रलयोद्वेला—दाचख्युर्नैर्ऋतोदधेः ।।३४।।

अथ वेलासमासन्नशैलरन्ध्रानुनादिना ।
स्वरेणोवाच भगवान् परिभूतार्णवध्वनिः ।।३५।।

पुराणस्य कवेस्तस्य वर्णस्थानसमीरिता ।
बभूव कृतसंस्कारा चरितार्थेव भारती ।।३६।।

बभौ सदशनज्योत्स्ना सा विभोर्वदनोद्गता ।
निर्यातशेषा चरणाद् गङ्गेवोर्ध्वप्रवर्तिनी ।।३७।।

जाने वो रक्षसाक्रान्तावनुभावपराक्रमौ ।
अङ्गिनां तमसेवोभौ गुणौ [2]प्रथममध्यमौ ।।३८।।

विदितं तप्यमानं च तेन मे भुवनत्रयम् ।
अकामोपनतेनेव साधोर्हृदयमेनसा ।।३९।।

कार्येषु चैककार्यत्वादभ्यर्थ्योऽस्मि न वज्रिणा ।
स्वयमेव हि वातोऽग्नेः सारथ्यं प्रतिपद्यते ।।४०।।

स्वासिधारापरिहृतः कामं चक्रस्य तेन मे ।
स्थापितो दशमो मूर्धा [1]लव्यांश इव रक्षसा ।।४१।।

स्रष्टुर्वरातिसर्गात् तु मया तस्य दुरात्मनः ।
अत्यारूढं रिपोः सोढं चन्दनेनेव भोगिनः ।।४२।।

धातारं तपसा प्रीतं ययाचे स हि राक्षसः ।
दैवात् सर्गादवध्यत्वं मर्त्येष्वास्थापराङ्मुखः ।।४३।।

१. लभ्यांश म.   २. सत्त्वरजसी

सोऽहं [1]दाशरथिर्भूत्वा रणभूमेर्बलिक्षमम् ।
करिष्यामि शरैस्तीक्ष्णैस्तच्छिरःकमलोच्चयम् ॥४४॥

अचिराद् यज्वभिर्भागं कल्पितं विधिवत् पुनः ।
मायाविभिरनालीढमादास्यध्वे निशाचरैः ॥४५॥

वैमानिकाः पुण्यकृतस्त्यजन्तु मरुतां पथि ।
पुष्पकालोकसंक्षोभं मेघावरणतत्पराः ॥४६॥

मोक्ष्यध्वे स्वर्गवन्दीनां वेणीवन्धानदूषितान् ।
शापयन्त्रित-पौलस्त्य-वलात्कार-कचग्रहैः ॥४७॥

रावणावग्रहक्लान्तमिति वागमृतेन सः ।
अभिवृष्य मरुत्सस्यं कृष्णमेघस्तिरोदधे ॥४८॥

पुरूहूतप्रभृतयः सुरकार्योद्यतं सुराः ।
अंशैरनुययुर्विष्णुं पुष्पैर्वायुमिव द्रुमाः ॥४९॥

अथ तस्य विशांपत्युरन्ते काम्यस्य कर्मणः ।
पुरुषः प्रवभूवाग्नेर्विस्मयेन सहर्त्विजाम् ॥५०॥

हेमपात्रगतं दोर्भ्यामादधानः पयश्चरुम् ।
अनुप्रवेशादाद्यस्य पुंसस्तेनापि दुर्वहम् ॥५१॥

प्राजापत्योपनीतं तदन्नं प्रत्यग्रहीन्नृपः ।
वृषेव पयसां सारमाविष्कृतमुदन्वता ॥५२॥

अनेन कथिता राज्ञो गुणास्तस्यान्यदुर्लभाः ।
प्रसूतिं चकमे तस्मिंस्त्रैलोक्यप्रभवोऽपि यत् ॥५३॥

स तेजो वैष्णवं पत्न्योर्विभेजे चरुसंज्ञितम् ।
द्यावापृथिव्योः प्रत्यग्रमहर्पतिरिवातपम् ॥५४॥

---

१. वाल्मीकीयस्य रामायणस्य बालकाण्डं कालिदाससमय आसीदित्येतेन स्थितम् ।

अर्चिता तस्य कौसल्या प्रिया केकयवंशजा ।
अतः संभावितां ताभ्यां सुमित्रामैच्छदीश्वरः ॥५५॥

ते बहुज्ञस्य चित्तज्ञे पत्न्यौ पत्युर्महोक्षितः ।
चरोरर्धार्धभागाभ्यां तामयोजयतामुभे ॥५६॥

सा हि प्रणयवत्यासीत् सपत्न्योरुभयोरपि ।
भ्रमरी वारणस्येव मदनिस्यन्दरेखयोः ॥५७॥

ताभिर्गर्भः प्रजाभूत्यै दध्रे देवांशसंभवः ।
सौरीभिरिव नाडीभिरमृताख्याभिरम्मयः ॥५८॥

सममापन्नसत्त्वास्ता रेजुरापाण्डुरत्विषः ।
अन्तर्गतफलारम्भाः सस्यानामिव संपदः ॥५९॥

गुप्तं ददृशुरात्मानं सर्वाः स्वप्नेषु वामनैः ।
[1]जलजासि-गदा-शार्ङ्ग–चक्र-लाञ्छित-मूर्तिभिः ॥६०॥

हेमपक्षप्रभाजालं गगने च वितन्वता ।
उह्यन्ते स्म सुपर्णेन वेगाकृष्टपयोमुचा ॥६१॥

बिभ्रत्या कौस्तुभन्यासं स्तनान्तरविलम्बिनम् ।
पर्युपास्यन्त लक्ष्म्या च पद्मव्यजनहस्तया ॥६२॥

कृताभिषेकैर्दिव्यायां त्रिस्रोतसि च सप्तभिः ।
ब्रह्मर्षिभिः परं ब्रह्म गृणद्भिरुपतस्थिरे ॥६३॥

ताभ्यस्तथाविधान् स्वप्नाञ्छ्रुत्वा प्रीतोऽथ [2]पार्थिवः ।
मेने परार्ध्यमात्मानं गुरुत्वेन जगद्गुरोः ॥६४॥

विभक्तात्मा विभुस्तासामेकः कुक्षिष्वनेकधा ।
उवास प्रतिमाचन्द्रः प्रसन्नानामपामिव ॥६५॥

अथाग्र्यमहिषी राज्ञः प्रसूतिसमये सती ।
पुत्रं तमोपहं लेभे नक्तं ज्योतिरिवौषधी[3] ॥६६॥

१. जलजं शङ्खः द्र. र ७।६३ २. हि म. ३. ०धिः म. हे.

राम इत्यभिरामेण वपुषा तस्य चोदितः ।
नामधेयं गुरुश्चक्रे जगत्प्रथम[1]-मङ्गलम् ॥६७॥

रघुवंशप्रदीपेन तेनाप्रतिमतेजसा ।
रक्षागृहगता दीपाः प्रत्यादिष्टा इवाभवन् ॥६८॥

शय्यागतेन रामेण माता शातोदरी बभौ ।
सैकताम्भोजवलिना जाह्नवीव शरत्कृशा ॥६९॥

कैकेय्यास्तनयो जज्ञे भरतो नाम शीलवान् ।
जनयित्रीमलंचक्रे यः प्रश्रय इव श्रियम् ॥७०॥

सुतौ लक्ष्मणशत्रुघ्नौ सुमित्रा सुषुवे यमौ ।
सम्यगाराधिता विद्या प्रबोधविनयाविव ॥७१॥

निर्दोषमभवत् सर्वमाविष्कृतगुणं जगत् ।
अन्वगादिव हि स्वर्गो गां गतं पुरुषोत्तमम् ॥७२॥

तस्योदये चतुर्मूर्तेः पौलस्त्यचकितेश्वराः ।
विरजस्कैर्नभस्वद्भिर्दिश उच्छ्वसिता इव ॥७३॥

कृशानुरपधूमत्वात् प्रसन्नत्वात् प्रभाकरः ।
रक्षोविप्रकृतावास्ता—मपविद्धशुचाविव ॥७४॥

दशाननकिरीटेभ्यस्तत्क्षणं राक्षसश्रियः ।
मणिव्याजेन पर्यस्ताः पृथिव्यामश्रुबिन्दवः ॥७५॥

पुत्रजन्मप्रवेश्यानां तूर्याणां तस्य पुत्रिणः ।
आरम्भं प्रथमं चक्रुर्देवदुन्दुभयो दिवि ॥७६॥

संतानकमयी वृष्टिर्भवने चास्य पेतुषी ।
सन्मङ्गलोपचाराणां सैवादिरचनाभवत् ॥७७॥

---

१. प्रथमशब्दार्थाय द्र. मे. १।२, शा ५।२१, ७।१०-११, र ९।७९.

कुमाराः कृतसंस्कारास्ते धात्रीस्तन्यपायिनः ।
आनन्देनाग्रजेनेव समं ववृधिरे पितुः ॥७८॥

स्वाभाविकं विनीतत्वं तेषां विनयकर्मणा ।
मुमूर्च्छ सहजं तेजो हविषेव हविर्भुजाम् ॥७९॥

परस्पराविरुद्धास्ते तद् रघोरनघं कुलम् ।
अलमुद्द्योतयामासु—र्देवारण्यमिवर्तवः ॥८०॥

समानेऽपि हि सौभ्रात्रे यथोभौ रामलक्ष्मणौ ।
तथा भरतशत्रुघ्नौ प्रीत्या द्वन्द्वं बभूवतुः ॥८१॥

तेषां द्वयोर्द्वयोरैक्यं बिभिदे न कदाचन ।
यथा वायुविभावस्वोर्यथा चन्द्रसमुद्रयोः ॥८२॥

ते प्रजानां प्रजानाथास्तेजसा प्रश्रयेण च ।
मनो जह्रुर्निदाघान्ते श्यामाभ्रा दिवसा इव ॥८३॥

स चतुर्धा बभौ व्यस्तः प्रसवः पृथिवीपतेः ।
धर्मार्थकाममोक्षाणामवतार इवाङ्गभाक् ॥८४॥

गुणैराराधयामासुस्ते गुरुं गुरुवत्सलाः ।
तमेव चतुरन्तेशं रत्नैरिव महार्णवाः ॥८५॥

सुरगज इव दन्तैर्भग्नदैत्यासिधारै-
र्नय इव पणबन्धव्यक्तयोगैरुपायैः ।
हरिरिव युगदीर्घैर्दोर्भिरंशैस्तदीयैः
पतिरवनिपतीनां तैश्चकाशे चतुर्भिः ॥८६॥

॥ इति श्रीमहाकविकालिदासकृतौ रघुवंशे महाकाव्ये
भगवदवतारो नाम दशमः सर्गः ॥



एकादशः सर्गः

कौशिकेन स किल क्षितीश्वरो राममध्वरविघातशान्तये ।
काकपक्षधरमेत्य याचितस्तेजसां हि न वयः समीक्ष्यते ॥१॥

कृच्छ्रलब्धमपि लब्धवर्णभाक् तं दिदेश मुनये सलक्ष्मणम् ।
अप्यसुप्रणयिनां रघोः कुले न व्यहन्यत कदाचिदर्थिता ॥२॥

यावदादिशति पार्थिवस्तयोर्निर्गमाय पुरमार्गसंस्क्रियाम् ।
तावदाशु विदधे मरुत्सखैः सा सपुष्पजलवर्षिभिर्घनैः ॥३॥

तौ निदेशकरणोद्यतौ पितुर्धन्विनौ चरणयोर्निपेततुः ।
भूपतेरपि तयोः प्रवत्स्यतोर्नम्रयोरुपरि बाष्पविन्दवः ॥४॥

तौ पितुर्नयनजेन वारिणा किंचिदुक्षितशिखण्डकावुभौ ।
धन्विनौ तमृषिमन्वगच्छतां पौरदृष्टिकृतमार्गतोरणौ ॥५॥

लक्ष्मणानुचरमेव राघवं नेतुमैच्छदृषिरित्यसौ नृपः ।
आशिषं प्रयुयुजे न वाहिनीं सा हि रक्षणविधौ तयोः क्षमा ॥६॥

मातृवर्गचरणस्पृशौ मुनेस्तौ प्रपद्य पदवीं महौजसः ।
रेजतुर्गतिवशात् प्रवर्तिनौ भास्करस्य मधुमाधवाविव[1] ॥७॥

वीचिलोलभुजयोस्तयोर्गतं शैशवाच्चपलमप्यशोभत ।
तोयदागम इवोद्ध्यभिद्ययोर्नामधेयसदृशं विचेष्टितम् ॥८॥

तौ बलातिबलयोः प्रभावतो विद्ययोः पथि मुनिप्रदिष्टयोः ।
मम्लतुर्न मणिकुट्टिमोचितौ मातृपार्श्वपरिवर्तिनाविव ॥९॥

पूर्ववृत्तकथितैः पुराविदः सानुजः पितृसखस्य राघवः ।
उह्यमान इव वाहनोचितः पादचारमपि न व्यभावयत् ॥१०॥

---

१. पा० इदमिति हे० । तत्पाठश्च 'रेजतुश्चे'त्यादि ।

तौ सरांसि रसवद्भिरम्बुभिः कूजितैः श्रुतिसुखैः पतत्रिणः ।
वायवः सुरभिपुष्परेणुभिश्छायया च जलदाः सिषेविरे ।।११।।

नाम्भसां कमलशोभिनां तथा शाखिनां न च परिश्रमच्छिदाम् ।
दर्शनेन लघुना यथा तयोः प्रीतिमापुरुभयोस्तपस्विनः ।।१२।।

स्थाणुदग्धवपुषस्तपोवनं प्राप्य दाशरथिरात्तकार्मुकः ।
विग्रहेण मदनस्य चारुणा सोऽभवत् प्रतिनिधिर्न कर्मणा ।।१३।।

तौ सुकेतुसुतया खिलीकृते कौशिकाद् विदितशापया पथि ।
निन्यतुः स्थलनिवेशिताटनी लीलयैव धनुषी अधिज्यताम् ।।१४।।

ज्यानिनादमथ गृह्णती तयोः प्रादुरास बहुलक्षपाछविः ।
ताडका चल-कपालकुण्डला कालिकेव निबिडा वलाकिनी ।।१५।।

तीव्रवेगधुतमार्गवृक्षया प्रेतचीवरवसा स्वनोग्रया ।
अभ्यभावि भरताग्रजस्तया वात्ययेव पितृकाननोत्थया ।।१६।।

उद्यतैकभुजयष्टिमायतीं श्रोणिलम्बिपुरुषान्त्रमेखलाम् ।
तां विलोक्य वनितावधे घृणां पत्रिणा सह मुमोच राघवः ।।१७।।

यच्चकार विवरं शिलाघने ताडकोरसि स रामसायकः ।
अप्रविष्टविषयस्य रक्षसां द्वारतामगमदन्तकस्य तत् ।।१८।।

बाणभिन्नहृदया निपेतुषी सा स्वकाननभुवं न केवलाम् ।
विष्टपत्रयपराजयस्थिरां रावणश्रियमपि व्यकम्पयत् ।।१९।।

राममन्मथशरेण ताडिता दुःसहेन हृदये निशाचरी ।
गन्धवद्रुधिरचन्दनोक्षिता जीवितेशवसतिं जगाम सा ।।२०।।

नैर्ऋतघ्नमथ मन्त्रवन्मुनेः प्रापदस्त्रमवदानतोषितात् ।
ज्योतिरिन्धननिपाति भास्करात् सूर्यकान्त इव ताडकान्तकः ।।२१।।

वामनाश्रमपदं ततः परं पावनं श्रुतमृषेरुपेयिवान् ।
उन्मनाः प्रथमजन्मचेष्टितान्यस्मरन्नपि बभूव राघवः ।।२२।।

आससाद मुनिरात्मनस्ततः शिष्यवर्गपरिकल्पितार्हणम् ।
बद्धपल्लवपुटाञ्जलिद्रुमं दर्शनोन्मुखमृगं तपोवनम् ॥२३॥

तत्र दीक्षितमृषिं ररक्षतुर्विघ्नतो दशरथात्मजौ शरैः ।
लोकमन्धतमसात् क्रमोदितौ रश्मिभिः शशिदिवाकराविव ॥२४॥

वीक्ष्य वेदिमथ रक्तबिन्दुभिर्बन्धुजीवपृथुभिः प्रदूषिताम् ।
संभ्रमोऽभवदपोढकर्मणामृत्विजां च्युतविकङ्कतस्रुचाम् ॥२५॥

उन्मुखः सपदि लक्ष्मणाग्रजो बाणमाश्रयमुखात् समुद्धरन् ।
रक्षसां बलमपश्यदम्बरे गृध्रपक्षपवनेरितध्वजम् ॥२६॥

तत्र यावधिपती मखद्विषां तौ शरव्यमकरोत् स नेतरान् ।
किं महोरगविसर्पिविक्रमो राजिलेषु गरुडः प्रवर्तते ॥२७॥

सोऽस्त्रमुग्र-जवमस्त्रकोविदः संदधे धनुषि वायुदैवतम् ।
तेन शैलगुरुमप्यपातयत् पाण्डुपत्रमिव ताडकासुतम् ॥२८॥

यः सुबाहुरिति राक्षसोऽपरस्तत्र तत्र विससर्प मायया ।
तं क्षुरप्र-शकलीकृतं कृती पत्त्रिणां व्यभजदाश्रमाद् बहिः ॥२९॥

इत्यपास्तमखविघ्नयोस्तयोः सांयुगीनमभिनन्द्य विक्रमम् ।
ऋत्विजः कुलपतेर्यथाक्रमं वाग्यतस्य निरवर्तयन् क्रियाः ॥३०॥

तौ प्रणामचलकाकपक्षकौ भ्रातरावबभृथाप्लुतो मुनिः ।
आशिषामनुपदं समस्पृशद् दर्भपाटिततलेन पाणिना ॥३१॥

तं न्यमन्त्रयत संभृतक्रतुर्मैथिलः स मिथिलां व्रजन् वशी ।
राघवावपि निनाय बिभ्रतौ तद्धनुःश्रवणजं कुतूहलम् ॥३२॥

तैः शिवेषु वसतिर्गताध्वभिः सायमाश्रमतरुष्वगृह्यत ।
येषु दीर्घतपसः परिग्रहो वासवक्षणकलत्रतां ययौ ॥३३॥

प्रत्यपद्यत चिराय यत् पुनश्चारु गौतमवधूः शिलामयी ।
स्वं वपुः स किल किल्बिषच्छिदां रामपादरजसामनुग्रहः ॥३४॥

राघवान्वितमुपस्थितं मुनिं तं निशम्य जनको जनेश्वरः ।
अर्थकामसहितं सपर्यया देहवद्धमिव धर्ममभ्यगात् ॥३५॥

तौ विदेहनगरीनिवासिनां गां गताविव दिवः पुनर्वसू ।
मन्यते स्म पिबतां विलोचनैः पक्ष्मपातमपि वञ्चनां मनः ॥३६॥

यूपवत्यवसिते क्रियाविधौ कालवित् कुशिकवंशवर्द्धनः ।
राममिष्वसनदर्शनोत्सुकं मैथिलाय कथयांबभूव सः ॥३७॥

तस्य वीक्ष्य ललितं वपुः शिशोः पार्थिवः प्रथितवंशजन्मनः ।
स्वं विचिन्त्य च धनुर्दुरानमं पीडितो दुहितृशुल्कसंस्थया ॥३८॥

अब्रवीच्च भगवन् मतङ्गजैर्यद् बृहद्भिरपि कर्म दुष्करम् ।
तत्र नाहमनुमन्तुमुत्सहे मोघवृत्ति कलभस्य चेष्टितम् ॥३९॥

ह्रेपिता हि वहवो नरेश्वरास्तेन तात धनुषा धनुर्भृतः ।
ज्यानिघातकठिनत्वचो भुजान् स्वान् विधूय धिगिति प्रतस्थिरे॥४०॥

प्रत्युवाच तमृषिर्निशम्यतां सारतोऽयमथवा गिरा कृतम् ।
चाप एव भवतो भविष्यति व्यक्तशक्तिरशनिर्गिराविव ॥४१॥

एवमाप्तवचनात् स पौरुषं काकपक्षकधरेऽपि राघवे ।
श्रद्दधे त्रिदशगोपमात्रके दाहशक्तिमिव कृष्णवर्त्मनि ॥४२॥

व्यादिदेश गणशोऽथ पार्श्वगान् कार्मुकाभिहरणाय मैथिलः ।
तैजसस्य धनुषः प्रवृत्तये तोयदानिव सहस्रलोचनः ॥४३॥

तत् प्रसुप्तभुजगेन्द्रभीषणं वीक्ष्य दाशरथिराददे धनुः ।
विद्रुतक्रतुमृगानुसारिणं येन वाणमसृजद् वृषध्वजः ॥४४॥

आततज्यमकरोत् स संसदा विस्मयस्तिमितनेत्रमीक्षितः ।
शैलसारमपि नातियत्नतः पुष्पचापमिव पेशलं स्मरः ॥४५॥

भज्यमानमतिमात्रकर्षणात् तेन वज्रपरुषस्वनं धनुः ।
भार्गवाय दृढमन्यवे पुनः क्षत्त्रमुद्यतमिव न्यवेदयत् ॥४६॥

दृष्टसारमथ रुद्रकार्मुके वीर्यशुल्कमभिनन्द्य मैथिलः।
राघवाय तनयामयोनिजां रूपिणीं श्रियमिव न्यवेदयत् ॥४७॥

मैथिलः सपदि सत्यसङ्गरो राघवाय तनयामयोनिजाम्।
संनिधौ द्युतिमतस्तपोनिधेरग्निसाक्षिक इवातिसृष्टवान् ॥४८॥

प्राहिणोच्च महितं महाद्युतिः कोसलाधिपतये पुरोधसम्।
भृत्यभावि दुहितुः परिग्रहाद् दिश्यतां कुलमिदं निमेरिति ॥४९॥

अन्वियेष सदृशीं स च स्नुषां प्राप चैनमनुकूलवाग् द्विजः।
सद्य एव सुकृतां हि पच्यते कल्पवृक्षफलधर्मि काङ्क्षितम् ॥५०॥

तस्य कल्पितपुरस्क्रियाविधेः शुश्रुवान् वचनमग्रजन्मनः।
उच्चचाल बलभित्सखो वशी सैन्यरेणुमुषितार्कदीधितिः ॥५१॥

आससाद मिथिलां स वेष्टयन् पीडितोपवनपादपां बलैः।
प्रीतिरोधमसहिष्ट सा पुरी स्त्रीव कान्तपरिभोगमायतम् ॥५२॥

तौ समेत्य समये स्थितावुभौ भूपती वरुणवासवोपमौ।
कन्यकातनयकौतुकक्रियां स्वप्रभावसदृशीं वितेनतुः ॥५३॥

पार्थिवीमुदवहद् रघूद्वहो लक्ष्मणस्तदनुजामथोर्मिलाम्।
यौ तयोरवरजौ वरौजसौ तौ कुशध्वजसुते सुमध्यमे ॥५४॥

ते चतुर्थसहितास्त्रयो बभुः सूनवो नववधूपरिग्रहाः।
सामदानविधिभेदनिग्रहाः सिद्धिमन्त इव तस्य भूपतेः ॥५५॥

ता नराधिपसुता नृपात्मजैस्ते च ताभिरगमन् कृतार्थताम्।
सोऽभवद् वरवधूसमागमः प्रत्यय-प्रकृति-योगसन्निभः ॥५६॥

एवमात्तरतिरात्मसंभवांस्तान् निवेश्य[1] चतुरोऽपि तत्र सः।
अध्वसु त्रिषु विसृष्टमैथिलः स्वां पुरीं दशरथो न्यवर्तत ॥५७॥

---

१. निवेश्य विवाह्य, 'निवेशः शिबिरोद्वाहविन्यासेषु' वि. म.हे, द्र. शा. ४।२०।

तस्य जातु मरुतः प्रतीपगा वर्त्मसु ध्वजतरुप्रमाथिनः ।
चिक्लिशुर्भृशतया वरूथिनीमुत्तटा इव नदीरयाः स्थलीम् ॥५८॥

लक्ष्यते स्म तदनन्तरं रविर्बद्धभीमपरिवेषमण्डलः ।
वैनतेयशमितस्य भोगिनो भोगवेष्टित इव च्युतो मणिः ॥५९॥

श्येनपक्षपरिधूसरालकाः सांध्यमेघरुधिरार्द्रवाससः ।
अङ्गना इव रजस्वला दिशो नो बभूवुरवलोकनक्षमाः ॥६०॥

भास्करश्च दिशमध्युवास यां तां श्रिताः प्रतिभयं ववासिरे ।
क्षत्त्रशोणितपितृक्रियोचितं चोदयन्त्य इव भार्गवं शिवाः ॥६१॥

तत् प्रतीपपवनादि वैकृतं प्रेक्ष्य शान्तिमधिकृत्य कृत्यवित् ।
अन्वयुङ्क्त गुरुमीश्वरःक्षितेः स्वन्तमित्यलघयत् स तद्व्यथाम्॥६२॥

तेजसः सपदि राशिरुत्थितः प्रादुरास किल वाहिनीमुखे ।
यः प्रमृज्य नयनानि सैनिकैर्लक्षणीयपुरुषाकृतिश्चिरात् ॥६३॥

पित्र्यमंशमुपवीतलक्षणं मातृकं च धनुरूर्जितं दधत् ।
यः ससोम इव घर्मदीधितिः सद्विजिह्व इव चन्दनद्रुमः ॥६४॥

येन रोषपरुषात्मनः पितुः शासने स्थितिभिदोऽपि तस्थुषा ।
वेपमानजननीशिरश्छिदा प्रागजीयत घृणा ततो मही ॥६५॥

अक्षबीजवलयेन निर्बभौ दक्षिणश्रवणसंस्थितेन यः ।
क्षत्त्रियान्तकरणैकविंशते-र्व्याजपूर्वगणनामिवोद्वहन् ॥६६॥

तं पितुर्वधभवेन मन्युना राजवंशनिधनाय दीक्षितम् ।
बालसूनुरवलोक्य भार्गवं स्वां दशां च विषसाद पार्थिवः ॥६७॥

नाम राम इति तुल्यमात्मजे वर्तमानमहिते च दारुणे ।
हृद्यमस्य भयदायि चाभवद् रत्नजातमिव हारसर्पयोः ॥६८॥

अर्घ्यमर्घ्यमिति वादिनं नृपं सोऽनवेक्ष्य भरताग्रजो यतः ।
क्षत्त्रकोपदहनार्चिषं ततः संदधे दृशमुदग्रतारकाम् ॥६९॥

तेन कार्मुकनिषक्तमुष्टिना राघवो विगतभीः पुरोगतः ।
अङ्गुलीविवरचारिणं शरं कुर्वता निजगदे युयुत्सुना ।।७०।।

क्षत्त्रजातमपकारवैरि मे तन्निहत्य वहुशः शमं गतः ।
सुप्तसर्प इव दण्डघट्टनाद् रोषितोऽस्मि तव विक्रमश्रवात् ।।७१।।

मैथिलस्य धनुरन्यपार्थिवैस्त्वं किलानमितपूर्वमक्षणोः ।
तन्निशम्य भवता समर्थये वीर्यश्रृङ्गमिव भग्नमात्मनः ।।७२।।

अन्यदा जगति राम इत्ययं शब्द उच्चरित एव मामगात् ।
व्रीडमावहति मे स संप्रति व्यस्तवृत्तिरुदयोन्मुखे त्वयि ।।७३।।

बिभ्रतोऽस्त्रमचलेऽप्यकुण्ठितं द्वौ रिपू मम मतौ समागसौ ।
धेनुवत्सहरणाच्च हैहयस्त्वं च कीर्त्तिमपहर्त्तुमुद्यतः ।।७४।।

क्षत्त्रियान्तकरणोऽपि विक्रमस्तेन मामवति नाजिते त्वयि ।
पावकस्य महिमा स गण्यते कक्षवज्ज्वलति सागरेऽपि यः ।।७५।।

विद्धि चात्तबलमोजसा हरेरैश्वरं धनुरभाजि यत् त्वया ।
खातमूलमनिलो नदीरयैः पातयत्यपि मृदुस्तटद्रुमम् ।।७६।।

तन्मदीयमिदमायुधं ज्यया सङ्गमय्य सशरं विकृष्यताम् ।
तिष्ठतु प्रधनमेवमप्यहं तुल्यबाहुतरसा जितस्त्वया ।।७७।।

कातरोऽसि यदि वोद्गतार्चिषा तर्जितः परशुधारया मम ।
ज्यानिघातकठिनाङ्गुलिर्वृथा वध्यतामभययाचनाञ्जलिः ।।७८।।

एवमुक्तवति भीमदर्शने भार्गवे स्मितविकम्पिताधरः ।
तद्धनुर्ग्रहणमेव राघवः प्रत्यपद्यत समर्थमुत्तरम् ।।७९।।

पूर्वजन्मधनुषा समागतः सोऽतिमात्रलघुदर्शनोऽभवत् ।
केवलोऽपि सुभगो नवाम्बुदः किं पुनस्त्रिदशचापलाञ्छितः ।।८०।।

तेन भूमिनिहितैककोटि तत् कार्मुकं च बलिनाधिरोपितम् ।
निष्प्रभश्च रिपुरास भूभृतां धूमशेष इव धूमकेतनः ।।८१।।

तावुभावपि परस्परस्थितौ वर्धमानपरिहीणतेजसौ ।
पश्यति स्म जनता दिनात्यये पार्वणौ शशिदिवाकराविव ॥८२॥

तं कृपामृदुरवेक्ष्य भार्गवं राघवः स्खलितवीर्यमात्मनि ।
स्वं च संहितममोघमाशुगं व्याजहार हरसूनुसंनिभः ॥८३॥

न प्रहर्तुमलमस्मि निर्दयं विप्र इत्यभिभवत्यपि त्वयि ।
शंस किं गतिमनेन पत्त्रिणा हन्मि लोकमुत ते मखार्जितम् ॥८४॥

प्रत्युवाच तमृषिर्न तत्त्वतस्त्वां न वेद्मि पुरुषं पुरातनम् ।
गां गतस्य तव धाम वैष्णवं कोपितो ह्यसि मया दिदृक्षुणा ॥८५॥

भस्मसात् कृतवतः पितृद्विषः पात्रसाच्च वसुधां ससागराम् ।
आहितो जयविपर्ययोऽपि मे श्लाघ्य एव परमेष्ठिना त्वया ॥८६॥

तद् गतिं मतिमतां वरेप्सितां पुण्यतीर्थगमनाय रक्ष मे ।
पीडयिष्यति न मां खिलीकृता स्वर्गपद्धतिरभोगलोलुपम् ॥८७॥

प्रत्यपद्यत तथेति राघवः प्राङ्मुखश्च विससर्ज सायकम् ।
भार्गवस्य सुकृतोऽपि सोऽभवत् स्वर्गमार्गपरिघो दुरत्ययः ॥८८॥

राघवोऽपि चरणौ तपोनिधेः क्षम्यतामिति वदन् समस्पृशत् ।
निर्जितेषु तरसा तरस्विनां शत्रुषु प्रणतिरेव कीर्तये ॥८९॥

राजसत्त्वमवधूय मातृकं पित्र्यमस्मि गमितः शमं यदा ।
नन्वनिन्दितफलो मम त्वया निग्रहोऽप्ययमनुग्रहीकृतः ॥९०॥

साधयाम्यहमविघ्नमस्तु ते देवकार्यमुपपादयिष्यतः ।
ऊचिवानिति वचः सलक्ष्मणं लक्ष्मणाग्रजमृषिस्तिरोदधे ॥९१॥

तस्मिन् गते विजयिनं परिरभ्य रामं
स्नेहादमन्यत पिता पुनरेव जातम् ।
तस्याभवत् क्षणशुचः परितोषलाभः
कक्षाग्निलङ्घिततरोरिव वृष्टिपातः ॥९२॥

अथ पथि गमयित्वा क्लृप्तरम्योपकार्ये
कतिचिदवनिपालः शर्वरीः शर्वकल्पः ।
पुरमविशदयोध्यां मैथिलीदर्शिनीनां
कुवलयितगवाक्षां लोचनैरङ्गनानाम् ॥९३॥

॥ इति श्रीमहाकविकालिदासकृतौ रघुवंशे महाकाव्ये
राम-सीताविवाह-वर्णनो नामैकादशः सर्गः ॥



द्वादशः सर्गः

निर्विष्टविषयस्नेहः स दशान्तमुपेयिवान् ।
आसीदासन्ननिर्वाणः प्रदीपार्चिरिवोषसि ॥१॥

तं कर्णमूलमागत्य रामे श्रीर्न्यस्यतामिति ।
कैकेयीशङ्कयेवाह पलितच्छद्मना जरा ॥२॥

सा पौरान् पौरकान्तस्य रामस्याभ्युदयश्रुतिः ।
प्रत्येकं ह्लादयाञ्चक्रे कुल्येवोद्यानपादपान् ॥३॥

तस्याभिषेकसंभारं कल्पितं क्रूरनिश्चया[1] ।
दूषयामास कैकेयी शोकोष्णैः पार्थिवाश्रुभिः ॥४॥

सा किलाश्वासिता चण्डी भर्त्रा तत्संश्रुतौ वरौ ।
उद्ववामेन्द्रसिक्ता भूर्बिलमग्नाविवोरगौ ॥५॥

तयोश्चतुर्दशैकेन रामं प्राव्राजयत् समाः ।
द्वितीयेन सुतस्यैच्छद् वैधव्यैकफलां श्रियम् ॥६॥

पित्रा दत्तां रुदन् रामः प्राङ् महीं प्रत्यपद्यत ।
पश्चाद् वनाय गच्छेति तदाज्ञां मुदितोऽग्रहीत् ॥७॥

दधतो मङ्गलक्षौमे वसानस्य च वल्कले ।
ददृशुर्विस्मितास्तस्य मुखरागं समं जनाः ॥८॥

स सीतालक्ष्मणसखः सत्याद् गुरुमलोपयन् ।
विवेश दण्डकारण्यं प्रत्येकं च सतां मनः ॥९॥

राजाऽपि तद्वियोगार्तः स्मृत्वा शापं स्वकर्मजम् ।
शरीरत्यागमात्रेण शुद्धिलाभममन्यत ॥१०॥

---

१. कैकेयीमहत्त्वाय द्रष्टव्यमस्माकं सीताचरिते १।३५.

विप्रोषितकुमारं तद् राज्यमस्तमितेश्वरम् ।
रन्ध्रान्वेषणदक्षाणां द्विषामामिषतां ययौ ॥११॥

अथानाथाः प्रकृतयो मातृबन्धुनिवासिनम् ।
मौलैरानाययामासुर्भरतं स्तम्भिताश्रुभिः ॥१२॥

श्रुत्वा तथाविधं मृत्युं कैकेयीतनयः पितुः ।
मातुर्न केवलं स्वस्याः श्रियोऽप्यासीत् पराङ्मुखः ॥१३॥

ससैन्यश्चान्वगाद् रामं दर्शितानाश्रमालयैः ।
तस्य पश्यन् ससौमित्रेरुदश्रुर्वसतिद्रुमान् ॥१४॥

चित्रकूटवनस्थं च कथितस्वर्गतिर्गुरोः ।
लक्ष्म्या निमन्त्रयाञ्चक्रे तमनुच्छिष्टसंपदा ॥१५॥

स हि प्रथमजे तस्मिन्नकृतश्रीपरिग्रहे ।
परिवेत्तारमात्मानं मेने स्वीकरणाद् भुवः ॥१६॥

तमशक्यमपाक्रष्टुं निदेशात् स्वर्गिणः पितुः ।
ययाचे पादुके पश्चात् कर्तुं राज्याधिदेवते ॥१७॥

स विसृष्टस्तथेत्युक्त्वा भ्रात्रा नैवाविशत् पुरीम् ।
नन्दिग्रामगतस्तस्य राज्यं न्यासमिवाभुनक्[1] ॥१८॥

दृढभक्तिरिति ज्येष्ठे राज्यतृष्णापराङ्मुखः ।
मातुः पापस्य भरतः प्रायश्चित्तमिवाकरोत् ॥१९॥

रामोऽपि सह वैदेह्या वने वन्येन वर्तयन् ।
चचार सानुजः शान्तो वृद्धेक्ष्वाकुव्रतं युवा ॥२०॥

प्रभावस्तम्भितच्छायमाश्रितः स वनस्पतिम् ।
कदाचिदङ्के सीतायाः शिश्ये किञ्चिदिव श्रमात् ॥२१॥

---

१. अभुनक् अरक्षद् रक्षणार्थत्व एव भुजिक्रियायाः परस्मैपदित्वात् ।

ऐन्द्रिः किल नखैस्तस्या विददार स्तनौ द्विजः ।
प्रियःपभोगचिह्नेषु पौरोभाग्यमिवाचरन् ॥२२॥

तस्मिन्नास्थदिषीकास्त्रं रामो रामावबोधितः ।
आत्मानं मुमुचे तस्मादेकनेत्रव्ययेन सः ॥२३॥

रामस्त्वासन्नदेशत्वाद् भरतागमनं पुनः ।
आशङ्क्योत्सुकसारङ्गां चित्रकूटस्थलीं जहौ ॥२४॥

प्रययावातिथेयेषु वसन् ऋषिकुलेषु सः ।
दक्षिणां दिशमृक्षेषु वार्षिकेष्विव भास्करः ॥२५॥

बभौ तमनुगच्छन्ती विदेहाधिपतेः सुता ।
प्रतिषिद्धापि कैकेय्या लक्ष्मीरिव गुणोन्मुखी ॥२६॥

अनसूयातिसृष्टेन पुण्यगन्धेन काननम् ।
सा चकाराङ्गरागेण पुष्पोच्चलितषट्पदम् ॥२७॥

सन्ध्याभ्रकपिशस्तस्य विराधो नाम राक्षसः ।
अतिष्ठन्मार्गमावृत्य रामस्येन्दोरिव ग्रहः ॥२८॥

स जहार तयोर्मध्ये मैथिलीं लोकशोषणः ।
नभोनभस्ययोर्वृष्टिमवग्रह इवान्तरे ॥२९॥

तं विनिष्पिष्य काकुत्स्थौ पुरा दूषयति स्थलीम् ।
गन्धेनाशुचिना चेति वसुधायां निचख्नतुः ॥३०॥

पञ्चवट्यां ततो रामः शासनात् कुम्भजन्मनः ।
अनपोढस्थितिस्तस्थौ विन्ध्याद्रिः प्रकृताविव ॥३१॥

रावणावरजा तत्र राघवं मदनातुरा ।
अभिपेदे निदाघार्ता व्यालीव मलयद्रुमम् ॥३२॥

सा सीतासन्निधावेव तं वव्रे कथितान्वया ।
अत्यारूढो हि नारीणामकालज्ञो मनोभवः ॥३३॥

कलत्रवानहं भद्रे[1] कनीयांसं भजस्व मे।
इति रामो वृषस्यन्तीं वृषस्कन्धः शशास ताम् ॥३४॥

ज्येष्ठाभिगमनात् पूर्वं तेनाप्यनभिनन्दिता।
साऽभूद् रामाश्रया भूयो नदीवोभयकूलभाक् ॥३५॥

संरम्भं मैथिलीहासः क्षणसौम्यां निनाय ताम्।
निवातस्तिमितां वेलां चन्द्रोदय इवोदधेः ॥३६॥

फलमस्योपहासस्य सद्यः प्राप्स्यसि पश्य माम्।
मृग्याः परिभवो व्याघ्र्यामित्यवेहि त्वया कृतम् ॥३७॥

इत्युक्त्वा मैथिलीं भर्तुरङ्के निर्विशतीं भयात्।
रूपं शूर्पणखा नाम्नः सदृशं प्रत्यपद्यत ॥३८॥

लक्ष्मणः प्रथमं श्रुत्वा कोकिलामञ्जुवादिनीम्।
शिवाघोरस्वनां पश्चाद् बुबुधे विकृतेति ताम् ॥३९॥

पर्णशालामथ क्षिप्रं विकृष्टासिः प्रविश्य सः।
वैरूप्यपौनरुक्त्येन भीषणां तामयोजयत् ॥४०॥

सा वक्रनखधारिण्या वेणुकर्कशपर्वया।
अङ्कुशाकारयाङ्गुल्या तावतर्जयदम्बरे ॥४१॥

प्राप्य चाशु जनस्थानं खरादिभ्यस्तथाविधम्।
रामोपक्रममाचख्यौ रक्षःपरिभवं नवम् ॥४२॥

मुखावयवलूनां तां नैर्ऋता यत् पुरो दधुः।
रामाभियायिनां तेषां तदेवाभूदमङ्गलम् ॥४३॥

उदायुधानापततस्तान् दृप्तान् प्रेक्ष्य राघवः।
निदधे विजयाशंसां चापे सीतां च लक्ष्मणे ॥४४॥

---

१. बाले म.

एको दाशरथिः कामं यातुधाना सहस्रशः।
ते तु यावन्त एवाजौ तावांश्च ददृशे स तैः ॥४५॥

असज्जनेन काकुत्स्थः प्रयुक्तमथ दूषणम्।
न चक्षमे शुभाचारः स दूषणमिवात्मनः ॥४६॥

तं शरैः प्रतिजग्राह खरत्रिशिरसौ च सः।
क्रमशस्ते पुनस्तस्य चापात् सममिवोद्ययुः ॥४७॥

तैस्त्रयाणां शितैर्वाणैर्यथापूर्वविशुद्धिभिः।
आयुर्देहातिगैः पीतं रुधिरं तु पतत्त्रिभिः ॥४८॥

तस्मिन् रामशरोत्कृत्ते बले महति रक्षसाम्।
उत्थितं ददृशेऽन्यच्च कबन्धेभ्यो न किंचन ॥४९॥

सा बाणवर्षिणं रामं योधयित्वा सुरद्विषाम्।
अप्रबोधाय सुष्वाप गृध्रच्छाये वरूथिनी ॥५०॥

राघवास्त्रविदीर्णानां रावणं प्रति रक्षसाम्।
तेषां शूर्पणखैवैका दुष्प्रवृत्तिहराऽभवत् ॥५१॥

निग्रहात् स्वसुराप्तानां वधाच्च धनदानुजः।
रामेण निहितं मेने पदं दशसु मूर्धसु ॥५२॥

रक्षसा मृगरूपेण वञ्चयित्वा स राघवौ।
जहार सीतां पक्षीन्द्रप्रयासक्षणविघ्नितः ॥५३॥

तौ सीतान्वेषिणौ गृध्रं लूनपक्षमपश्यताम्।
प्राणैर्दशरथप्रीतेरनृणं कण्ठवर्तिभिः ॥५४॥

स रावणहृतां ताभ्यां वचसाचष्ट मैथिलीम्।
आत्मनः सुमहत् कर्म व्रणैरावेद्य संस्थितः[1] ॥५५॥

१. संस्थितो मृतः।

तयोस्तस्मिन्नवीभूत – पितृ – व्यापत्ति – शोकयोः ।
पितरीवाग्निसंस्कारात् परा ववृतिरे क्रियाः ॥५६॥

वधनिर्धूतशापस्य कबन्धस्योपदेशतः ।
मुमूर्च्छ सख्यं रामस्य समानव्यसने हरौ ॥५७॥

स हत्वा वालिनं वीरस्तत्पदे चिरकाङ्क्षिते ।
धातोः स्थान इवादेशं सुग्रीवं संन्यवेशयत् ॥५८॥

इतस्ततश्च वैदेहीमन्वेष्टुं भर्तृचोदिताः ।
कपयश्चेरुरार्तस्य रामस्येव मनोरथाः ॥५९॥

प्रवृत्तावुपलब्धायां तस्याः संपातिदर्शनात् ।
मारुतिः सागरं तीर्णः संसारमिव निर्ममः ॥६०॥

दृष्टा विचिन्वता तेन लङ्कायां राक्षसीवृता ।
जानकी विषवल्लीभिः परीतेव महौषधिः ॥६१॥

तस्यै भर्तुरभिज्ञानमङ्गुलीयं ददौ कपिः ।
प्रत्युद्गतमिवानुष्णैस्तदानन्दाश्रुबिन्दुभिः ॥६२॥

निर्वाप्य प्रियसंदेशैः सीतामक्षवधोद्धतः ।
स ददाह पुरीं लङ्कां क्षणसोढारिनिग्रहः ॥६३॥

प्रत्यभिज्ञानरत्नं च रामायादर्शयत् कृती ।
हृदयं स्वयमायातं वैदेह्या इव मूर्तिमत् ॥६४॥

स प्राप हृदयन्यस्तमणिस्पर्शनिमीलितः ।
अपयोधरसंसर्गां प्रियालिङ्गननिर्वृतिम् ॥६५॥

श्रुत्वा रामः प्रियोदन्तं मेने तत्सङ्गमोत्सुकः ।
महार्णवपरिक्षेपं लङ्कायाः परिखालघुम् ॥६६॥

स प्रतस्थेऽरिनाशाय हरिसैन्यैरनुद्रुतः ।
न केवलं भुवः पृष्ठे व्योम्नि संबाधवर्त्मभिः ॥६७॥

निविष्टमुदधेः कूले तं प्रपेदे विभीषणः ।
स्नेहाद् राक्षसलक्ष्म्येव बुद्धिमादिश्य चोदितः ।।६८।।

तस्मै निशाचरैश्वर्यं प्रतिशुश्राव राघवः ।
काले खलु समारब्धाः फलं बध्नन्ति नीतयः ।।६९।।

स सेतुं बन्धयामास प्लवगैर्लवणाम्भसि ।
रसातलादिवोन्मग्नं शेषं स्वप्नाय शार्ङ्गिणः ।।७०।।

तेनोत्तीर्य पथा लङ्कां रोधयामास पिङ्गलैः ।
द्वितीयं हेम[1]प्राकारं कुर्वद्भिरिव वानरैः ।।७१।।

रणः प्रववृते तत्र भीमः प्लवगरक्षसाम् ।
दिग्विजृम्भित – काकुत्स्थ – पौलस्त्य – जयघोषणः ।।७२।।

पादपाविद्धपरिघः शिलानिष्पिष्टमुद्गरः ।
अतिशस्त्रनखन्यासः शैलरुग्णमतङ्गजः ।।७३।।

अथ रामशिरश्छेद – दर्शनोद्भ्रान्तचेतनाम् ।
सीतां मायेति शंसन्ती त्रिजटा समजीवयत् ।।७४।।

कामं जीवति मे नाथ इति सा विजहौ शुचम् ।
प्राङ् मत्वा सत्यमस्यान्तं जीवितास्मीति लज्जिता ।।७५।।

गरुडापात – विश्लिष्ट – मेघनादास्त्र – बन्धनः ।
दाशरथ्योः क्षणक्लेशः स्वप्नवृत्त इवाभवत् ।।७६।।

ततो बिभेद पौलस्त्यः शक्त्या वक्षसि लक्ष्मणम् ।
रामस्त्वनाहतोऽप्यासीद् विदीर्णहृदयः शुचा ।।७७।।

स मारुति – समानीत – महौषधि – हृत – व्यथः ।
लङ्कास्त्रीणां पुनश्चक्रे विलापाचार्यकं शरैः ।।७८।।

---

१. संयोगपूर्वत्वेऽप्यत्रैव दीर्घविकल्पः कु० ७।११ पाठान्तरेऽपि ।

स नादं मेघनादस्य धनुश्चेन्द्रायुधप्रभम् ।
मेघस्येव शरत्कालो न किंचित् पर्यशेषयत् ॥७९॥

कुम्भकर्णः कपीन्द्रेण तुल्यावस्थः स्वसुः कृतः ।
रुरोध रामं शृङ्गीव टङ्कच्छिन्नमनःशिलः ॥८०॥

अकाले बोधितो भ्रात्रा प्रियस्वप्नो वृथा भवान् ।
रामेषुभिरितीवासौ दीर्घनिद्रां प्रवेशितः ॥८१॥

इतराण्यपि रक्षांसि पेतुर्वानरकोटिषु ।
रजांसि समरोत्थानि तच्छोणितनदीष्विव ॥८२॥

निर्ययावथ पौलस्त्यः पुनर्युद्धाय मन्दिरात् ।
अरावणमरामं वा जगदद्येति निश्चितः ॥८३॥

रामं पदातिमालोक्य लङ्केशं च वरूथिनम् ।
हरियुग्यं रथं तस्मै प्रजिघाय पुरन्दरः ॥८४॥

तमाधूतध्वजपटं व्योमगङ्गोर्मिवायुभिः ।
देवसूतभुजालम्बी जैत्रमध्यास्त राघवः ॥८५॥

मातलिस्तस्य माहेन्द्रमामुमोच तनुच्छदम् ।
यत्रोत्पलदलक्लैब्यमस्त्राण्यापुः सुरद्विषाम् ॥८६॥

अन्योन्यदर्शनप्राप्तविक्रमावसरं चिरात् ।
रामरावणयोर्युद्धं चरितार्थमिवाभवत् ॥८७॥

भुजमूर्धोरुबाहुल्यादेकोऽपि धनदानुजः ।
ददृशे ह्ययथापूर्वो मातृवंश इव स्थितः[1] ॥८८॥

जेतारं लोकपालानां स्वमुखैरर्चितेश्वरम् ।
रामस्तुलितकैलासमरातिं बह्वमन्यत ॥८९॥

---

१. अव्यक्तार्थमिदम् । मातृवंशस्थितत्वेन किं न्वत्र विवक्षितमिति विचार्यम् ।

तस्य स्फुरति पौलस्त्यः सीतासंगमशंसिनि ।
निचखानाधिकक्रोधः शरं सव्येतरे भुजे ॥९०॥

रावणस्यापि रामास्तो भित्त्वा हृदयमाशुगः ।
विवेश भुवमाख्यातुमुरगेभ्य इव प्रियम् ॥९१॥

वचसैव तयोर्वाक्यमस्त्रमस्त्रेण निघ्नतोः ।
अन्योन्यजयसंरम्भो ववृधे वादिनोरिव ॥९२॥

विक्रमव्यतिहारेण सामान्याऽभूद् द्वयोरपि ।
जयश्रीरन्तरा वेदिर्मत्तवारणयोरिव ॥९३॥

कृतप्रतिकृतप्रीतैस्तयोर्मुक्तां सुरासुरैः ।
परस्पर-शरव्राताः पुष्पवृष्टिं न सेहिरे ॥९४॥

अयःशङ्कु-चितां रक्षः शतघ्नीमथ शत्रवे ।
हृतां वैवस्वतस्येव [1]कूटशाल्मलिमक्षिपत् ॥९५॥

राघवो रथमप्राप्तां तामाशां च सुरद्विषाम् ।
अर्द्धचन्द्रमुखैर्बाणैश्चिच्छेद कदलीसुखम् ॥९६॥

अमोघं संदधे चास्मै धनुष्येकधनुर्धरः ।
ब्राह्ममस्त्रं प्रियाशोकशल्यनिष्कर्षणौषधम् ॥९७॥

तद् व्योम्नि शतधा भिन्नं ददृशे दीप्तिमन्मुखम् ।
वपुर्महोरगस्येव करालफणमण्डलम् ॥९८॥

तेन मन्त्रप्रयुक्तेन निमेषार्धादपातयत् ।
स रावणशिरः-पङ्क्तिमज्ञातव्रणवेदनाम् ॥९९॥

बालार्कप्रतिमेवाप्सु वीचिभिन्ना पतिष्यतः ।
रराज रक्षःकायस्य कण्ठच्छेदपरम्परा ॥१००॥

---

१. कूटशाल्मलिः अस्त्रविशेषोऽपि ।

मरुतां पश्यतां तस्य शिरांसि पतितान्यपि ।
मनो नातिविशश्वास पुनः संधानशङ्किनाम् ॥१०१॥

अथ मदगुरुपक्षैर्लोकपालद्विपाना-
मनुगतमलिवृन्दैर्गण्डभित्तीर्विहाय ।
उपनतमणिवन्धे मूर्ध्नि पौलस्त्यशत्रोः
सुरभि सुरविमुक्तं पुष्पवर्षं पपात ॥१०२॥

यन्ता हरेः सपदि संहृतकार्मुकज्य-
मापृच्छ्य राघवमनुष्ठितदेवकार्यम् ।
नामाङ्करावणशराङ्कितकेतुयष्टि-
मूर्ध्वं रथं हरिसहस्रयुजं निनाय ॥१०३॥

रघुपतिरपि जातवेदोविशुद्धां प्रगृह्य प्रियां
प्रियसुहृदि विभीषणे संक्रमय्य[1] श्रियं वैरिणः ।
रविसुतसहितेन तेनानुयातः ससौमित्रिणा
भुजविजितविमानरत्नाधिरूढः प्रतस्थे पुरीम्[2] ॥१०४॥

॥ इति श्रीमहाकविकालिदासकृतौ रघुवंशे महाकाव्ये
रावणवधो नाम द्वादशः सर्गः ॥



१. संगमय्य म.

२. तारा-निशा-प्रिया-वरदा-तारका-नाराच-नाराचक-महामालिका-सिंहविक्री-डितान्यतमनामकं छन्दः, 'ननरररर' इति चैतल्लक्षणम् । द्र. छ.

त्रयोदशः सर्गः

अथात्मनः शब्दगुणं गुणज्ञः पदं विमानेन विगाहमानः ।
रत्नाकरं वीक्ष्य मिथः स जायां रामाभिधानो हरिरित्युवाच ॥१॥

वैदेहि पश्यामलयाद् विभक्तं मत्सेतुना फेनिलमम्बुराशिम् ।
[1]छायापथेनेव शरत्प्रसन्नमाकाशमाविष्कृतचारुतारम् ॥२॥

गुरोर्यियक्षोः कपिलेन मेध्ये रसातलं संक्रमिते तुरङ्गे ।
तदर्थमुर्वीमवदारयद्भिः पूर्वैः किलायं परिवर्धितो नः ॥३॥

गर्भं दधत्यर्कमरीचयोऽस्माद् विवृद्धिमत्राश्नुवते वसूनि ।
अबिन्धनं वह्निमसौ बिभर्ति प्रह्लादनं ज्योतिरजन्यनेन ॥४॥

तां तामवस्थां प्रतिपद्यमानं स्थितं दश व्याप्य दिशो महिम्ना ।
विष्णोरिवास्यानवधारणीयमीदृक्तया रूपमियत्तया वा ॥५॥

नाभिप्ररूढाम्बुरुहासनेन संस्तूयमानः प्रथमेन धात्रा ।
अमुं युगान्तोचितयोगनिद्रः संहृत्य लोकान् पुरुषोऽधिशेते ॥६॥

पक्षच्छिदा गोत्रभिदात्तगन्धाः शरण्यमेनं शतशो महीध्राः ।
नृपा इवोपप्लविनः परेभ्यो धर्मोत्तरं मध्यममाश्रयन्ते ॥७॥

रसातलादादिभवेन पुंसा भुवः प्रयुक्तोद्वहनक्रियायाः ।
अस्याच्छमम्भः प्रलयप्रवृद्धं मुहूर्तवक्त्राभरणं बभूव ॥८॥

मुखार्पणेषु प्रकृतिप्रगल्भाः स्वयं तरङ्गाधरदानदक्षः ।
अनन्यसामान्यकलत्रवृत्तिः पिबत्यसौ पाययते च सिन्धूः ॥९॥

ससत्त्वमादाय नदीमुखाम्भः संमीलयन्तो विवृताननत्वम्[2] ।
अमी शिरोभिस्तिमयः सरन्ध्रैरूर्ध्वं वितन्वन्ति जलप्रवाहान् ॥१०॥

---

१. आकाशगङ्गया ।   २. विवृताननत्वात् म.

मातङ्गनक्रैः सहसोत्पतद्भिर्भिन्नान् द्विधा पश्य समुद्रफेनान्।
कपोलसंसर्पितया य एषां व्रजन्ति कर्णक्षणचामरत्वम् ॥११॥

वेलानिलाय प्रसृता भुजङ्गा महोर्मिविस्फूर्जथुनिर्विशेषाः।
सूर्यांशुसंपर्कसमृद्धरागैर्व्यज्यन्त एते मणिभिः फणस्थैः ॥१२॥

तवाधरस्पर्धिषु विद्रुमेषु पर्यस्तमेतत् सहसोर्मिवेगात्।
ऊर्ध्वाङ्कुरप्रोतमुखं कथंचित् क्लेशादपक्रामति शङ्खयूथम् ॥१३॥

प्रवृत्तमात्रेण पयांसि पातुमावर्त्तवेगाद् भ्रमता घनेन।
आभाति भूयिष्ठमयं समुद्रः प्रमथ्यमानो गिरिणेव भूयः ॥१४॥

दूरादयश्चक्रनिभस्य तन्वी तमालतालीवनराजिनीला।
आभाति वेला लवणाम्बुराशेर्धारानिबद्धेव कलङ्करेखा ॥१५॥

वेलानिलः केतकरेणुभिस्ते संभावयत्याननमायताक्षि।
मामक्षमं मण्डनकालहानेर्वेत्तीव बिम्बाधरबद्धतृष्णम् ॥१६॥

एते वयं सैकतभिन्नशुक्तिपर्यस्तमुक्तापटलं पयोधेः।
प्राप्ता मुहूर्त्तेन विमानवेगात् कूलं फलावर्जितपूगमालम् ॥१७॥

कुरुष्व तावत् करभोरु पश्चान्मार्गे मृगप्रेक्षिणि दृष्टिपातम्।
एषा विदूरीभवतः समुद्रात् सकानना निष्पततीव भूमिः[१] ॥१८॥

क्वचित् पथा संचरते सुराणां क्वचिद् घनानां पततां क्वचिच्च।
यथाविधो मे मनसोऽभिलाषः प्रवर्तते पश्य तथा विमानम्[२] ॥१९॥

असौ महेन्द्र-द्विप-दानगन्धिस्त्रिमार्गगा-वीचि-विमर्द-शीतः।
आकाशवायुर्दिनयौवनोत्थानाचामति स्वेदलवान् मुखे ते ॥२०॥

करेण वातायनलम्बितेन स्पृष्टस्त्वया [३]तन्वि कुतूहलिन्या।
आमुञ्चतीवाभरणं द्वितीयमुद्भिन्नविद्युद्वलयो घनस्ते ॥२१॥

१. २. शा. सप्तमाङ्कारम्भे ३. चण्डि म.

अमी जनस्थानमपोढविघ्नं मत्वा समारब्धनवोटजानि ।
अध्यासते चीरभृतो यथास्वं चिरोज्झितान्याश्रममण्डलानि ॥२२॥

सैषा स्थली यत्र विचिन्वता त्वां भ्रष्टं मया नूपुरमेकमुर्व्याम् ।
अदृश्यत त्वच्चरणारविन्दविश्लेषदुःखादिव बद्धमौनम्[१] ॥२३॥

त्वं रक्षसा भीरु यतोऽपनीता तं मार्गमेताः कृपया लता मे ।
अदर्शयन् वक्तुमशक्नुवत्यः शाखाभिरावर्जितपल्लवाभिः ॥२४॥

मृग्यश्च दर्भाङ्कुरनिर्व्यपेक्षास्तवागतिज्ञं समबोधयन् माम् ।
व्यापारयन्त्यो दिशि दक्षिणस्यामुत्पक्ष्मराजीनि विलोचनानि ॥२५॥

एतद् गिरेर्माल्यवतः पुरस्तादाविर्भवत्यम्बरलेखि शृङ्गम् ।
नवं पयो यत्र घनैर्मया च त्वद्विप्रयोगाश्रु समं विसृष्टम् ॥२६॥

गन्धश्च धाराहतपल्वलानां कादम्बमर्धोद्गतकेसरं च ।
स्निग्धाश्च केकाः शिखिनां बभूवुर्यस्मिन्नसह्यानि विना त्वया मे॥२७॥

पूर्वानुभूतं स्मरता च यत्र कम्पोत्तरं भीरु तवोपगूढम् ।
गुहाविसारीण्यतिवाहितानि मया कथंचिद् घनगर्जितानि ॥२८॥

आसारसिक्तक्षितिबाष्पयोगान्मामक्षिणोद् यत्र विभिन्नकोशैः ।
विडम्ब्यमाना नवकन्दलैस्ते विवाहधूमारुणलोचनश्रीः ॥२९॥

उपान्तवानीर—वनोपगूढा—न्यालक्ष्यपारिप्लव—सारसानि ।
दूरावतीर्णा पिबतीव खेदादमूनि पम्पासलिलानि दृष्टिः ॥३०॥

अत्रावियुक्तानि रथाङ्गनाम्नामन्योन्यदत्तोत्पलकेसराणि ।
द्वन्द्वानि दूरान्तरवर्तिना ते मया प्रिये सस्पृहमीक्षितानि ॥३१॥

इमां तटाशोकलतां च तन्वीं स्तनाभिरामस्तबकाभिनम्राम् ।
त्वत्प्राप्तिबुद्ध्या परिरब्धुकामः सौमित्रिणा साश्रुरहं निषिद्धः ॥३२॥

---

१. चिन्तामणिमन्त्रगर्भं पद्यमित्यस्मद्गुरुपारम्परी, अड्यारस्थो हस्तलेखश्च।

अमूर्विमानान्तरलम्बिनीनां श्रुत्वा स्वनं काञ्चनकिङ्किणीनाम् ।
प्रत्युद्व्रजन्तीव खमुत्पतन्त्यो गोदावरीसारसपङ्क्तयस्त्वाम् ॥३३॥

एषा त्वया पेशलमध्ययापि घटाम्बुसंवर्धितबालचूता ।
आनन्दयत्युन्मुखकृष्णशारा दृष्टा चिरात् पञ्चवटी मनो मे ॥३४॥

अत्रानुगोदं मृगयानिवृत्तस्तरङ्गवातेन विनीतखेदः ।
रहस्त्वदुत्सङ्गनिषण्णमूर्धा स्मरामि वानीरगृहेषु सुप्तम् ॥३५॥

भ्रू - भेदमात्रेण पदान्मघोनः प्रभ्रंशयां यो नहुषं चकार ।
तस्याविलाम्भःपरिशुद्धिहेतोर्भौमो मुनेः स्थानपरिग्रहोऽयम् ॥३६॥

त्रेताग्निधूमाग्रमनिन्द्यकीर्तेस्तस्येदमाक्रान्त - विमान - मार्गम् ।
घ्रात्वा हविर्गन्धि रजोविमुक्तः समश्नुते मे लघिमानमात्मा ॥३७॥

एतन्मुनेर्मानिनि माण्डकर्णे:[1] पञ्चाप्सरो नाम विहारवारि ।
आभाति पर्यन्तवनं विदूरान्मेघान्तरालक्ष्यमिवेन्दुबिम्बम् ॥३८॥

पुरा स दर्भाङ्कुरमात्रवृत्तिश्चरन् मृगैः सार्धमृषिर्मघोना ।
समाधिभीतेन किलोपनीतः पञ्चाप्सरोयौवनकूटबन्धम् ॥३९॥

तस्यायमन्तर्हितसौधभाजः प्रसक्तसंगीतमृदङ्गघोषः ।
वियद्गतः पुष्पकचन्द्रशालाः क्षणं प्रतिश्रुन्मुखराः करोति ॥४०॥

हविर्भुजामेधवतां चतुर्णां मध्ये ललाटन्तपसप्तसप्तिः ।
असौ तपस्यत्यपरस्तपस्वी नाम्ना सुतीक्ष्णश्चरितेन दान्तः ॥४१॥

अमुं सहासप्रहितेक्षणानि व्याजार्धसंदर्शितमेखलानि ।
नालं विकर्तुं जनितेन्द्रशङ्कं सुराङ्गनाविभ्रमचेष्टितानि ॥४२॥

एषोऽक्षमालावलयं मृगाणां कण्डूयितारं कुशसूचिलावम् ।
सभाजने मे भुजमूर्ध्वबाहुः सव्येतरं प्राध्वमितः प्रयुङ्क्ते ॥४३॥

---

१. शातकर्णेः म.

वाचंयमत्वात् प्रणतिं ममैष कम्पेन किंचित् प्रतिगृह्य मूर्ध्नः ।
दृष्टिं विमानव्यवधानमुक्तां पुनः सहस्रार्चिषि संनिधत्ते ॥४४॥

अदः शरण्यं शरभङ्गनाम्नस्तपोवनं पावनमाहिताग्नेः ।
चिराय संतर्प्य समिद्भिरग्निं यो मन्त्रपूतां तनुमप्यहौषीत् ॥४५॥

छायाविनीताध्वपरिश्रमेषु भूयिष्ठसंभाव्यफलेष्वमीषु ।
तस्यातिथीनामधुना सपर्या स्थिता सुपुत्रेष्विव पादपेषु ॥४६॥

धारास्वनोद्गारिदरीमुखोऽसौ शृङ्गाग्रलग्नाम्बुद-वप्र-पङ्कः ।
बध्नाति मे बन्धुरगात्रि चक्षुर्दृप्तः ककुद्मानिव चित्रकूटः[1] ॥४७॥

एषा प्रसन्नस्तिमितप्रवाहा सरिद् विदूरान्तरभावतन्वी ।
मन्दाकिनी[2] भाति नगोपकण्ठे मुक्तावली कण्ठगतेव भूमेः ॥४८॥

अयं सुजातोऽनुगिरं तमालः प्रवालमादाय सुगन्धि यस्य ।
यवाङ्कुरापाण्डुकपोलशोभी मयावतंसः परिकल्पितस्ते ॥४९॥

अनिग्रहत्रासविनीतसत्त्वमपुष्पलिङ्गात् फलबन्धिवृक्षम् ।
वनं तपःसाधनमेतदत्रेराविष्कृतोदग्रतरप्रभावम् ॥५०॥

अत्राभिषेकाय तपोधनानां सप्तर्षिहस्तोद्धृतहेमपद्माम् ।
प्रवर्तयामास किलानसूया त्रिस्रोतसं त्र्यम्बकमौलिमालाम् ॥५१॥

वीरासनैर्ध्याननिजुषामृषीणाममी समध्यासितवेदिमध्याः ।
निवातनिष्कम्पतया विभान्ति योगाधिरूढा इव शाखिनोऽपि ॥५२॥

त्वया पुरस्तादुपयाचितो यः सोऽयं वटः श्याम इति प्रतीतः ।
राशिर्मणीनामिव गारुडानां सपद्मरागः फलितो विभाति ॥५३॥

१-२. दण्डकारण्यान्तःपाती तन्नामा शिलोच्चयः, मन्दाकिनी चापि तत्रत्यैवेति केचित् ।

क्वचित् प्रभालेपिभिरिन्द्रनीलैर्मुक्तामयी यष्टिरिवानुविद्धा ।
अन्यत्र माला सितपङ्कजानामिन्दीवरैरुत्खचितान्तरेव ॥५४॥
क्वचित् खगानां प्रियमानसानां कादम्बसंसर्गवतीव पङ्क्तिः ।
अन्यत्र कालागुरुदत्तपत्रा भक्तिर्भुवश्चन्दनकल्पितेव ॥५५॥
क्वचित् प्रभा चान्द्रमसी तमोभिश्छायाविलीनैः शबलीकृतेव ।
अन्यत्र शुभ्रा शरदभ्रलेखा रन्ध्रेष्विवालक्ष्यनभःप्रदेशा ॥५६॥
क्वचिच्च कृष्णोरगभूषणेव भस्माङ्गरागा तनुरीश्वरस्य ।
पश्यानवद्याङ्गि विभाति गङ्गा भिन्नप्रवाहा यमुनातरङ्गैः ॥५७॥

समुद्रपत्न्योर्जलसंनिपाते पूतात्मनामत्र किलाभिषेकात् ।
तत्त्वावबोधेन विनापि भूयस्तनुत्यजां नास्ति शरीरबन्धः ॥५८॥

पुरं निषादाधिपतेरिदं तद् यस्मिन् मया मौलिमणिं विहाय ।
जटासु बद्धास्वरुदत् सुमन्त्रः कैकेयि कामाः फलितास्तवेति ॥५९॥

पयोधरैः पुण्यजनाङ्गनानां निर्विष्टहेमाम्बुजरेणु यस्याः ।
ब्राह्मं सरः कारणमाप्तवाचो बुद्धेरिवाव्यक्तमुदाहरन्ति ॥६०॥
जलानि या तीरनिखातयूपा वहत्ययोध्यामनु राजधानीम् ।
तुरङ्गमेधावभृथावतीर्णैरिक्ष्वाकुभिः पुण्यतरीकृतानि ॥६१॥
यां सैकतोत्सङ्गसुखोचितानां प्राज्यैः पयोभिः परिवर्धितानाम् ।
सामान्यधात्रीमिव मानसं मे संभावयत्युत्तरकोसलानाम् ॥६२॥
सेयं मदीया जननीव तेन मान्येन राज्ञा सरयूर्वियुक्ता ।
दूरे वसन्तं शिशिरानिलैर्मां तरङ्गहस्तैरुपगूहतीव ॥६३॥

विरक्तसंध्याकपिशं पुरस्ताद् यतो रजः पार्थिवमुज्जिहीते ।
शङ्के हनूमत्कथितप्रवृत्तिः प्रत्युद्गतो मां भरतः ससैन्यः ॥६४॥

अद्धा श्रियं पालितसंगराय प्रत्यर्पयिष्यत्यनघां स साधुः ।
हत्वा निवृत्ताय मृधे खरादीन् संरक्षितां त्वामिव लक्ष्मणो मे ॥६५॥

असौ पुरस्कृत्य गुरुं पदातिः पश्चादवस्थापितवाहिनीकः ।
वृद्धैरमात्यैः सह चीरवासा मामर्घ्यपाणिर्भरतोऽभ्युपैति ॥६६॥

पित्रा विसृष्टां मदपेक्षया यः श्रियं युवाप्यङ्कगतामभोक्ता ।
इयन्ति वर्षाणि तया सहोग्रमभ्यस्यतीव व्रतमासिधारम् ॥६७॥

एतावदुक्तवति दशरथौ तदीया-
मिच्छां विमानमधिदेवतया विदित्वा ।
ज्योतिष्पथादवततार सविस्मयाभि-
रुद्वीक्षितं प्रकृतिभिर्भरतानुगाभिः ॥६८॥

तस्मात् पुरःसरविभीषणदर्शितेन
सेवाविचक्षणहरीश्वरदत्तहस्तः ।
यानादवातरददूरमहीतलेन
मार्गेण भङ्गिरचितस्फटिकेन रामः ॥६९॥

इक्ष्वाकुवंशगुरवे प्रयतः प्रणम्य
स भ्रातरं भरतमर्घ्यपरिग्रहान्ते ।
पर्यश्रुरस्वजत मूर्धनि चोपजघ्रौ
तद्भक्त्यपोढपितृराज्यमहाभिषेके ॥७०॥

श्मश्रुप्रवृद्धिजनिताननविक्रियांश्च
प्लक्षान् प्ररोहजटिलानिव मन्त्रिवृद्धान् ।
अन्वग्रहीत् प्रणमतः शुभदृष्टिपातै-
र्वार्तानुयोगमधुराक्षरया च वाचा ॥७१॥

दुर्जातवन्धुरयमृक्षहरीश्वरो मे
पौलस्त्य एष समरेषु पुरः प्रहर्ता ।
इत्यादृतेन कथितौ रघुनन्दनेन
व्युत्क्रम्य लक्ष्मणमुभौ भरतो ववन्दे ॥७२॥

सौमित्रिणा तदनु संससृजे स चैन-
मुत्थाप्य नम्रशिरसं[1] भृशमालिलिङ्ग ।
रूढेन्द्रजित्प्रहरणव्रणकर्कशेन
क्लिश्यन्निवास्य भुजमध्यमुरःस्थलेन ॥७३॥

रामाज्ञया हरिचमूपतयस्तदानीं
कृत्वा मनुष्यवपुरारुरुहुर्गजेन्द्रान् ।
येषु क्षरत्सु बहुधा मदवारिधाराः
शैलाधिरोहणसुखान्युपलेभिरे ते[2] ॥७४॥

सानुप्लवः प्रभुरपि क्षणदाचराणां
भेजे रथान् दशरथप्रभवानुशिष्टः ।
मायाविकल्परचितैरपि ये तदीयै-
र्न स्यन्दनैस्तुलितकृत्रिमभक्तिशोभाः ॥७५॥

भूयस्ततो रघुपतिर्विलसत्पताक-
मध्यास्त कामगति सावरजो विमानम् ।
दोषातनं बुधबृहस्पतियोगदृश्य-
स्तारापतिस्तरलविद्युदिवाभ्रवृन्दम् ॥७६॥

तत्रेश्वरेण जगतां प्रलयादिवोर्वीं
वर्षात्ययेन रुचमभ्रघनादिवेन्दोः ।
रामेण मैथिलसुतां दशकण्ठकृच्छ्रात्
प्रत्युद्धृतां धृतिमतीं भरतो ववन्दे ॥७७॥

लङ्केश्वरप्रणतिभङ्गदृढव्रतं तद्
वन्द्यं युगं चरणयोर्जनकात्मजायाः ।
ज्येष्ठानुवृत्तिजटिलं च शिरोऽस्य साधो-
रन्योन्यपावनमभूदुभयं समेत्य ॥७८॥

---

१. एतेन भरतस्य लक्ष्मणानुजत्वमिति केषांचिदुत्प्रेक्षा । २. वि० ४।२५

क्रोशार्धं प्रकृतिपुरःसरेण गत्वा
काकुत्स्थः स्तिमितजवेन पुष्पकेण ।
शत्रुघ्नप्रतिविहितोपकार्यमार्यः
साकेतोपवनमुदारमध्युवास ॥७९॥

॥ इति श्रीमहाकविकालिदासकृतौ रघुवंशे महाकाव्ये
साकेतप्रत्यागमनो नाम त्रयोदशः सर्गः ॥



चतुर्दशः सर्गः

भर्तुः प्रणाशादथ शोचनीयं दशान्तरं तत्र समं प्रपन्ने ।
अपश्यतां दाशरथी जनन्यौ छेदादिवोपघ्नतरोर्[1] व्रतत्यौ ॥१॥

उभावुभाभ्यां प्रणतौ हतारी यथाक्रमं विक्रमशोभिनौ तौ ।
विस्पष्टमस्रान्धतया न दृष्टौ ज्ञातौ सुतस्पर्शसुखोपलम्भात् ॥२॥

आनन्दजः शोकजमश्रु बाष्पस्तयोरशीतं शिशिरो बिभेद ।
गङ्गासरय्वोर्जलमुष्णतप्तं हिमाद्रिनिस्यन्द इवावतीर्णः ॥३॥

ते पुत्रयोर्नैर्ऋतशस्त्रमार्गानार्द्रानिवाङ्गे सदयं स्पृशन्त्यौ ।
अपीप्सितं क्षत्रकुलाङ्गनानां न वीरसूशब्दमकामयेताम् ॥४॥

क्लेशावहा भर्तुरलक्षणाहं सीतेति नाम स्वमुदीरयन्ती ।
स्वर्गप्रतिष्ठस्य गुरोर्महिष्यावभक्तिभेदेन वधूर्ववन्दे ॥५॥

उत्तिष्ठ वत्से ननु सानुजोऽसौ वृत्तेन भर्त्ता शुचिना तवैव ।
कृच्छ्रं महत् तीर्ण इति प्रियार्हां तामूचतुस्ते प्रियमप्यमिथ्या ॥६॥

अथाभिषेकं रघुवंशकेतोः प्रारब्धमानन्दजलैर्जनन्योः ।
निर्वर्तयामासुरमात्यवृद्धास्तीर्थाहृतैः काञ्चनकुम्भतोयैः ॥७॥

सरित्समुद्रान् सरसीश्च गत्वा रक्षःकपीन्द्रैरुपपादितानि ।
तस्यापतन् मूर्ध्नि जलानि जिष्णोर्विन्ध्यस्य मेघप्रभवा इवापः ॥८॥

तपस्विवेषक्रिययापि तावद् यः प्रेक्षणीयः सुतरां बभूव ।
राजेन्द्रनेपथ्यविधानशोभा तस्योदिताऽऽसीत् पुनरुक्तदोषा ॥९॥

समौलरक्षोहरिभिः ससैन्यस्तूर्यस्वनानन्दितपौरवर्गः ।
विवेश सौधोद्गतलाजवर्षामुत्तोरणामन्वयराजधानीम् ॥१०॥

---

१. आश्रयतरोरित्यर्थः ।

सौमित्रिणा सावरजेन मन्दमाधूतवालव्यजनो रथस्थः ।
धृतातपत्रो भरतेन साक्षादुपायसंघात इव प्रवृद्धः ॥११॥

प्रासादकालागुरुधूमराजिस्तस्याः पुरो वायुवशेन भिन्ना ।
वनान्निवृत्तेन रघूत्तमेन मुक्ता स्वयं वेणिरिवावभासे ॥१२॥

श्वश्रूजनानुष्ठितचारुवेषां कर्णीरथस्थां रघुवीरपत्नीम् ।
प्रासादवातायनदृश्यबन्धैः साकेतनार्योऽञ्जलिभिः प्रणेमुः ॥१३॥

स्फुरत्प्रभामण्डलमानसूयं सा बिभ्रती शाश्वतमङ्गरागम् ।
रराज शुद्धेति पुनः स्वपुर्यै संदर्शिता वह्निगतेव भर्त्रा ॥१४॥

वेश्मानि रामः परिबर्हवन्ति विश्राण्य सौहार्दनिधिः सुहृद्भ्यः ।
बाष्पायमाणो बलिमग्निकेतमालेख्यशेषस्य पितुर्विवेश ॥१५॥

कृताञ्जलिस्तत्र यदम्ब सत्यान्नाभ्रश्यत स्वर्गफलाद् गुरुर्नः ।
तच्चिन्त्यमानं सुकृतं तवेति जहार लज्जां भरतस्य मातुः ॥१६॥

तथैव सुग्रीवविभीषणादीनुपाचरत् कृत्रिमसंविधाभिः ।
संकल्पमात्रोदितसिद्धयस्ते क्रान्ता यथा चेतसि विस्मयेन ॥१७॥

सभाजनायोपगतान् स दिव्यान् मुनीन् पुरस्कृत्य हतस्य शत्रोः ।
शुश्राव तेभ्यः प्रभवादिवृत्तं स्वविक्रमे गौरवमादधानम्[1] ॥१८॥

प्रतिप्रयातेषु तपोधनेषु सुखादविज्ञातगतार्धमासान् ।
सीतास्वहस्तोपहृताग्र्यपूजान् रक्षःकपीन्द्रान् विससर्ज रामः ॥१९॥

तच्चात्मचिन्तासुलभं विमानं हृतं सुरारेः सह जीवितेन ।
कैलासनाथोद्वहनाय भूयः पुष्पं दिवः पुष्पकमन्वमंस्त ॥२०॥

पितुर्नियोगाद् वनवासमेवं निस्तीर्य रामः प्रतिपन्नराज्यः ।
धर्मार्थकामेषु समां प्रपेदे यथा तथैवावरजेषु वृत्तिम् ॥२१॥

---

१. एतेन स्पष्टम् 'कालिदासो वाल्मीकिरामायणस्योत्तरकाण्डं ददृशिवानि'-ति ।

सर्वासु मातृष्वपि वत्सलत्वात् स निर्विशेषप्रतिपत्तिरासीत् ।
षडाननापीतपयोधरासु नेता चमूनामिव कृत्तिकासु ॥२२॥

तेनार्थवाँल्लोभपराङ्मुखेन तेन घ्नता विघ्नभयं क्रियावान् ।
तेनास लोकः पितृमान् विनेत्रा तेनैव शोकापनुदेन पुत्री ॥२३॥

स पौरकार्याणि समीक्ष्य काले रेमे विदेहाधिपतेर्दुहित्रा ।
उपस्थितश्चारु वपुस्तदीयं कृत्वोपभोगोत्सुकयेव लक्ष्म्या ॥२४॥

तयोर्यथाप्रार्थितमिन्द्रियार्थानासेदुषोः सद्मसु चित्रवत्सु ।
प्राप्तानि दुःखान्यपि दण्डकेषु संचिन्त्यमानानि सुखान्यभूवन् ॥२५॥

अथाधिकस्निग्धविलोचनेन मुखेन सीता शरपाण्डुरेण ।
आनन्दयित्री परिणेतुरासीदनक्षरव्यञ्जितदोहदेन ॥२६॥

तामङ्कमारोप्य कृशाङ्गयष्टिं वर्णान्तराक्रान्तपयोधराग्राम् ।
विलज्जमानां रहसि प्रतीतः पप्रच्छ रामां रमणोऽभिलाषम् ॥२७॥

सा दष्टनीवारबलीनि हिंस्रैः संवद्धवैखानसकन्यकानि ।
इयेष भूयः कुशवन्ति गन्तुं भागीरथीतीरतपोवनानि ॥२८॥

तस्यै प्रतिश्रुत्य रघुप्रवीरस्तदीप्सितं पार्श्वचरानुयातः ।
आलोकयिष्यन् मुदितामयोध्यां प्रासादमभ्रंलिहमारुरोह ॥२९॥

ऋद्धापणं राजपथं स पश्यन् विगाह्यमानां सरयूं च नौभिः ।
विलासिभिश्चाध्युषितानि पौरैः पुरोपकण्ठोपवनानि रेमे ॥३०॥

स किंवदन्तीं वदतां पुरोगः स्ववृत्तमुद्दिश्य विशुद्धवृत्तः ।
सर्पाधिराजोरुभुजोऽपसर्पं पप्रच्छ भद्रं विजितारिभद्रः ॥३१॥

निर्बन्धपृष्टः स जगाद सर्वं स्तुवन्ति पौराश्चरितं त्वदीयम् ।
अन्यत्र रक्षोभवनोषिताया: परिग्रहान्मानवदेव देव्याः ॥३२॥

कलत्रनिन्दागुरुणा किलैवमभ्याहतं कीर्तिविपर्ययेण ।
अयोघनेनाय इवाभितप्तं वैदेहिबन्धोर्हृदयं विदद्रे ॥३३॥

किमात्मनिर्वादकथामुपेक्षे जायामदोषामुत संत्यजानि ।
इत्येकपक्षाश्रयविक्लवत्वादासीत् स दोलाचलचित्तवृत्तिः ॥३४॥

निश्चित्य चानन्यनिवृत्ति वाच्यं त्यागेन पत्न्याः परिमार्ष्टुमैच्छत् ।
अपि स्वदेहात् किमुतेन्द्रियार्थाद् यशोधनानां हि यशो गरीयः ॥३५॥

स संनिपात्यावरजान् हतौजास्तद्विक्रियादर्शनलुप्तहर्षान् ।
कौलीनमात्माश्रयमाचचक्षे तेभ्यः पुनश्चेदमुवाच वाक्यम् ॥३६॥

राजर्षिवंशस्य रविप्रसूतेरुपस्थितः पश्यत कीदृशोऽयम् ।
मत्तः सदाचारशुचेः कलङ्कः पयोदवातादिव दर्पणस्य ॥३७॥

पौरेषु सोऽहं [1]बहुलीभवन्तमपां तरङ्गेष्विव तैलबिन्दुम् ।
सोढुं न तत्पूर्वमवर्णमीशे [2]ह्यालानिकं स्थाणुमिव द्विपेन्द्रः ॥३८॥

तस्यापनोदाय फलप्रवृत्तावुपस्थितायामपि निर्व्यपेक्षः ।
त्यक्ष्यामि वैदेहसुतां पुरस्तात् समुद्रनेमिं पितुराज्ञयेव ॥३९॥

अवैमि चैनामनघेति किन्तु लोकापवादो बलवान् मतो मे ।
छाया हि भूमेः शशिनो मलत्वेनारोपिता शुद्धिमतः प्रजाभिः ॥४०॥

रक्षोवधान्तो न च मे प्रयासो व्यर्थः स वैरप्रतिमोचनाय ।
अमर्षणः शोणितकाङ्क्षया किं पदा स्पृशन्तं दशति द्विजिह्वः ॥४१॥

तदेष सर्गः करुणार्द्रचित्तैर्न मे भवद्भिः प्रतिषेधनीयः ।
यद्यर्थिता निर्हृतवाच्यशल्यान् प्राणान् मया धारयितुं चिरं वः ॥४२॥

इत्युक्तवन्तं जनकात्मजायां नितान्तरूक्षाभिनिवेशमीशम् ।
न कश्चन भ्रातृषु तेषु शक्तो निषेद्धुमासीदनुमोदितुं वा ॥४३॥

स लक्ष्मणं लक्ष्मणपूर्वजन्मा विलोक्य लोकत्रयगीतकीर्तिः ।
सौम्येति चाभाष्य यथार्थभाषी स्थितं निदेशे पृथगादिदेश ॥४४॥

प्रजावती दोहदशंसिनी ते तपोवनेषु स्पृहयालुरेव ।
स त्वं रथी तद्व्यपदेशनेयां प्रापय्य वाल्मीकिपदं त्यजैनाम् ॥४५॥

---

१. विपुली० हे. २. आला० म.

स शुश्रुवान् मातरि भार्गवेण पितुर्नियोगात् प्रहृतं द्विषद्वत् ।
प्रत्यग्रहीदग्रजशासनं तदाज्ञा गुरूणां ह्यविचारणीया ॥४६॥

अथानुकूलश्रवणप्रतीतामत्रस्नुभिर्युक्तधुरं तुरङ्गैः ।
रथं सुमन्त्रप्रतिपन्नरश्मिमारोप्य वैदेहसुतां प्रतस्थे ॥४७॥

सा नीयमाना रुचिरान् प्रदेशान् प्रियङ्करो मे प्रिय इत्यनन्दत् ।
नाबुद्ध कल्पद्रुमतां विहाय जातं तमात्मन्यसिपत्रवृक्षम् ॥४८॥

जुगूह तस्याः पथि लक्ष्मणो यत् सव्येतरेण स्फुरता तदक्ष्णा ।
आख्यातमस्यै गुरु भावि दुःखमत्यन्तलुप्तप्रियदर्शनेन ॥४९॥

सा दुर्निमित्तोपगताद् विषादात् सद्यः परिम्लानमुखारविन्दा ।
राज्ञः शिवं सावरजस्य भूयादित्याशशंसे करणैरबाह्यैः ॥५०॥

गुरोर्नियोगाद् वनितां वनान्ते साध्वीं सुमित्रातनयो विहास्यन् ।
अवार्यतेवोत्थितवीचिहस्तैर्जह्नोर्दुहित्रा स्थितया पुरस्तात् ॥५१॥

रथात् स यन्त्रा निगृहीतवाहात् तां भ्रातृजायां पुलिनेऽवतार्य ।
गङ्गां निषादाहृतनौविशेषस्ततार सन्धामिव सत्यसन्धः ॥५२॥

अथ व्यवस्थापितवाक् कथंचित् सौमित्रिरन्तर्गतबाष्पकण्ठः ।
औत्पातिको मेघ इवाश्मवर्षं महीपतेः शासनमुज्जगार ॥५३॥

ततोऽभिषङ्गानिलविप्रविद्धा प्रभ्रश्यमानाभरणप्रसूना ।
स्वमूर्तिलाभप्रकृतिं धरित्रीं लतेव सीता सहसा जगाम ॥५४॥

इक्ष्वाकुवंशप्रभवः कथं त्वां त्यजेदकस्मात् पतिरार्यवृत्तः ।
इति क्षितिः संशयितेव तस्यै ददौ प्रवेशं जननी न तावत् ॥५५॥

सा लुप्तसंज्ञा न विवेद दुःखं प्रत्यागतासुः समतप्यतान्तः ।
तस्याः सुमित्रात्मजयत्नलब्धो मोहादभूत् कष्टतरः प्रबोधः ॥५६॥

न चावदद् भर्तुरवर्णमार्या निराकरिष्णोर्वृजिनादृतेऽपि ।
आत्मानमेव स्थिरदुःखभाजं पुनःपुनर्दुष्कृतिनं निनिन्द ॥५७॥

आश्वास्य रामावरजः सतीं तामाख्यातवाल्मीकिनिकेतमार्गः ।
निघ्नस्य मे भर्तृनिदेशरौक्ष्यं देवि क्षमस्वेति बभूव नम्रः ॥५८॥

सीता तमुत्थाप्य जगाद वाक्यं प्रीतास्मि ते सौम्य चिराय जीव ।
विडौजसा विष्णुरिवाग्रजेन भ्रात्रा यदित्थं परवानसि त्वम् ॥५९॥

श्वश्रूजनं सर्वमनुक्रमेण विज्ञापय प्रापितमत्प्रणामः ।
प्रजानिषेकं मयि वर्तमानं सूनोरनुध्यायत चेतसेति ॥६०॥

वाच्यस्त्वया मद्वचनात् स राजा वह्नौ विशुद्धामपि यत् समक्षम् ।
मां लोकवादश्रवणादहासीः श्रुतस्य किं तत् सदृशं कुलस्य ॥६१॥

कल्याणबुद्धेरथवा तवायं न कामचारो मयि शङ्कनीयः ।
ममैव जन्मान्तरपातकानां विपाकविस्फूर्जथुरप्रसह्यः ॥६२॥

उपस्थितां पूर्वमपास्य लक्ष्मीं वनं मया सार्धमसि प्रपन्नः ।
तदास्पदं प्राप्य तयातिरोषात् सोढास्मि न त्वद्भवने वसन्ती ॥६३॥

निशाचरोपप्लुतभर्तृकाणां तपस्विनीनां भवतः प्रसादात् ।
भूत्वा शरण्या शरणार्थमन्यं कथं प्रपत्स्ये त्वयि दीप्यमाने ॥६४॥

किंवा तवात्यन्तवियोगमोघे कुर्यामुपेक्षां हतजीवितेऽस्मिन् ।
स्याद् रक्षणीयं यदि मे न तेजस्त्वदीयमन्तर्गतमन्तरायः ॥६५॥

साऽहं तपः सूर्यनिविष्टदृष्टिरूर्ध्वं प्रसूतेश्चरितुं यतिष्ये ।
भूयो यथा मे जननान्तरेऽपि त्वमेव भर्ता न च विप्रयोगः ॥६६॥

नृपस्य वर्णाश्रमपालनं यत् स एव धर्मो मनुना प्रणीतः ।
निर्वासिताप्येवमतस्त्वयाहं तपस्विसामान्यमवेक्षणीया ॥६७॥

तथेति तस्याः प्रतिगृह्य वाचं रामानुजे दृष्टिपथं व्यतीते ।
सा मुक्तकण्ठं व्यसनातिभाराच्चक्रन्द विग्ना कुररीव भूयः ॥६८॥

नृत्तं मयूराः कुसुमानि वृक्षा दर्भानुपात्तान् विजहुर्हरिण्यः ।
तस्याः प्रपन्ने समदुःखभावमत्यन्तमासीद् रुदितं वनेऽपि[1] ॥६९॥

---

१. शा ४।११

तामभ्यगच्छद् रुदितानुसारी कविः कुशेध्माहरणाय यातः ।
निषादविद्धाण्डजदर्शनोत्थः श्लोकत्वमापद्यत यस्य शोकः ॥७०॥

तमश्रु नेत्रावरणं प्रमृज्य सीता विलापाद् विरता ववन्दे ।
तस्यै मुनिर्दोहृदलिङ्गदर्शी दाश्वान् पुत्राशिषमित्युवाच ॥७१॥

जाने विसृष्टां प्रणिधानतस्त्वां मिथ्यापवादक्षुभितेन भर्त्रा ।
तन्मा व्यथिष्ठा विषयान्तरस्थं प्राप्तासि वैदेहि पितुर्निकेतम् ॥७२॥

उत्खातलोकत्रयकण्टकेऽपि सत्यप्रतिज्ञेऽप्यविकत्थनेऽपि ।
त्वां प्रत्यकस्मात् कलुषप्रवृत्तावस्त्येव मन्युर्भरताग्रजे मे ॥७३॥

तवोरुकीर्तिः श्वशुरः सखा मे सतां [1]भयच्छेदकरः पिता ते ।
धुरि स्थिता त्वं पतिदेवतानां किं तन्न येनासि ममानुकम्प्या ॥७४॥

तपस्विसंसर्गविनीतसत्त्वे तपोवने वीतभया वसास्मिन् ।
इतो भविष्यत्यनघप्रसूतेरपत्यसंस्कारमयो विधिस्ते ॥७५॥

अशून्यतीरां मुनिसंनिवेशैस्तमोपहन्त्रीं तमसां वगाह्य ।
तत्सैकतोत्सङ्गबलिक्रियाभिः सपत्स्यते ते मनसः प्रसादः ॥७६॥

पुष्पं फलं चार्तवमाहरन्त्यो बीजं च बालेयमकृष्टरोहि ।
विनोदयिष्यन्ति नवाभिषङ्गामुदारवाचो मुनिकन्यकास्त्वाम् ॥७७॥

पयोघटैराश्रमबालवृक्षान् संवर्धयन्ती स्वबलानुरूपैः ।
असंशयं प्राक् तनयोपपत्तेः स्तनन्धयप्रीतिमवाप्स्यसि त्वम् ॥७८॥

अनुग्रहप्रत्यभिनन्दिनीं तां वाल्मीकिरादाय दयार्द्रचेताः ।
सायं मृगाध्यासितवेदिपार्श्वं स्वमाश्रमं शान्तमृगं निनाय ॥७९॥

तामर्पयामास च शोकदीनां तदागमप्रीतिषु तापसीषु ।
निर्विष्टसारां पितृभिर्हिमांशोरन्त्यां कलां दर्श इवौषधीषु ॥८०॥

---

१. भवो० म., भव० हे. । भयेन भवभयमपि नो न गृह्णेत ।

ता इङ्गुदीस्नेहकृतप्रदीपमास्तीर्णमेध्याजिनतल्पमन्तः ।
तस्यै सपर्यानुपदं दिनान्ते निवासहेतोरुटजं वितेरुः ।।८१।।

तत्राभिषेकप्रयता वसन्ती प्रयुक्तपूजा विधिनाऽतिथिभ्यः ।
वन्येन सा वल्कलिनी शरीरं पत्युः प्रजासन्ततये बभार ।।८२।।

अपि प्रभुः सानुशयोऽधुना स्यात्[1] किमुत्सुकः शक्रजितोऽपि हन्ता ।
शशंस सीतापरिदेवनान्तमनुष्ठितं शासनमग्रजाय ।।८३।।

बभूव रामः सहसा सबाष्पस्तुषारवर्षीव सहस्यचन्द्रः ।
कौलीनभीतेन गृहान्निरस्ता न तेन वैदेहसुता मनस्तः ।।८४।।

निगृह्य शोकं स्वयमेव धीमान् वर्णाश्रमावेक्षणजागरूकः ।
स भ्रातृसाधारणभोगमृद्धं राज्यं रजोरिक्तमनाः शशास ।।८५।।

तामेकभार्यां परिवादभीरोः साध्वीमपि त्यक्तवतो नृपस्य ।
वक्षस्यसंघट्टसुखं वसन्ती रेजे सपत्नीरहितेव लक्ष्मीः ।।८६।।

सीतां हित्वा दशमुखरिपुर्नोपयेमे यदन्यां
तस्या एव प्रतिकृतिसखो यत् क्रतूनाजहार ।
वृत्तान्तेन श्रवणविषयप्रापिणा तेन भर्तुः
सा दुर्वारं कथमपि परित्यागदुःखं विषेहे ।।८७।।

।। इति श्रीमहाकविकालिदासकृतौ रघुवंशे महाकाव्ये
सीतापरित्यागो नाम चतुर्दशः सर्गः ।।

---

१. दित्यु॰ हे.

पञ्चदशः सर्गः

कृतसीतापरित्यागः स रत्नाकरमेखलाम् ।
बुभुजे पृथिवीपालः पृथिवीमेव केवलाम् ॥१॥

लवणेन विलुप्तेज्यास्तामिस्रेण तमभ्ययुः ।
मुनयो यमुनाभाजः शरण्यं शरणार्थिनः ॥२॥

अवेक्ष्य रामं ते तस्मिन्न प्रजह्रुः स्वतेजसा ।
त्राणाभावे हि शापास्त्राः कुर्वन्ति तपसो व्ययम् ॥३॥

प्रतिशुश्राव काकुत्स्थस्तेभ्यो विघ्नप्रतिक्रियाम् ।
धर्मसंरक्षणार्थैव प्रवृत्तिर्भुवि शार्ङ्गिणः ॥४॥

ते रामाय वधोपायमाचख्युर्विबुधद्विषः ।
दुर्जयो लवणः शूली विशूलः प्रार्थ्यतामिति ॥५॥

आदिदेशाथ शत्रुघ्नं तेषां क्षेमाय राघवः ।
करिष्यन्निव नामास्य यथार्थमरिनिग्रहात् ॥६॥

यः कश्चन रघूणां हि परमेकः परन्तपः ।
अपवाद इवोत्सर्गं व्यावर्तयितुमीश्वरः ॥७॥

अग्रजेन प्रयुक्ताशीस्ततो दाशरथी रथी ।
ययौ वनस्थलीः पश्यन् पुष्पिताः सुरभीरभीः ॥८॥

रामादेशादनुगता सेना तस्यार्थसिद्धये ।
पश्चादध्ययनार्थस्य धातोरधिरिवाभवत् ॥९॥

आदिष्टवर्त्मा मुनिभिः स गच्छँस्तपतां वरः ।
विरराज रथप्रष्ठैर्वालखिल्यैरिवांशुमान् ॥१०॥

तस्य मार्गवशादेका बभूव वसतिः सतः।
रथस्वनोत्कण्ठमृगे वाल्मीकीये तपोवने ॥११॥

तमृषिः पूजयामास कुमारं क्लान्तवाहनम्।
तपःप्रभावसिद्धाभिर् विशेषप्रतिपत्तिभिः ॥१२॥

तस्यामेवास्य यामिन्यामन्तर्वत्नी प्रजावती।
सुतावसूत संपन्नौ कोशदण्डाविव क्षितिः ॥१३॥

संतानश्रवणाद् भ्रातुः सौमित्रिः सौमनस्यवान्।
प्राञ्जलिर्मुनिमामन्त्र्य प्रातर्युक्तरथो ययौ ॥१४॥

स च प्राप मधूपघ्नं कुम्भीनस्याश्च कुक्षिजः।
वनात् करमिवादाय सत्त्वराशिमुपस्थितः ॥१५॥

धूमधूम्रो वसागन्धी ज्वालाबभ्रुशिरोरुहः।
क्रव्याद्गणपरीवारश्चिताग्निरिव जङ्गमः ॥१६॥

अपशूलं तमासाद्य लवणं लक्ष्मणानुजः।
रुरोध संमुखीनो हि जयो रन्ध्रप्रहारिणाम् ॥१७॥

नातिपर्याप्तमालक्ष्य मत्कुक्षेरद्य भोजनम्।
दिष्ट्या त्वमसि मे धात्रा भीतेनेवोपपादितः ॥१८॥

इति संतर्ज्य शत्रुघ्नं राक्षसस्तज्जिघांसया।
प्रांशुमुत्पाटयामास मुस्तास्तम्बमिव द्रुमम् ॥१९॥

सौमित्रेर्निशितैर्बाणैरन्तरा शकलीकृतः।
गात्रं पुष्परजः प्राप न शाखी नैर्ऋतेरितः ॥२०॥

विनाशात् तस्य वृक्षस्य रक्षस्तस्मै महोपलम्।
प्रजिघाय कृतान्तस्य मुष्टिं पृथगिव स्थितम् ॥२१॥

ऐन्द्रमस्त्रमुपादाय शत्रुघ्नेन स ताडितः।
सिकतात्वादपि परां प्रपेदे परमाणुताम् ॥२२॥

तमुपाद्रवदुद्यम्य दक्षिणं दोर्निशाचरः ।
एकताल इवोत्पातपवनप्रेरितो गिरिः ॥२३॥

कार्ष्णेन पत्त्रिणा शत्रुः स भिन्नहृदयः पतन् ।
आनिनाय भुवः कम्पं जहाराश्रमवासिनाम् ॥२४॥

वयसां पङ्क्तयः पेतुर्हतस्योपरि विद्विषः ।
तत्प्रतिद्वन्द्विनो मूर्ध्नि दिव्याः कुसुमवृष्टयः ॥२५॥

स हत्वा लवणं वीरस्तदा मेने महौजसः ।
भ्रातुः सोदर्यमात्मानमिन्द्रजिद्वधशोभिनः ॥२६॥

तस्य संस्तूयमानस्य चरितार्थैस्तपस्विभिः ।
शुशुभे विक्रमोदग्रं व्रीडयाऽवनतं शिरः ॥२७॥

उपकूलं स कालिन्द्याः पुरीं पौरुषभूषणः ।
निर्ममे निर्ममोऽर्थेषु मधुरां मधुराऽऽकृतिः ॥२८॥

या सौराज्यप्रकाशाभिर्बभौ पौरविभूतिभिः ।
स्वर्गाभिष्यन्दवमनं कृत्वेवोपनिवेशिता ॥२९॥

तत्र सौधगतः पश्यन् यमुनां चक्रवाकिनीम् ।
हेमभक्तिमतीं भूमेः प्रवेणीमिव पिप्रिये ॥३०॥

सखा दशरथस्यापि जनकस्य च मन्त्रकृत् ।
संचस्कारोभयप्रीत्या मैथिलेयौ यथाविधि ॥३१॥

स तौ कुशलवोन्मृष्टगर्भक्लेदौ तदाख्यया ।
कविः कुशलवावेव चकार किल नामतः ॥३२॥

साङ्गं च वेदमध्याप्य किंचिदुत्क्रान्तशैशवौ ।
स्वकृतिं गापयामास कविप्रथमपद्धतिम् ॥३३॥

रामस्य मधुरं वृत्तं गायन्तौ मातुरग्रतः ।
तद्वियोगव्यथां किञ्चिच्छिथिलीचक्रतुः सुतौ ॥३४॥

इतरेऽपि रघोर्वंश्यास्त्रयस्त्रेताग्नितेजसः ।
तद्योगात् पतिवत्नीषु पत्नीष्वासन् द्विसूनवः ॥३५॥

शत्रुघातिनि शत्रुघ्नः सुबाहौ च बहुश्रुते ।
मधुराविदिशे सून्वोर्निदधे पूर्वजोत्सुकः ॥३६॥

भूयस्तपोव्ययो मा भूद् वाल्मीकेरिति सोऽत्यगात् ।
मैथिलीतनयोद्गीत — निःस्पन्दमृगमाश्रमम् ॥३७॥

वशी विवेश चायोध्यां रथ्यासंस्कारशोभिनीम् ।
लवणस्य वधात् पौरैरीक्षितोऽत्यन्तगौरवम् ॥३८॥

स ददर्श सभामध्ये सभासद्भिरुपस्थितम् ।
रामं सीतापरित्यागादसामान्यपतिं भुवः ॥३९॥

तमभ्यनन्दत् प्रणतं लवणान्तकमग्रजः ।
कालनेमिवधात् प्रीतस्तुराषाडिव शार्ङ्गिणम् ॥४०॥

स पृष्टः सर्वतो वार्त्तमाख्यद् राज्ञे न संततिम् ।
प्रत्यर्पयिष्यतः काले कवेराद्यस्य शासनात् ॥४१॥

अथ जानपदो विप्रः शिशुमप्राप्तयौवनम् ।
अवतार्याङ्कशय्यास्थं द्वारि चक्रन्द भूपतेः ॥४२॥

शोचनीयाऽसि वसुधे या त्वं दशरथाच्च्युता ।
रामहस्तमनुप्राप्य कष्टात् कष्टतरं गता ॥४३॥

श्रुत्वा तस्य शुचो हेतुं गोप्ता जिह्राय राघवः ।
न ह्यकालभवो मृत्युरिक्ष्वाकुपदमस्पृशत् ॥४४॥

स मुहूर्तं क्षमस्वेति द्विजमाश्वास्य दुःखितम् ।
यानं सस्मार कौबेरं [1]वैवस्वतजिगीषया ॥४५॥

आत्तशस्त्रस्तदध्यास्य प्रस्थितः स रघूद्वहः ।
उच्चचार पुरस्तस्य गूढरूपा सरस्वती ॥४६॥

१. वैवस्वतस्य यमस्य.

राजन् प्रजासु ते कश्चिदपचारः प्रवर्तते ।
तमन्विष्य प्रशमयेर्भवितासि ततः कृती ॥४७॥

इत्याप्तवचनाद् रामो विनेष्यन् वर्णविक्रियाम् ।
दिशः पपात पत्त्रेण वेगनिष्कम्पकेतुना ॥४८॥

अथ धूमाभिताम्राक्षं वृक्षशाखावलम्बिनम् ।
ददर्श कञ्चिदैक्ष्वाकस्तपस्यन्तमधोमुखम् ॥४९॥

पृष्टनामान्वयो राज्ञा स किलाचष्ट धूमपः ।
आत्मानं शम्बुकं नाम शूद्रं सुरपदार्थिनम् ॥५०॥

तपस्यनधिकारित्वात् प्रजानां तमघावहम् ।
शीर्षच्छेद्यं परिच्छिद्य नियन्ता शस्त्रमाददे ॥५१॥

स तद्वक्त्रं हिमक्लिष्टकिञ्जल्कमिव पङ्कजम् ।
ज्योतिष्कणाहतश्मश्रु कण्ठनालादपातयत् ॥५२॥

कृतदण्डः स्वयं राज्ञा लेभे शूद्रः सतां गतिम् ।
तपसा दुश्चरेणापि न स्वमार्गविलङ्घिना ॥५३॥

रघुनाथोऽप्यगस्त्येन मार्गसंदर्शितात्मना ।
महौजसा संयुयुजे शरत्काल इवेन्दुना ॥५४॥

कुम्भयोनिरलंकारं तस्मै दिव्यपरिग्रहम् ।
ददौ दत्तं समुद्रेण पीतेनेवात्मनिष्क्रयम् ॥५५॥

तं दधन्मैथिलीकण्ठनिर्व्यापारेण बाहुना ।
पश्चान्निववृते रामः प्राक् परासुर्द्विजात्मजः ॥५६॥

तस्य पूर्वोदितां निन्दां द्विजः पुत्रसमागतः ।
स्तुत्या निवर्तयामास त्रातुर्वैवस्वतादपि ॥५७॥

तमध्वराय मुक्ताश्वं रक्षःकपिनरेश्वराः ।
मेघाः सस्यमिवाम्भोभिरभ्यवर्षन्नुपायनैः ५८॥

दिग्भ्यो निमन्त्रिताश्चैनमभिजग्मुर्महर्षयः ।
न भौमान्येव धिष्ण्यानि हित्वा ज्योतिर्मयान्यपि ॥५६॥

उपशल्यनिविष्टैस्तैश्चतुर्द्वारमुखी बभौ ।
अयोध्या सृष्टलोकेव सद्यः पैतामही तनुः ॥६०॥

श्लाघ्यस्त्यागोऽपि वैदेह्याः पत्युः प्राग्वंशवासिनः ।
अनन्यजानेः सैवासीद् यस्माज्जायाहिरण्मयी ॥६१॥

विधेरधिकसंभारस्ततः प्रववृते मखः ।
आसन् यत्र क्रियाविघ्ना राक्षसा एव रक्षिणः ॥६२॥

अथ प्राचेतसोपज्ञं रामायणमितस्ततः ।
मैथिलेयौ कुशलवौ जगतुर्गुरुचोदितौ[1] ॥६३॥

वृत्तं रामस्य वाल्मीकेः कृतिस्तौ किन्नरस्वनौ ।
किं तद् येन मनो हर्तुमलं स्यातां न शृण्वताम् ॥६४॥

रूपे गीते च माधुर्यं तयोस्तज्ज्ञैर्निवेदितम् ।
ददर्श सानुजो रामः शुश्राव च कुतूहली ॥६५॥

तद्गीतश्रवणैकाग्रा संसदश्रुमुखी बभौ ।
हिमनिष्यन्दिनी प्रातर्निर्वातेव वनस्थली ॥६६॥

वयोवेषविसंवादी रामस्य च तयोस्तदा ।
जनता प्रेक्ष्य सादृश्यं नाक्षिकम्पं व्यतिष्ठत ॥६७॥

उभयोर्न तथा लोकः प्रवीण्येन विसिष्मये ।
नृपतेः प्रीतिदानेषु वीतस्पृहतया यथा ॥६८॥

गेये को नु विनेता वां कस्य चेयं कृतिः कवेः ।
इति राज्ञा स्वयं पृष्टौ तौ वाल्मीकिमशंसताम् ॥६६॥

---

१. एतेन स्थितमिदं यद् वाल्मीकिरामायणोत्तरकाण्डं कालिदासोऽध्यगीष्ट ।

अथ सावरजो रामः प्राचेतसमुपेयिवान् ।
ऊरीकृत्यात्मनो देहं राज्यमस्मै न्यवेदयत् ॥७०॥

स तावाख्याय रामाय मैथिलेयौ तदात्मजौ ।
कविः कारुणिको वव्रे सीतायाः संपरिग्रहम् ॥७१॥

तात शुद्धा समक्षं नः स्नुषा ते जातवेदसि ।
दौरात्म्याद् रक्षसस्तां तु नात्रत्याः श्रद्दधुः प्रजाः ॥७२॥

ताः स्वचारित्रमुद्दिश्य प्रत्याययतु मैथिली ।
ततः पुत्रवतीमेनां प्रतिपत्स्ये त्वदाज्ञया ॥७३॥

इति प्रतिश्रुते राज्ञा जानकीमाश्रमान्मुनिः ।
शिष्यैरानाययामास स्वसिद्धिं नियमैरिव ॥७४॥

अन्येद्युरथ काकुत्स्थः संनिपात्य पुरौकसः ।
कविमाह्वाययामास प्रस्तुतप्रतिपत्तये ॥७५॥

स्वरसंस्कारवत्यासौ पुत्राभ्यामथ सीतया ।
ऋचेवोदर्चिषं सूर्यं रामं मुनिरुपस्थितः ॥७६॥

काषायपरिवीतेन स्वपदार्पितचक्षुषा ।
अन्वमीयत शुद्धेति शान्तेन वपुषैव सा ॥७७॥

जनास्तदालोकपथात् प्रतिसंहृतचक्षुषः ।
तस्थुस्तेऽवाङ्मुखाः सर्वे फलिता इव शालयः ॥७८॥

तां दृष्टिविषये भर्तुर्मुनिरास्थितविष्टरः ।
कुरु निःसंशयं वत्से स्ववृत्ते लोकमित्यशात् ॥७९॥

अथ वाल्मीकिशिष्येण पुण्यमावर्जितं पयः ।
आचम्योदीरयामास सीता सत्यां सरस्वतीम् ॥८०॥

वाङ्मनःकर्मभिः पत्यौ व्यभिचारो यथा न मे ।
तथा विश्वम्भरे देवि मामन्तर्धातुमर्हसि ॥८१॥

एवमुक्ते तया साध्व्या रन्ध्रात् सद्योभवाद् भुवः ।
शातह्रदमिव ज्योतिः प्रभामण्डलमुद्ययौ ॥८२॥

तत्र नाग – फणोत्क्षिप्त – सिंहासन – निषेदुषी ।
समुद्ररसना साक्षात् प्रादुरासीद् वसुन्धरा ॥८३॥

सा सीतामङ्कमारोप्य भर्तृप्रणिहितेक्षणाम् ।
मा मेति व्याहरत्येव तस्मिन् पातालमभ्यगात् ॥८४॥

धरायां तस्य संरम्भं सीताप्रत्यर्पणैषिणः ।
गुर्विधिबलापेक्षी शमयामास धन्विनः ॥८५॥

ऋषीन् विसृज्य यज्ञान्ते सुहृदश्रु-पुरस्कृतान् ।
रामः सीतागतं स्नेहं निदधे तदपत्ययोः ॥८६॥

युधाजितश्च संदेशात् स देशं सिन्धुनामकम् ।
ददौ दत्तप्रभावाय भरताय भृतप्रजः ॥८७॥

भरतस्तत्र गन्धर्वान् युधि निर्जित्य केवलम् ।
आतोद्यं ग्राहयामास समत्याजयदायुधम् ॥८८॥

स तक्षपुष्कलौ पुत्रौ राजधान्यास्तदाख्ययोः ।
अभिषिच्याभिषेकार्हौ रामान्तिकमगात् पुनः ॥८९॥

अङ्गदं चन्द्रकेतुं च लक्ष्मणोऽप्यात्मसंभवौ ।
शासनाद् रघुनाथस्य चक्रे कारापथेश्वरौ ॥९०॥

इत्यारोपितपुत्रास्ते जननीनां जनेश्वराः ।
भर्तृलोकप्रपन्नानां निवापान् विदधुः क्रमात् ॥९१॥

उपेत्य मुनिवेषोऽथ कालः प्रोवाच राघवम् ।
रहः—संवादिनौ पश्येदावां यस्तं त्यजेरिति ॥९२॥

तथेति प्रतिपन्नाय विवृतात्मा नृपाय सः ।
आचख्यौ दिवमध्यास्व शासनात् परमेष्ठिनः ॥९३॥

विद्वानपि तयोर्द्वाःस्थः समयं लक्ष्मणोऽभिनत् ।
भीतो दुर्वाससः शापाद् रामसंदर्शनार्थिनः ॥९४॥

स गत्वा सरयूतीरं देहत्यागेन योगवित् ।
चकारावितथां भ्रातुः प्रतिज्ञां पूर्वजन्मनः ॥९५॥

तस्मिन्नात्मचतुर्भागे प्राङ्नाकमधितस्थुषि ।
राघवः शिथिलं तस्थौ भुवि धर्मस्त्रिपादिव ॥९६॥

स निवेश्य कुशावत्यां रिपुनागाङ्कुशं कुशम् ।
शरावत्यां सतां सूक्तैर्जनिताश्रुलवं लवम् ॥९७॥

उदक् प्रतस्थे स्थिरधीः सानुजोऽग्निपुरःसरः ।
अन्वितः पतिवात्सल्याद् गृहवर्जमयोध्यया ॥९८॥

जगृहुस्तस्य चित्तज्ञाः पदवीं हरिराक्षसाः ।
कदम्बमुकुलस्थूलैरभिवृष्टां प्रजाश्रुभिः ॥९९॥

उपस्थितविमानेन तेन भक्तानुकम्पिना ।
चक्रे त्रिदिवनिःश्रेणिः सरयूरनुयायिनाम् ॥१००॥

यद् [1]गोप्रतरकल्पोऽभूत् संमर्दस्तत्र मज्जताम् ।
अतस्तदाख्यया तीर्थं पावनं भुवि पप्रथे ॥१०१॥

स विभुर्विबुधांशेषु प्रतिपन्नात्ममूर्तिषु ।
त्रिदशीभूतपौराणां स्वर्गान्तरमकल्पयत् ॥१०२॥

निर्वर्त्यैवं दशमुख-[2]भयच्छेदकार्यं सुराणां
विष्वक्सेनः स्वतनुमविशत् सर्वलोकप्रतिष्ठाम् ।
लङ्कानाथं पवनतनयं चोभयं स्थापयित्वा
कीर्तिस्तम्भद्वयमिव गिरौ दक्षिणे चोत्तरे च ॥१०३॥

॥ इति श्रीमहाकविकालिदासकृतौ रघुवंशे महाकाव्ये
रामस्वर्गारोहणो नाम पञ्चदशः सर्गः ॥

●

१. प्रतरः तरणम्   २. शिरश्छे० म.

षोडशः सर्गः

अथेतरे सप्त रघुप्रवीरा ज्येष्ठं पुरोजन्मतया गुणैश्च ।
चक्रुः कुशं रत्नविशेषभाजं सौभ्रात्रमेषां हि कुलानुसारि ॥१॥

ते सेतुवार्त्तागजवन्धमुख्यैरभ्युच्छ्रिताः कर्मभिरप्यवन्ध्यैः ।
अन्योन्यदेशप्रविभागसीमां वेलां समुद्रा इव न व्यतीयुः ॥२॥

चतुर्भुजांशप्रभवः स तेषां दानप्रवृत्तेरनुपारतानाम् ।
सुरद्विपानामिव सामयोनिर्भिन्नोऽष्टधा विप्रससार वंशः ॥३॥

अथार्धरात्रे स्तिमितप्रदीपे शय्यागृहे सुप्तजने प्रबुद्धः ।
कुशः प्रवासस्थकलत्रवेषामदृष्टपूर्वां वनितामपश्यत् ॥४॥

सा साधुसाधारणपार्थिवर्द्धेः स्थित्वा पुरस्तात् पुरुहूतभासः ।
जेतुः परेषां जयशब्दपूर्वं तस्याञ्जलिं वन्धुमतो ववन्ध ॥५॥

अथानपोढार्गलमप्यगारं छायामिवादर्शतलं प्रविष्टाम् ।
सविस्मयो दाशरथेस्तनूजः प्रोवाच पूर्वार्धविसृष्टतल्पः ॥६॥

लब्धान्तरा सावरणेऽपि गेहे योगप्रभावो न च लक्ष्यते ते ।
विभर्षि चाकारमनिर्वृतानां मृणालिनी हैममिवोपरागम् ॥७॥

का त्वं शुभे कस्य परिग्रहो वा किंवा मदभ्यागमकारणं ते ।
आचक्ष्व मत्वा वशिनां रघूणां मनः परस्त्रीविमुखप्रवृत्ति ॥८॥

तमब्रवीत् सा गुरुणानवद्या या नीतपौरा स्वपदोन्मुखेन ।
तस्याः पुरः संप्रति वीतनाथां जानीहि राजन्नधिदेवतां माम् ॥९॥

वस्वौकसारामभिभूय साहं सौराज्यवद्धोत्सवया विभूत्या ।
समग्रशक्तौ त्वयि सूर्यवंश्ये सति प्रपन्ना करुणामवस्थाम् ॥१०॥

विशीर्णतल्पाट्टशतो निवेशः पर्यस्तसालः प्रभुणा विना मे ।
विडम्बयत्यस्तनिमग्नसूर्यं दिनान्तमुग्रानिलभिन्नमेघम् ॥११॥

निशासु भास्वत्कलनूपुराणां यः संचरोऽभूदभिसारिकाणाम् ।
नदन्मुखोल्काविचितामिषाभिः स वाह्यते राजपथः शिवाभिः ॥१२॥

आस्फालितं यत् प्रमदाकराग्रैर्मृदङ्गधीरध्वनिमन्वगच्छत् ।
वन्यैरिदानीं महिषैस्तदम्भः शृङ्गाहतं क्रोशति दीर्घिकाणाम् ॥१३॥

वृक्षेशया यष्टिनिवासभङ्गान्मृदङ्गशब्दापगमादलास्याः ।
प्राप्ता दवोल्काहतशेषबर्हाः क्रीडामयूरा वनबर्हिणत्वम् ॥१४॥

सोपानमार्गेषु च येषु रामा निक्षिप्तवत्यश्चरणान् सरागान् ।
सद्यो हतन्यङ्कुभिरस्रदिग्धं व्याघ्रैः पदं तेषु निधीयते मे ॥१५॥

चित्रद्विपाः[1] पद्मवनावतीर्णाः करेणुभिर्दत्तमृणालभङ्गाः ।
नखाङ्कुशाघातविभिन्नकुम्भाः संरब्धसिंहप्रहृतं वहन्ति ॥१६॥

स्तम्भेषु योषित्प्रतियातनानामुत्क्रान्तवर्णक्रमधूसराणाम् ।
स्तनोत्तरीयाणि भवन्ति सङ्गान्निर्मोकपट्टाः फणिभिर्विमुक्ताः ॥१७॥

कालान्तरश्यामसुधेषु नक्तमितस्ततो रूढतृणाङ्कुरेषु ।
त एव मुक्तागुणशुद्धयोऽपि हर्म्येषु मूर्च्छन्ति न चन्द्रपादाः ॥१८॥

आवर्ज्य शाखाः सदयं च यासां पुष्पाण्युपात्तानि विलासिनीभिः ।
वन्यैः पुलिन्दैरिव वानरैस्ताः क्लिश्यन्त उद्यानलता मदीयाः ॥१९॥

रात्रावनाविष्कृतदीपभासः कान्तामुखश्रीवियुता दिवापि ।
तिरस्क्रियन्ते कृमितन्तुजालैर्विच्छिन्नधूप[2]प्रसरा गवाक्षाः ॥२०॥

बलिक्रियावर्जितसैकतानि स्नानीयसंसर्गमनाप्नुवन्ति ।
उपान्तवानीरगृहाणि दृष्ट्वा शून्यानि दूये सरयूजलानि ॥२१॥

---

१. आलेख्य-चित्रिता द्विपा इत्यर्थः । २. धूम० म.

तदर्हसीमां वसतिं विसृज्य मामभ्युपेतुं कुलराजधानीम् ।
हित्वा तनुं कारणमानुषीं तां यथा गुरुस्ते परमात्ममूर्तिम् ॥२२॥

तथेति तस्याः प्रणयं[1] प्रतीतः प्रत्यग्रहीत् प्राग्रहरो रघूणाम् ।
पूरप्यभिव्यक्तमुखप्रसादा शरीरबन्धेन तिरोबभूव ॥२३॥

तदद्भुतं संसदि रात्रिवृत्तं प्रातर्द्विजेभ्यो नृपतिः शशंस ।
श्रुत्वा त एनं कुलराजधान्या साक्षात्पतित्वे वृतमभ्यनन्दन् ॥२४॥

कुशावतीं श्रोत्रियसात् स कृत्वा यात्रानुकूलेऽहनि सावरोधः ।
अनुद्रुतो वायुरिवाभ्रवृन्दैः सैन्यैरयोध्याभिमुखः प्रतस्थे ॥२५॥

सा केतुमालोपवना बृहद्भिर्विहारशैलानुगतेव नागैः ।
सेना रथोदारगृहा प्रयाणे तस्याभवज्जङ्गमराजधानी ॥२६॥

तेनातपत्रामलमण्डलेन प्रस्थापितः पूर्वनिवासभूमिम् ।
बभौ बलौघः शशिनोदितेन वेलामुदन्वानिव नीयमानः ॥२७॥

तस्य प्रयातस्य वरूथिनीनां पीडामपर्याप्तवतीव सोढुम् ।
वसुन्धरा विष्णुपदं द्वितीयमध्यारुरोहेव रजश्छलेन ॥२८॥

उद्यच्छमाना गमनाय पश्चात् पुरो निवेशे पथि च व्रजन्ती ।
सा यत्र सेना ददृशे नृपस्य तत्रैव सामग्र्यमतिं चकार ॥२९॥

तस्य द्विपानां मदवारिसेकात् खुराभिघाताच्च तुरङ्गमाणाम् ।
रेणुः प्रपेदे पथि पङ्कभावं पङ्कोऽपि रेणुत्वमियाय नेतुः ॥३०॥

मार्गैषिणी सा कटकान्तरेषु वैन्ध्येषु सेना बहुधा विभिन्ना ।
चकार रेवेव महाविरावा बद्धप्रतिश्रुन्ति गुहामुखानि ॥३१॥

स धातुभेदारुणयाननेमिः प्रभुः प्रयाणध्वनिमिश्रतूर्यः ।
व्यलङ्घयद् विन्ध्यमुपायनानि पश्यन् पुलिन्दैरुपपादितानि ॥३२॥

तीर्थे तदीये गजसेतुबन्धात् प्रतीपगामुत्तरतोऽस्य गङ्गाम् ।
अयत्नवालव्यजनीबभूवुर्हंसा नभोलङ्घनलोलपक्षाः ॥३३॥

१. प्रणयः प्रीतिपूर्णा याच्ञा। र. २।३६, १९।२१, वि. ४।१३, १५ श्लो० मे० ११५.

स पूर्वजानां कपिलेन रोषाद् भस्मावशेषीकृतविग्रहाणाम् ।
सुराऽलयप्राप्तिनिमित्तमम्भस्त्रैस्रोतसं नौलुलितं ववन्दे ।।३४।।

इत्यध्वनः कैश्चिदहोभिरन्ते कूलं समासाद्य कुशः सरय्वाः ।
वेदिप्रतिष्ठान् वितताध्वराणां यूपानपश्यच्छतशो रघूणाम् ।।३५।।

आधूय शाखाः कुसुमद्रुमाणां स्पृष्ट्वा च शीतान् सरयूतरङ्गान् ।
तं क्लान्तसैन्यं कुलराजधान्याः प्रत्युज्जगामोपवनान्तवायुः ।।३६।।

अथोपशल्ये रिपुमग्नशल्यस्तस्याः पुरः पौरसखः स राजा ।
कुलध्वजस्तानि चलध्वजानि निवेशयामास वली वलानि ।।३७।।

तां शिल्पिसंघाः प्रभुणा नियुक्तास्तथागतां संभृतसाधनत्वात् ।
पुरं नवीचक्रुरपां विसर्गान्मेघा निदाघग्लपितामिवोर्वीम् ।।३८।।

ततः सपर्यां सपशूपहारां पुरः परार्ध्यप्रतिमागृहायाः ।
उपोषितैर्वास्तुविधानविद्भिर्निर्वर्तयामास रघुप्रवीरः ।।३९।।

तस्याः स राजोपपदं निशान्तं कामीव कान्ताहृदयं प्रविश्य ।
यथार्हमन्यैरनुजीविलोकं संभावयामास यथाप्रधानम् ।।४०।।

सा मन्दुरासंश्रयिभिस्तुरङ्गैः शालाविधिस्तम्भगतैश्च नागैः ।
पूराबभासे विपणिस्थपण्या सर्वाङ्गनद्धाभरणेव नारी ।।४१।।

वसन् स तस्यां वसतौ रघूणां पुराणशोभामधिरोपितायाम् ।
न मैथिलेयः स्पहयाम्बभूव भर्त्रे दिवो नाप्यलकेश्वराय ।।४२।।

अथास्य रत्नग्रथितोत्तरीयमेकान्तपाण्डुस्तनलम्विहारम् ।
निःश्वासहार्यांशुकमाजगाम घर्मः[1] प्रियावेषमिवोपदेष्टुम् ।।४३।।

अगस्त्यचिह्नादयनात् समीपं दिगुत्तरा भास्वति संनिवृत्ते ।
आनन्दशीतामिव वाष्पवृष्टिं हिमस्रुतिं हैमवतीं ससर्ज ।।४४।।

प्रवृद्धतापो दिवसोऽतिमात्रमत्यर्थमेव क्षणदा च तन्वी ।
उभौ विरोधक्रियया विभिन्नौ जायापती सानुशयाविवास्ताम् ।।४५।।

---

१. घर्मो ग्रीष्मकालः ।

दिने दिने शैवलवन्त्यधस्तात् सोपानपर्वाणि विमुञ्चदम्भः ।
उद्दण्डपद्मं गृहदीर्घिकाणां नारीनितम्बद्वयसं बभूव ॥४६॥

वनेषु सायन्तनमल्लिकानां विजृम्भणोद्गन्धिषु कुड्मलेषु ।
प्रत्येकनिक्षिप्तपदः सशब्दं संख्यामिवैषां भ्रमरश्चकार ॥४७॥

स्वेदानुविद्धार्द्रनखक्षताङ्के भूयिष्ठसंदष्टशिखं कपोले ।
च्युतं न कर्णादपि कामिनीनां शिरीषपुष्पं सहसा पपात ॥४८॥

यन्त्रप्रवाहैः शिशिरैः परीतान् रसेन धौतान् मलयोद्भवस्य ।
शिलाविशेषानधिशय्य निन्युर्धारागृहेष्वातपमृद्धिमन्तः ॥४९॥

स्नानार्द्रमुक्तेष्वनुधूपवासं विन्यस्तसायन्तनमल्लिकेषु ।
कामो वसन्तात्ययमन्दवीर्यः केशेषु लेभे बलमङ्गनानाम् ॥५०॥

आपिञ्जरा बद्धरजःकणत्वान्मञ्जर्युदारा शुशुभेऽर्जुनस्य ।
दग्ध्वापि देहं गिरिशेन रोषात् खण्डीकृता ज्येव मनोभवस्य ॥५१॥

मनोज्ञगन्धं सहकारभङ्गं पुराणशीधुं नवपाटलं च ।
संबध्नता कामिजनेषु दोषाः सर्वे निदाघावधिना प्रमृष्टाः ॥५२॥

जनस्य तस्मिन् समये विगाढे बभूवतुर् द्वौ सविशेषकान्तौ ।
तापापनोदक्षमपादसेवौ स चोदयस्थो नृपतिः शशी च ॥५३॥

अथोर्मिलोलोन्मदराजहंसे रोधोलतापुष्पवहे सरय्वाः ।
विहर्तुमिच्छा वनितासखस्य तस्याम्भसि ग्रीष्मसुखे बभूव ॥५४॥

स तीरभूमौ विहितोपकार्यामानायिभिस्तामपकृष्टनक्राम् ।
विगाहितुं श्रीमहिमानुरूपं प्रचक्रमे चक्रधरप्रभावः ॥५५॥

सा तीरसोपानपथावतारादन्योन्यकेयूरविघट्टिनीभिः ।
सनूपुरक्षोभपदाभिरासीदुद्विग्नहंसा सरिदङ्गनाभिः ॥५६॥

परस्पराभ्युक्षणतत्पराणां तासां नृपो मज्जनरागदर्शी ।
नौसंश्रयः पार्श्वगतां किरातीमुपात्तबालव्यजनां बभाषे ॥५७॥

पश्यावरोधैः शतशो मदीयैर्विगाह्यमानो गलिताङ्गरागैः ।
सन्ध्योदयः साभ्र इवैष वर्णं पुष्यत्यनेकं सरयूप्रवाहः ॥५८॥

विलुप्तमन्तःपुरसुन्दरीणां यदञ्जनं नौलुलिताभिरद्भिः ।
तद् बध्नतीभिर्मदरागशोभां विलोचनेषु प्रतिमुक्तमासाम् ॥५९॥

एता गुरुश्रोणिपयोधरत्वादात्मानमुद्वोढुमशक्नुवत्यः ।
गाढाङ्गदैर्बाहुभिरप्सु बालाः क्लेशोत्तरं रागवशात् प्लवन्ते ॥६०॥

अमी शिरीषप्रसवावतंसाः प्रभ्रंशिनो वारिविहारिणीनाम् ।
पारिप्लवाः स्रोतसि निम्नगायाः शैवाललोलाँश्छलयन्ति मीनान्॥६१॥

आसां जलास्फालनतत्पराणां मुक्ताफलस्पर्धिषु सीकरेषु ।
पयोधरोत्सर्पिषु शीर्यमाणः संलक्ष्यते न च्छिदुरोऽपि हारः ॥६२॥

आवर्तशोभा नतनाभिकान्तेर्भङ्ग्यो भ्रुवां द्वन्द्वचराः स्तनानाम् ।
जातानि रूपावयवोपमानान्यदूरवर्तीनि विलासिनीनाम् ॥६३॥

तीरस्थलीबर्हिभिरुत्कलापैः प्रस्निग्धकेकैरभिनन्द्यमानम् ।
श्रोत्रेषु संमूर्च्छति रक्तमासां गीतानुगं वारिमृदङ्गवाद्यम् ॥६४॥

संदष्टवस्त्रेष्वबलानितम्बेष्विन्दु — प्रकाशान्तरितोडुतुल्याः ।
अमी जलापूरितसूत्रमार्गा मौनं भजन्ते रसनाकलापाः ॥६५॥

एताः करोत्पीडितवारिधारा दर्पात् सखीभिर्वदनेषु सिक्ताः ।
वक्रेतराग्रैरलकैस्तरुण्यश्चूर्णारुणान् वारिलवान् वमन्ति ॥६६॥

उद्बन्धकेशश्च्युतपत्त्रलेखो विश्लेषिमुक्ताफलपत्त्रवेष्टः ।
मनोज्ञ एव प्रमदामुखानामम्भोविहाराकुलितोऽपि वेषः ॥६७॥

स नौविमानादवतीर्य रेमे विलोलहारः सह ताभिरप्सु ।
स्कन्धावलग्नोद्धृतपद्मिनीकः करेणुभिर्वन्य इव द्विपेन्द्रः ॥६८॥

ततो नृपेणानुगताः स्त्रियस्ता भ्राजिष्णुना सातिशयं विरेजुः ।
प्रागेव मुक्ता नयनाभिरामाः प्राप्येन्द्रनीलं किमुतोन्मयूखम् ॥६९॥

वर्णोदकैः काञ्चनशृङ्गमुक्तैस्तमायताक्ष्यः प्रणयादसिञ्चन् ।
तथागतः सोऽतितरां बभासे सधातुनिष्यन्द इवाद्रिराजः ॥७०॥

तेनावरोधप्रमदासखेन विगाहमानेन सरिद्वरां ताम् ।
आकाशगङ्गारतिरप्सरोभिर्वृतो मरुत्वाननुयातलीलः ॥७१॥

यत् कुम्भयोनेरधिगम्य रामः कुशाय राज्येन समं दिदेश ।
तदस्य जैत्राभरणं विहर्तुरज्ञातपातं सलिले ममज्ज ॥७२॥

स्नात्वा यथाकाममसौ सदारस्तीरोपकार्यां गतमात्र एव ।
दिव्येन शून्यं वलयेन बाहुमुपोढनेपथ्यविधिर्ददर्श[1] ॥७३॥

जयश्रियः संवननं यतस्तदामुक्तपूर्वं गुरुणा च यस्मात् ।
सेहेऽस्य न भ्रंशमतो न लोभात् स तुल्यपुष्पाभरणो हि धीरः ॥७४॥

ततः समाज्ञापयदाशु सर्वानानायिनस्तद्विचये नदीष्णान् ।
वन्ध्यश्रमास्ते सरयूं विगाह्य तमूचुरम्लानमुखप्रसादाः ॥७५॥

कृतः प्रयत्नो न च देव लब्धं मग्नं पयस्याभरणोत्तमं ते ।
नागेन लौल्यात् कुमुदेन नूनमुपात्तमन्तर्ह्रदवासिना तत् ॥७६॥

ततः स कृत्वा धनुराततज्यं धनुर्धरः कोपविलोहिताक्षः ।
गारुत्मतं तीरगतस्तरस्वी भुजङ्गनाशाय समाददेऽस्त्रम् ॥७७॥

तस्मिन् ह्रदः संहितमात्र एव क्षोभात् समाविद्धतरङ्गहस्तः ।
रोधांसि निघ्नन्नवपातमग्नः करीव वन्यः परुषं ररास ॥७८॥

तस्मात् समुद्रादिव मथ्यमानादुद्वृत्तनक्रात् सहसोन्ममज्ज ।
लक्ष्म्येव सार्धं सुरराजवृक्षः कन्यां पुरस्कृत्य भुजङ्गराजः ॥७९॥

विभूषणप्रत्युपहारहस्तमुपस्थितं वीक्ष्य विशांपतिस्तम् ।
सौपर्णमस्त्रं प्रतिसंजहार प्रह्वेष्वनिर्बन्धरुषो हि सन्तः ॥८०॥

त्रैलोक्यनाथप्रभवं प्रभावात् कुशं द्विषामङ्कुशमस्त्रविद्वान् ।
मानोन्नतेनाप्यभिनन्द्य मूर्ध्ना मूर्धाभिषिक्तं कुमुदो बभाषे ॥८१॥

---

१. आद्यकर्मणि क्तः । ०मपोढ० म.

अवैमि कार्यान्तरमानुषस्य विष्णोः सुताख्यामपरां तनुं त्वाम् ।
सोऽहं कथं नाम तवाचरेयमाराधनीस्य धृतेर्विघातम् ॥८२॥

कराभिघातोत्थितकन्दुकेयमालोक्य वालाऽतिकुतूहलेन ।
हृदात् पतज्ज्योतिरिवान्तरिक्षादादत्त जैत्राभरणं त्वदीयम् ॥८३॥

तदेतदाजानुविलम्बिना ते ज्याघातरेखाकिणलाञ्छनेन ।
भुजेन रक्षापरिघेण भूमेरुपैतु योगं पुनरंसलेन ॥८४॥

इमां स्वसारं च यवीयसीं मे कुमुद्वतीं नार्हसि नानुमन्तुम् ।
आत्मापराधं नुदतीं चिराय शुश्रूषया पार्थिव पादयोस्ते ॥८५॥

इत्यूचिवानुपहृताभरणः क्षितीशं
श्लाघ्यो भवान् स्वजन इत्यनुभाषितारम् ।
संयोजयां विधिवदास समेतबन्धुः,
कन्यामयेन कुमुदः कुलभूषणेन ॥८६॥

तस्याः स्पृष्टे मनुजपतिना साहचर्याय हस्ते,
माङ्गल्योर्णावलयिनि पुरः पावकस्योच्छिखस्य ।
दिव्यस्तूर्यध्वनिरुदचरद् व्यश्नुवानो दिगन्तान्,
गन्धोदग्रं तदनु ववृषुः पुष्पमाश्चर्यमेघाः ॥८७॥

इत्थं नागस्त्रिभुवनगुरोरौरसं मैथिलेयं,
लब्ध्वा बन्धुं तमपि च कुशः पञ्चमं तक्षकस्य ।
एकः शङ्कां पितृवधरिपोरत्यजद् वैनतेया-
च्छान्तव्यालामवनिमपरः पौरकान्तः शशास ॥८८॥

॥ इति श्रीमहाकविकालिदासकृतौ रघुवंशे महाकाव्ये
कुश-कुमुद्वतीपरिणयो नाम षोडशः सर्गः ॥

सप्तदशः सर्गः

अतिथिं नाम काकुत्स्थात् पुत्रं प्राप कुमुद्वती ।
पश्चिमाद् यामिनीयामात् प्रसादमिव चेतना ॥१॥

स पितुः पितृमान् वंशं मातुश्चानुपमद्युतिः ।
अपुनात् सवितेवोभौ मार्गावुत्तरदक्षिणौ ॥२॥

तमादौ कुलविद्यानामर्थमर्थविदां वरः ।
पश्चात् पार्थिवकन्यानां पाणिमग्राहयत् पिता ॥३॥

जात्यस्तेनाभिजातेन शूरः शौर्यवता कुशः ।
अमन्यतैकमात्मानमनेकं वशिना वशी ॥४॥

स कुलोचितमिन्द्रस्य साहायकमुपेयिवान् ।
जघान समरे दैत्यं दुर्जयं तेन चावधि ॥५॥

तं स्वसा नागराजस्य कुमुदस्य कुमुद्वती ।
अन्वगात् कुमुदानन्दं शशाङ्कमिव कौमुदी ॥६॥

तयोर्दिवस्पतेरासीदेकः सिंहासनार्धभाक् ।
द्वितीयापि सखी शच्याः पारिजातांशभागिनी ॥७॥

तदात्मसंभवं राज्ये मन्त्रिवृद्धाः समादधुः ।
स्मरन्तः पश्चिमामाज्ञां भर्तुः संग्रामयायिनः ॥८॥

ते तस्य कल्पयामासुरभिषेकाय शिल्पिभिः ।
विमानं नवमुद्वेदि चतुःस्तम्भप्रतिष्ठितम् ॥९॥

तत्रैनं हेमकुम्भेषु संभृतैस्तीर्थवारिभिः ।
उपतस्थुः प्रकृतयो भद्रपीठोपवेशितम् ॥१०॥

नदद्भिः स्निग्धगम्भीरं तूर्यैराहतपुष्करैः ।
अन्वमीयत कल्याणं तस्याविच्छिन्नसंतति ॥११॥

दूर्वायवाङ्कुरप्लक्ष — त्वगभिन्नपुटोत्तरान् ।
ज्ञातिवृद्धैः प्रयुक्तान् स भेजे नीराजनाविधीन् ॥१२॥

पुरोहितपुरोगास्तं जिष्णुं जैत्रैरथर्वभिः ।
उपचक्रमिरे पूर्वमभिषेकं द्विजातयः ॥१३॥

तस्यौघमहती मूर्ध्नि निपतन्ती व्यरोचत ।
सशब्दमभिषेकश्रीर्गङ्गेव त्रिपुरद्विषः ॥१४॥

स्तूयमानः क्षणे तस्मिन्नलक्ष्यत स वन्दिभिः ।
प्रवृद्ध इव पर्जन्यः सारङ्गैरभिनन्दितः ॥१५॥

तस्य सन्मन्त्रपूताभिः स्नानमद्भिः प्रतीच्छतः ।
ववृधे वैद्युतस्याग्नेर्वृष्टिसेकादिव द्युतिः ॥१६॥

स तावदभिषेकान्ते स्नातकेभ्यो ददौ वसु ।
यावतैषां समाप्येरन् यज्ञाः पर्याप्तदक्षिणाः ॥१७॥

ते प्रीतमनसस्तस्मै यामाशिषमुदैरयन् ।
सा तस्य कर्मनिर्वृत्तैर्दूरं पश्चात्कृता फलैः ॥१८॥

वन्धच्छेदं स वद्धानां वधार्हाणामवध्यताम् ।
धुर्याणां च धुरो मोक्षमदोहं चादिशद् गवाम् ॥१९॥

क्रीडापतत्रिणोऽप्यस्य पञ्जरस्थाः शुकादयः ।
लब्धमोक्षास्तदादेशाद् यथेष्टगतयोऽभवन् ॥२०॥

ततः कक्ष्यान्तरन्यस्तं गजदन्तासनं शुचि ।
सोत्तरच्छदमध्यास्त नेपथ्यग्रहणाय सः ॥२१॥

तं धूपाश्यानकेशान्तं तोयनिर्णिक्तपाणयः ।
आकल्पसाधनैस्तैस्तैरुपसेदुः प्रसाधकाः ॥२२॥

तेऽस्य मुक्तागुणोन्नद्धं मौलिमन्तर्गतस्रजम् ।
प्रत्यूपुः पद्मरागेण प्रभामण्डलशोभिना ॥२३॥

चन्दनेनाङ्गरागं च मृगनाभिसुगन्धिना ।
समापय्य ततश्चक्रुः पत्रं विन्यस्तरोचनम् ॥२४॥

आमुक्ताभरणः स्रग्वी हंसचिह्नदुकूलवान् ।
आसीदतिशयप्रेक्ष्यः स राज्यश्रीवधूवरः ॥२५॥

नेपथ्यदर्शिनश्छाया तस्यादर्शे हिरण्मये ।
विरराजोदिते सूर्ये मेरौ कल्पतरोरिव ॥२६॥

स राजककुदव्यग्रपाणिभिः पार्श्ववर्तिभिः ।
ययावुदीरितालोकः सुधर्मानवमां सभाम् ॥२७॥

वितानसहितं तत्र भेजे पैतृकमासनम् ।
चूडामणिभिरुद्घृष्टपादपीठं महीक्षिताम् ॥२८॥

शुशुभे तेन चाक्रान्तं मङ्गलायतनं महत् ।
श्रीवत्सलक्षणं वक्षः कौस्तुभेनेव केशवम् ॥२९॥

वभौ भूयः कुमारत्वादाधिराज्यमवाप्य सः ।
रेखाभावादुपारूढः सामग्र्यमिव चन्द्रमाः ॥३०॥

प्रसन्नमुखरागं तं स्मितपूर्वाभिभाषिणम् ।
मूर्तिमन्तममन्यन्त विश्वासमनुजीविनः ॥३१॥

स पुरं पुरुहूतश्रीः कल्पद्रुमनिभध्वजाम् ।
क्रममाणश्चकार द्यां नागेनैरावतौजसा ॥३२॥

तस्यैकस्योच्छ्रितं छत्रं मूर्ध्नि तेनामलत्विषा ।
पूर्वराजवियोगौष्म्यं कृत्स्नस्य जगतो हृतम् ॥३३॥

धूमादग्नेः शिखाः पश्चादुदयादंशवो रवेः ।
सोऽतीत्य तेजसां वृत्तिं सममेवोत्थितो गुणैः ॥३४॥

तं प्रीतिविशदैर्नेत्रैरन्वयुः पौरयोषितः ।
शरत्प्रसन्नैर्ज्योतिर्भिर्विभावर्य इव ध्रुवम् ॥३५॥

अयोध्यादेवताश्चैनं प्रशस्तायतनार्चिताः ।
अनुदध्युरनुध्येयं सांनिध्यैः प्रतिमागतैः ॥३६॥

यावन्नाश्यायते वेदिरभिषेकजलाप्लुता ।
तावदेवास्य वेलान्तं प्रतापः प्राप दुःसहः ॥३७॥

वसिष्ठस्य गुरोर्मन्त्राः सायकास्तस्य धन्विनः ।
किं तत् साध्यं यदुभये साधयेयुर्न संगताः ॥३८॥

स धर्मस्थसखः शश्वदर्थिप्रत्यर्थिनां स्वयम् ।
ददर्श संशयच्छेद्यान् व्यवहारानतन्द्रितः ॥३९॥

ततः परमभिव्यक्तसौमनस्यनिवेदितैः
युयोज पाकाभिमुखैर्भृत्यान् विज्ञापनाफलैः ॥४०॥

प्रजास्तद्गुरुणा नद्यो नभसेव विवर्धिताः ।
तस्मिंस्तु भूयसीं वृद्धिं नभस्ये ता इवाययुः ॥४१॥

यदुवाच न तन्मिथ्या यद् ददौ न जहार तत् ।
सोऽभूद् भग्नव्रतः शत्रूनुद्धृत्य प्रतिरोपयन् ॥४२॥

वयोरूपविभूतीनामेकैकं मदकारणम् ।
तानि तस्मिन् समस्तानि न तस्योत्सिषिचे मनः ॥४३॥

इत्थं जनितरागासु प्रकृतिष्वनुवासरम् ।
अक्षोभ्यः स नवोऽप्यासीद् दृढमूल इव द्रुमः ॥४४॥

अनित्याः शत्रवो वाह्या विप्रकृष्टाश्च ते यतः ।
अतः सोऽभ्यन्तरान्नित्यान् षट् पूर्वमजयद् रिपून् ॥४५॥

प्रसादाभिमुखे तस्मिंश्चपलापि स्वभावतः ।
निकषे हेमरेखेव श्रीरासीदनपायिनी ॥४६॥

कातर्यं केवला नीतिः शौर्यं श्वापदचेष्टितम् ।
अतः सिद्धिं समेताभ्यामुभाभ्यामन्वियेष सः ॥४७॥

न तस्य मण्डले राज्ञो न्यस्तप्रणिधिदीधितेः ।
अदृष्टमभवत् किंचिद् व्यभ्रस्येव विवस्वतः ॥४८॥

रात्रिन्दिवविभागेषु यदादिष्टं महीक्षिताम् ।
तत् सिषेवे नियोगेन स विकल्पपराङ्मुखः ॥४९॥

मन्त्रः प्रतिदिनं तस्य बभूव सह मन्त्रिभिः ।
स जातु सेव्यमानोऽपि गुप्तद्वारो न सूच्यते ॥५०॥

परेषु स्वेषु च क्षिप्तैरविज्ञातपरस्परैः ।
सोऽपसर्पैर्जजागार यथाकालं स्वपन्नपि ॥५१॥

दुर्गाणि दुर्ग्रहाण्यासँस्तस्य रोद्धुरपि द्विषाम् ।
न हि सिंहो गजास्कन्दी भयाद् गिरिगुहाशयः ॥५२॥

भव्यमुख्याः समारम्भाः प्रत्यवेक्ष्या निरत्ययाः ।
गर्भशालिसधर्माणस्तस्य गूढं विपेचिरे ॥५३॥

अपथेन प्रववृते न जातूपचितोऽपि सः ।
वृद्धौ नदीमुखेनैव प्रस्थानं लवणाम्भसः ॥५४॥

कामं प्रकृतिवैराग्यं सद्यः शमयितुं क्षमः ।
यस्य कार्यः प्रतीकारः स तन्नैवोदपादयत् ॥५५॥

शक्येष्वेवाभवद् यात्रा तस्य शक्तिमतः सतः ।
समीरणसहायोऽपि नाम्भःप्रार्थी दवानलः ॥५६॥

न धर्ममर्थकामाभ्यां बबाधे न च तेन तौ ।
नार्थं कामेन कामं वा सोऽर्थेन सदृशस्त्रिषु ॥५७॥

हीनान्यनुपकर्तॄणि प्रवृद्धानि विकुर्वते ।
तेन मध्यमशक्तीनि मित्राणि स्थापितान्यतः ॥५८॥

परात्मनोः परिच्छिद्य शक्त्यादीनां बलाबलम् ।
ययावेभिर्बलिष्ठश्चेत् परस्मादास्त सोऽन्यथा ॥५९॥

कोशेनाश्रयणीयत्वमिति तस्यार्थसंग्रहः ।
अम्बुगर्भो हि जीमूतश्चातकैरभिनन्द्यते ॥६०॥

परकर्मापहः सोऽभूदुद्यतः स्वेषु कर्मसु ।
आवृणोदात्मनो रन्ध्रं रन्ध्रेषु प्रहरन् रिपून् ॥६१॥

पित्रा संवर्धितो नित्यं कृतास्त्रः सांपरायिकः ।
तस्य दण्डवतो दण्डः स्वदेहान्न व्यशिष्यत ॥६२॥

सर्पस्येव शिरोरत्नं नास्य शक्तित्रयं परः ।
स चकर्ष परस्मात् तदयस्कान्त इवायसम् ॥६३॥

वापीष्विव स्रवन्तीषु वनेषूपवनेष्विव ।
सार्थाः स्वैरं स्वकीयेषु चेरुर्वेश्मस्विवाद्रिषु ॥६४॥

तपो रक्षन् स विघ्नेभ्यस्तस्करेभ्यश्च संपदः ।
यथास्वमाश्रमैश्चक्रे वर्णैरपि षडंशभाक् ॥६५॥

खनिभिः सुषुवे[1] रत्नं क्षेत्रैः सस्यं वनैर्गजान् ।
दिदेश वेतनं तस्मै रक्षासदृशमेव भूः ॥६६॥

स गुणानां बलानां च षण्णां षण्मुखविक्रमः ।
बभूव विनियोगज्ञः साधनीयेषु वस्तुषु ॥६७॥

इति क्रमात् प्रयुञ्जानो राजनीतिं चतुर्विधाम् ।
आ तीर्थादप्रतीघातं स तस्याः फलमानशे ॥६८॥

कूटयुद्धविधिज्ञेऽपि तस्मिन् सन्मार्गयोधिनि ।
भेजेऽभिसारिकावृत्तिं जयश्रीर्वीरगामिनी[2] ॥६९॥

प्रायः प्रतापभग्नत्वादरीणां तस्य दुर्लभः ।
रणो गन्धद्विपस्येव गन्धभिन्नान्यदन्तिनः ॥७०॥

---

१. 'भूरत्र कर्त्री. २. ०कामिनी. हे.

प्रवृद्धौ हीयते चन्द्रः समुद्रोऽपि तथाविधः ।
स तु तत्समवृद्धिश्च न चाऽभूत् ताविव क्षयी ।।७१।।

सन्तस्तस्याभिगमनादत्यर्थं महतः कृशाः ।
उदधेरिव जीमूताः प्रापुर्दातृत्वमर्थिनः ।।७२।।

स्तूयमानः स जिह्राय स्तुत्यमेव समाचरन् ।
तथापि ववृधे तस्य तत्कारि-द्वेषिणो यशः ।।७३।।

दुरितं दर्शनेन घ्नँस्तत्त्वार्थेन नुदँस्तमः ।
प्रजाः स्वतन्त्रयाञ्चक्रे शश्वत् सूर्य इवोदितः ।।७४।।

इन्दोरगतयः पद्मे सूर्यस्य कुमुदेंऽशवः ।
गुणास्तस्य विपक्षेऽपि गुणिनो लेभिरेऽन्तरम् ।।७५।।

पराभिसंधानपरं यद्यप्यस्य विचेष्टितम् ।
जिगीषोरश्वमेधाय धर्म्यमेव बभूव तत् ।।७६।।

एवमुद्यन् प्रभावेण शास्त्रनिर्दिष्टवर्त्मना ।
वृषेव देवो देवानां राज्ञां राजा बभूव सः ।।७७।।

पञ्चमं लोकपालानामूचुः साधर्म्ययोगतः ।
भूतानां महतां षष्ठमष्टमं कुलभूभृताम् ।।७८।।

दूरापवर्जितच्छत्रैस्तस्याज्ञां [1]शासनार्पिताम् ।
दधुः शिरोभिर्भूपाला [2]शेषां पौरन्दरीमिव ।।७९।।

---

१. शासनं ताम्रपत्रादिषु दानाद्यादेशः ।

२. प्रसाददत्तां मालाम् द्र० कु० ३।२२, शा० ७।२, देवाः म. ।

ऋत्विजः स तथाऽऽनर्च दक्षिणाभिर्महाक्रतौ ।
यथा साधरणीभूतं नामास्य धनदस्य च ॥८०॥

इन्द्राद् वृष्टिर्नियमितगदोद्रेकवृत्तिर्यमोऽभूद्
यादोनाथः शिवजलपथः कर्मणे नौचराणाम् ।
पूर्वापेक्षी तदनु विदधे कोषवृद्धिं कुबेर-
स्तस्मिन् दण्डोपनतचरितं भेजिरे लोकपालाः॥८१॥

॥ इति श्रीमहाकविकालिदासकृतौ रघुवंशे महाकाव्ये
अतिथिवर्णनो नाम सप्तदशः सर्गः ॥



अष्टादशः सर्गः

स नैषधस्यार्थपतेः सुतायामुत्पादयामास निषिद्धशत्रुः ।
अनूनसारं निषधान्नगेन्द्रात् पुत्रं यमाहुर्निषधाख्यमेव ॥१॥

तेनोरुवीर्येण पिता प्रजायै कल्पिष्यमाणेन ननन्द यूना ।
सुवृष्टियोगादिव जीवलोकः सस्येन संपक्तिफलोन्मुखेन ॥२॥

शब्दादि निर्विश्य सुखं चिराय तस्मिन् प्रतिष्ठापितराजशब्दः ।
कौमुद्वतेयः कुमुदावदातैर्द्यामर्जितां कर्मभिरारुरोह ॥३॥

पौत्रः कुशस्यापि कुशेशयाक्षः ससागरां सागरधीरचेताः ।
एकातपत्रां भुवमेकवीरः पुरार्गलादीर्घभुजो बुभोज ॥४॥

तस्यानलौजास्तनयस्तदन्ते वंशश्रियं प्राप नलाभिधानः ।
यो नड्वलानीव गजः परेषां बलान्यमृद्नान्नलिनाभवक्त्रः ॥५॥

नभश्चरैर्गीतयशाः स लेभे नभस्तलश्यामतनुं तनूजम् ।
ख्यातं नभःशब्दमयेन नाम्ना कान्तं नभोमासमिव प्रजानाम् ॥६॥

तस्मै विसृज्योत्तरकोसलानां धर्मोत्तरस्तत्प्रभवे प्रभुत्वम् ।
मृगैरजर्यं जरसोपदिष्टमदेहबन्धाय पुनर्बबन्ध ॥७॥

तेन द्विपानामिव पुण्डरीको राज्ञामजय्योऽजनि पुण्डरीकः ।
शान्ते पितर्याहृतपुण्डरीका यं पुण्डरीकाक्षमिव श्रिता श्रीः ॥८॥

स क्षेमधन्वानममोघधन्वा पुत्रं प्रजाक्षेमविधानदक्षम् ।
क्ष्मां लम्भयित्वा क्षमयोपपन्नं वने तपः क्षान्ततरश्चचार ॥९॥

अनीकिनीनां समरेऽग्रयायी तस्यापि देवप्रतिमः सुतोऽभूत् ।
व्यश्रूयतानीकपदावसानं देवादि नाम त्रिदिवेऽपि यस्य ॥१०॥

पिता समाराधनतत्परेण पुत्रेण पुत्री स यथैव तेन ।
पुत्रस्तथैवात्मजवत्सलेन स तेन पित्रा पितृमान् बभूव ॥११॥

पूर्वस्तयोरात्मसमे चिरोढामात्मोद्भवे वर्णचतुष्टयस्य ।
धुरं निधायैकनिधिर्गुणानां जगाम यज्वा यजमानलोकम् ॥१२॥

वशी सुतस्तस्य वशंवदत्वात् स्वेषामिवासीद् द्विषतामपीष्टः ।
सकृद् विविग्नानपि हि प्रयुक्तं माधुर्यमीष्टे हरिणान् ग्रहीतुम् ॥१३॥

अहीनगुर्नाम स गां समग्रामहीनबाहुद्रविणः शशास ।
यो हीनसंसर्गपराङ्मुखत्वाद् युवाप्यनर्थैर्व्यसनैर्विहीनः ॥१४॥

गुरोः स चानन्तरमन्तरज्ञः पुंसां पुमानाद्य इवावतीर्णः ।
उपक्रमैरस्खलितैश्चतुर्भिश्चतुर्दिगीशश्चतुरो बभूव ॥१५॥

तस्मिन् प्रयाते परलोकयात्रां जेतर्यरीणां तनयं तदीयम् ।
उच्चैःशिरस्त्वाज्जितपारियात्रं[1] लक्ष्मीःसिषेवे किल पारियात्रम् ॥१६॥

तस्याभवत् सूनुरुदारशीलः शिलः शिलापट्टविशालवक्षाः ।
जितारिपक्षोऽपि शिलीमुखैर्यः शालीनतामव्रजदीड्यमानः ॥१७॥

तमात्मसंपन्नमनिन्दितात्मा कृत्वा युवानं युवराजमेव ।
सुखानि सोऽभुङ्क्त सुखोपरोधि वृत्तं हि राज्ञामुपरुद्धवृत्तम्[2] ॥१८॥

तं रागबन्धिष्ववितृप्तमेव भोगेषु सौभाग्यविशेषभोग्यम् ।
विलासिनीनामरतिक्षमापि जरा वृथा मत्सरिणी जहार ॥१९॥

उन्नाभ इत्युद्गतनामधेयस्तस्यायथार्थोन्नतनाभिरन्ध्रः ।
सुतोऽभवत् पङ्कजनाभकल्पः कृत्स्नस्य नाभिर्नृपमण्डलस्य ॥२०॥

ततः परं वज्रधरप्रभावस्तदात्मजः संयति वज्रघोषः ।
बभूव[3] वज्राकरभूषणायाः पतिः पृथिव्याः किल वज्रणाभः ॥२१॥

तस्मिन् गते द्यां सुकृतोपलब्धां तत्संभवं शङ्खणमर्णवान्ता ।
उत्खातशत्रुं वसुधोपतस्थे रत्नोपहारैरुदितैः खनिभ्यः ॥२२॥

१. पारियात्रः शैलः । २. उपरुद्धो बन्दी । ३. वज्राकरो रत्नाकरः ।

तस्यावसाने हरिदश्वधामा पित्र्यं प्रपेदे पदमश्विरूपः ।
वेलातटेषूषितसैनिकाश्वं पुराविदो यं व्युषिताश्वमाहुः ॥२३॥

आराध्य विश्वेश्वरमीश्वरेण तेन क्षितेर्विश्वसहो विजज्ञे ।
पातुं सहो विश्वसखः समग्रां विश्वम्भरामात्मजमूर्तिरात्मा ॥२४॥

अंशे हिरण्याक्षरिपोः स जाते हिरण्यनाभे तनये नयज्ञः ।
द्विषामसह्यः सुतरां तरूणां हिरण्यरेता इव सानिलोऽभूत् ॥२५॥

पिता पितॄणामनृणस्तमन्ते वयस्यनन्तानि सुखानि लिप्सुः ।
राजानमाजानुविलम्बिबाहुं कृत्वा कृती वल्कलवान् बभूव ॥२६॥

कौसल्य इत्युत्तरकोसलानां पत्युः पतङ्गान्वयभूषणस्य ।
तस्यौरसः सोमसुतः सुतोऽभून्नेत्रोत्सवः सोम इव द्वितीयः ॥२७॥

यशोभिराब्रह्मसभं प्रकाशः स ब्रह्मभूयं गतिमाजगाम ।
ब्रह्मिष्ठमाधाय निजेऽधिकारे ब्रह्मिष्ठमेव स्वतनुप्रसूतम् ॥२८॥

तस्मिन् कुलापीडनिभे विपीडं सम्यङ् महीं शासति शासनाङ्काम् ।
प्रजाश्चिर सुप्रजसि प्रजेशे ननन्दुरानन्दजलाविलाक्ष्यः ॥२९॥

पात्रीकृतात्मा गुरुसेवनेन स्पष्टाकृतिः पत्त्ररथेन्द्रकेतोः ।
तं पुत्रिणां पुष्करपत्त्रनेत्रः पुत्रः समारोपयदग्रसंख्याम् ॥३०॥

वंशस्थितिं वंशकरेण तेन संभाव्य भावी स सखा मघोनः ।
उपस्पृशन् स्पर्शनिवृत्तलौल्यस्त्रिपुष्करेषु त्रिदशत्वमाप ॥३१॥

तस्य प्रभानिर्जितपुष्परागं पौष्यां तिथौ पुष्यमसूत पत्नी ।
तस्मिन्नपुष्यन्नुदिते समग्रां पुष्टिं जनां पुष्य इव द्वितीये ॥३२॥

महीं महेच्छः परिकीर्य सूनौ मनीषिणे जैमिनयेऽर्पितात्मा ।
तस्मात् सयोगादधिगम्य योगमजन्मनेऽकल्पत जन्मभीरुः ॥३३॥

ततः परं तत्प्रभवः प्रपेदे ध्रुवोपमेयो ध्रुवसंधिरुर्वीम् ।
यस्मिन्नभूज्ज्यायसि सत्यसन्धे सन्धिर्ध्रुवः संनमतामरीणाम् ॥३४॥

सुते शिशावेव सुदर्शनाख्ये दर्शात्ययेन्दुप्रियदर्शने सः ।
मृगायताक्षो मृगयाविहारी सिंहादवापद् विपदं नृसिंहः ॥३५॥

स्वर्गामिनस्तस्य तमैकमत्यादमात्यवर्गः कुलतन्तुमेकम् ।
अनाथदीनाः प्रकृतीरवेक्ष्य साकेतनाथं विधिवच्चकार ॥३६॥

नवेन्दुना तन्नभसोपमेयं शावैकसिंहेन च काननेन ।
रघोः कुलं कुड्मलपुष्करेण तोयेन चाप्रौढनरेन्द्रमासीत् ॥३७॥

लोकेन भावी पितुरेव तुल्यः संभावितो मौलिपरिग्रहात् सः ।
दृष्टो हि वृण्वन् कलभप्रमाणोऽप्याशाः पुरोवातमवाप्य मेघः ॥३८॥

तं राजवीथ्यामधिहस्ति[1] यान्तमाधोरणालम्बितमग्र्यवेशम् ।
षड्वर्षदेशीयमपि प्रभुत्वात् प्रैक्षन्त पौराः पितृगौरवेण ॥३९॥

कामं न सोऽकल्पत पैतृकस्य सिंहासनस्य प्रतिपूरणाय ।
तेजोमहिम्ना पुनरावृतात्मा तद् व्याप चामीकरपिञ्जरेण ॥४०॥

तस्मादधः किंचिदिवावतीर्णावसंस्पृशन्तौ तपनीयपीठम् ।
सालक्तकौ भूपतयः [2]प्रसिद्धैर्ववन्दिरे मौलिभिरस्य पादौ ॥४१॥

मणौ महानील इति प्रभावादल्पप्रमाणेऽपि यथा न मिथ्या ।
शब्दो महाराज इति प्रतीतस्तथैव तस्मिन् युयुजेऽर्भकेऽपि ॥४२॥

पर्यन्तसंचारितचामरस्य कपोललोलोभयकाकपक्षात् ।
तस्याननादुच्चरितोऽपि[3] वादश्चस्खाल वेलास्वपि नार्णवानाम् ॥४३॥

निर्वृत्तजाम्बूनदपट्टशोभे न्यस्तं ललाटे तिलकं दधानः ।
तेनैव शून्यान्यरिसुन्दरीणां मुखानि स स्मेरमुखश्चकार ॥४४॥

शिरीषपुष्पाधिकसौकुमार्यः खेदं स यायादपि भूषणेन ।
नितान्तगुर्वीमपि सोऽनुभावाद् धुरं धरित्र्या बिभरांबभूव ॥४५॥

---

१. हस्तयन्तं पा० हे० २. कु० ५।९ ३. दुच्चरितो वि० म०

न्यस्ताक्षरामक्षरभूमिकायां कार्त्स्न्येन गृह्णाति लिपिं न यावत् ।
सर्वाणि तावच्छ्रुतवृद्धयोगात् फलान्युपायुङ्क्त स दण्डनीतेः ।।४६।।

उरस्यपर्याप्तनिवेशभोगा[1] प्रौढीभविष्यन्तमुदीक्षमाणा ।
संजातलज्जेव तमातपत्रच्छायाच्छलेनोपजुगूह लक्ष्मीः ।।४७।।

अनश्नुवानेन युगोपमानमबद्धमौर्वीकिणलाञ्छनेन ।
अस्पृष्टखड्ग-त्सरुणापि चासीद् रक्षावती तस्य भुजेन भूमिः ।।४८।।

न केवलं गच्छति तस्य काले ययुः शरीरावयवा विवृद्धिम् ।
वंश्या गुणाः खल्वपि लोककान्ताः प्रारम्भसूक्ष्माः प्रथिमानमापुः ।।४६।।

स पूर्वजन्मान्तरदृष्टपाराः स्मरन्निवाक्लेशकरो गुरूणाम् ।
तिस्रस्त्रिवर्गाधिगमस्य मूलं जग्राह विद्याः प्रकृतीश्च पित्र्याः ।।५०।।

व्यूह्य स्थितः किंचिदिवोत्तरार्धमुन्नद्धचूडोऽञ्चितसव्यजानुः ।
आकर्णमाकृष्ट-सबाणधन्वा व्यरोचतास्त्रेषु विनीयमानः ।।५१।।

अथ मधु वनितानां नेत्रनिर्वेशनीयं[2]
मनसिजतरुपुष्पं रागबन्धप्रवालम् ।
अकृतक-विधिसर्वाङ्गीणमाकल्पजातं
विलसितपदमाद्यं यौवनं स प्रपेदे ।।५२।।

प्रतिकृतिरचनाभ्यो दूतिसंदर्शिताभ्यः
समधिकतररूपाः शुद्धसंतानकामैः ।
अधिविविदुरमात्यैराहृतास्तस्य यूनः
प्रथमपरिगृहीते श्रीभुवौ राजकन्याः ।।५३।।

।। इति श्रीमहाकविकालिदासकृतौ रघुवंशे महाकाव्ये
वंशानुक्रमो नामाष्टादशः सर्गः ।।

१. भागा म० २. ०शपेयं पा०

एकोनविंशः सर्गः

अग्निवर्णमभिषिच्य राघवः स्वे पदे तनयमग्नितेजसम् ।
शिश्रिये श्रुतवतामपश्चिमः पश्चिमे वयसि नैमिषं वशी ॥१॥

तत्र तीर्थसलिलेन दीर्घिकास्तल्पमन्तरितभूमिभिः कुशैः ।
सौधवाससमुटजेन विस्मृतः सञ्चिकाय फलनिःस्पृहस्तपः ॥२॥

लब्धपालनविधौ न तत्सुतः खेदमाप गुरुणा हि मेदिनी ।
भोक्तुमेव भुजनिर्जितद्विषा न प्रसाधयितुमस्य कल्पिता ॥३॥

सोऽधिकारमभिकः कुलोचितं काश्चन स्वयमवर्तयत् समाः ।
संनिवेश्य सचिवेष्वतः परं स्त्रीविधेयनवयौवनोऽभवत् ॥४॥

कामिनीसहचरस्य कामिनस्तस्य वेश्मसु मृदङ्गनादिषु ।
ऋद्धिमन्तमधिकर्द्धिरुत्तरः पूर्वमुत्सवमपोहदुत्सवः ॥५॥

इन्द्रियार्थपरिशून्यमक्षमः सोढुमेकमपि स क्षणान्तरम् ।
अन्तरेव विहरन् दिवानिशं न व्यपैक्षत समुत्सुकाः प्रजाः ॥६॥

गौरवाद् यदपि जातु मन्त्रिणां दर्शनं प्रकृतिकाङ्क्षितं ददौ ।
तद् गवाक्षविवरावलम्बिना केवलेन चरणेन कल्पितम् ॥७॥

तं कृतप्रणतयोऽनुजीविनः कोमलात्मनखरागरूषितम् ।
भेजिरे नवदिवाकरातपस्पृष्टपङ्कजतुलाधिरोहणम् ॥८॥

यौवनोन्नतविलासिनीस्तनक्षोभलोलकमलाश्च दीर्घिकाः ।
गूढमोहनगृहास्तदम्बुभिः स व्यगाहत विगाढमन्मथः ॥९॥

तत्र सेकहृतलोचनाञ्जनैर्धौतरागपरिपाटलाधरैः ।
अङ्गनास्तमधिकं व्यलोभयन्नर्पितप्रकृतकान्तिभिर्मुखैः ॥१०॥

घ्राणकान्तमधुगन्धकर्षिणीः पानभूमिरचनाः प्रियासखः ।
अभ्यपद्यत स वासितासखः पुष्पिता कमलिनीरिव द्विपः ॥११॥

सातिरेकमदकारणं रहस्तेन दत्तमभिलेषुरङ्गनाः ।
ताभिरप्युपहृतं मुखासवं सोऽपिबद् बकुलतुल्यदोहदः ॥१२॥

अङ्कमङ्कपरिवर्तनोचिते तस्य निन्यतुरशून्यतामुभे ।
वल्लकी च हृदयङ्गमस्वना वल्गुवागपि च वामलोचना ॥१३॥

स स्वयं प्रहतपुष्करः कृती लोलमाल्यवलयो हरन्मनः ।
नर्तकीरभिनयातिलङ्घिनीः पार्श्ववर्तिषु गुरुष्वलज्जयत् ॥१४॥

चारु नृत्यनिगमे च तन्मुखं स्वेदभिन्नतिलकं परिश्रमात् ।
प्रेमदत्तवदनानिलः पिबन्नत्यजीव-[1]दमरालकेश्वरौ ॥१५॥

तस्य सावरणदृष्टसन्धयः काम्यवस्तुषु नवेषु सङ्गिनः ।
वल्लभाभिरुपसृत्य चक्रिरे सामिभुक्तविषयाः समागमाः ॥१६॥

अङ्गुलीकिसलयाग्रतर्जनं भ्रूविभङ्गकुटिलं च वीक्षितम् ।
मेखलाभिरसकृच्च बन्धनं वञ्चयन् प्रणयिनीरवाप सः ॥१७॥

तेन दूतिविदितं निषेदुषा पृष्ठतः सुरतवाररात्रिषु ।
शुश्रुवे प्रियजनस्य कातरं विप्रलम्भपरिशङ्किनो वचः ॥१८॥

लौल्यमेत्य गृहिणीपरिग्रहान्नर्तकीष्वसुलभासु तद्वपुः ।
वर्तते स्म स कथंचिदालिखन्नङ्गुलीक्षरणसन्नवर्तिकः ॥१९॥

प्रेमगर्वितविपक्षमत्सरादायताच्च मदनान्महीक्षितम् ।
निन्युरुत्सवविधिच्छलेन तं देव्य उज्झितरुषः कृतार्थताम् ॥२०॥

प्रातरेत्य परिभोगशोभिना दर्शनेन कृतखण्डनव्यथाः ।
प्राञ्जलिः प्रणयिनीः प्रसादयन् सोऽधुनोत् प्रणयमन्थरः पुनः ॥२१॥

---

१. अमराया अमरावत्या अलकायाश्चेत्यपिच्छेदः । द्र० हेमाद्रेर्दर्पणः ।

स्वप्नकीर्तितविपक्षमङ्गनाः प्रत्यभैत्सुरवदन्त्य एव तम् ।
प्रच्छदान्तगलिताश्रुविन्दुभिः क्रोधभिन्नवलयैर्विवर्तनैः ॥२२॥

क्लृप्तपुष्पशयनाँल्लतागृहानेत्य दूतिकृतमार्गदर्शनः ।
अन्वभूत् परिजनाङ्गनारतं सोऽवरोधभयवेपथूत्तरम् ॥२३॥

नाम वल्लभजनस्य ते मया प्राप्य भाग्यमपि तस्य काङ्क्ष्यते ।
लोलुपं ननु मनो ममेति तं गोत्रविस्खलितमूचुरङ्गनाः ॥२४॥

चूर्णवभ्रु लुलितस्रगाकुलं छिन्नमेखलमलक्तकाङ्कितम् ।
उत्थितस्य शयनं विलासिनस्तस्य विभ्रमरतान्यपावृणोत् ॥२५॥

स स्वयं चरणरागमादधे योषितां न च तथा समाहितः ।
लोभ्यमाननयनः श्लथांशुकैर्मेखलागुणपदैर्नितम्बिभिः ॥२६॥

चुम्बने विपरिवर्तिताधरं हस्तरोधि रसनाविघट्टने ।
विघ्नितेच्छमपि तस्य सर्वतो मन्मथेन्धनमभूद् वधूरतम् ॥२७॥

दर्पणेषु परिभोगदर्शिनीर्नर्मपूर्वमनुपृष्ठसंस्थितः ।
छायया स्मितमनोज्ञया वधूर्ह्रीनिमीलितमुखीश्चकार सः ॥२८॥

कण्ठसक्तमृदुबाहुवन्धनं न्यस्तपादतलमग्रपादयोः ।
प्रार्थयन्त शयनोत्थितं प्रियास्तं निशात्ययविसर्गचुम्बनम् ॥२९॥

प्रेक्ष्य दर्पणतलस्थमात्मनो राजवेशमतिशक्रशोभिनम् ।
पिप्रिये न स तथा यथा युवा व्यक्तलक्ष्म परिभोगमण्डनम् ॥३०॥

मित्रकृत्यमपदिश्य पार्श्वतः प्रस्थितं तमनवस्थितं प्रियाः ।
विद्महे शठ पलायनच्छलान्यञ्जसेति रुरुधुः कचग्रहैः ॥३१॥

तस्य निर्दयरतिश्रमालसाः [1]कण्ठसूत्रमपदिश्य योषितः ।
अध्यशेरत बृहद् भुजान्तरं पीवरस्तनविलुप्तचन्दनम् ॥३२॥

संगमाय निशि गूढचारिणं चारदूतिकथितं पुरोगताः ।
वञ्चयिष्यसि कुतस्तमोवृतः कामुकेति चकृषुस्तमङ्गनाः ॥३३॥

१. कण्ठसूत्रं सुरतवन्धविशेषः ।

योषितामुडुपतेरिवार्चिषां स्पर्शनिर्वृतिमसाववाप्नुवन्[1] ।
आरुरोह कुमुदाकरोपमां रात्रिजागरपरो दिवाशयः ॥३४॥

वेणुना दशनपीडिताधरा वीणया नखपदाङ्कितोरवः[2] ।
शिल्पकार्य उभयेन वेजितास्तं विजिह्मनयना व्यलोभयन् ॥३५॥

अङ्गसत्त्ववचनाश्रयं मिथः स्त्रीषु नृत्यमुपधाय दर्शयन् ।
स प्रयोगनिपुणैः प्रयोक्तृभिः संजघर्ष सह मित्रसन्निधौ ॥३६॥

अंसलम्बिकुटजार्जुनस्रजस्तस्य नीपरजसाङ्गरागिणः ।
प्रावृषि प्रमदबर्हिणेष्वभूत् कृत्रिमाद्रिषु विहारविभ्रमः ॥३७॥

विग्रहाच्च शयने पराङ्मुखीर्नानुनेतुमबलाः स तत्वरे ।
आचकाङ्क्ष घनशब्दविक्लवास्ता विवृत्य विशतीर्भुजान्तरम् ॥३८॥

कार्तिकीषु सवितानहर्म्यभाग् यामिनीषु ललिताङ्गनासखः ।
अन्वभुङ्क्त सुरतश्रमापहां मेघमुक्तविशदां स चन्द्रिकाम् ॥३९॥

सैकतं च सरयूं विवृण्वतीं श्रोणिबिम्बमिव हंसमेखलाम्[3] ।
स्वप्रियाविलसितानुकारिणीं सौधजालविवरैर्व्यलोकयत् ॥४०॥

मर्मरैरगुरुधूपगन्धिभिर् व्यक्तहेमरसनैस्तमेकतः ।
जह्रु – राग्रथनमोक्षलोलुपं हैमनैर्निवसनैः सुमध्यमाः ॥४१॥

अर्पितस्तिमितदीपदृष्टयो गर्भवेश्मसु निवातकुक्षिषु ।
तस्य सर्वसुरतान्तरक्षमाः साक्षितां शिशिररात्रयो ययुः ॥४२॥

दक्षिणेन पवनेन संभृतं प्रेक्ष्य चूतकुसुमं सपल्लवम् ।
अन्वनैषुरवधूतविग्रहास्तं दुरुत्सहवियोगमङ्गनाः ॥४३॥

ताः स्वमङ्कमधिरोप्य दोलया प्रेङ्खयन् परिजनापविद्धया ।
मुक्तरज्जु निबिडं भयच्छलात् कण्ठबन्धनमवाप बाहुभिः ॥४४॥

---

१. वनाप्नुवन् पा० २. '०रसः पा० ३. ०मेखलम्-म०

तं पयोधरनिषिक्तचन्दनैर् मौक्तिकग्रथितचारुभूषणैः ।
ग्रीष्मवेषविधिभिः सिषेविरे श्रोणिलम्बिमणिमेखलैः प्रियाः ।।४५।।

यत् स लग्नसहकारमासवं रक्तपाटलसमागमं पपौ ।
तेन तस्य मधुनिर्गमात् कृशश्चित्तयोनिरभवत् पुनर्नवः ।।४६।।

एवमिन्द्रियसुखानि निर्विशन्नन्यकार्यविमुखः स पार्थिवः ।
आत्म—लक्षणनिवेदितानृतू—नत्यवाहयदनङ्ग-वाहितः ।।४७।।

तं प्रमत्तमपि न प्रभावतः शेकुराक्रमितुमन्यपार्थिवाः ।
आमयस्तु रतिरागसंभवो दक्षशाप इव चन्द्रमक्षिणोत् ।।४८।।

दृष्टदोषमपि तन्न सोऽत्यगात् सङ्गमं[1] तु भिषजामनाश्रवः ।
स्वादुभिस्तु विषयैर्हृतस्ततो दुःखमिन्द्रियगणो निवार्यते ।।४९।।

तस्य पाण्डुवदनाऽल्पभूषणा सावलम्बगमना मृदुस्वना ।
राजयक्ष्मपरिहाणिराययौ कामयानसमवस्थया तुलाम् ।।५०।।

व्योम पश्चिमकलास्थितेन्दु वा पङ्कशेषमिव घर्मपल्वलम् ।
राज्ञि तत्कुलमभूत् क्षयातुरे वामनार्चिरिव दीपभाजनम् ।।५१।।

बाढमेषु दिवसेषु पार्थिवः कर्म साधयति पुत्रजन्मने ।
इत्यदर्शितरुजोऽस्य मन्त्रिणः शश्वदूचुरघशङ्किनीः प्रजाः ।।५२।।

स त्वनेकवनितासखोऽपि सन् पावनीमनवलोक्य सन्ततिम् ।
वैद्ययत्नपरिभाविनं गदं न प्रदीप इव वायुमत्यगात् ।।५३।।

तं गृहोपवन एव संगताः पश्चिमक्रतुविदा पुरोधसा ।
रोगशान्तिमपदिश्य मन्त्रिणः संभृते शिखिनि गूढमादधुः ।।५४।।

तैः कृतप्रकृतिमुख्यसंग्रहैराशु तस्य सहधर्मचारिणी ।
साधु दृष्टशुभगर्भलक्षणा प्रत्यपद्यत नराधिपश्रियम् ।।५५।।

---

१. सोऽत्यजत् संगवस्तु म० ।

तस्यास्तथाविधनरेन्द्रविपत्तिशोका-
दुष्णैर्विलोचनजलैः प्रथमाभितप्तः ।
निर्वापितः कनककुम्भमुखोज्झितेन
वंशाभिषेकविधिना शिशिरेण गर्भः ॥५६॥

तं [1]भावार्थं प्रसवसमयाकाङ्क्षिणीनां प्रजाना-
मन्तर्गूढं क्षितिरिव नभोवीजमुष्टिं दधाना ।
मौलैः सार्धं स्थविरसचिवैर्हैमसिंहासनस्था
राज्ञी राज्यं विधिवदशिषद् भर्तुरव्याहताज्ञा[2] ॥५७॥

॥ इति श्रीमहाकविकालिदासकृतौ रघुवंशे महाकाव्ये
गर्भाभिषेको नामैकोनविंशः सर्गः ॥

[समाप्तमिदं रघुवंशाख्यं[3] महाकाव्यम्]

---

१. भूत्य० पा०, भावो भूतिः म०

२. श्रीलङ्काप्रस्तरलेखोल्लेखादिकमाश्रित्य पञ्चविंशतिसर्गात्मकमिदं काव्यमिति केचित् । अत्रैवेदं पर्यंपूरीति तु वयम् । अत्र रघुर्नायकस्तस्यैवैकस्याजन्मशुद्ध्यादिषोडश-गुणवत्त्वात् । अन्येषां चरितानि पुनस्तत्तद्गुणहानेः कस्कोऽपकर्ष इति व्यतिरेकमुखेन रघोरेव प्रशंसा । रामावतारस्तु पौरुषं दौर्बल्यमित्याद्यावेदितमेव ।

३. क. कुमारसंभववत् कालिदासस्य रघुवंशं, विक्रमोर्वशीयं, शाकुन्तलं चेति त्रितयमपि कुमारसंभवमेवं । तत्र कुमारसंभवे कुमारो दिव्यः, विक्रमोर्वशीये दिव्यादिव्यः, शाकुन्तले रघुवंशे च मानुषः । तत्रापि रघुवंशे तन्नायको रघुः परम्परयाप्यदिव्ययोनिरिति रघुवंशमेव सुमानुषं श्रेष्ठं च महाकाव्यम् ।
ख. रघुवंशस्य प्रक्षिप्तानि पद्यानि परिशिष्टे दृश्यानि ।

मालविकाग्निमित्रम्

पात्राणि

पुरुषाः

सूत्रधारः—नाटकस्य प्रबन्धकः

पारिपार्श्वकः—सूत्रधारस्य सहचरः।

राजा—अग्निमित्राख्यो विदिशाधीशः।

वाहतकः—प्राचीन-मन्त्री।

विदूषकः—राज्ञो मित्रम्।

कञ्चुकी—अन्तःपुराध्यक्षो वृद्धः।

गणदासः हरदत्तश्च—नाट्याचार्यौ।

सारसः—कुब्जः किङ्करः।

वैतालिकः—स्तुतिपाठकः।

स्त्रियः

मालविका—मालवेशमाधवसेन-भगिनी।

धारिणी—अग्निमित्रस्य प्रधान-महिषी।

इरावती—अग्निमित्रस्य द्वितीया पत्नी।

परिव्राजिका—कौशिकीनाम्नी माधवसेवसचिवस्य सुमतेर्विधवा भगिनी।

बकुलावलिका—मालविकायाः सखी।

मधुकरिका—उद्यानपालिका।

कौमुदिका—दासी।

समाहितिका—परिव्राजिकायाः परिचारिका।

निपुणिका—इरावतीपरिचारिका।

जयसेना—प्रतीहारी।

चेटी—अपरा दासी।

मदनिका, ज्योत्स्निका—विदर्भदेशीयं शिल्पिकन्याद्वयम्।

मालविकाग्निमित्रम्

[[1]पूर्वरङ्गः : नान्दी]

एकैश्वर्ये स्थितोऽपि प्रणतबहुफले यः स्वयं कृत्तिवासाः,
कान्तासंमिश्रदेहोऽप्यविषयमनसां यः परस्ताद् यतीनाम् ।
अष्टाभिर्यस्य कृत्स्नं जगदपि तनुभिर्बिभ्रतो नाभिमानः,
सन्मार्गालोकनाय व्यपनयतु स वस्तामसीं वृत्तिमीशः ॥१॥

---

१. इयमस्मत्कृता योजना। अत्र 'प्रथमोऽङ्कः' इति सा. नि. च। तत्र पूर्वरङ्गो द्वाविंशत्यङ्गः। अङ्गानि चास्य भरतदिशा द्विविधानि अन्तर्यवनिकासंस्थानि, बहिर्यवनिकासंस्थानीति कृत्वा। तत्राद्यानि नेपथ्यगतानि, शेषाणि च मञ्चगतानि। अङ्गेष्वेषु नान्दी अन्यतमम्। तच्च मञ्चगतम्। नान्द्यामप्यस्यां द्वैविध्यम् चित्रत्वेन, शुद्धत्वेन च। तत्र चित्रा प्रतिपादं गीत-नृत्य-पुष्करवाद्यमिश्रिता। पुष्करवाद्यमात्रमिश्र-मङ्गलश्लोकपाठरूपा च शुद्धा, केवलस्य श्लोकपाठस्य मुनिनैव "भाण्डेनैव समः कार्यस्तज्ज्ञैर्गीतपरिक्रम" इति निषिद्धत्वात्। गीतं चात्र ध्रुवागीत-रूपम्। भाण्डं च भणतीति व्युत्पत्त्या पुष्कर इत्यभिनवगुप्तः। अस्ति च केवलः पुष्करोऽपि नान्दीपदवाच्यः। तथा चामरकोषे 'नान्दीवाद'—पदस्य व्याख्यायां 'नाटकादौ मङ्गलार्थं भेर्यादिवादकस्ये'—ति भानुजिदीक्षितः, 'नक्तन्दिवमसंहृत-नान्दीकः पट्टाभिषेकसमय' इत्युत्तररामचरितप्रस्तावनायां भवभूतिः, वासवदत्ताकथान्तागतयुद्धप्रस्तावे 'कौतुकाकृष्ट-जन-कृत-वदन-नान्दीक' इति 'समुत्पतदतिनिनद—नान्दीक' इति च तत्पाठान्तरे रणखल-विशेषणेषु सुबन्धुश्च। अत एव च कालिदासोऽप्यत्रैव प्रथमाङ्कावसाने 'मृदङ्गशब्द एव न उत्थापयिष्यती'—ति, 'नेपथ्ये मृदङ्गध्वनिरिति'—'जीमूतस्तनिते—'त्यादि चोपनिबध्नाति, सूचयति च मृदङ्गवाद्यस्याभ्यर्हितत्वं प्रयोगारम्भे। अस्ति चेयं परम्पराद्यत्वेऽपि जीविता। अत एव 'नौटंकी'—त्यभिधीयमानेषु ग्राम्येषु नाट्यप्रयोगेषु मृदङ्गध्वनेरेव प्राधान्यम्, रामलीलादिषु च। उच्यते च भरतेनापि पुष्कराध्याये 'पूर्वं हि भाण्डवाद्येन सिद्धिरुत्पादनीया, स्त्री-बाल-मूर्खविकीर्णे हि रङ्गे कुतूहल जननसमर्थं वाद्यमुपपन्नं भवती—'

(नान्द्यन्ते)

।। [1]प्रस्तावना ।।

सूत्रधारः—(नेपथ्याभिमुखमवलोक्य) अलमतिविस्तरेण । मारिष ! इतस्तावत् ।

(प्रविश्य)

पारिपार्श्विकः—भाव ! अयमस्मि ।

सूत्र०—अभिहितोऽस्मि विद्वत्परिषदा कालिदासग्रथितवस्तु मालविकाग्निमित्रं नाम नाटकम् अस्मिन् वसन्तोत्सवे प्रयोक्तव्यमिति । तदारभ्यतां संगीतकम् ।

(ना० शा० ३४ अ० ब.सं,पृ. २२२)—ति । अस्ति चावधानाय सिनेमास्वपि घण्टिकाया नादत्रयमिदानींतनैरपि दृष्टप्रवृत्तिकम् । एष च मृदङ्गध्वनिर्नान्दीश्लोकपाठेऽभ्यर्हित इत्यत्रापि भरत एव प्रमाणम् 'बहिर्यमनिकासंस्थानां' समेषामपि पूर्वरङ्गाङ्गानां सवाद्यत्वमयोगव्यवच्छेदेनोपनिबध्नन् । यथा चैतत् तदपि पुष्कराध्यायेनैव स्पष्टम् । अत एव च मुद्राराक्षसे विशाखदत्तः 'असौ नान्दीनादः पटुपटहशङ्खध्वनिमहान्' (६।१४) इति, 'द्वादशतूर्यनिर्घोषो नान्दी'—त्यन्येऽपि (मा०, काशि० ६।३।६३) । आसूत्र्यते चात एव कुतुपविधानस्य प्राथम्यं भरतेनैव पूर्वरङ्गाङ्गेषु । कुतुपश्च 'कुतुपो मुरजादीनां भाण्डानां निचयः स्मृत' इति भावप्रकाशनलक्षणोक्तः पुष्करादीनां निचयः । एवंगतेऽत्र स्थिरमिदं यन्नान्दीश्लोकः प्रतिचरणं नान्दीवाद्येनानुगन्तव्यध्रुवः । स च श्लोको येन पठ्यते स सूत्रधार एवेति भरतः । कालिदासे पुनः नान्द्यन्ते सूत्रधारस्याविस्तरगिरः पारिपार्श्विकस्य च सत्त्वात् सूत्रधारातिरिक्तपात्रप्रयोक्तव्यत्वं श्लोकनान्द्याः स्थिरम् । तानि च पात्राण्यत्रोत्थापकपदवाच्यानीति शास्त्रविदः । निर्देशाभावान्नान्दीयं प्रयोक्तृभिश्चित्रत्वेन शुद्धत्वेन वा यथाकामं प्रयोक्तव्येति कामचारलाभः । चित्रत्वेन प्रयोक्तव्यत्वे पुनरत्र प्रतिचरणं मृदङ्गवाद्यं, गीतं, नृत्यं, ध्रुवा गीतिः, पारिपार्श्विकयोः 'एवमार्य' इति वचनानि चावश्यकानि । तत्र य एव परेषामुत्थापकः स एव भरतस्य स्थापकः । उदुपसर्गेण स्थापकस्यैवोत्थपकत्वसिद्धेः । अत्राभिनवगुप्तः 'सूत्रधार एव स्थापकः इति सूत्रधारः पूर्वरङ्गं प्रयुज्य स्थापकः सन् प्रविशेत् इति न भिन्नकर्तृता' इति ।

१. पूर्वरङ्ग इति शेषः । इयमस्मत्कृता योजना ।

पारि०—मा तावत्। प्रथितयशसां भास-सौमिल्ल-कविपुत्रादीनां प्रबन्धानतिक्रम्य वर्तमानकवेः कालिदासस्य क्रियायां कथं बहुमानः।

सूत्र०—अयि। विवेकविश्रान्तमभिहितम्। पश्य

पुराणमित्येव न साधु सर्वं
न चापि काव्यं नवमित्यवद्यम्।
सन्तः परीक्ष्यान्यतरद् भजन्ते
मूढः परप्रत्ययनेयबुद्धिः ॥२॥

पारि०—आर्यमिश्राः प्रमाणम्।

सूत्र०—तेन हि त्वरतां भवान्।

शिरसा प्रथमगृहीतामाज्ञामिच्छामि परिषदः कर्तुम्।
देव्या इव धारिण्याः सेवादक्षः परिजनोऽयम् ॥३॥

(निष्क्रान्तौ।)

॥ इति प्रस्तावना [1]पूर्वरङ्गश्च ॥

---

१. पूर्वरङ्ग इत्यस्मदयोजना

॥ [1]अथ मिश्रविष्कम्भकः ॥

(ततः प्रविशति बकुलावलिका ।)

बकु०—आणत्तम्हि देवीए धारणीए । अइरप्पउत्तोवदेसं [2]छलिअं णाम णट्टअं अन्दरेण कीरिसी मालविअ त्ति णट्टाअरिअं अज्जगणदासं पुच्छिदुं । ता दाव संगीदसालं गच्छम्हि । (आज्ञप्तास्मि देव्या धारिण्या 'अचिरप्रवृत्तोपदेशं छलिकं नाम नाट्यमन्तरेण कीदृशी मालविकेति नाट्याचार्यमार्यगणदासं प्रष्टुम् । तत् तावत् संगीतशालां गच्छामि' ।) (परिक्रामति)

(ततः प्रविशत्याभरणहस्ता कौमुदिका)

बकु०—(कौमुदिकां दृष्ट्वा) हला कोमुदीए, कुदो दे दाणिं इअं धीरदा, जं समीवेण वि अदिक्कमन्ती इदो दिट्ठिं ण देसि । (सखि कौमुदिके ! कुतस्त इदानीमियं धीरता, यत् समीपेनाप्यतिक्रामन्ती इतो दृष्टिं न ददासि ।)

कौमु०—अम्हो वउलावलिआ ? सहि ! देवीए इदं सिप्पिसआसादो आणीदं णागमुद्दासणाहं अंगुलीअअं सिणिद्धं णिज्झाअन्ती तुह उवालम्भे पडिदम्हि । (अहो बकुलावलिका । सखि ! देव्या इदं शिल्पिसकाशादानीतं नागमुद्रासनाथमङ्गुलीयकं स्निग्धं निध्यायन्ती तवोपालम्भे पतितास्मि ।)

बकु०—(विलोक्य) ठाणे सज्जदि दिट्ठी । इमिणा अंगुलीअएण उब्भिण्णकिरणकेसरेण कुसुमिदो विअ दे अग्गहत्थो पडिभादि । (स्थाने सज्जति दृष्टिः । अनेनाङ्गुलीयकेन उद्भिन्नकिरणकेसरेण कुसुमित इव ते अग्रहस्तः प्रतिभाति ।)

कौमु०—हला ! कहिं पत्थिदासि । (सखि ! कुत्र प्रस्थितासि ।)

बकु०—देवीए एव्व वअणेण णट्टाआरिअं अज्जगणदासं पुच्छिदुं उवदेसग्गहणे कीरिसो मालविए त्ति । (देव्या एव वचनेन नाट्याचार्यम् आर्यगणदासं प्रष्टुम् उपदेशग्रहणे कीदृशी मालविकेति ।)

---

१. इयमस्मत्कृता योजना ।　　२. चलिअं. पा०

कौमु०—सहि ईरिसेण वावारेण असण्णिहिदा वि सा कहं भट्टिणा दिट्ठा । (सखि ! ईदृशेन व्यापारेणासंनिहितापि सा कथं भर्त्रा दृष्टा ।)

बकु०—आम् । सो जणो देवीए पास्सगदो चित्ते दिट्ठो । (आम् । स जनो देव्याः पार्श्वगतश्चित्रे दृष्टः ।)

कौमु०—कहं विअ । (कथमिव ?)

बकु०—सुणु । चित्तसालं गदा देवी जदा पच्चग्गवण्णराअं चित्तलेहं आआरिअस्स आलोअन्ती चिट्ठदि भट्टा अ उवट्ठिदो । (शृणु । चित्रशालां गता देवी यदा प्रत्यग्रवर्णरागां चित्रलेखामाचार्यस्य आलोकयन्ती तिष्ठति भर्ता च उपस्थितः ।)

कौमु०—तदो तदो । (ततस्ततः ।)

बकु०—उवआराणन्तरं एक्कासणोवविट्ठेण भट्टिणा चित्तगदाए देवीए परिअणमज्झगदं आसण्णदारिअं देक्खिअ देवी पुच्छिदा । (उपचारानन्तरमेकासनोपविष्टेन भर्त्रा चित्रगताया देव्याः परिजनमध्यगताम् आसन्नदारिकां दृष्ट्वा देवी पृष्टा ।)

कौमु०—किं ति । (किमिति ।)

बकु०—अपुव्वा इअं दारिआ देवीए आसण्णा आलिहिदा किं णामहेए त्ति । (अपूर्वेयं दारिका देव्या आसन्ना आलिखिता किंनामधेयेति ।)

कौमु०—आकिदिविसेसेसु आअरो पदं करेति । तदो तदो । (आकृतिविशेषेष्वादरः पदं करोति । ततस्ततः ।)

बकु०—तदो अवहीरिअवअणो भट्टा संकिदो देवीं पुणोवि अणुबंधिदुं पउत्तो । तदो कुमारिए वसुलच्छीए आअक्खिदम् अज्ज एसा मालविए'त्ति । (ततोऽवधीरितवचनो भर्ता शङ्कितो देवीं पुनरप्यनुबन्धुं प्रवृत्तः । ततः कुमार्या वसुलक्ष्म्या आख्यातम् आर्य एषा मालविकेति ।)

कौमु०—[सस्मितम्] सरिसं क्खु बालभाअस्स । अदो अवरं कहेहि । (सदृशं खलु बालभावस्य । अतोऽपरं कथय ।)

बकु०—किं अण्णं। संपदं मालविआ सविसेसं भट्टिणो दंसणपहादो रक्खीअदि। (किमन्यत्। साम्प्रतं मालविका सविशेषं भर्तुर्दर्शनपथाद् रक्ष्यते।)

कौमु०—हला! अणुचिट्ठ अत्तणो णिओअं। अहं वि एवं अङ्गुलीअअं देवीए उवणइस्सं। (सखी! अनुतिष्ठात्मनो नियोगम्। अहमप्येतदङ्गुलीयकं देव्या उपनेष्यामि।)

(निष्क्रान्ता।)

बकु०—(परिक्रम्यवलोक्य) एसो णट्टाअरिओ संगीदसालादो णिग्गच्छदि। जाव से अत्ताणं दंसेमि। (एष नाट्याचार्यः संगीतशालातो निर्गच्छति। यावदस्मै आत्मानं दर्शयामि।) (इति परिक्रामति।)

(प्रविश्य)

गण०—कामं खलु सर्वस्यापि कुलविद्या बहुमता। न पुनरस्माकं नाट्यं प्रति मिथ्या गौरवम्। तथाहि—

देवानामिदमामनन्ति मुनयः [1]शान्तं क्रतुं चाक्षुषं
रुद्रेणेदमुमाकृतव्यतिकरे स्वाङ्गे विभक्तं द्विधा।
त्रैगुण्योद्भवमत्र लोकचरितं नानारसं दृश्यते
नाट्यं भिन्नरुचेर्जनस्य बहुधाप्येकं समाराधन[2]म्॥४॥

बकु०—(उपेत्य) अज्ज वन्दामि। (आर्य वन्दे।)

गण०—भद्रे चिरञ्जीव।

बकु०—अज्जा देवी पुच्छदि अवि उवदेसग्गहणे णादिकीलिस्सदि वो सिस्सा मालविएत्ति। (आर्य! देवी पृच्छति अप्युपदेशग्रहणे नातिक्लिश्नाति वः शिष्या मालविकेति।)

गण०—भद्रे! विज्ञाप्यतां देवी परमनिपुणा मेधाविनी चेति। किं बहुना—

१. कान्तम्—पा०, शान्तं पशुवधादिनिष्ठुरव्यापारानञ्चितम्। २. ०कम् का०

यद् यत् प्रयोगविषये भाविकमुपदिश्यते मया तस्यै ।
तत् तद् विशेषकरणात् प्रत्युपदिशतीव मे बाला ॥५॥

वकु०—(आत्मगतम्) अदिक्कमती विअ इरावदिं पेक्खामि । (प्रकाशम्) किदत्था दाणिं वो सिस्सा जाए गुरुअणो एवं तुस्सदि । (अतिक्रामन्तीमिव इरावतीं पश्यामि । (प्रकाशम्) कृतार्थेदानीं वः शिष्या यस्या गुरुजन एवं तुष्यति ।)

गण०—भद्रे ! तद्विधानामसुलभत्वात् पृच्छामि—कुतो देव्या तत् पात्रमानीतम् ।

वकु०—अत्थि देवीए वण्णावरो भादा वीरसेणो णाम । सो भट्टिणा णम्मदातीरे अन्तवालदुग्गे ठाविदो । तेण सिप्पाहिआरे जोग्गा इअं दारिएत्ति भणिअ भइणीए देवीए उवाअणं पेसिदा । (अस्ति देव्या वर्णावरो भ्राता वीरसेनो नाम । स भर्त्रा नर्मदातीरे अन्तपालदुर्गे स्थापितः । तेन शिल्पाधिकारे योग्येयं दारिकेति भणित्वा भगिन्या देव्या उपायनं प्रेषिता ।)

गण०—(आत्मगतम्) आकृतिविशेषप्रत्ययादेनामनूनवस्तुकां संभावयामि । (प्रकाशम्) भद्रे ! मयापि यशस्विना भवितव्यम् । यतः—

पात्रविशेषे न्यस्तं गुणान्तरं व्रजति शिल्पमाधातुः ।
जलमिव समुद्रशुक्तौ मुक्ताफलतां पयोदस्य ॥६॥

वकु०—अज्ज ! कहिं दाणिं वो सिस्सा । (आर्य ! कुत्रेदानीं वः शिष्या ।)

गण०—इदानीमेव [1]पञ्चाङ्गाभिनयमुपदिश्य मया विश्रम्यतामित्यभिहिता दीर्घिकावलोकनगवाक्षगता प्रवातमासेवमाना तिष्ठति ।

वकु०—तेण हि पुणो अणुजाणादु मं अज्जो । जाव से अज्जस्स परितोसणिवेदणेण उस्साहं वड्ढेमि । (तेन हि पुनरनुजानातु मामार्यः । यावदस्या आर्यस्य परितोषनिवेदनेनोत्साहं वर्धयामि ।)

गण०—दृश्यतां सखी । अहमपि लब्धक्षणः स्वगृहं गच्छामि ।

(निष्क्रान्तौ)

॥ इति मिश्रविष्कम्भकः ॥

---

१. नृत्त-कैवारी-मर्मर-जागर-गीतानि. का., चित्ताक्षिभ्रूहस्तपादचेष्टासाम्यम्. प.

[1]अथ प्रथमोऽङ्कः

(ततः प्रविशत्येकान्तस्थितपरिजनो मन्त्रिणा लेखहस्तेनान्वास्यमानो राजा।)

राजा—(अनुवाचितलेखममात्यं विलोक्य) वाहतक! किं प्रतिपद्यते वैदर्भः?

अमा०—देव आत्मविनाशम्।

राजा—संदेशमिदानीं श्रोतुमिच्छामि।

अमा०—इदमिदानीमनेन प्रतिलिखितम्—पूज्येनाहमादिष्टः—'भवतः पितृव्यपुत्रः कुमारो माधवसेनः प्रतिश्रुतसंवन्धो ममोपान्तिकमुपसर्पन्नन्तरा त्वदीयेनान्तपालेनावस्कन्द्य गृहीतः। स त्वया मदपेक्षया सकलत्रसोदर्यो मोक्तव्य' इति ।। एतन्नु वो विदितं यत् तुल्याभिजनेषु राज्ञां वृत्तिः। अतोऽत्र मध्यस्थः पूज्यो भवितुमर्हति। सोदरा पुनरस्य ग्रहणविप्लवे विनष्टा। तदन्वेषणाय प्रयतिष्ये। अथवा अवश्यमेव माधवसेनो मया पूज्येन मोचयितव्यः। श्रूयतामभिसंधिः—

मौर्यसचिवं विमुञ्चति यदि पूज्यः संयतं मम श्यालम्।
मोक्ता माधवसेनस्ततो मया वन्धनात् सद्यः ।।७।।

इति।

राजा—(सरोषम्) कथं कार्यविनिमयेन मयि व्यवहरत्यनात्मज्ञः। वाहतक! प्रकृत्यमित्रः प्रतिकूलकारी च मे वैदर्भः। तद् यातव्यपक्षे स्थितस्य पूर्वसंकल्पितसमुन्मूलनाय वीरसेनमुखं दण्डचक्रमाज्ञापय।

अमा०—यदाज्ञापयति देवः।

राजा—अथवा किं भवान् मन्यते।

१. इयमस्मत्कृता योजना। नान्दी, प्रस्तावना, विष्कम्भश्चेति त्रितयस्यापि अङ्कानन्तर्गतत्वमेव।

अमा०—शास्त्रदृष्टमाह देवः ।

अचिराधिष्ठितराज्यः शत्रुः प्रकृतिष्वरूढमूलत्वात् ।
नवसंरोपणशिथिलस्तरुरिव सुकरः समुद्धर्तुम् ॥८॥

राजा—तेन ह्यवितथं तन्त्रकारवचनम् । इदमेव वचनं निमित्तमुपादाय समुद्योज्यतां सेनाधिपतिः ।

अमा०—तथा । (निष्क्रान्तः)

(परिजनो यथाव्यापारं राजानमभितः स्थितः ।)

(प्रविश्य विदूषकः)

विदू०—आणत्तोम्हि तत्तभवदा रण्णा- गोदम ! चिन्तेहि दाव उवाग्रं । जह मे जदिच्छादिट्ठप्पदिकिदी मालविआ पच्चक्खदंसणा होदित्ति' । मए अ तं तहा किदं । दाव से णिवेदेमि । (आज्ञप्तोऽस्मि तत्रभवता राज्ञा । गौतम ! चिन्तय तावदुपायम् । यथा मे यदृच्छादृष्टप्रतिकृतिर्मालविका प्रत्यक्षदर्शना भवतीति । मया च तत् तथा कृतम् । तावदस्मै निवेदयामि ।) (परिक्रामति ।)

राजा—(विदूषकं दृष्ट्वा) अयमपरः कार्यान्तरसचिवोऽस्माकमुपस्थितः ।

विदू०—(उपगम्य) वड्ढदु भवं । (वर्धतां भवान् ।)

राजा—(सशिरःकम्पम्) इत आस्यताम् । (विदूषकः उपविष्टः ।)

राजा—अपि कच्चिदुपेयोपायदर्शने व्यापृतं ते प्रज्ञाचक्षुः ।

विदू०—पओअसिद्धिं पुच्छ । (प्रयोगसिद्धिं पृच्छ ।)

राजा—कथमिव ।

विदू०—(कर्णे) एव्वमिव । (एवमिव)

राजा—साधु वयस्य निपुणमुपक्रान्तम् । इदानीं दुरधिगमसिद्धावप्यस्मिन्नारम्भे वयमाशंसामहे । कुतः—

अर्थं सप्रतिबन्धं प्रभुरधिगन्तुं सहायवानेव ।
दृश्यं तमसि न पश्यति दीपेन विना सचक्षुरपि ॥९॥

(नेपथ्ये)

अलं बहु विकत्थ्य। राज्ञः समक्षमेवावयोरधरोत्तरयोर्व्यक्ति-र्भविष्यति।

राजा—(आकर्ण्य) सखे! त्वत्सुनीतिपादपस्य पुष्पमुद्भिन्नम्।

विदू०—फलं वि अइरेण देक्खिस्ससि। (फलमप्यचिरेण द्रक्ष्यसि।)

(ततः प्रविशति कञ्चुकी)

कञ्चु०—देव देव! अमात्यो विज्ञापयति। अनुष्ठिता प्रभोराज्ञा। एतौ पुनर्हरदत्तगणदासौ—

उभावभिनयाचार्यौ परस्परजयैषिणौ।
त्वां द्रष्टुमुद्यतौ साक्षाद् भावाविव शरीरिणौ ॥१०॥

राजा—प्रवेशय तौ।

कञ्चु०—यदाज्ञापयति देवः। (निष्क्रम्य ताभ्यां सह प्रविश्य।) इत इतो भवन्तौ।

गण०—(राजानं विलोक्य) अहो दुरासदो राजमहिमा।

न च न परिचितो न चाप्यरम्य-
श्चकितमुपैमि तथापि पार्श्वमस्य।
सलिलनिधिरिव प्रतिक्षणं मे
भवति स एव नवो नवोऽयमक्ष्णोः ॥११॥

हर०—महत् खलु पुरुषाकारमिदं ज्योतिः। तथाहि—

द्वारे नियुक्तपुरुषाभिमतप्रवेशः
सिंहासनान्तिकचरेण सहोपसर्पन्।
तेजोभिरस्य विनिवर्तितदृष्टिपातै-
र्वाक्यादृते पुनरिव प्रतिवारितोऽस्मि ॥१२॥

कञ्चु०—एष देवः। उपसर्पतां भवन्तौ।

उभौ—(उपेत्य) विजयतां देवः।

राजा—स्वागतं भवद्भ्याम्। (परिजनं विलोक्य।) आसने तावदत्रभवतोः।

(उभौ परिजनोपनीतयोरासनयोरुपविष्टौ।)

राजा—किमिदं शिष्योपदेशकाले युगपदाचार्याभ्यामत्रोपस्थानम् ?

गण०—देव ! श्रूयताम् । मया सुतीर्थादभिनयविद्या सुशिक्षिता । दत्तप्रयोगश्चास्मि । देवेन देव्या च परिगृहीतः ।

राजा—बाढं जाने । ततः किम् ?

गण०—सोऽहममुना हरदत्तेन प्रधानपुरुषसमक्षम् अयं मे न पादरजसापि तुल्य इत्यधिक्षिप्तः ।

हर०—देव ! अयमेव प्रथमं परिवादकरः—'अत्रभवतः किल, मम च, समुद्रपल्वलयोरिवान्तरमि'ति । तत् अत्रभवानिमं, मां च, शास्त्रे, प्रयोगे च विमृशतु । देव एव नौ विशेषज्ञः प्राश्निकः ।

विदू०—समत्थं पइण्णादं । (समर्थं प्रतिज्ञातम् ।)

गण०—प्रथमः कल्पः । अवहितो देवः श्रोतुमर्हति ।

राजा—तिष्ठ तावत् । पक्षपातमत्र देवी मन्यते । तदस्याः पण्डितकौशिकीसहितायाः समक्षमेव न्याय्यो व्यवहारः ।

विदू०—सुट्ठु भवं भणादि । (सुष्ठु भवान् भणति ।)

आचार्यौ—यद् देवाय रोचते ।

राजा—मौद्गल्य ! अमुं प्रस्तावं निवेद्य पण्डितकौशिक्या सार्धमाहूयतां देवी ।

कञ्चुकी—यदाज्ञापति देवः । (इति निष्क्रम्य सपरिव्राजिकया देव्या सह प्रविष्टः ।) इत इतो भवती ।

धारि०—(परिव्राजिकां विलोक्य) भअवदि ! हरदत्तस्स गणदासस्स अ संरम्भं कहं पेक्खसि । (भगवति ! हरदत्तस्य गणदासस्य च संरम्भं कथं पश्यसि ।)

परि०—अलं स्वपक्षावसादशङ्कया। न परिहीयते प्रतिवादिनो गणदासः ।

धारि०—जइ वि एवं तह वि राअपरिग्गहो पहाणत्तणं उवहरदि । (यद्यप्येवं तथापि राजपरिग्रहः प्रधानत्वमुपहरति ।)

परि०—अयि ! राज्ञीशब्दभाजनमात्मानमपि चिन्तयतु भवती । पश्य—

अतिमात्रभासुरत्वं पुष्यति भानोः परिग्रहादनलः ।
अधिगच्छति महिमानं चन्द्रोऽपि निशापरिगृहीतः ॥१३॥

विदू०—अइ उअट्ठिदा देवी पीठमद्दिअं पण्डिअकोसिइं पुरोकरिअ तत्तभोदी धारिणी । (अयि ! उपस्थिता देवी पीठमर्दिकां पण्डित-कौशिकीं पुरस्कृत्य तत्रभवती धारिणी ।)

राजा—पश्याम्येनाम् । यैषा—

मङ्गलालंकृता भाति कौशिक्या यतिवेषया ।
त्रयी विग्रहवत्येव सममध्यात्मविद्यया ॥१४॥

परि०—(उपेत्य) विजयतां देवः ।

राजा—भगवति अभिवादये ।

परि०— महासारप्रसवयोः सदृशक्षमयोर्द्वयोः ।
धारिणीभूतधारिण्योर्भव भर्ता शरच्छतम् ॥१५॥

धारि०—जेदु जेदु अज्जउत्तो । (जयतु जयत्वार्यपुत्रः ।)

राजा—स्वागतं देव्यै । (परिव्राजिकां विलोक्य) भगवति ! क्रियतामासनपरिग्रहः ।

(सर्वे उपविशन्ति ।)

राजा—भगवति! अत्रभवतोर्हरदत्तगणदासयोः परस्परं विज्ञानसंघर्षिणोर्भगवत्या प्राश्निकपदमध्यासितव्यम् ।

परि०—(सस्मितम्) अलमुपालम्भेन । पत्तने सति ग्रामे रत्नपरीक्षा ।

राजा—नैतदेवम् । पण्डितकौशिकी खलु भगवती । पक्षपातिनौ पुनः, अहम्, देवी च ।

आचा०—सम्यगाह देवः । मध्यस्था भगवती नौ गुणदोषतः परिच्छेत्तुमर्हति ।

राजा—तेन हि प्रस्तूयतां विवादः ।

परि०—देव प्रयोगप्रधानं हि नाट्यशास्त्रम्। किमत्र वाग्व्यवहारेण। कथं वा देवी मन्यते।

देवी—जइ मं पुच्छसि तदा एदाणं विवादो एव्व ण मे रोअदि। (यदि मां पृच्छसि तदैतयोर्विवाद एव न मे रोचते।)

गण०—देवि! न मां समानविद्यतः परिभवनीयमवगन्तुमर्हसि।

विदू०—भोदि पेक्खामो उरब्भसंवादं। किं मुहा वेअणदाणेण एदेणं। (भवति पश्याम [1]उरभ्रसंपातम्। किं मुधा वेतनदानेनैतेषाम्।)

देवी—णं कलहप्पिओसि। (ननु कलहप्रियोऽसि।)

विदू०—मा एव्वं। चण्डि! अण्णोण्णकलहप्पिआणं मत्तहत्थीणं एक्कदरस्सि अणिज्जिदे कुदो उवसमो। (मैवम्। चण्डि! अन्योन्यकलहप्रिययोर्मत्तहस्तिनोरेकतरस्मिन्ननिर्जिते कुत उपशमः।)

राजा—ननु स्वाङ्गसौष्ठवातिशयमुभयोर्दृष्टवती भगवती।

परि०—अथ किम्।

राजा—तदिदानीमतः परं किमाभ्यां प्रत्यायथितव्यम्।

परि०—तदेव वक्तुकामास्मि।

शिलष्टा क्रिया कस्यचिदात्मसंस्था संक्रान्तिरन्यस्य विशेषयुक्ता।
यस्योभयं साधु स शिक्षकाणां धुरि प्रतिष्ठापयितव्य एव॥१६॥

विदू०—सुदं अज्जेहिं भअवदीए वअणं। एसो पिण्डितत्थो उवदेसदंसणादो णिण्णओ त्ति। (श्रुतमार्याभ्यां भगवत्या वचनम्। एष पिण्डितार्थ उपदेशदर्शनान्निर्णय इति।)

हर०—परमभिमतं नः।

गण०—देवि! एवं स्थितम्।

देवी—जदा उण मंदमेधा सिस्सा उवदेसं मलिणेन्ति तदा आअरिअस्स ण दोसो। (यदा पुनर्मन्दमेधा शिष्या उपदेशं मलिनयन्ति तदा आचार्यस्य न दोषः।)

---

१. उरभ्रो मेषः, उअरंभरि० च.

राजा—देवि। एवमापठ्यते 'विनेतुरद्रव्यपरिग्रहोऽपि बुद्धिलाघवं प्रकाशयती'-ति।

देवी०—(आत्मगतम्) कहं दाणिं। (गणदासं विलोक्य जनान्तिकम्) अलं अज्जउत्तस्स ऊसाहकारणं मणोरहं पूरिअ। (प्रकाशम्, गणदासं प्रति) विरम णिरत्थआदो आरंभादो (कथमिदानीम्। (गणदासं विलोक्य जनान्तिकम्) अलमार्यपुत्रस्य उत्साहकारणं मनोरथं पूरयित्वा। (प्रकाशम्, गणदासं प्रति) विरम निरर्थकादारम्भात्।)

विदू०—सुट्ठु भोदी भणादि। भो गणदास! संगीदपदं लम्भिअ सरस्सईए उवाअणमोदआणं खादमाणस्स किं दे मुहणिग्गहेण विवादेण। (सुष्ठु भवती भणति। भो गणदास! संगीतपदं लब्ध्वा सरस्वत्या उपायनमोदकान् खादतः किं ते मुखनिग्रहेण विवादेन।)

गण०—सत्यम्, अयमेवार्थो देवीवाक्यस्य। श्रूयतामवसरप्राप्तमिदानीम्-

लब्धास्पदोऽस्मीति विवादभीरोस्तितिक्षमाणस्य परेण निन्दाम्।
यस्यागमः केवलजीविकायै तं ज्ञानपण्यं वणिजं वदन्ति ॥१७॥

देवी—अइरोवणीदा दे सिस्सा। अवरिणिट्ठिदस्स उवदेसस्स उण अण्णाय्यं पआसणं। (अचिरोपनीता ते शिष्या। अपरिनिष्ठितस्योदेशस्य पुनरन्याय्यं प्रकाशनम्।)

गण०—अत एव मे निर्बन्धः।

देवी०—तेण हि दुवेवि भअवदीए उवदेसं दंसेध। (तेन हि द्वावपि भगवत्यै उपदेशं दर्शयतम्।)

परि०—देवि! नैतन्न्याय्यम्। सर्वज्ञस्याप्येकाकिनो निर्णयाभ्युपगमो दोषाय।

देवी—(स्वगतम्[1]) मूढे परिव्वाजिए! मं जाग्गतिं वि सुत्तं विअ करेसि। (मूढे परिव्राजिके! मां जाग्रतीमपि सुप्तामिव करोषि।) (सासूयं परावर्तते।) (राजा देवीं परिव्राजिकायै दर्शयति।)

---

१. जनान्तिकम्. नि. च.

परि०—अनिमित्तमिन्दुवदने किमत्रभवतः पराङ्मुखी भवसि ।
प्रभवन्त्योऽपि हि भर्तृषु कारणकोपाः कुटुम्बिन्यः ॥१८॥

विदू०—णं सकारणं एव्व । अत्तणो पक्खो रक्खिदव्वो । (गणदासं विलोक्य ।) दिट्ठिआ कोवव्वाजेण देवीए परित्तादो भवं । सुसिक्खिदो वि सव्वो उवदेसदंसणेण णिण्हादो होदि । (ननु सकारणमेव । आत्मनः पक्षो रक्षितव्यः । (गणदासं विलोक्य) दिष्ट्या कोपव्याजेन देव्या परित्रातो भवान् । सुशिक्षितोऽपि सर्व उपदेशदर्शनेन निष्णातो भवति ।)

गण०—देवि ! श्रूयताम् । एवं जनो गृह्णाति । तदिदानीम्—

विवादे दर्शयिष्यामि क्रियासंक्रान्तिमात्मनः ।
यदि मां नानुजानासि परित्यक्तोऽस्म्यहं त्वया ॥१९॥

(इत्यासनादुत्थातुमिच्छति ।)

देवी—(स्वगतम्) का गई । (प्रकाशम् ।) पहवदि आआरिओ सिस्सजणस्स । (का गतिः । (प्रकाशम्) प्रभवत्याचार्यः शिष्यजनस्य ।)

गण०—चिरमपदेशशङ्कितोऽस्मि । (राजानमवलोक्य) अनुज्ञातं देव्या । तदाज्ञापयतु देवः कस्मिन्नभिनयवस्तुनि प्रयोगं दर्शयिष्यामि ।

राजा—यदादिशति भगवती ।

परि०—किमपि देव्या मनसि वर्तते । ततः शङ्कितास्मि ।

देवी—भण वीसद्धं । पहवदि प्पहू अत्तणो परिअणस्स । (भण विस्रब्धम् । प्रभवति प्रभुरात्मनः परिजनस्य ।)

राजा—मम चेति ब्रूहि ।

देवी—भअवदि । भणेदाणीम् । (भगवति ! भणेदानीम् ।)

परि०—देव ! शर्मिष्ठायाः कृतिं चतुष्पदोत्थं [1]छलिकं दुष्प्रयोज्यमुदाहरन्ति । तत्रैकार्थसंश्रयमुभयोः प्रयोगं पश्यामः । तावता ज्ञायत एव अत्रभवतोरुपदेशान्तरम् ।

आचा०—यदाज्ञापयति भगवती ।

---

१. चलितम् पा०

विदू०—तेण हि दुवे वि वग्गा पेक्खाघरे संगीदरअणं करिअ तत्तभवदो दूदं पेसअह । अहवा मुदङ्गसद्दो एव्व णो उत्थावइस्सदि । (तेन हि द्वावपि वर्गौ प्रेक्षागृहे संगीतरचनां कृत्वा तत्रभवतो दूतं प्रेषयतम् । अथवा मृदङ्गशब्द एव न उत्थापयिष्यति ।)

हर०—तथा । (इत्युत्तिष्ठति ।)

गण०—(धारिणीमवलोकयति ।)

देवी—(गणदासं विलोक्य) विअई भोदु । णं विजअब्भत्थिणी अहं आअरिअस्स (विजयी भवतु । ननु विजयाभ्यर्थिनी अहमाचार्यस्य ।)

(आचार्यौ प्रस्थितौ ।)

परि०—इतस्तावदाचार्यौ ।

आचार्यौ—(परिवृत्य) इमौ स्वः ।

परि०—निर्णयाधिकारे ब्रवीमि । सर्वाङ्गसौष्ठवाभिव्यक्तये विगतनेपथ्ययोः पात्रयोः प्रवेशोऽस्तु ।

आचार्यौ—नेदमावयोरुपदेश्यम् ।

(निष्क्रान्तौ ।)

देवी—(राजानमवलोक्य) जइ राअकज्जेसु ईरिसो उवाअणिउणदा तदो सोहणं भवे । (यदि राजकार्येषु ईदृशी उपायनिपुणता आर्यपुत्रस्य ततः शोभनं भवेत् ।)

राजा—

अलमन्यथा गृहीत्वा न खलु मनस्विनि मया प्रयुक्तमिदम् ।
प्रायः समानविद्याः परस्परयशःपुरोभागाः ॥२०॥

(नेपथ्ये मृदङ्गध्वनिः)

(सर्वे कर्णं ददति)

परि०—हन्त । प्रवृत्तं संगीतम् । तथा ह्येषा—

जीमूतस्तनितविशङ्किभिर्मयूरै-
रुद्ग्रीवैरनुरसितस्य पुष्करस्य[1] ।
निर्ह्लादिन्युपहितमध्यमस्वरोत्था
मायूरी मदयति [2]मार्जना मनांसि॥२१॥

राजा—देवी ! तस्याः सामाजिका भवामः ।

देवी—(स्वगतम्) अहो अविणओ अज्जउत्तस्स । (अहो अविनय आर्यपुत्रस्य ।)

(सर्वं उत्तिष्ठन्ति)

विदू०—(अपवार्य) भो धीरं गच्छ । तत्तभोदी धारिणी विसंवादइस्सदि । (भोः धीरं गच्छ । तत्रभवती धारिणी विसंवादयिष्यति ।)

धैर्यावलम्बिनमपि त्वरयति मां मुरजवाद्यरागो[3]ऽयम् ।
अवतरतः सिद्धिपथं शब्दः स्वमनोरथस्येव ॥२२॥

(निष्क्रान्ताः सर्वे)

॥ इति प्रथमोऽङ्कः ॥



१. पुष्करो मृदङ्गभेदः २. मार्जना पुष्करस्वरगतो विशेषः । तत्र मध्यमः स्वरो नामोर्ध्वगः पुष्करस्वरारोहः, अत एव निर्ह्लादिनीति विशेषणम् । का.
३. नादो—शा.

द्वितीयोऽङ्कः

(ततः प्रविशति संगीतरचनायां कृतायामासनस्थो राजा सवयस्थः धारिणी, परिव्राजिका, विभवतश्च परिवारः)

राजा—भगवति अत्रभवतोराचार्ययोः प्रथमं कतरस्योपदेशं द्रक्ष्यामः ।

परि०—ननु समानेऽपि ज्ञानवृद्धभावे वयोवृद्धत्वाद् गणदासः पुरस्कारमर्हति ।

राज—तेन हि मौद्गल्य एवमत्रभवतोरावेद्य स्वनियोग्यमशून्यं कुरु ।

कञ्चु०—यदाज्ञापयति देवः । (निष्क्रान्तः)

(प्रविश्य)

गण०—देव! शर्मिष्ठायाः कृतिर्लयमध्या चतुष्पदास्ति । तस्यास्तु [1]छलिकप्रयोगमेकमनाः श्रोतुमर्हति देवः ।

राजा—आचार्य वहुमानादवहितोऽस्मि । (निष्क्रान्तो गणदासः)

राजा—(जनान्तिकम्) वयस्य ।

नेपथ्यपरिगतायाश्चक्षुर्दर्शनसमुत्सुकं तस्याः ।
संहर्तुमधीरतया व्यवसितमिव मे तिरस्करिणीम्[2] ।।१।।

विदू०—(अपवार्य) उवट्ठिदं णअणमहु संणिहिदमक्खिअं अ । ता अप्पमत्तो दाणिं पेक्ख । (उपस्थितं नयनमधु सन्निहितमक्षिकं च । तद् अप्रमत्त इदानीं पश्य ।)

(ततः प्रविशत्याचार्यप्रत्यवेक्ष्यमाणाङ्गसौष्ठवा मालविका)

---

१. चलित—पा., चतुर्थवस्तुनः. का.

२. तिरस्करिणी यमनिका, यवनिका, जवनिका, जमनिका, पर्दा इति यावत् । एतेन स्थितमिदं 'कालिदाससमये मञ्चमुखे तिरस्करिणी भवति स्मेति । यवनिकेत्यपशब्दे यवनपदमुत्प्रेक्ष्य यवनानप्रभावमस्मासु वीक्ष्यमाणा धन्याः । तिरस्करण्यभावे कथं स्यादासनस्थादीनां प्रवेशः । द्र. २।११ अपि ।

विदू०—(जनान्तिकम्) पेक्खदु भवं। ण क्खु से पडिच्छन्दादो परिहीअदि महुरदा। (पश्यतु भवान्। न खल्वस्याः प्रतिच्छन्दात् परिहीयते मधुरता।)

राजा—(अपवार्य) वयस्य!

चित्रगतायामस्यां कान्तिविसम्वादशङ्कि मे हृदयम्।
सम्प्रति शिथिलसमाधिं मन्ये येनेयमालिखिता ॥२॥

गण०—वत्से! मुक्तसाध्वसा सत्त्वस्था भव।

राजा—(आत्मगतम्) अहो सर्वस्थानानवद्यता रूपविशेषस्य। तथाहि—

दीर्घाक्षं शरदिन्दुकान्ति वदनं बाहू नतावंसयोः
संक्षिप्तं निविडोन्नतस्तनमुरः पार्श्वे प्रमृष्टे इव।
मध्यः पाणिमितो नितम्बि जघनं पादावरालाङ्गुली
छन्दो नर्तयितुर्यथैव मनसि श्लिष्टं तथास्या वपुः ॥३॥

माल०—(उपगानं कृत्वा चतुष्पदवस्तु गायति)

दुल्लहो पिओ मे तस्सिं भव हिअअ णिरासं
अम्हो अपङ्गओ मे परिप्फुरइ किं वि वामओ।
एसो सो चरदिट्ठो कहँ उण उवणइदव्वो
णाह मं पराहीणं तुइ परिगणअ सतिण्हम् ॥४॥

(दुर्लभः प्रियो मे तस्मिन् भव हृदय निराश-
महो अपाङ्गो मे परिस्फुरति किमपि वामः।
एष स चिरदृष्टः कथं पुनरुपनेतव्यो
नाथ मां पराधीनां त्वयि परिगणय सतृष्णाम् ॥)

(ततो यथारसमभिनयति)

विदू०—(जनान्तिकम्) भो वअस्स। चउप्पदवत्थुअं दुवारीकरिअ तुइ उवट्ठाविदो अप्पा तत्तहोदीए। (भो वयस्य! चतुष्पदवस्तुकं द्वारीकृत्य त्वय्युपस्थापित आत्मा तत्रभवत्या।)

राजा—सखे! एवमेव ममापि हृदयम्। अनया खलु—

जनमिममनुरक्तं विद्धि नाथेति गेये
वचनमभिनयन्त्या स्वाङ्गनिर्देशपूर्वम् ।
[1]प्रणयगतिमदृष्ट्वा धारिणीसंनिकर्षा-
दहमिव सुकुमारप्रार्थनाव्याजमुक्तः ॥५॥

(मालविका गीतान्ते निष्क्रमितुमारब्धा)

विदू०—भोदि चिट्ठ । किंवि वो विसुमरिदो कम्मभेदो । तं दाव पुच्छिस्सम् । (भवति तिष्ठ । किमपि वो विस्मृतः कर्मभेदः । तं तावत् प्रक्ष्यामि ।)

गण०—वत्से । क्षणमात्रं स्थित्वोपदेशविशुद्धा यास्यसि ।

(मालविका निवृत्य स्थिता)

राजा—(आत्मगतम्) अहो ! सर्वास्ववस्थासु चारुता शोभान्तरं पुष्यति । तथा हि—

वामं संधिस्तिमितवलयं न्यस्य हस्तं नितम्बे
कृत्वा श्यामाविटपसदृशं स्रस्तमुक्तं द्वितीयम् ।
पादाङ्गुष्ठालुलितकुसुमे कुट्टिमे पातिताक्षं
नृत्यादस्याः स्थितमतितरां कान्तमृज्वायतार्धम् ॥६॥

देवी—णं गोदमवअणं वि अज्जो हिअए करेदि । (ननु गौतमवचनमप्यार्यो हृदये करोति ।)

गण०—देवी! मा मैवम् । देवप्रत्ययात् संभाव्यते सूक्ष्मदर्शिता गौतमस्य । पश्य—

मन्दोऽप्यमन्दतामेति संसर्गेण विपश्चितः ।
पङ्कच्छिदः फलस्येव निकषेणाविलं पयः ॥७॥

(विदूषकं विलोक्य) तच्छृणुमो वयं विवक्षितमार्यस्य ।

विदू०—(गणदासं विलोक्य) कोसिइँ दाव पुच्छ । पच्छा जो मए कम्मभेदो दिट्ठो तं भणिस्सं । (कौशिकीं तावत् पृच्छ । पश्चाद् यो मया कर्मभेदो दृष्टस्तं भणिष्यामि ।)

---

१. प्रणयः प्रीतिपूर्विका याच्ञा । अत्र प्रेयासं प्रत्यात्मनिवेदनम् ।

गण०—भगवति ! यथादृष्टमभिधीयतां गुणो वा दोषो वेति ।

परि०—यथा दृष्टं सर्वमनवद्यम् । कुतः—

अङ्गैरन्तर्निहितवचनैः सूचितः सम्यगर्थः
पादन्यासो [1]लयमनुगतस्तन्मयत्वं रसेषु ।
[2]शाखायोनिर्मृदुरभिनयस्तद्विकल्पानुवृत्तौ
भावो भावं नुदति विषयाद् [3]रागवन्धः स एव ॥८॥

गण०—देवः कथं वा मन्यते ।

राजा—वयं स्वपक्षशिथिलाभिमानाः संवृत्ताः ।

गण०—अद्य नर्तयितास्मि । कुतः—

उपदेशं विदुः शुद्धं सन्तस्तमुपदेशिनः ।
श्यामायते न युष्मासु यः काञ्चनमिवाग्निषु ॥९॥

देवी—दिट्ठिया [4]परिक्खआराहणेण अज्जो वड्ढइ । (दिष्ट्या परीक्षकाराधनेनार्यो वर्धते ।

गण०—देवीपरिग्रह एव मे वृद्धिहेतुः । (विदूषकं विलोक्य ।) गौतम वदेदानीं यत् ते मनसि वर्तते ।

विदू०—पढमोवदेसदंसणे पढमं वम्हणस्स पूजा कादव्वा । सा णं वो विसुमरिदा । (प्रथमोपदेशदर्शने प्रथमं ब्राह्मणस्य पूजा कर्तव्या । सा ननु वो विस्मृता ।)

परि०—अहो ! प्रयोगाभ्यन्तरः प्रश्नः ।

(सर्वे प्रहसिताः मालविका स्मितं करोति)

राजा—(आत्मगतम्) उपात्तसारश्चक्षुषा मे स्वविषयः । यदनेन—

स्मयमानमायताक्ष्याः किञ्चिदभिव्यक्तदशनशोभि मुखम् ।
असमग्रलक्ष्यकेसरमुच्छ्वसदिव पङ्कजं दृष्टम् ॥१०॥

---

१. 'लयस्तालवर्त्ती कालः'—का.
२. 'शाखा तु नृत्तहस्तानां या मानोचितनर्त्तनी'—का.
३. रागबन्धो रञ्जनत्वयोगः—का.   ४. अपरिक्खदा० का. नि. च.

गण०—महाब्राह्मण न खलु प्रथमं नेपथ्यदर्शनमिदम् । अन्यथा कथं त्वां दक्षिणीयं नार्चयिष्यामः ।

विदू०—मए णाम सुक्खघणगज्जिदे अन्तरिक्खे जलपाणं इच्छिदा चादआइदम् । अहवा पण्डितसंतोसपच्चआ णं मूढा जादी । जदि अत्तहोदीए सोहणं भणिदं तदो इमं से पारितोसिअं पअच्छामि । (मया नाम शुष्कघनगर्जिते अन्तरिक्षे जलपानमिच्छता चातकायितम् । अथवा पण्डितसन्तोषप्रत्यया ननु मूढजातिः । यतः अत्रभवत्या शोभनं भणितं तत इदं ते परितोषिकं प्रयच्छामि ।)

(राज्ञो हस्तात् कटकमाकर्षति ।)

देवी—चिट्ठ दाव । गुणन्तरं अजाणन्तो किंणिमित्तं तुम आहरणं देसि । (तिष्ठ तावत् । गुणान्तरमजानन् किंनिमित्तं त्वमाभरणं ददासि ।)

विदू०—परकेरअंति करिअ । (परकीयमिति कृत्वा ।)

देवी—(आचार्यं विलोक्य) अज्जगणदास ! णं दंसिदोवदेसा दे सिस्सा । आर्य गणदास ! ननु दर्शितोपदेशा ते शिष्या ।)

गण०—वत्से ! एहि गच्छाव इदानीम् ।

(सहाचार्येण निष्क्रान्ता मालविका ।)

विदू०—(जनान्तिकम्) एत्तिओ मे मदिविहवो भवन्तं सेविदुं । (एतावान् मे मतिविभवो भवन्तं सेवितुम् ।)

राजा—(जनान्तिकम्) अलमलं परिच्छेदेन । अहं हि—

भाग्यास्तमयमिवाक्ष्णोर्हृदयस्य महोत्सवावसानमिव ।
द्वारपिधानमिव धृतेर्मन्ये तस्यास्तिरस्करिणीम् ॥११॥

विदू०—(जनान्तिकम्) दलिद्दो विअ आदुरो वेज्जेण ओसदं दीअमाणं इच्छसि (दरिद्र इवातुरो वैद्येनौषधं दीयमानमिच्छसि ।)

(प्रविश्य)

हर०—देव ! मदीयमिदानीं प्रयोगमवलोकयितुं क्रियतां प्रसादः ।

राजा—(आत्मगतम्) अवसितो दर्शनार्थः। (दाक्षिण्यमवलम्ब्य प्रकाशम्) ननु पर्युत्सुका एव वयम्।

हर०—अनुगृहीतोऽस्मि।

वैता०—जयतु जयतु देवः। उपारूढो मध्याह्नः। तथाहि—

पत्रच्छायासु हंसा मुकुलितनयना दीर्घिकापद्मिनीनां
सौधान्यत्यर्थतापाद् वलभिपरिचय-द्वेषिपारावतानि।
बिन्दुक्षेपान् पिपासुः परिसरति शिखी भ्रान्तिमद् वारियन्त्रं
सर्वैरुस्रैः[1] समग्रैस्त्वमिव नृपगुणैर्दीप्यते सप्तसप्तिः॥१२॥

विदू०—अविहा अविहा। अम्हाणं उण भोअणवेला उवट्ठिदा। अत्तभवदो उइदवेलादिक्कमे चिइच्छआ दोसं उदाहरन्ति। (हरदत्तं विलोक्य) हरदत्त! किं दाणिं भणसि। (अविधा अविधा। अस्माकं पुनर्भोजनवेलोपस्थिता। अत्रभवत उचितवेलातिक्रमे चिकित्सका दोषमुदाहरन्ति। (हरदत्तं विलोक्य) हरदत्त! किमिदानीं भणसि।)

हर०—अस्ति वचनस्यान्यस्यावकाशोऽत्र?

राजा—तेन हि त्वदीयमुपदेशं श्वो वयं द्रक्ष्यामः। विरमतु भवान्।

हर०—यदाज्ञापयति देवः। (निष्क्रान्तः)

देवी—णिव्वट्ठेदु अज्जउत्तो मज्जणविहिम् (निर्वर्तयतु आर्यपुत्रो मज्जनविधिम्।)

विदू०—भोदि विसेसेण पाणभोअणं तुवरावेहि। (भवति विशेषेण पानभोजनं त्वरय।)

परि०—(उत्थाय) स्वस्ति भवते। (सपरिजनया देव्या सह निष्क्रान्ता)

विदू०—भो वअस्स! ण केवलं रुवे सिप्पे वि अदुदीआ मालविआ। (भो वयस्य! न केवलं रूपे शिल्पेऽप्यद्वितीया मालविका।)

---

१. उस्रैः किरणैः।

राजा—वयस्य !

अव्याजसुन्दरीं तां [1]ललितविधानेन योजयता ।
परिकल्पितो विधात्रा वाणः कामस्य विषदिग्धः ॥१३॥

किं वहुना । सखे ! चिन्तयितव्योऽस्मि ।

विदू०—भवदा वि अहं । दिढं विपणिकन्दू विअ मे उअरब्भन्तरं दज्झइ । (भवताप्यहम् । दृढं विपणिकन्दुरिव[2] मे उदराभ्यन्तरं दह्यते ।)

राजा०—एवमेव भवान् सुहृदर्थेऽपि त्वरताम् ।

विदू०—गहीददक्खिणोम्हि । किं तु मेहावलीणिरुद्धा जोण्हा विअ पराहीणदंसणा तत्तहोदी मालविआ । भवं वि सूणापरिसरचरो विअ गिद्धो अमिसलोलुओ भीरुओ अ । ता अणादुरो हविअ कज्जसिद्धिं पत्थेन्तो मे रोअसि । (गृहीतदक्षिणोऽस्मि । किं तु मेघावलीनिरुद्धा ज्योत्स्नेव पराधीनदर्शना तत्रभवती मालविका । भवानपि सूनापरिसरचर इव गृध्र आमिषलोलुपो भीरुकश्च । तत् अनातुरो भूत्वा कार्यसिद्धिं प्रार्थयमानो मे रोचसे ।)

राजा—कथमनातुरो भविष्यामि—

सर्वान्तःपुरवनिताव्यापारप्रतिनिवृत्तहृदयस्य ।
सा वामलोचना मे स्नेहस्यैकायनीभूता ॥१४॥

(निष्क्रान्ताः सर्वे)

॥ इति द्वितीयोऽङ्कः ॥

---

१. 'विधानेन ल०' च. 'विज्ञानेन ल०' का. क. २. कन्दुः कटाही भा.
३. अब्भंतादुरो विअ. च.

॥ [1]अथ प्रवेशकः ॥

(ततः प्रविशति परिव्राजिकायाः परिचारिका समाहितिका ।)

समा०—आणत्तम्हि [2]भअवदीए—'समाहिदिए ! देवस्स उवावणत्थं वीअऊरअं गेण्हिअ आअच्छ'त्ति । ता जाव पमदवणपालिअं महुअरिअं अण्णेसामि । (परिक्रम्यावलोक्य) एसा तवणीआसोअं ओलोअन्ती महुअरिआ चिट्ठदि । ता जाव णं उपसप्पामि । (आज्ञप्तास्मि [2]भगवत्या—'समाहितिके ! देवस्योपवनस्थं बीजपूरकं गृहीत्वागच्छेति । तद् यावत् प्रमदवनपालिकां मधुरिकामन्विष्यामि । एषा तपनीयाशोकमवलोकयन्ती मधुकरिका तिष्ठति । तद् यावदेनामुपसर्पामि ।)

(ततः प्रविशति यथोक्तव्यापारा उद्यानपालिका ।)

समा०—(उपसृत्य) महुअरिए । अवि सुहो दे उज्जाणव्वावारो ! (मधुकरिके ! अपि सुखस्त उद्यानव्यापारः ।)

मधु०—अम्हो समाहिदिआ । सहि सागदं दे । (अहो समाहितिका । सखि, स्वागतं ते ।)

समा०—हला भगवदी आणवेदि 'अरित्तपाणिणा अम्हारिसजणेण तत्तहोदी देवी देक्खिदव्वा । ता बीअपूरएण सुस्सूसिदुं इच्छामि' त्ति । (सखि ! भगवत्याज्ञापयति–'अरिक्तपाणिना अस्मादृशजनेन तत्रभवती देवी द्रष्टव्या तद् बीजपूरकेण शुश्रूषितुमिच्छामि'- इति ।

मधु०—णं संणिहिदं बीजपूरअं । कहेहि दाव अण्णोण्णसंघरिसिदाणं णट्टाअरिआणं उवदेसं देक्खिअ कदरो भअवदीए पसंसिदो । (ननु संनिहितं बीजपूरकम् । कथय तावदन्योन्यसंघर्षितयोर्नाट्याचार्ययोरुपदेशं दृष्ट्वा कतरो भगवत्या प्रशंसितः ।)

समा०—दुवे वि किल आगमिणा पओअणिउणा अ । किंतु सिस्साए[3] मालविआए गुणविसेसेण गणदासस्स[4] उवदेशो पसंसिदो ।

---

१. अस्मत्कृतेयं योजना । 'तृतीयोऽङ्कः' इति तु सा.नि.क.च.
२. परिव्राजिकया । ३. सिस्सागुण० का.क. ४. मालविआए. का.

(द्वावपि किलागमिनौ प्रयोगनिपुणौ च। किंतु शिष्याया मालविकाया गुणविशेषेण गणदासस्योपदेशः प्रशंसितः।)

मधु०—अह मालविआगदं कोलीणं कीरिसं सुणीअदि ? (अथ मालविकागतं कौलीनं कीदृशं श्रूयते ?)

समा०—वाढं किल तस्सिं साहिलासो भट्टा। किंतु केवलं देवीए धारिणीए चित्तं रक्खन्तो अत्तणो पहुत्तणं दंसेदि। मालविआ वि इमेसु दिअसेसु अणुहूदमुत्ता विअ मालदीमाला मिलाणा लक्खीअदि। अदो अवरं ण जाणे। विसज्जेहि मं। (बाढं किल तस्यां साभिलाषो भर्ता। किन्तु केवलं देव्या धारिण्याश्चित्तं रक्षन्नात्मनः प्रभुत्वं दर्शयति, मालविकाप्येषु दिवसेष्वनुभूतमुक्तेव मालतीमाला म्लाना लक्ष्यते। अतः परं न जाने। विसृज माम्।)

मधु०—एदं साहावलम्विदं वीअपूरअं गेण्ह। (एतच्छाखावलम्बितं वीजपूरकं गृहाण।)

समा०—तह। (नाट्येन बीजपूरकं गृहीत्वा) हला तुमं वि अदो पेसलदरं साहुजणसुस्सूसाए फलं पावेहि। (तथा। (नाट्येन वीजवीजपूरकं गृहीत्वा) सखि! त्वमप्यतः पेशलतरं साधुजनशुश्रूषायाः फलं प्राप्नुहि।) (प्रस्थिता)

मधु०—हला समं जेव्व गच्छम्ह। अहं वि इमस्स चिराअमाणकुसुमोग्गमस्स तवणीआसोअस्स दोहलणिमित्तं देवीए णिवेदेमि। (सखि! सममेव गच्छावः। अहमप्यस्य चिरायमाणकुसुमोद्गमस्य तपनीयाशोकस्य दोहदनिमित्तं देव्यै निवेदयामि।)

समा०—जुज्जइ। अहिआरो क्खु तुइ। (युज्यते। अधिकारः खलु तव।)

(निष्क्रान्ते)

॥ इति प्रवेशकः ॥

[1]अथ तृतीयोऽङ्कः

(ततः प्रविशति [2]कामयानावस्थो राजा विदूषकश्च ।)

राजा—(आत्मनं विलोक्य)

शरीरं क्षामं स्यादसति दयितालिङ्गनसुखे
भवेत् सास्रं चक्षुः क्षणमपि न सा दृश्यत इति ।
तया सारङ्गाक्ष्या त्वमसि न कदाचिद् विरहितं
प्रसक्ते निर्वाणे हृदय परितापं व्रजसि किम् ॥१॥

विदू०—अलं भवदो धीरं उज्झिअ परिदेविदेण । दिट्ठा मए तत्तहोदीए मालविआए पिअसही वउलावलिआ । सुणाविदा अ अत्थं जो भवदा संविट्ठो । (अलं भवतो धीरतामुज्झित्वा परिदेवितेन । दृष्टा मया तत्रभवत्या मालविकायाः प्रियसखी बकुलावलिका, श्राविता चार्थं यो भवता संदिष्टः ।)

राजा—ततः किमुक्तवती ।

विदू०—विण्णावेहि भट्टारअम्—'अणुगहीदम्हि इमिणा णिओएण । किदु सा तवस्सिणी देवीए अहिअं रक्खन्तीए णाअरक्खिदो विअ णिही ण सुहं समासादइदव्वा । तहवि जइस्सं ।' (विज्ञापय-भट्टारकम्—'अनुगृहीतास्म्यनेन नियोगेन । किन्तु सा तपस्विनी देव्या अधिकं रक्षन्त्या नागरक्षित इव निधिर्न सुखं समासादयितव्या । तथापि, यतिष्ये' ।)

राजा—भगवन् संकल्पयोने । प्रतिबन्धवत्स्वपि विषयेषु अभिनिवेश्य किं तथा प्रहरसि यथा जनोऽयं न कालान्तरक्षमो भवति । (सविस्मयम्)

क्व रुजा हृदयप्रमाथिनी क्व च ते विश्वसनीयमायुधम् ।
मृदु तीक्ष्णतरं यदुच्यते तदिदं मन्मथ दृश्यते त्वयि ॥२॥

---

१. अस्माभिरिदं योजितम् । २. र. ९।५०, वाम. ५।२।८२, कामयमा० पा०

विदू०—णं भणामि तस्सि साहणिज्जे कज्जे किदो मए उवाओवक्खेओ। ता पज्जवत्थावेदु भवं अप्पाणं। (ननु भणामि तस्मिन् साधनीये कार्ये कृतो मया उपायोपक्षेपः। तत् पर्यवस्थापयतु भवानात्मानम्।

राजा—अथेमं दिवसशेषम् उचितव्यापारविमुखेन चेतसा क्व नु खलु यापयामि।

विदू०—अज्ज एव्व पढमादारसुहआणि रत्तकुरवआणि उवाअणं पेसिअ णववसन्तावदारव्वदेसेण इरावदीए णिउणिआमुहेण पत्थिदो भवं—'इच्छामि अज्जउत्तेण सह दोलाहिरोहणं अणुहविदुं'त्ति। भवदा वि से पडिण्णादं। ता पमदवणं एव्व गच्छम्ह। (अद्यैव प्रथमावतारसुभगानि रक्तकुरबकाणि उपायनं प्रेष्य नववसन्तावतार-व्यपदेशेन इरावत्या निपुणिकामुखेन प्राथितो भवान्—'इच्छामि आर्यपुत्रेण सह दोलाधिरोहणमनुभवितुमि'-ति। भवताप्यस्यै प्रतिज्ञातम्। तत् प्रमदवनमेव गच्छावः।)

राजा—न क्षममिदम्।

विदू०—कहं विअ। (कथमिव)

राजा—वयस्य निसर्गनिपुणाः स्त्रियः। कथमन्यसंक्रान्तहृदयमुपलालयन्तमपि ते सखी न मां लक्षयिष्यति। अतः पश्यामि—

उचितः प्रणयो वरं विहन्तुं
वहवः खण्डनहेतवो हि दृष्टाः।
उपचारविधिर्मनस्विनीनां
न तु पूर्वाभ्यधिकोऽपि भावशून्यः॥३॥-इति।

विदू०—णारिहदि भवं अन्तेउरट्ठिदं दक्खिण्णं एक्कपदे पिट्ठदो कादुम्। (नार्हति भवानन्तःपुरस्थितं दाक्षिण्यमेकपदे पृष्ठतः कर्तुम्।)

राजा—(विचिन्त्य) तेन हि प्रमदवनमार्गमादेशय।

विदू०—इदो इदो भवं। (इत इतो भवान्।) (उभौ परिक्रामतः।)

विदू०—णं एवं पमदवणं पवणबलचलाहिं पल्लवङ्गुलीहिं तुवरेदि विअ भवन्तं पवेसिदुं। (नन्वेतत् प्रमदवनं पवनबलचलाभिः पल्लवाङ्गुलीभिस्त्वरयतीव भवन्तं प्रवेष्टुम्।)

राजा—(स्पर्शं रूपयित्वा) अभिजातः खलु वसन्तः। सखे पश्य—

उन्मत्तानां श्रवणसुभगैः कूजितैः कोकिलानां
सानुक्रोशं मनसिजरुजः सह्यतां पृच्छतेव।
अङ्गे चूतप्रसवसुरभिर्दक्षिणो मारुतो मे
सान्द्रस्पर्शः करतल इव व्यापृतो माधवेन ॥४॥

विदू०—पविस णिव्वुदिलाहाअ। (प्रविश निर्वृतिलाभाय।)

(उभौ प्रविशतः)

विदू०—अवहाणेण दिट्ठिं देहि। एदं क्खु भवन्तं विअ विलोहइदुकामाए पमदवणलच्छीए जुवदोवेसलज्जावइत्तिअं वसन्तकुसुमणेवत्थं गहीदं। (अवधानेन दृष्टिं देहि। एतत् खलु भवन्तमिव विलोभयितु-कामया प्रमदवनलक्ष्म्या युवतिवेषलज्जापयितृकं वसन्तकुसुमनेपथ्यं गृहीतम्।)

राजा—ननु विस्मयादवलोकयामि—

रक्ताशोकरुचा विशेषितगुणो विम्बाधरालक्तकः
प्रत्याख्यातविशेषकं कुरबकं श्यामावदातारुणम्।
आक्रान्ता तिलकक्रिया च तिलकैर्लग्नद्विरेफाञ्जनैः
सावज्ञेव मुखप्रसाधनविधौ श्रीर्माधवी योषिताम् ॥५॥

(उभौ नाट्येनोद्यानशोभां निर्वर्णयतः।)

(ततः प्रविशति पर्युत्सुका मालविका।)

माल०—अविण्णादहिअअं भट्टारअं अहिलसन्दी अप्पणो वि दाव लज्जेमि। कुदो विहवो सिणिद्धस्स सहीजणस्स इमं वुत्तन्तं आचक्खिदुं। ण जाणे अप्पडिआरगरुअं वेदणं केत्तिअं कालं मअणो मं णइस्सदि त्ति। आ, कहिं खु पत्थिदम्हि? (इति स्मृतिमभिनीय) आदिट्ठम्हि देवीए—मालविए गोदमचापलादो दोलापरिब्भट्टाए सरुजौ मह चलणौ। तुमं दाव गदुअ तवणी-आसोअस्स दोहलं णिवट्टेहि त्ति। जइ सो पञ्चरत्तब्भन्तरे कुसुमं दंसेदि तदो अहं अहिलासपूरइत्तअं पसादं दावइस्सं त्ति। ता जाव णिओअभूमिं पढमं गदा होमि दाव अणुपदं

मह चलणालंकारहत्थाए बउलावलिआए आअन्दव्वं। ता परिदेवइस्सं ताव वीसद्धं मुहुत्तग्रं। (अविज्ञातहृदयं भर्तारमभिलषन्ती आत्मनोऽपि तावल्लज्जे। कुतो विभवः स्निग्धस्य सखीजनस्य इमं वृत्तान्तमाख्यातुम्। न जाने अप्रतिकारगुरुकां वेदनां कियन्तं कालं मदनो मां नेष्यतीति। आ कुत्र खलु प्रस्थितास्मि। (स्मृतिमभिनीय) आदिष्टास्मि देव्या—मालविके गौतमचापलाद् दोलापरिभ्रष्टायाः सरुजौ मम चरणौ। त्वं तावद् गत्वा तपनीयाशोकस्य दोहदं निर्वर्तयेति। यद्यसौ पञ्चरात्राभ्यन्तरे कुसुमं दर्शयति ततोऽहमभिलाषपूरयितृकं प्रसादं दापयिष्यामीति। तद् यावन्नियोगभूमिं प्रथमं गता भवामि तावदनुपदं मम चरणालङ्कारहस्तया बकुलावलिकया आगन्तव्यम्। तत् परिदेविष्ये तावद् विस्रब्धं मुहूर्तकम्।) (परिक्रमति।)

विदू०—(दृष्ट्वा) ही ही। वअस्स! एदं क्खु सीहुपाणुव्वेजिदस्स मच्छण्डिआ उवणदा। (आश्चर्यमाश्चर्यम्। वयस्य! एतत् खलु सीधुपानोद्वेजितस्य [1]मत्स्यण्डिकोपनता।)

राजा—अये! किमेतत्।

विदू०—एसा णादिपरिक्खिदवेसा ऊसुअवअणा एआइणी मालविआ अदूरे वट्टदि (एषा नातिपरिष्कृतवेषा उत्सुकवदना एकाकिनी मालविका अदूरे वर्तते।)

राजा—(सहर्षम्) कथं मालविका

विदू०—अह इं। (अथ किम्।)

राजा—शक्यमिदानीं जीवितमवलम्बितुम्—

त्वदुपलभ्य समीपगतां प्रियां हृदयमुच्छ्वसितं मम विक्लवम्।
तरुवृतां पथिकस्य जलार्थिनः सरितमारसितादिव सारसात् ॥६॥

अथ क्व तत्रभवती?

---

१. मत्स्यन्दिकेति पाठे तु मदं स्यन्दयतीति व्युत्पत्तिः। मत्स्यण्डिका शर्करालुगुडद्रवः। विदेशेषु सांप्रतं प्रसिद्धः मदशामको मत्स्याण्डनिर्मितः प्रशस्ततमः पानविशेष इति त्वन्ये।

विदू०—एसा तरुराइमज्झादो णिक्कन्ता इदो ज्जेव्व परिवट्टन्ती दीसइ। (एषा तरुराजिमध्यान्निष्क्रान्ता इत एव परिवर्तमाना दृश्यते।)

राजा—(विलोक्य सहर्षम्) वयस्य पश्याम्येनाम्।

विपुलं नितम्बदेशे मध्ये क्षाम समुन्नतं कुचयोः।
अत्यायतं नयनयोर्मम जीवितमेतदायाति ॥७॥

सखे! पूर्वस्मादतिमनोहरावस्थान्तरमुपारूढा तत्रभवती। तथा हि—

शरकाण्डपाण्डुगण्डस्थलेयमाभाति परिमिताभरणा।
माधवपरिणतपत्रा कतिपयकुसुमेव कुन्दलता ॥८॥

विदू०—एसा वि भवं विअ मअणव्वाहिणा परामिट्ठा भविस्सदि। (एषापि भवानिव मदनव्याधिना परामृष्टा भविष्यति।)

राजा—सौहार्दमेवं पश्यति।

माल०—अयं सो ललिदसुउमालदोहलापेक्खी अगिहीदकुसुमणेवत्थो उक्कण्ठिदाए मह अणुकरेदि असोओ। जाव एदस्स पच्छाअसीदले सिलापट्टए णिसण्णा अप्पाणं विणोदेमि। (अयं स ललितसुकुमारदोहदापेक्षी अगृहीतकुसुमनेपथ्यः उत्कण्ठिताया मम अनुकरोत्यशोकः। यावदस्य प्रच्छायशीतले शिलापट्टके निषण्णा आत्मानं विनोदयामि।)

विदू०—सुदं भवदा उक्कण्ठिदम्हि त्ति तत्तहोदी मन्तेदि। (श्रुतं भवता उत्कण्ठितास्मीति तत्रभवती मन्त्रयति।)

राजा—नैतावता भवन्तं प्रसन्नतर्कं मन्ये। कुतः—

वोढा कुरवकरजसां किसलयपुटभेदसीकरानुगतः।
[1]अनिमित्तोत्कण्ठामपि जनयति मनसो मलयवातः ॥९॥

(मालविकोपविष्टा।)

राजा—सखे! इतस्तावदावां लतान्तरितौ भवावः।

---

१. उत्कण्ठामनिमित्तामिति तु युज्येत।

विदू०—इरावदिं विअ अदूरे पेक्खामि। (इरावतीमिवादूरे प्रेक्षे।)

राजा—नहि कमलिनीं दृष्ट्वा ग्राहमवेक्षते मतङ्गजः। (विलोकयन् स्थितः।)

माल०—हिअअ णिरवलम्वणादो अदिभूमिलंघिणो ते मणोरहादो विरम। किं मं आआसिअ। (हृदय! निरवलम्बनाद् अतिभूमिलङ्घिनो मनोरथाद् विरम। किं मामायास्य?

(विदूषको राजानं वीक्षते।)

राजा—प्रिये! पश्य वामत्वं स्नेहस्य—

औत्सुक्यहेतुं विवृणोषि न त्वं तत्त्वाववोधैकफलो[1] न तर्कः।
तथापि रम्भोरु करोमि लक्ष्यमात्मानमेषां परिदेवितानाम् ॥१०॥

विदू०—संपदं भवदो णिस्संसअं भविस्सदि। एसा अप्पिदमअणसंदेसा विवित्ते णं बउलावसिआ उवठ्ठिदा। (सांप्रतं भवतो निःसंशयं भविष्यति। एषा अर्पितमदनसंदेशा विविक्ते ननु बकुलावलिकोपस्थिता।)

राजा—अपि स्मरेदसावस्मदभ्यर्थनाम्।

विदू०—किं दाणिं एसा दासीए दुहिदा तुह गरुअं संदेसं विसुमरेदि। अहं दाव ण विसुमरेमि। (किमिदानीमेषा दास्या दुहिता तव गुरुकं संदेशं विस्मरति। अहं तावन्न विस्मरामि।)

(प्रविश्य चरणालङ्कारहस्ता बकुलावलिका)

बकु०—अवि सुहं सहीए। (अपि सुखं सख्याः।)

माल०—अम्हो बउलावलिआ उवठ्ठिदा। सहि साअदं दे। उवविस। (अहो बकुलावलिकोपस्थिता। सखि स्वागतं ते। उपविश।)

बकु०—(उपविश्य) हला तुमं दाणिं जोग्गदाए णिउत्ता। ता एक्कं दे चलणं उवणेहि जाव सालत्तअं सणूउरं अ करेमि। (सखि त्वमिदानीं योग्यतया नियुक्ता। तस्मादेकं ते चरणमुपनय यावत् सालक्तकं सनूपुरं च करोमि।)

---

१. रसः पा.

माल०—(आत्मगतम्) हिअअ ! अलं सुहिदाए। उवट्ठिदो अअं विहवो। कहं दाणिं अत्ताणं मोचेअं। अहवा एवं एव्व मे मिच्चुमण्डणं भविस्सदि। (हृदय ! अलं सुखितया। उपस्थितोऽयं विभवः। कथमिदानीमात्मानं मोचयेयम्। अथवा एतदेव मे मृत्युमण्डनं भविष्यति।)

बकु०—किं विआरेसि। ऊसुआ क्खु इमस्स तवणीआसोअस्स कुसुमोग्गमे देवी। (किं विचारयसि। उत्सुका खल्वस्य तपनीयाशोकस्य कुसुमोद्गमेन देवी।)

राजा—कथमशोकदोहदनिमित्तोऽयमारम्भः।

विदू०—किं णु क्खु जाणासि तुमं। मह कालणादो देवी मं अन्तेउरणेवच्छेण योजइस्सदि त्ति। (किं नु खलु जानासि त्वम् 'मम कारणाद् देवी इमामन्तःपुरनेपथ्येन योजयिष्यती'-ति।)

माल०—हला मरिसेहि दाव णं। (सखि मर्षय तावदेनम्।)

(पादमुपहरति)

बकु०—अइ सरीरअं सि मे। (अयि शरीरमसि मे।)

(नाट्येन चरणसंस्कारमारभते।)

राजा—

चरणान्तनिवेशितां प्रियायाः सरसां पश्य वयस्य रागलेखाम्।
प्रथमामिव पल्लवप्रसूतिं हरदग्धस्य मनोभवद्रुमस्य ॥११॥

विदू०—चलणाणुरूवो तत्तहोदीए अहिआरो उवक्खित्तो।
(चरणानुरूपस्तत्रभवत्या अधिकार उपक्षिप्तः।)

राजा—सम्यगाह भवान्।

नवकिसलयरागेणाग्रपादेन बाला
स्फुरितनखरुचा द्वौ हन्तुमर्हत्यनेन।
अकुसुमितमशोकं दोहदापेक्षया वा
प्रणमितशिरसं वा कान्तमार्द्रापराधम् ॥१२॥

विदू०—पहरिस्सदि तत्तहोदी तुमं अवरद्धम्। (प्रहरिष्यति तत्रभवती त्वामपराद्धम्।)

राजा—मूर्ध्ना प्रतिगृहीतं वचः सिद्धिदर्शिनो ब्राह्मणस्य ।

(ततः प्रविशति युक्तमदा इरावती चेटी च ।)

इरा०—हञ्जे णिउणिए ! सुणामि वहुसो मदो किल इत्थिआजणस्स विसेसमण्डणं त्ति । अवि सच्चो एसो लोअवाओ । (चेटि निपुणिके ! शृणोमि वहुशो मदः किल स्त्रीजनस्य विशेषमण्डनमिति । अपि सत्य एष लोकवादः ।)

निपु०—पढमं लोअवाओ एव्व अज्ज सच्चो संवुत्तो ।
(प्रथमं लोकवाद एवाद्य सत्यः संवृतः ।)

इरा०—अलं मयि सिणेहेण । कहेहि कुदो दाणिं ओगमिदव्वं दोलाघरं पढमं गदो भट्टा ण वेत्ति । (अलं मयि स्नेहेन । कथय कुत इदनीमवगन्तव्यं दोलागृहं प्रथमं गतो भर्ता न वेति ।)

निपु०—भट्टिणीए अखिण्डदादो पणआदो । (भट्टिन्या अखण्डितात् प्रणयात् ।)

इरा०—अलं सेवाए । मज्झत्थदं परिगाहिअ भणाहि । (अलं सेवया । मध्यस्थतां परिगृह्य भण ।)

निपु०—वसन्तोस्सवुवाअणलोलुवेण अज्जगोदमेण कहिअं तुवरदु भट्टिणी त्ति । (वसन्तोत्सवोपायनलोलुपेनार्यगौतमेन कथितं त्वरतां भट्टिनीति ।)

इरा०—(अवस्थासदृशं परिक्रम्य) हञ्जे ! मदेण किलाअमाणं अत्ताण अज्जउत्तस्स दंसणे हिअअं तुवरेदि । चलणा उ ण मह पसरन्ति । (चेटि ! मदेन क्लाम्यमानमात्मानमार्यपुत्रस्य दर्शने हृदयं त्वरयति, चरणौ पुनर्न मम प्रसरतः ।)

निपु०—णं संपत्ते मह दोलाघरं । (ननु संप्राप्ते स्वो दोलागृहम् ।)

इरा०—णिउणिए ! अज्जउत्तो एत्थ ण दीसदि । (निपुणिके ! आर्यपुत्रोऽत्र न दृश्यते ।)

निपु०—णं भट्टिणीए ओलोअदु । परिहासणिमित्तं कहिं वि अदिट्ठेण भत्तुणा होदव्वं । अम्हे वि पिअंगुलदापरिक्खित्तं असोअसिलावट्टअं पविसामो । (ननु भट्टिन्यवलोकयतु । परिहासनिमित्तं कुत्रा-

प्यदृष्टेन भर्त्रा भवितव्यम् । आवामपि प्रियङ्गु-लतापरिक्षिप्तमशोक-शिलापट्टकं प्रविशावः ।)

इरा०—तह । (तथा)

निपु०—(विलोक्य) आलोअदु भट्टिणी चूदङ्कुरं विचिण्णन्तीणं पिपीलिआहिं दंसिदं । (अवलोकयतु भट्टिनी चूताङ्कुरं विचिन्वत्योः पिपीलिकाभिर्दष्टम् ।)

इरा०—कहं विअ एदं । (कथमिवेदम् ।)

निपु०—एसा असोअपादवच्छाआए मालविआए बउलावलिआ चलणालंकारं णिव्वट्टेदि । (एषाशोकपादपच्छायायां मालविकाया बकुलावलिका चरणालङ्कारं विर्वतयति ।)

इरा०—(शङ्कां रूपयित्वा) अभूमी इअं मालविआए ! कहं एत्थ तक्केसि । अभूमिरियं मालविकायाः । कथमत्र तर्कयसि ।)

निपु०—तक्केमि दोलापरिब्भंसिदाए सरुअचलणाऐ देवीए असोअदोहलाहिआरे मालविआ णिउत्तेत्ति । अण्णहा कहं देवी सअं धारिअं णूउरजुअलं परिअणस्स अब्भणुजाणिस्सदि । (तर्कयामि दोलापरिभ्रष्टया सरुजचरणया देव्याऽशोकदोहृदाधिकारे मालविका नियुक्तेति । अन्यथा कथं देवी स्वयं धारितं नूपूरयुगलं परिजनस्याभ्यनुज्ञास्यति ।)

इरा०—महदो क्खु से संभावणा । (महती खल्वस्याः संभावना ।)

निपु०—किं ण अण्णेसीअदि भट्टा । (किं नान्विष्यते भर्ता ।)

इरा०—हला ण मे चलणा अण्णदो पवट्टन्ति । मदो मं विआरेदि । आसंकिदस्स दाव अन्तं गमिस्सं । (मालविकां निर्वर्ण्य । निरूप्यात्मगतम् ।) ठाणे क्खु कादरं मे हिअअं । (सखि ! न मे चरणावन्यतः प्रवर्तेते । मदो मां विकारयति । आशङ्कितस्य तावदन्तं गमिष्यामि । (मालविकां निवर्ण्य निरूप्यात्मगतम्) स्थाने खलु कातरं मे हृदयम् ।)

बकु०—(मालविकायै चरणं दर्शयन्ती) अवि रोअदि दे राअरेहाविण्णासो । (अपि रोचते ते रागरेखाविन्यासः ।)

माल०—हला ! अत्तणो चलणं त्ति लज्जेमि णं पसंसिदुं । केण पसाहणकलाए अहिणीदासि । (सखि ! आत्मनश्चरण इति लज्जे एनं प्रशंसितुम् । केन प्रसाधनकलायामभिनीतासि ।)

बकु०—एत्थ क्खु भत्तुणो सीसम्हि । (अत्र खलु भर्तुः शिष्यास्मि ।)

विदू०—तुवरेहि दाव णं गुरुदक्खिणाए । (त्वरय तावदेनां गुरुदक्षिणायै ।)

माल०—दिट्ठिआ ण गव्विदासि । (दिष्ट्या न गर्वितासि ।)

बकु०—उवदेसाणुरूवा चलणा लम्भिअ अज्ज दाव गव्विदा भविस्सं । (रागं विलोक्यात्मगतम्) हन्त सिद्धो मे दप्पो । (प्रकाशम्) सहि एक्कस्स दे चलणस्स अवसिदो राअणिक्खेवो । केवलं मुहमारुदो लम्भइदव्वो । अहवा पवादं एदं ठाणं । (उपदेशानुरूपौ चरणौ लब्ध्वा अद्य तावद् गर्विता भविष्यामि । हन्त सिद्धो मे दर्पः । (प्रकाशम्) सखि एकस्य ते चरणस्यावसितो रागनिक्षेपः । केवलं मुखमारुतो लम्भयितव्यः । अथवा प्रवातमेतत् स्थानम् ।)

राजा—सखे ! पश्य—

आर्द्रालक्तकमस्याश्चरणं मुखमारुतेन शोषयितुम् ।
प्रतिपन्नः प्रथमतरः संप्रति सेवावकाशो मे ।।१३।।

विदू०—कुदो दे अणुसओ । चिरं भवदा एदं कमेण[1] अणुभविदव्वं । (कुतस्तेऽनुशयः । चिरं भवता एतत् क्रमेणानुभवितव्यम् ।)

बकु०—सहि ! अरुणसतपत्तं विअ सोहदि दे चलणं । सव्वहा भत्तुणो अंकपरिवट्टिणी होहि । (सखि ! अरुणशतपत्रमिव शोभते ते चरणम् । सर्वथा भर्तुरङ्कपरिवर्तिनी भव ।) (इरावती निपुणिकामवेक्षते ।)

राजा—ममेयमाशीः ।

माल०—हला मा अवअणीअं मन्तेहि । (सखि मा अवचनीयं मन्त्रयस्व ।)

बकु०—मन्तइदव्वं एव्व मन्तिदं मए । (मन्त्रयितव्यमेव मन्त्रितं मया ।)

माल०—पिआ क्खु अहं तव । (प्रिया खल्वहं तव ।)

---

१. एदं भवदा चिरक्कमेण च.

बकु०—ण केवलं मह। (न केवलं मम।)

माल०—कस्स वा अण्णस्स। (कस्य वान्यस्य।)

बकु०—गुणेसु अहिणिवेसिणो भत्तुणो वि। (गुणेष्वभिनिवेशिनो भर्तुरपि।)

माल०—अलिअं मन्तेसि। एदं एव्व मइ णत्थि। (अलीकं मन्त्रयसे। एतदेव मयि नास्ति।)

बकु०—सच्चं तुइ णत्थि। अत्तुणो किसेसु सुन्दरपाण्डरेसु दीसइ अंगेसु। (सत्यं त्वयि नास्ति। भर्त्तुः कृशेषु सुन्दरपाण्डुरे दृश्यते अङ्गेषु।)

निपु०—पढमं गणिदं विअ हदासए उत्तरं। (प्रथमं गणितमिव हताशाया उत्तरम्।)

बकु०—अणुराओ अणुराएण परिक्खिदव्वो त्ति सुअणवअणं पमाणीकरेहि। (अनुरागोऽनुरागेण परिक्षितव्य इति सुजनवचनं प्रमाणीकुरु।)

माल०—किं अत्तणो छन्देण मन्तेसि (किमात्मनश्छन्देन मन्त्रयसि।)

बकु०—णहि णहि। भतुणो क्खु एदाइँ पणअमिदुलाइँ अक्खराइँ वत्तन्तरिताइँ। (नहि नहि। भर्तुः खल्वेतानि प्रणयमृदुलान्यक्षराणि वक्त्रान्तरितानि।)

माल०—हला! देवीं चन्तिअ ण मे हिअअं विस्ससदि। (सखि! देवीं चिन्तयित्वा न मे हृदयं विश्वसिति।

बकु०—मुद्धे! भमरसंपादो भविस्सदि त्ति वसन्तावदारसव्वस्सं किं ण चूदप्पसवो ओदंसिदव्वो। (मुग्धे! भ्रमरसंपातो भविष्यतीति वसन्तावतारसर्वस्वं किं न चूतप्रसवोऽवतंसितव्यः।)

माल०—तुमं दाव दुज्जादे गच्छतस्स सहायिणी होसि। (त्वं तावद् दुर्जाते गच्छतः सहायिनी भव।)

बकु०—विमद्दसुरही वउलावलिआ क्खु अहं। (विमर्दसुरभिर्बकुलावलिका खल्वहम्।)

राजा—साधु बकुलावलिके साधु।

भावज्ञानानन्तरं प्रस्तुतेन
प्रत्याख्याने दत्तयुक्तोत्तरेण ।
वाक्येनेयं स्थापिता स्वे निदेशे
स्थाने प्राणाः कामिनां दूत्यधीनाः ॥१४॥

इरा०—हञ्जे ! पेक्ख कारिदं एव्व वउलावलिआए एदस्सिं पदं मालविआए। (सखि ! पश्य कारितमेव बकुलावलिकया एतस्मिन् पदं मालविकायाः ।)

निपु०—भट्टिणि !अहिआरस्स उइदो उवदेसो । (भट्टिनि ! अधिकारस्योचित उपदेशः ।)

इरा—ठाणे क्खु संकिदं मे हिअअं। गहीदत्था अणन्तरं चिन्तइस्सं । (स्थाने खलु शङ्कितं मे हृदयम् । गृहीतार्था अनन्तरं चिन्तयिष्यामि ।)

बकु०—एसो दुदीओ वि दे णिव्वुत्तपरिकम्मा चलणो । जाव णं सणूउरं करेमि । (नाट्येन नुपुरयुगलमामुच्य) । हला ! उट्ठेहि । असोअविआसइत्तअं देवीए णिओअं अणुचिट्ठ । (एष द्वितीयोऽपि ते निर्वृत्तपरिकर्मा चरणः । यावदेनं सनूपुरं करोमि । (नाट्येन नुपुरयुगलमामुच्य) हला ! उत्तिष्ठ । अशोकविकासयितृकं देव्या नियोगमनुतिष्ठ ।)

(उभे उत्तिष्ठतः ।)

इरा०—सुदो देवीए णिओओ । होदु दाणिं । (श्रुतो देव्या नियोगः । भवत्विदानीम् ।)

बकु०—एसो उवारूढराओ उअभोअक्खमो पुरदो दे वट्टइ । (एष उपारूढराग उपभोगक्षमः पुरतस्ते वर्तते ।)

माल०—(सहर्षम्) किं भट्टा (किं भर्ता ।)

बकु०—(सस्मितम् ।) ण दाव भट्टा । एसो असोअसाहावलम्बी पल्लवगुच्छओ । ओदंसेहि णं । (न तावद् भर्ता । एषः अशोकशाखावलम्बी पल्लवगुच्छः । अवतंसयैनम् ।) (मालविका विषादं नाटयति ।)

विदू०—सुदं भवदा । (श्रुतं भवता ।)

राजा—सखे। पर्याप्तमेतावता कामिनाम्—

अनातुरोत्कण्ठितयोः प्रसिद्धचता
समागमेनापि रतिर्न मां प्रति।
परस्पर-प्राप्ति-निराशयोर् वरं
शरीरनाशोऽपि समानुरागयोः ॥१५॥

(मालविका रचितपल्लवावतंसा पादमशोकाय प्रहिणोति।)

राजा—वयस्य !

आदाय कर्णकिसलयमस्मादियमत्र चरणमर्पयति।
उभयोः सदृशविनिमयादात्मानं वञ्चितं मन्ये ॥१६॥

बकु०—हला ! णत्थि दे देसो। णिग्गुणो अअं असोओ जइ कुसुमोब्भेद-मन्थरो भवे जो दे चलणसक्कारं लंभिओ। (सखि ! नास्ति ते दोषः। निर्गुणोऽयमशोकः, यदि कुसुमोद्भेदमन्थरो भवेत्, यस्ते चरणसत्कारं लम्भितः।)

राजा—

अनेन तनुमध्यया मुखरनूपुराराविणा
नवाम्बुरुहकोमलेन चरणेन संभावितः।
अशोक यदि सद्य एव मुकुलैर्न संपत्स्यसे
वृथा वहसि दोहदं ललितकामिसाधारणम् ॥१७॥

सखे ! वचनानुसरणपूर्वकं प्रवेष्टुमिच्छामि।

विदू०—एहि। णं परिहासइस्सं। (एहि एनां परिहासयिष्यामि।)

(उभौ प्रवेशं कुरुतः।)

निपु०—भट्टिणि भट्टिणि ! भट्टा एत्थ पविसदि।
(भट्टिनि भट्टिनि ! भर्ताऽत्र प्रविशति।)

इरा०—इदं मम पढमं चिन्तिदं हिअएण।
(एतन्मम प्रथमं चिन्तितं हृदयेन)

विदू०—(उपेत्य) भोदि जुत्तं णाम अत्तभवदो पिअवअस्सो अअं असोओ णं वामपादेण ताडिदुं ? (भवति। युक्तं नाम अत्रभवतः प्रियवयस्योऽयमशोको ननु वामपादेन ताडयितुम् ?)

उभे—(ससंभ्रमम्) अम्हो भट्टा। (अहो भर्ता।)

विदू०—वउलावलिए। गहीदत्थाए तुइ अत्तहोदी ईरिसं अविणअं करन्ती कीस णं णिवारिदा। (बकुलावलिके ! गृहीतार्थया त्वयात्रभवती ईदृश दृशमविनयं कुर्वन्ती कस्मान्न निवारिता।)

(मालविका भयं रूपयति।)

निपु०—भट्टिणि पेक्ख। किं पउत्तं अज्जगोदमेण। (भट्टिनि ! पश्य। किं प्रवृत्तमार्यगौतमेन।

इरा०—कहं क्खु वह्मवन्धू अण्णहा जीविस्सदि। (कथं खलु ब्रह्मबन्धुरन्यथा जीविष्यति।)

बकु०—अज्ज ! एसा देवीए णिओअं अणुचिट्ठदि। एदस्सिं अदिक्कमे परवदी इअं। पसीददु भट्टा। आर्य ! एषा देव्या नियोगमनुतिष्ठति। एतस्मिन्नतिक्रमे परवतीयम्। प्रसीदतु भर्ता।)

(आत्मना सहैनां प्रणिपातयति।)

राजा—यद्येवमनपराधासि। उत्तिष्ठ भद्रे !

(हस्तेन गृहीत्वैनामुत्थापयति।)

विदू०—जुज्जइ देवी एत्थ माणइदव्वा। (युज्यते देवी अत्र मानयितव्या।)

राजा—(विहस्य)

किसलयमृदोर्विलासिनि कठिने निहतस्य पादपस्कन्धे।
चरणस्य न ते वाधा संप्रति वामोरु ! वामस्य ॥१८॥

(मालविका लज्जां नाटयति।)

इरा०—अहो णवणीदकप्पहिअओ अज्जउत्तो। (अहो नवनीतकल्पहृदय आर्यपुत्रः।)

माल०—वउलावलिए। एहि। अणुट्ठिदं अत्तणो णिओअं देवीए णिवेदेम्ह। (वकुलावलिके ! एहि। अनुष्ठितमात्मनो नियोगं देव्यै निवेदयावः।)

बकु०—विण्णावेहि भट्टारं विसज्जेहि त्ति। (विज्ञापय भर्तारं विसर्जयेति।)

राजा—भद्रे यास्यसि । मम तावदुत्पन्नावसरमर्थित्वं श्रूयताम् ।

वकु०—अवहिदा सुणाहि । आणवेदु भट्टा ।
(अवहिता शृणु । आज्ञापयतु भर्ता ।)

राजा—

घृतिपुष्पमयमपि जनो वध्नाति न तादृशं चिरात् प्रभृति ।
स्पर्शामृतेन पूरय दोहदमस्याप्यनन्यरुचेः ॥१६॥

इरा०—(सहसोपसृत्य) पूरेहि पूरेहि । असोओ कुसुमं ण दंसेदि । अअं उण पुप्फदि एव्व । (पूरय पूरय । अशोकः कुसुमं न दर्शयति । अयं पुनः पुष्पत्येव ।)

(सर्वे इरावतीं दृष्ट्वा संभ्रान्ताः ।)

राजा—(अपवार्य) वयस्य । का प्रतिपत्तिरत्र ।

विदू०—किं अण्णं । जंघावलं एव्व । (किमन्यत् । जङ्घाबलमेव ।)

इरा०—वउलावलिए । तुए साहु उवक्कन्तं । दाणिं सफलब्भत्थणं करेहि अज्जउत्तं । (वकुलावलिके ! त्वया साधूपक्रान्तम् । इदानीं सफलाभ्यर्थिनं कुरु आर्यपुत्रम् ।)

उभे— पसीददु भट्टिणी । काओ अम्हे भत्तुणो पणअपरिग्गहस्स । (प्रसीदतु भट्टिनी । के आवां भर्तुः प्रणयपरिग्रहस्य ।)

(निष्क्रान्ते ।)

इरा०—अविसस्ससणीआ पुरिसा । अत्तणो वञ्चणवअणं पमाणीकरिअ आक्खिताए वाहजणगदगहीदचिताए विअ हरिणीए एदं ण विण्णादं मए । (अविश्वसनीयाः पुरुषाः । आत्मनो वञ्चनावचनं प्रमाणीकृत्याक्षिप्तया व्याधजनगीतगृहीतचित्तयेव हरिण्या एतन्न विज्ञातं मया ।)

विदू०—(जनान्तिकम्) भो पडिपज्जेहि किंपि उत्तरम् । कम्मग्गहीदेण वि कुम्भीलएण संधिच्छेदे सिक्खिओम्मि त्ति वत्तव्वं होदि । (भो प्रतिपद्यस्व किमप्युत्तरम् । कर्मगृहीतेनापि कुम्भीलकेन संधिच्छेदे शिक्षितास्मीति वक्तव्यं भवति ।)

राजा—सुन्दरि ! न मे मालविकया कश्चिदर्थः मया त्वं चिरयसीति यथाकथंचिदात्मा विनोदितः ।

इरा०—विस्ससणीओसि । ण मए विण्णादं ईरिसं विणोदवुत्तन्तं अज्जउत्तेण उवलद्धं त्ति । अण्णहा दुक्खभाइणीए एव्वं ण करीअदि । (विश्वसनीयोऽसि । न मया विज्ञातम् ईदृशो विनोदवृत्तान्तः, आर्यपुत्रेणोपलब्ध इति । अन्यथा दुःखभागिन्या एवं न क्रियेत ।)

विदू०—मा दाव अत्तभोदो दक्खिण्णस्य उवरोहं करेहि । समावदिट्टेण देवीए परिचारिआइत्थिआजणेन संकहावि जइ वारीअदि एत्थ तुमं एव्व पमाणं । (मा तावदत्रभवतो दाक्षिण्यस्योपरोधं कुरु । समीपदृष्टेन देव्याः परिचारिकास्त्रीजनेन संकथापि यदि वार्यते अत्र त्वमेव प्रमाणम् ।)

इरा०—णं संकहा णाम होदु । किंति अत्ताणं आआसइस्सं । (ननु संकथा नाम भवतु । किमित्यात्मानमायासयिष्यामि ।)

(रुषा प्रस्थिता)

राजा—(अनुसरन्) प्रसीदतु भवती ।

(इरावती रसनासंधारितचरणा व्रजत्येव)

राजा—सुन्दरि ! न शोभते प्रणयिनि जने निरपेक्षता ।

इरा०—सठ । अविस्ससणीअहिअओसि । (शठ ! अविश्वसनीयहृदयोऽसि ।)

राजा—

शठ इति मयि तावदस्तु ते
परिचयवत्यवधीरणा प्रिये ।
चरणपतितया न चण्डि ! तां
विसृजसि मेखलयापि याचिता ? ।।२०।।

इरा०—इअं पि हदासा तुमं एव्व अणुसरदि । (इयमपि हताशा त्वामेवानुसरति ।)

(इति रसनामादाय राजानं ताडयितुमिच्छति)

राजा—वयस्य ! इयमिरावती

वाष्पासारा हेमकाञ्चीगुणेन
श्रोणीविम्वादप्युपेक्षाच्युतेन ।
चण्डी चण्डं हन्तुमभ्युद्यता यां
विद्युद्दाम्ना मेघराजीव विन्ध्यम् ।।२१।।

इरा०—किं मं एव्व भूओ वि अवरद्धं करेसि ।
(किं मामेव भूयोऽप्यपराद्धां करोषि ।)

राजा—(सरसनं हस्तमवलम्बयति)

अपराधिनि मयि दण्डं संहरसि किमुद्यतं कुटिलकेशि ।
वर्धयसि विलसितं त्वं दासजनायाद्य कुप्यसि च ।।२२।।

नूनमिदमनुज्ञातम् । (पादयोः पतति)

इरा०—ण क्खु इमे मालविआचलणा जा दे हरिसदोहलं पूरयिस्सन्ति ।
(न खल्विमौ मालविकाचरणौ यौ ते हर्षदोहदं पूरयिष्यतः ।)

(निष्क्रान्ता सह चेट्या)

विदू०—उट्ठेहि अकिदप्पसादोऽसि । (उत्तिष्ठ । अकृतप्रसादोऽसि ।)

राजा—(उत्थायेरावतीमपश्यन्) तत्कथं गतैव प्रिया ।

विदू०—अवस्स । दिट्ठिआ इमस्स अविणअस्स अप्पसण्णा गदा एसा । ता वअं सिग्घं अवक्कमाम जाव अंगारओ रासिं विअ अणुवंकं परिगमणं ण करेदि । (वयस्य ! दिष्ट्या अनेनाविनयेन अप्रसन्ना गतैषा- तद् वयं शीघ्रमपक्रमामः यावदङ्गारको राशिमिवानुवक्रं प्रतिगमनं न करोति ।)

राजा—अहो मदनस्य वैषम्यम् ।

मन्ये प्रियाहृतमनास्तस्याः प्रणिपातलङ्घनं सेवाम् ।
एवं हि प्रणयवती सा शक्यमुपेक्षितुं कुपिता ।।२३।।

(निष्क्रान्तः सह वयस्येन)

।। इति तृतीयोऽङ्कः ।।

चतुर्थोऽङ्कः

(ततः प्रविशति पर्युत्सुको राजा प्रतीहारी च ।)

राजा—(आत्मगतम्)

तामाश्रित्य श्रुतिपथगतामाशया बद्धमूलः
संप्राप्तायां नयनविषयं रूढरागप्रवालः ।
हस्तस्पर्शैर्मुकुलित इव व्यक्तरोमोद्गमत्वात्
कुर्यात् कान्तं मनसिजतरुर् मां रसज्ञं फलस्य ॥१॥

(प्रकाशम्) सखे गौतम !

प्रती०—जेदु जेदु भट्टा । असंणिहिदो गोदमो ।
(जयतु जयतु भर्ता । असंनिहितो गौतमः ।)

राजा—(आत्मगतम्) आः मालविकावृत्तान्तज्ञानाय मया प्रेषितः ।

विदू०—(प्रविश्य) वड्ढदु भवं । (वर्धतां भवान् ।)

राजा—जयसेने ! जानीहि तावत् क्व देवी धारिणी सरुजचरणत्वाद् विनोद्यत इति ।

प्रती०—जं देव आणिवेदि । (यद् देव आज्ञापयति ।) (निष्क्रान्ता)

राजा—गौतम ! को वृत्तान्तस्तत्रभवत्यास्ते सख्याः ?

विदू०—जो विडालगहीदाए परहुदिआए ।
(यो बिडालगृहीतायाः परभृतिकायाः ।)

राजा—(सविषादम्) कथमिव ?

विदू०—सा क्खु तवस्सिणी तए ण पिंगलच्छीए सारभाण्डभूघरए गुहाए विअ णिक्खित्ता । (सा खलु तपस्विनी तया पिङ्गलाक्ष्या सारभाण्डभूगृहे गुहायामिव निक्षिप्ता ।)

राजा—ननु मत्संपर्कमुपलभ्य ?

विदू:—अह इं। (अथ किम्।)

राजा—क एवं विमुखोऽस्माकम् येन चण्डीकृता देवी ?

विदू:—सुणादु भवं परिव्वाजिआए मे कहिदं। हिओ किल तत्तहोदी इरावदी रुअक्कन्तचलणं देविं सुहपुच्छिआ आअदा। (शृणोतु भवान् परिव्राजिकया मे कथितम्। ह्यः किल तत्रभवती इरावती रुजाक्रान्तचरणां देवीं सुखपृच्छिका आगता।)

राजा—ततस्ततः।

विदू०—तदो सा देवीए पुच्छिदा—'किं णु ओलोइदो वल्लहजणो' त्ति। ताए उत्तं—'मन्दो वो उपआरो जं परिजणे संकंतं वल्लहत्तणं ण जाणीअदि' (ततः सा देव्या पृष्टा—'किन्ववलोकितो वल्लभजन' इति। तयोक्तम्—'मन्दो व उपचारः यत् परिजने संक्रान्तं वल्लभत्वं न ज्ञायते'।)

राजा—अहो निर्भेदाद् ऋतेऽपि मालविकायामयमुपन्यासः शङ्कयैति।

विदू०—तदो ताए अणुबंधिज्जमाणा सा भवदो अविणअं अंतरेण परिगदत्था किदा देवी। (ततस्तयानुबन्ध्यमाना सा भवतः अविनय-मन्तरेण परिगतार्था कृता देवी।)

राजा—अहो दीर्घरोषता तत्रभवत्याः। अतः परं कथय।

विदू०—किं अवरं। मालविआ वउलावलिआ अ पादालवासं णिगल-पदीओ अदिट्ठसुज्जपादं णागकण्णाआओ विअ अणुहोन्ति। (किमपरम्। मालविका बकुलावलिका च पातालवासं निगडपद्यौ अदृष्ट-सूर्यपादं नागकन्यके इवानुभवतः।)

राजा—कष्टं कष्टम्।

मधुरस्वरा परभृता भ्रमरी च विबुद्धचूतसङ्गिन्यौ।
कोटरमकालवृष्टया प्रबलपुरोवातया गमिते ॥२॥

अप्यत्र कस्यचिदुपक्रमस्य गतिः स्यात्।

विदू०—कहं भवस्सदि। जं सारभांडघरव्वावारिदा माहविश्रा देवीए संदिट्ठा—'मह अंगुलीअअमुद्दिग्रं श्रदेक्खिअ ण मोत्तव्वा तुए हदासा मालविआ वउलावलिश्रा श्र' त्ति। (कथं भविष्यति, यत् सारभाण्डगृहव्यापारिता माधविका देव्या संदिष्टा। ममाङ्गलीयक-मुद्रिकामदृष्ट्वा न मोक्तव्या त्वया हताशा मालविका बकुलावलिका चेति।)

राजा—(निःश्वस्य सपरामर्शम्।) सखे! किमत्र कर्तव्यम्।

विदू०—(विचिन्त्य) अत्थि एत्थ उवाश्रो। (अस्त्यत्रोपायः।)

राजा—क इव।

विदू०—(सदृष्टिक्षेपम्) को वि अदिट्ठो सुणिस्सदि। कण्णे दे कहेमि। (उपश्लिष्य कर्णे) एव्वं विश्र। (कोऽप्यदृष्ट श्रोष्यति। कर्णे ते कथयामि (उपश्लिष्य) एवमिव।

(आवेदयति।)

राजा—(सहर्षम्) सुष्ठ। प्रयुज्यतां सिद्धये।

(प्रविश्य)

प्रति०—देव! पवादसअणे देवी णिसण्णा रत्तचंदणधारिणा परिअण-हत्थगदेण चलणेण भअवदीए कहाहिं विणोदिज्जमाणा चिट्ठदि। (देव! प्रवातशयने देवी निषण्णा रक्तचन्दनधारिणा परिजन-हस्तगतेन चरणेन भगवत्या कथाभिर्विनोद्यमाना तिष्ठति।

राजा०—तस्मादस्मत्प्रवेशयोग्योऽयमवसरः।

विदू०—भो गच्छदु भवं। अहं वि देविं पेक्खिदुं अरित्तपाणी भविस्सं। (भो गच्छतु भवान्। अहमपि देवीं द्रष्टुमरिक्तपाणिर्भविष्यामि।)

राजा—जयसेनायास्तावदस्मद्रहस्यं विदितं कुरु।

विदू०—तह। (इति कर्णे) एव्वं विअ होदि।
(तथा। (कर्णे) एवमिव भवति।)

(आवेद्य निक्रान्तः)

राजा—जयसेने ! प्रवातशयनमार्गमादेशय ।

प्रती॰—इदो इदो देवो । (इत इतो देवः)

(ततः प्रविशति शयनस्था देवी परिव्राजिका विभवतश्च परिवारः ।)

देवी—भअवदि ! रमणिज्जं कहावत्थु । तदो तदो ।

(भगवति ! रमणीयं कथावस्तु । ततस्ततः ।)

परि॰—(सदृष्टिक्षेपम्) देवी ! अतः परं पुनः कथयिष्यामि । अत्र भवान् विदिशेश्वरः संप्राप्तः ।

धारि॰—अम्हो भट्टा (अहो भर्ता ।)

(उत्थातुमिच्छति ।)

राजा—अलमलमुपचारयन्त्रणया—

अनुचितनूपुरविरहं नार्हसि तपनीयपीठिकालम्बि ।
चरणं रुजा परीतं कलभाषिणि ! मां च पीडयितुम् ।।३।।

धारि॰—जेदु जेदु अज्जउत्तो । (जयतु जयत्वार्यपुत्रः ।)

परि॰—विजयतां देवः ।

राजा—(परिव्राजिकां प्रणम्योपविश्य ।) देवि ! अपि सह्या वेदना ।

धारि॰—अज्ज अत्थि मे विसेसो । (अद्यास्ति मे विशेषः ।)

(ततः प्रविशति यज्ञोपवीतवद्धाङ्गुष्ठः संभ्रान्तो विदूषकः ।)

विदू॰—परित्ताअदु परित्ताअदु भवं । सप्पेणम्हि दट्ठो ।

(परित्रायतां परित्रायतां भवान् । सर्पेणास्मि दष्टः ।)

(सर्वे विषण्णाः)

राजा—कष्टं कष्टम् । क्व भवान् परिभ्रान्तः ।

विदू॰—देविं देक्खिस्सं त्ति आआरपुप्फग्गहणकारणादो पमदवणं गदोम्हि । (देवीं द्रक्ष्यामीत्याचारपुष्पग्रहणात् प्रमदवनं गतोऽस्मि ।)

धारि०—हद्धी हद्धी । अहं एव्व बम्हणस्स जीविदसंसअणिमित्तं जादम्हि । (हा धिक् ! हा धिक ! अहमेव ब्राह्मणस्य जीवितसंशयनिमित्तं जातास्मि ।)

विदू०—तहिं असोअत्थवअकालणादो पसारिदो दक्खिणहत्थो । तदो कोडरणिग्गदेण सप्परूवेण कालेण दट्ठोम्हि । णं एदाणि दुवे दंसणपदाणि । (तस्मिन्नशोकस्तबककारणात् प्रसारितो दक्षिणहस्तः । ततः कोटरनिर्गतेन सर्परूपेण कालेन दष्टोऽस्मि । नन्वेते द्वे दंशनपदे ।)

(दंशं दर्शयति)

परि०—तेन हि दंशच्छेदः पूर्वकर्मेति श्रूयते । स तावदस्य क्रियताम्—

छेदो दंशस्य दाहो वा क्षतेर्वा रक्तमोक्षणम् ।
एतानि दष्टमात्राणामायुष्याः प्रतिपत्तयः ॥४॥

राजा—संप्रति विषवैद्यानां कर्म । जयसेने ! ध्रुवसिद्धिः क्षिप्रमानीयताम् ।

प्रती०—जं देवो आवेणदि । (यद् देव आज्ञापयति ।) (निष्क्रान्ता)

विदू—अहो पावेण मिच्चुणा गहीदोम्हि । (अहो पापेन मृत्युना गृहीतोऽस्मि ।)

राजा—मा कातरो भूः । अविषोऽपि कदाचिद् दंशो भवेत् ।

विदू०—कहं ण भाइस्सं । सिमसिमाअन्ति मे अंगाइँ ।
(कथं न भेष्यामि, सिमसिमायन्ति मेऽङ्गानि ।)

(विषवेगं रूपयति)

धारि०—हा दंसिदं असुहं विआरेण । अवलम्बथ बम्हणं ।

(हा ! दर्शितमशुभं विकारेण । अवलम्बध्वं ब्राह्मणम्)
(परिव्राजिका ससंभ्रममवलम्बते ।)

विदू०—(राजानं विलोक्य) भो ! भवदो बाल्लादो वि पिअवअस्सोम्हि । तं विआरिअ अपुत्ताए मे जणणीए जोगक्खमं वहेहि । (भोः ! भवतो बाल्यादपि प्रियवयस्योऽस्मि । तं विचार्य अपुत्राया मे जनन्या योगक्षेमं वह ।)

राजा—मा भैषीर्गौतम । स्थिरो भव । अचिरात् त्वां वैद्यश्चिकित्सिष्यति ।

(प्रविश्य)

जय०—देव ! आणाविदो ध्रुवसिद्धीविण्णावेदि इह एव्व आणीअदु सो गोदमो त्ति । (देव ! आज्ञापितो ध्रुवसिद्धिर्विज्ञापयति—इहैवानीयतां स गौतम इति ।)

राजा—तेन हि प्रतिगृहीतमेनं तत्रभवतः सकाशं प्रापय ।

जय०—तहा । (तथा ।)

विदू०—(देवीं विलोक्य) भोदि । जीवेअं वा ण वा । जं मए अत्तभवन्तं सेवमाणेण ते अवरद्धं तं मरिसेहि ।

(भवति । जीवेयं वा नवा । यन्मयात्रभवन्तं सेवमानेन तेऽपराद्धं तन्मृष्यस्व ।)

धारि०—दीहाऊ होहि । (दीर्घायुर्भव ।)

(निष्क्रान्तो विदूषकः प्रतीहारी च ।)

राजा—प्रकृतिभीरुस्तपस्वी ध्रुवसिद्धिमपि यथार्थनामानं सिद्धिमन्तं न मन्यते ।

(प्रविश्य)

जय०—जेदु जेदु भट्टा । ध्रुवसिद्धी विण्णावेदि—उदकुंभविहाणेण सप्पमुद्दिअं किंपि कप्पिदवं । तं अण्णेसीअदु त्ति ।

(जयतु जयतु भर्ता । ध्रुवसिद्धिर्विज्ञापयति—उदकुम्भविधानेन सर्पमुद्रितं किमपि कल्पयितव्यम् । तदन्विष्यतामिति ।)

धारि०—इदं सप्पमुद्दिअं अंगुलीअअं । पच्छा मम हत्थे देहि णं ।

(इदं सर्पमुद्रितमङ्गुलीयम् । पश्चान्मम हस्ते देह्येतत् ।)

(अङ्गुलीयकं ददाति)

(प्रतीहारी गृहीत्वा प्रस्थिता)

राजा—जयसेने । कर्मसिद्धावाशु प्रतिपत्तिमानय ।

प्रती०—जं देवो आणवेदि । (यद् देव आज्ञापयति ।)

परि०—यथा मे हृदयमाचष्टे तथा निर्विषो गौतमः ।

राजा—भूयादेवम् ।

२०

(प्रविश्य)

जय०—जेदु देवो भट्टा। णिवुत्तविसवेगो गोदमो मुहुत्तेण पकिदित्थो संवुत्तो। (जयतु देवो भर्ता। निवृत्तविषवेगो गौतमो मुहूर्तेन प्रकृतिस्थः संवृत्तः।)

धारि०—दिट्ठिआ वअणीआदो मुत्तम्हि। (दिष्ट्या वचनीयान्मुक्तास्मि।)

प्रती०—एसो उण वाहृतओ अमच्चो विण्णवेदि—राअकज्जं बहु मन्तिदव्वं दंसणेण अणुग्गहं इच्छामि त्ति। (एष पुनर्वाहतकोऽमात्यो विज्ञापयति—राजकार्यं बहु मन्त्रयितव्यम्, दर्शनेनानुग्रहमिच्छामीति।)

धारि०—गच्छदु अज्जउत्तो कज्जसिद्धीए! (गच्छत्वार्यपुत्रः कार्यसिद्धये।)

राजा—देवि! आतपाक्रान्तोऽयमुद्देशः। शीतक्रिया चास्या रुजः प्रशस्ता। तदन्यत्र नीयतां शयनम्।

देवी०—वालिगाओ। अज्जउत्तवअणं अणुचिट्ठह।
(बालिकाः! आर्यपुत्रवचनमनुतिष्ठत।)

परि०—तह। (तथा।) (निष्क्रान्ता देवी परिव्राजिका परिजनश्च)

राजा—जयसेने! मां गूढेन पथा प्रमदवनं प्रापय।

जय०—इदो इदो देवो। (इत इतो देवः।)

राजा—जयसेने! ननु समाप्तकाम्यो गौतमः।

जय०—अह इं। (अथ किम्।)

राजा—

इष्टाधिगमनिमित्तं प्रयोगमेकान्तसाध्यमपि मत्वा।
संदिग्धमेव सिद्धौ कातरमाशङ्कते हृदयम्॥५॥

(प्रविश्य)

विदू०—वड्ढदु भवं। सिद्धाणि दे मङ्गलकम्माणि।
(वर्धतां भवान्। सिद्धानि ते मङ्गलकर्माणि।)

राजा—जयसेने ! त्वमपि स्वं नियोगमशून्यं कुरु ।

जय०—जं देवो आणवेदि । (यद्, देव आज्ञापयति ।)

(निष्क्रान्ता)

राजा—गौतम ! क्षुद्रा माधविका । न खलु किंचिद् विचारितमनया ।

विदू०—देवीए अंगुलीअअमुद्दिअं देक्खिअ कहं विआरेदि ।
(देव्या अङ्गुलीयकमुद्रां दृष्ट्वा कथं विचारयति ।)

राजा—न खलु मुद्रामधिकृत्य ब्रवीमि । एतयोर्द्वयोः किंनिमित्तो मोक्षः । किं वा देव्याः परिजनमतिक्रम्य भवान् संदिष्ट इत्येवमनया प्रष्टव्यम् ।

विदू०—णं पुच्छिदोम्हि ! पुणो मन्दस्स मे तस्सिं पच्चुप्पण्णा मदी ।
(ननु पृष्टोऽस्मि । पुनर्मन्दस्य मे तस्मिन् प्रत्युत्पन्ना मतिः ।)

राजा—कथ्यताम् ।

विदू०—भणिदं मए । देव्वचिंतएहिं विण्णाविदो राआ—'सोवसग्गं वो णक्खत्तं' । ता अवस्सं सव्वबंधमोक्खो करीअदु त्ति ।
(भणितं मया । दैवचिन्तकैर्विज्ञापितो राजा—'सोपसर्गं वो नक्षत्रम्' । तदवश्यं सर्वबन्धमोक्षः क्रियतामिति ।)

राजा—(सहर्षम्) ततस्ततः ।

विदू०—तं सुणिअ देवीए इरावदीए चित्तं रक्खन्तीए राआ किल मोएदि त्ति अहं संदिट्ठो त्ति । तदो जुज्जदि त्ति ताए एव्वं संपादिदो अत्थो । (तच्छ्रुत्वा देव्या इरावत्याश्चित्तं रक्षन्त्या राजा किल मोचयतीत्यहं संदिष्ट इति । ततो युज्यत इति तयैवं सम्पादितोऽर्थः ।)

राजा—(विदूषकं परिष्वज्य) सखे ! प्रियोऽहं खलु तव ।

नहि बुद्धिगुणेनैव सुहृदामर्थदर्शनम् ।
कार्यसिद्धिपथस्त्वन्यः[1] स्नेहेनाप्युपलभ्यते ।।६।।

---

१. ०पथः सूक्ष्मः

विदू०—तुवरदु भवं। समुद्दघरए सहीसहिदं मालविअं ठाविअ भवन्तं पच्चुग्गदोम्हि। (त्वरतां भवान्। समुद्रगृहे सखीसहितां मालविकां स्थापयित्वा भवन्तं प्रत्युद्‌गतोऽस्मि।)

राजा—अहमेनां संभावयामि। गच्छाग्रतः।

विदू०—एदु भवं। (परिक्रम्य) एदं समुद्दघरं। (एतु भवान्। (परिक्रम्य) इदं समुद्रगृहम्।)

राजा—(साशङ्कम्) वयस्य! एषा कुसुमावचयव्यग्रहस्ता सख्यास्ते परिचारिका चन्द्रिका संनिकृष्टमागच्छति। इतस्तावदावां भित्तिगूढौ भवावः।

विदू०—अहो! कुंभीलएहिं कामुएहिं च परिहरणीआ क्खु चंदिआ। (अहो कुम्भीलकैः कामुकैश्च परिहरणीया खलु चन्द्रिका।)

(उभौ यथोक्तं कुरुतः।)

राजा—गौतम! कथं नु ते सखी मां प्रतिपालयति। एहि। एनां गवाक्षमाश्रित्य विलोकयावः।

विदू०—तह। (तथा।)

(उभौ विलोकयन्तौ तिष्ठतः।)

(ततः प्रविशति मालविका बकुलावलिका च।

बकु०—सहि! पणम भट्टारं। (सखि! प्रणम भर्तारम्।)

माल०—णमो दे। (नमस्ते।)

राजा—शङ्के मे प्रतिकृतिं निर्दिशति।

माल०—(सहर्षं द्वारमवलोक्य सविषादम्) हला! मं विप्पलंभेसि। (सखि! मां विप्रलम्भयसि।)

राजा—हर्षविषादाभ्यामत्रभवत्याः प्रीतोऽस्मि—

सूर्योदये भवति या सूर्यास्तमये च पुण्डरीकस्य।
वदनेन सुवदनायास्ते समवस्थे क्षणादूढे ॥७॥

बकु०—णं एसो चित्तगदो भट्टा। (नन्वेष चित्रगतो भर्ता।)

उभे—(प्रणिपत्य ।) जेदु भट्टा । (जयतु भर्ता ।)

माल०—हला ! तदा संभमदिट्ठे भट्टिणो रूवे जहा ण वितिण्हम्हि तहा अज्जवि मए भाविदो अवितिण्हदंसणो भट्टा । (सखि ! तदा संभ्रमदृष्टे भर्तू रूपे यथा न वितृष्णास्मि तथा अद्यापि मया भावितः अवितृष्णदर्शनो भर्ता ।)

विदू०—सुदं भवदा । तत्तहोदि—'चित्ते जहा दिट्ठो ण तहा दिट्ठो भव'त्ति मन्तेदि । मुहा दाणिं मंजूसा विअ रअणभंडअं जोव्वणगव्वं वहेसि । (श्रुतं भवता । तत्रभवती—'चित्रे यथा दृष्टो न तथा दृष्टो भवानि'-ति मन्त्रयति । मुधेदानीं मञ्जूषेव रत्नभाण्डं यौवनगर्वं वहसि)

राजा—सखे ! कुतूहलवानपि निसर्गशालीनः स्त्रीजनः । पश्य—

कार्त्स्न्येन निर्वर्णयितुं च रूप-
मिच्छन्ति तत्पूर्वसमागमानाम् ।
न च प्रियेष्वायतलोचनानां
समग्रवृत्तीनि विलोचनानि ।।८।।

माल०—हला ! का एसा पासपरिउत्तमुहेण भट्टिणा सिणिद्धाए दिट्ठीए णिज्झाईअदि । (सखि ! कैषा पार्श्वपरिवृत्तमुखेन भर्त्रा मे स्निग्धया दृष्ट्या निध्यायते ।)

वकु०—णं इअं पासगदा इरावदी । (नन्वियं पार्श्वगतेरावती ।)

माल०—सहि ! अदक्खिणो विअ भट्टा मे पडिभादि जो सव्वं देवीजणं उज्झिअ एक्काए मुहे वद्धलक्खो । (सखि ! अदक्षिण इव भर्ता मे प्रतिभाति यः सर्वं देवीजनमुज्झित्वा एकस्या मुखे वद्धलक्ष्यः ।

बकु०—(आत्मगतम्) चित्तगदं भट्टारअं परमत्थदो संकप्पिअ असूअदि । होदु । कीडिस्सं दाव एदाए । (प्रकाशम्) हला ! भट्टिणो वल्लहा एसा । (चित्रगतं भर्तारं परमार्थतः संकल्प्यासूयति । भवतु । क्रीडिष्यामि तावदेतया । सखि ! (प्रकाशम्) भर्तुर्वल्लभैषा ।)

माल०—तदो किं दाणिं अत्ताणं आआसइस्सं । (ततः किमिदानीमात्मान-मायासयिष्यामि ।)

(सासूयं परावर्तते ।)

राजा—सखे ! पश्य ।

भ्रूभङ्गभिन्नतिलकं स्फुरिताधरोष्ठं
सासूयमाननमितः परिवर्तन्त्या ।
कान्तापराधकुपितेष्वनया विनेतुः
संदर्शितेव ललिताभिनयस्य शिक्षा ॥९॥

विदू०—अणुणअसज्जो दाणिं होहि । (अनुनयसज्जः इदानीं भव ।)

माल०—अज्जगोदमो एत्थ एव संसेवदि णं । (आर्यगौतमोऽत्रैव संसेवत एनाम् ।)

(पुनः स्थानान्तराभिमुखी भवितुमिच्छति ।)

बकु०—(मालविकां रुद्ध्वा) ण क्खु कुविदा दाणिं तुमं ।
(न खलु कुपितेदानीं त्वम्)

माल०—जइ चिरं कुविदं एव्व मं मण्णेसि एसो पच्चाणीअदि कोवो ।
(यदि चिरं कुपितामेव मां मन्यसे एष प्रत्यानीयते कोपः ।)

राजा—(उपेत्य)

कुप्यसि कुवलयनयने चित्रार्पितचेष्टया किमेतन्मे ।
ननु तव साक्षादयमहमनन्यसाधारणो दासः ॥१०॥

बकु०—जेदु जेदु भट्टा । (जयतु जयतु भर्ता ।)

माल०—(आत्मगतम्) कहं चित्तगदो भट्टा मए असूइदो ।
(कथं चित्रगतो भर्ता मया असूयितः ।)

(प्रकाशं सव्रीडवदनमञ्जलिं करोति ।)

(राजा मदनकातर्यं रूपयति ।)

विदू०—किं भवं उदासीणो विअ दीसइ । (किं भवानुदासीन इव दृश्यते ।)

राजा—अविश्वसनीयत्वात् सख्यास्तव ।

विदू०—अत्तहोदीए अअं कहं तुई अविस्सासो ।
(अत्रभवत्याम् अयं कथं तव अविश्वासः ।)

राजा—श्रूयताम् ।

पथि नयनयोः स्थित्वा स्थित्वा तिरोभवति क्षणात्
सरति सहसा बाह्वोर्मध्यं गतापि सखी तव ।
मनसिजरुजा क्लिष्टस्यैवं समागममायया
कथमिव सखे विस्रब्धं स्यादिमां प्रति मे मनः ॥११॥

बकु०—सहि । बहुसो क्खु भट्टा विप्पलद्धो । ता तुए अत्ता विस्ससणिज्जो करीअदु । (सखि ! बहुशः किल भर्ता विप्रलब्धः । तत्त्वयात्मा विश्वसनीयः क्रियताम् ।)

माल०—सहि ! मह उण मन्दभग्गाए सिविणसमाअमो वि भट्टिणो दुल्लहो आसि । (सखि ! मम पुनर्मन्दभाग्यायाः स्वप्नसमागमोऽपि भर्तुर्दुर्लभ आसीत् ।)

बकु०—भट्टा । कहेदु से उत्तरं । (भर्ता कथयत्वस्या उत्तरम् ।)

राजा—

उत्तरेण किमात्मैव पञ्चबाणाग्निसाक्षिकम् ।
तव सख्यै मया दत्तो न सेव्यः सेविता रहः ॥१२॥

बकु०—अणुगहीदम्हि । (अनुगृहीतास्मि ।)

विदू०—(परिक्रम्य ससंभ्रमम्) वउलावलिए ! एसो बालासोअरुक्खस्स पल्लवाइँ लंघेदि हरिणो । एहि णिवारेम णं । (बकुलावलिके ! एष बालाशोकवृक्षस्य पल्लवानि लङ्घयति हरिणः । एहि, निवारयाम एनम् ।)

(प्रस्थिता ।)

बकु०—तह । (तथा ।)

राजा—वयस्य ! एवमेवास्मिन् रक्षणक्षणेऽवहितेन त्वया भवितव्यम् ।

विदू०—एव्वं वि गोदमो सन्दिसेअदि । (एवमपि गौतमः सन्दिश्यते ?)

बकु०—(परिक्रम्य) अज्ज गोदम । अहं अप्पआसे चिट्ठामि । तुमं दुवाररक्खओ होहि । (आर्य गौतम ! अहमप्रकाशे तिष्ठामि । त्वं द्वाररक्षको भव ।)

विदू०—जुज्जदि । (युज्यते ।)

(निष्क्रान्ता बकुलावलिका)

विदू०—इमं दाव फलिहक्खंभं अस्सिदो होमि । (तथा कृत्वा) अहो सुहप्फरिसदा सिलाविसेसस्स । (इमं तावत् स्फटिकस्तम्भमाश्रितो भवामि । (तथा कृत्वा) अहो सुखस्पर्शता शिलाविशेषस्य ।) (निद्रायते ।)

(मालविका ससाध्वसा तिष्ठति)

राजा—

विसृज सुन्दरि संगमसाध्वसं
मयि[1] चिरात् प्रभृति प्रणयोन्मुखे ।
परिगृहाण गते सहकारतां
त्वमतिमुक्तलताचरितं मयि ।।१३।।

माल०—देवीए भएण अत्तणो वि पिअं कादुं ण पारेमि । (देव्या भयेनात्मनोऽपि प्रियं कर्तुं न पारयामि ।)

राजा—अयि ! न भेतव्यम् ।

माल०—(सोपालम्भम्) जो ण भाअदि सो मए भट्टिणीदंसणे दिट्ठसामत्थो भट्टा । (यो न बिभेति स मया भट्टिनीदर्शने दृष्टसामर्थ्यो भर्ता ।)

राजा—

दाक्षिण्यं नाम बिम्बोष्ठि ! नायकानां[2] कुलव्रतम् ।
तन्मे दीर्घाक्षि ! ये प्राणास्ते त्वदाशानिबन्धनाः ।।१४।।

तत् अनुगृह्यतां चिरानुक्तोऽयं जनः । (संश्लेषमुपजनयति ।)

(मालविका नाट्येन परिहरति)

राजा—(आत्मगतम्) रमणीयः खलु नवाङ्गनानां मदनविषयावतारः । तथा ह्ययम्—

हस्तं कम्पवती[3] रुणद्धि रसनाव्यापारलोलाङ्गुलिं[4]
स्वौ हस्तौ नयति स्तनावरणतामालिङ्ग्यमाना बलात् ।
पातुं पक्ष्मलनेत्रमुन्नमयतः साचीकरोत्याननं
व्याजेनाप्यभिलाषपूरणसुखं निर्वर्तयत्येव मे ।।१५।।

---

१. तव. पा. २. बैम्बिनाम् पा. ३. ०यते नि.च. ४. ०ली: नि. च.

(ततः प्रविशतीरावती निपुणिका च)

इरा०—हंजे णिउणिए ! सच्चं तुमं परिगदत्था चंदिआए। समुद्दघरअलिंदसइदो एआई अज्जगोदमो दिट्ठो त्ति। (हञ्जे निपुणिके ! सत्यं त्वं परिगतार्था चन्द्रिकया। समुद्रगृहालिन्दशयित एकाकी आर्यगौतमो दृष्ट इति।)

निपु०—अण्णहा कहं भट्टिणीए विण्णावेमि।
(अन्यथा कथं भट्टिन्यै विज्ञापयामि।)

इरा०—तेण हि तहिं एव्व गच्छम्ह संसआदो मुत्तं पिअवअस्सं पुच्छिदुं अ।
(तेन हि तत्रैव गच्छामः। संशयान्मुक्तं प्रियवयस्यं प्रष्टुं च।)

निपु०—सावसेसं विअ भट्टिणीए वअणं। (सावशेषमिव भट्टिन्या वचनम्।)

इरा०—अण्णं अ चित्तगदं अज्जउत्तं पसादेदुं।
(अन्यच्च चित्रगतमार्यपुत्रं प्रसादयितुम्।)

निपु०—अह दाणिं कहं णु भट्टा एव्वं अणुणीअदि।
(अथेदानीं कथं नु भर्ता एवमनुनीयते।)

इरा०—मुद्धे ! जारिसो चित्तगदो णं तारिसो एव्व अण्णसंकंतहिअओ अज्जउत्तो। केवलं उवआरादिक्कमं पमज्जिदुं अअं आरंभो। (मुग्धे ! यादृशश्चित्रगतो ननु तादृश एवान्यसंक्रान्तहृदय आर्यपुत्रः। केवलमुपचारातिक्रमं प्रमार्जितुमयमारम्भः।)

निपु०—इदो इदो भट्टिणी। (इत इतो भट्टिनी।)

(उभे परिक्रामतः।)

(प्रविश्य)

चेटी—जेदु जेदु भट्टिणी भट्टिणी। देवी भणादि—ण मे मच्छरस्स एसो कालो। तेण क्खु वहुमाण वड्ढेदुं वअस्साए सह णिअलबंधण किदा मालविआ। जइ अणुमण्णसि अज्जउत्तस्स पिअं कादुं तहा करेमि। जं तुह इच्छिअं तं मे भणाहि त्ति। (जयतु जयतु भट्टिनी। भट्टिनि ! देवी भणति—न मे मत्सरस्यैष कालः। तेन खलु बहुमानं वर्धयितुं वयस्यया सह निगडबन्धने कृता मालविका। यद्यनुमन्यसे आर्यपुत्रस्य प्रियं कर्तुं तथा करोमि। यत्तवेष्टं तन्मे भणेति।)

इरा०—णाअरिए। विण्णावेहि देवीं—'का वअं भट्टिणी णिओजेदुं! परिअणणिग्गहेण दंसिदो मइ अणुग्गहो। कस्स वा पसादेण अअं जणो वड्ढदि'त्ति। (नागरिके! विज्ञापय देवीम्—'का वयं भट्टिनीं नियोजयितुम्। परिजननिग्रहेण दर्शितो मय्यनुग्रहः कस्य वा प्रसादेनायं जनो[1] वर्धत इति।)

चेटी—तह। (तथा।) (निष्क्रान्ता।)

निपु०—(परिक्रम्यावलोक्य च) भट्टिणि! एसो दुवारुद्देसे समुद्दघरअस्स विपणिगदो विअ बलीवद्दो अज्जगोदमो आसीणो एव्व णिद्दाअदि। (भट्टिनि! एष द्वारोद्देशे समुद्रगृहस्य विपणिगत इव बलीवर्दः आर्यगौतमः, आसीन एव निद्रायते।)

इरा०—अच्चाहिदं ण क्खु सावसेसो विसविआरो हवे। (अत्याहितम्। न खलु सावशेषो विषविकारो भवेत्।

निपु०—पसण्णमुहवण्णो दीसइ। अवि अ धुवसिद्धिणा चिइच्छदो त से असंकणिज्जं पावं। (प्रसन्नमुखवर्णो दृश्यते। अपि च ध्रुवसिद्धिना चिकित्सितः। तदस्याङ्कनीयं पापम्।)

विदू०—(उत्स्वप्नायते) भोदि मालविए। (भवति मालविके!)

निपु०—सुदं भट्टिणीए। कस्स एसो अत्तणिओअसंपादणे विस्ससणिज्जो हदासो। सव्वकालं इदो एव्व सोत्थिवाअणमोदएहिं कुक्खि पूरिअ संपदं मालविअं सिविणावेदि। (श्रुतं भट्टिन्या। कस्यैव आत्मनियोगसम्पादने विश्वसनीयो हताशः। सर्वकालमित एव स्वस्तिवाचनमोदकैः कुक्षिं पूरयित्वा साम्प्रतं मालविकां स्वप्नायते।)

विदू०—इरावदीं अदिक्कमन्ती होहि। (इरावतीमतिक्रामन्ती भव)

निपु०—एदं अच्चाहिदं। इमं भुअंगभीरुअं बम्हबंधुं इमिणा भुअंगकुडिलेण दंडकट्ठेण खंभंतरिदा भाअइस्सं। (एतदत्याहितम्। इमं भुजंगभीरुं ब्रह्मबन्धुमनेन भुजङ्गकुटिलेन दण्डकाष्ठेन स्तम्भान्तरिता भीषयिष्यामि।)

---

१. अयं जनो मल्लक्षणो भर्त्ता चेति विनय उपालम्भश्च।

इरा०—अरिहदि एव्व किदग्घो उवद्दवस्स । (अर्हत्येव कृतघ्न उपद्रवस्य ।)

(निपुणिका विदूषकस्योपरि दण्डकाष्ठं पातयति ।)

विदू०—(सहसा प्रबुध्य) अविहा अविहा । भो वअस्स । सप्पो मे उवरि पडिदो । (अविधा अविधा । भो वयस्य ! सर्पो मे उपरि पतितः ।)

राजा—(सहसोपसृत्य) सखे ! न भेतव्यं न भेतव्यम् ।

माल०—(अनुसृत्य) भट्टा । मा दाव सहसा णिक्कम । सप्पो त्ति भणीअदि । (भर्तः ! मा तावत् सहसा निष्क्राम । सर्प इति भण्यते ।)

इरा०—हद्धी हद्धी । भट्टा इदो एव्व धावदि । (हा धिक् हा धिक् ! भर्ता इत एव धावति ।)

विदू०—(सप्रहासम्) कहं दंडकट्ठं एदं । अहं उण जाणे जं मए केदईकंटएहिं डंसं करिअ सप्पस्स उवरि अअसो किदं तं मे फलिदं त्ति । (कथं दण्डकाष्ठमेतत् । अहं पुनर्जाने यन्मया केतकीकण्टकैर्दंशं कृत्वा-सर्पस्योपरि अयशः कृतं तन्मे फलितमिति ।

(प्रविश्य [1]पटाक्षेपेण ।)

वकु०—मा दाव भट्टा पविसदु । इह कुडिलगई सप्पो विअ दीसदि । मा तावद् भर्ता प्रविशतु । इह कुटिलगतिः सर्प इव दृश्यते ।)

इरा०—(स्तम्भान्तरिता राजानं सहसोपेत्य) अवि णिव्विग्घमणोरहो दिवासंकेदो मिहुणस्स । (अपि निर्विघ्नमनोरथो दिवासङ्केतो मिथुनस्य ।)

(सर्वे इरावतीं दृष्ट्वा संभ्रान्ताः ।)

राजा—प्रिये ! अपूर्वोऽयमुपचारः ।

इरा०—वउलावलिए । दिट्ठिआ दुच्चाहिसारविसआ संपुण्णा दे पइण्णा । (वकुलावलिके ! दिष्ट्या [2]दूत्याभिसारविषया संपूर्णा ते प्रतिज्ञा ।)

---

१. सर्वत्रायमेव पाठः । २. दूत्यं दौत्यम्, तेनाभिसारः, स विषयो यस्याम् । दुच्चाहिआरेत्ति पाठे दूत्याधिकार इतिच्छाया ।

बकु०—पसीददु भट्टिणी ! किं मए किदं त्ति देवो पुच्छिदव्वो । दद्दुरा वाहरन्ति त्ति किं देवो पुहवीएँ वरिसिदुं विरमदि ।

(प्रसीदतु भट्टिनि ! किं मया कृतमिति देवः प्रष्टव्यः । दर्दुरा व्याहरन्तीति किं देवः पृथिव्यां वर्षितुं विरमति ।)

विदू०—मा दाव । भोदीए दंसणमत्तेण अत्तभवं पणिवादलंघणं विसुमरिदो । तुमं उण अज्जवि पसादं ण गेण्हसि । (मा तावत् । भवत्याः दर्शनमात्रेणात्रभवान् प्रणिपातलङ्घनं विस्मृतः । त्वं पुनरद्यापि प्रसादं न गृह्णासि)

इरा०—कुविदा दाणिं अहं किं करिस्सं । (कुपितेदानीमहं किं करिष्यामि ।)

राजा—एवमेतद् 'अस्थाने कोप' इत्यनुपपन्नं त्वयि । तथा हि—

कदा मुखं वरतनु कारणादृते
तवागतं क्षणमपि कोपपात्रताम् ।
अपर्वणि ग्रहकलुषेन्दुमण्डला
विभावरी कथय कथं भविष्यति ॥१६॥

इरा०—अट्ठाणे त्ति सुट्ठु वाहरिदं अज्जउत्तेण । अण्णसंकन्तेसु अम्हाणं भाअहेएसु जइ उण कुप्पेअं तदो णं अहं हस्सा भवेअं । (अस्थान इति सुष्ठु व्याहृतमार्यपुत्रेण । अन्यसंक्रान्तेष्वस्माकं भागधेयेषु यदि पुनः कुप्येयम् ततो नन्वहं हास्या भवेयम् ।)

राजा—त्वमन्यथा कल्पयसि । अहं पुनः सत्यमेव कोपस्थानं न पश्यामिः । कुतः—

नार्हति कृतापराधोऽप्युत्सवदिवसेषु परिजनो बन्धुम् ।
इति मोचिते मयैते प्रणिपतितुं मामुपगते च ॥१७॥

इरा०—णिउणिए ! गच्छ । देवीं विण्णावेहि-दिट्ठोभवदीए पक्खवादो णं अज्ज त्ति । (निपुणिके ! गच्छ । देवीं विज्ञापय—दृष्टो भवत्याः पक्षपातो नन्वद्येति ।)

निपु०—तह । (तथा ।) (निष्क्रान्ता)

विदू०—(आत्मगतम्) अहो अणत्थो संपडिदो। वंधणब्भट्टो गिहकवोदो विडालिआए आलोए पडिदो। (अहो अनर्थः संपतितः वन्धनभ्रष्टो गृहकपोतो विडालिकाया आलोके पतितः।)

निपु०—(प्रविश्यापवार्य) भट्टिणी ! जदिच्छादिट्ठाए माहविआए आचक्खिदं एव्वं क्खु एदं णिव्वुत्तं त्ति। (भट्टिनि ! यदृच्छादृष्टया माधविकयाख्यातम्—एवं खल्वेतन्निर्वृत्तमिति।)

(कर्णे कथयति।)

इरा०—(आत्मगतम्) उववण्णं। सच्चं अअं एत्थ वह्मबंधुणा किदो पओओ। (विदूषकं विलोक्य प्रकाशम्) इअं इमस्स कामतन्तसचिवस्स णीदी। (उपपन्नम्। सत्यमयमत्र ब्रह्मबन्धुना कृतः प्रयोगः। (विदूषकं विलोक्य प्रकाशम्) इयमस्य कामतन्त्रसचिवस्य नीतिः)

विदू०—भोदि ! जदि णीदिगदं एक्कं वि अक्खरं पढेअ णं मए अत्तभवं पासिदो हवे ! (भवति ! यदि नीतिगतमेकमप्यक्षरं पठेयं ननु मया अत्रभवान् पाशितो[1] भवेत् ?

राजा—(आत्मगतम्) कथं नु खल्वस्मात् सङ्कटादात्मानं मोचयिष्यामि।

(प्रविश्य)

जय०—देव ! कुमारी वसुलच्छी कंदुअं अणुधावन्दी पिंगलवाणरेण वलीअं तासिदा अंकणिसण्णा देवीए पवादकिसलअं विअ वेवमाणा ण किंवि पकिदिं पडिवज्जइ। (देव ! कुमारी वसुलक्ष्मीः कन्दुकमनुधावन्ती पिङ्गलवानरेण बलवत्त्रासिता,अङ्कनिषण्णा देव्याः प्रवातकिसलयमिव वेपमाना न किंचित् प्रकृतिं प्रतिपद्यते)

राजा—कष्टं कष्टम्। कातरो बालभावः।

इरा०—(सावेगम्) तुवरदु अज्जउत्तो णं समासासिदुं। मा से संतासजणिदो विआरो वड्ढदु। (त्वरतामार्यपुत्र एनां समाश्वासयितुम्। मास्याः सत्रासजनितो विकारो वर्धताम्।)

---

१. क. तदो गाअत्तिं वि विम्हरेअं = तदा गायत्रीमपि विस्मरेयम् नि-९. क. ख. मए अत्तभवं पेसिदो = मया अत्रभवान् प्रेषितः' का.च. नि-.४

राजा—अयमेनामहं संज्ञापयामि ।

(सत्वरं परिक्रामति ।

विदू—साहु रे पिंगलवाणर साहु । परित्तादो तुए सपक्खो ।
(साधु पिङ्गलवानर साधु । परित्रातस्त्वया स्वपक्षः ।)

(निष्क्रान्तो राजा विदूषकश्च, इरावती निपुणिका प्रतिहारी च ।)

माल०—हला देवि चिन्तिअ वेवदि मे हिअअं । ण जाणे अदो वरं किं वा अणुहविदव्वं हविस्सदि त्ति । (सखि ! देवीं चिन्तयित्वा वेपते हृदयम् । न जाने अतः परं किं वानुभवितव्यं भविष्यतीति ।

(नेपथ्ये)

अच्चरिअं अच्चरिअं अपुण्णे एव्व पंचरत्ते दोहलस्स मुउलेहिं संणद्धो तवणीआसोओ । जाव देवीए णिवेदेमि ।

(आश्चर्यमाश्चर्यम् । अपूर्ण एवं पञ्चरात्रे दोहदस्य मुकुलैः संनद्धस्तपनीयाशोकः । यावद् देव्यै निवेदयामि ।)

(उभौ श्रुत्वा प्रहृष्टे ।)

बकु०—आस्ससिदु सही । सच्चप्पइण्णा देवी ।
(आश्वसितु सखी ! सत्यप्रतिज्ञा देवी ।)

माल०—तेण हि पमदवणपालिआए पिट्ठदो होमि ।
(तेन हि प्रमदवनपालिकायाः पृष्ठतो भवामि ।)

बकु०—तह । (तथा ।)

(निष्क्रान्ते)

॥ इति चतुर्थोऽङ्कः ॥

।। [1]अथ प्रवेशकः ।।

(ततः प्रविशत्युद्यानपालिका ।)

उद्या०—उवक्खितो मए किदसक्कारविहिणो तवणीआसोअस्स वेदिआबंधो जाव अणुट्ठिदणिओअं अत्ताणं देवीए णिवेदेमि। (परिक्रम्य) अहो दैवस्य अणुकंपणीआ मालविआ। तस्सिं तह चंडिआ देवी इमिणा असोअकुसुमवुत्तंतेण पसादसुमुही हविस्सदि। कहिं णु क्खु देवी हवे। (विलोक्य) अम्हो एसो देवीए परिअणब्भन्तरो किंवि जदुमुद्दालंछिदं मंजूसं गेण्हिअ चदुस्सालादो कुज्जो सारसिओ णिक्कामदि। पुच्छिसं दाव णं। सारसिअ कहिं पत्थिदोसि।

(उपक्षिप्तो मया कृतसत्कारविधिस्तपनीयाशोकस्य वेदिकाबन्धः। यावदनुष्ठितनियोगमात्मानं देव्यै निवेदयामि। (परिक्रम्य) अहो दैवस्य अनुकम्पनीया मालविका! तस्यां तथा चण्डी देवी अनेनाशोककुसुमवृत्तान्तेन प्रसादसुमुखी भविष्यति। कुत्र नु खलु देवी भवेत्। (विलोक्य) अहो एष देव्याः परिजनाभ्यन्तरः किमपि जतुमुद्रालाञ्छितां मञ्जूषां गृहीत्वा चतुश्शालातः कुब्जः सारसिको निष्क्रामति। पृच्छामि तावदेनम्। सारसिक! कुत्र प्रस्थितोऽसि ?)

(ततः प्रविशति यथानिर्दिष्टहस्तः कुब्जः।)

सार०—महुअरिए विज्जाभरिआणं बह्मणाणं णिच्चदक्खिणा [2]दादव्वा। तं अज्ज पुरोहिदस्स हत्थं पावइस्सं। (मधुकरिके! विद्याभरितानां ब्राह्मणानां नित्यदक्षिणा [2]दातव्या। तामद्य पुरोहितस्य हस्तं प्रापयिष्यामि।)

मधु०—अह किंणिमित्तं। (अथ किंनिमित्तम् ?)

---

१. इयमस्माकं पाठयोजना। अत्र पञ्चमोङ्कः सा.च. नि-४, नि-९. क.

२. णां मासिइं णिक्कादिरूपं पु०' का. नि-९.। ०णामाडिका निष्काणि पु० का नि-४.

सार०—जदप्पहुदि सेणावदी जण्णतुरंगरक्खणे णिउत्तो भट्टदारओ वसुमित्तो तदप्पहुदि तस्स आउसणिमित्तं णिक्कसदसुवण्णपरिमाणं दक्खिणं देवी दक्खिणीएहिं परिग्गाहेदि। (यतः प्रभृति सेनापतिर्यज्ञतुरङ्गरक्षणे नियुक्तो भर्तृदारको वसुमित्रः ततः प्रभृति तस्यायुर्निमित्तं निष्कशतसुवर्णपरिमाणां दक्षिणां देवी दक्षिणीयैः परिग्राहयति।)

मधु०—अह कहिं देवी ? किं वा अणुचिट्ठदि ? (अथ कुत्र देवी ? किं वानुतिष्ठति ?)

सार०—मंगलघरे आसणत्था भविअ विदब्भ-विसआदो भादुणा वीरसेणेण पेसिदं लेहं लेहकरेहिं वाइअमाणं सुणादि। (मङ्गलगृहे आसनस्था भूत्वा विदर्भविषयाद् भ्रात्रा वीरसेनेन प्रेषितं लेखं लेखकैर्वाच्यमानं शृणोति।)

मधु०—को उण विदब्भराअवुत्तन्तो सुणीअदि। (कः पुनर्विदर्भराजवृत्तान्तः श्रूयते।)

सार०—वसीकिदो क्खु वीरसेणप्पमुहेहिं भत्तुणो विजअदंडेहिं विदब्भणाहो। मोइदो से दाआदो माहवसेणो दूदो। अ तेण महासाराणि रअणाणि वाहणाणि सिप्पआरिआ-भूइट्ठं परिअणं उवाअणीकरिअ भट्टिणो सआसं पेसिदो त्ति। (वशीकृतः किल वीरसेनप्रमुखैर्भर्तुर्विजयदण्डैर् विदर्भनाथः। मोचितोऽस्य दायादो माधवसेनः। दूतश्च तेन महासाराणि रत्नानि वाहनानि शिल्पकारिकाभूयिष्ठं परिजनमुपायनीकृत्य भर्तुः सकाशं प्रेषित इति।)

मधु०—गच्छ अणुचिट्ठ अत्तणो णिओअं। अहं वि देविं पेक्खिस्सं। (गच्छानुतिष्ठात्मनो नियोगम्। अहमपि देवीं प्रेक्षिष्ये।)

(निष्क्रान्ते।)

॥ इति प्रवेशकः ॥

अथ पञ्चमोऽङ्कः

(ततः प्रविशति प्रतिहारी)

प्रति०—आणत्तम्हि असोअसक्कारवावुदाए देवीए—विण्णावेहि अज्जउत्तम् इच्छम्मि उज्जउत्तेण सह असोअरुक्खस्स पसूणलच्छि पच्चक्खीकादुं त्ति। ता जाव धम्मासणगादं देवं पडिवालेमि। (आज्ञाप्तास्मि अशोकसत्कारव्यापृतया देव्या—विज्ञापय आर्यपुत्रम्-इच्छामि आर्यपुत्रेण सहाशोकवृक्षस्य प्रसूनलक्ष्मीं प्रत्यक्षीकर्तुमिति। तद् यावद् धर्मासनागतं देवं प्रतिपालयामि)

(परिक्रामति।)

(नेपथ्ये वैतालिकौ)

प्रथमः—विजयतां विजयतां देवः। दिष्टचा दण्डैरेव रिपुशिरःसु वर्तते देवः।

परभृतकलव्याहरेषु त्वमात्तरतिर्मधुं
नयसि विदिशातीरोद्यानेष्वनङ्ग इवाङ्गवान्।
विजयकरिणामालानत्वं गतैः प्रबलस्य ते
वरद [1]वरदारोधोवृक्षैः सहावनतो रिपुः ॥१॥

द्वितीयः—

विरचितपदं[2] वीरप्रीत्या सुरोपम सूरिभि-
श्चरितमुभयोर्मध्येकृत्य स्थितं क्रथकैशिकान्।
तव हृतवतो दण्डानीकैर्विदर्भपतेः श्रियं
परिघगुरुभिर्दोर्भिर्विष्णोः प्रसह्य च रुक्मिणीम् ॥२॥

प्रती०—एसो जअसद्दसूइदप्पत्थाणो भट्टा इदो एव्व आअच्छदि। अहं वि दाव इमस्स पमुहादो लोआदो ओसरिअ खम्भन्तरिदा होमि। (एष जयशब्दसूचितप्रस्थानो भर्ता इत एवागच्छति। अहमपि

१. वरदा नदीविशेषः। २. अत्राद्ययोः पादयोर्व्यत्यासो युक्तः।

तावदस्य प्रमुखाल्लोकादपसृत्य स्तम्भान्तरिता भवामि। (एकान्ते स्थिता।)

(प्रविश्य सवयस्यो राजा)

राजा— कान्तां विचिन्त्य सुलभेतरसंप्रयोगां
श्रुत्वा विदर्भपतिमानमितं बलैश्च।
धाराभिरातप इवाभिहतं सरोजं
दुःखायते मम मनः सुखमश्नुते च ॥३॥

विदू०—जह अहं पेक्खिामि तह एक्कन्तसुहिदो भवं हविस्सदि। (यथाहं प्रेक्ष्ये तथा एकान्तसुखितो भवान् भविष्यति।)

राजा—कथमिव।

विदू—अज्ज किल देवीए एव्वं पंडितकोसिई भणिदा—भअवदि! जं तुमं पसाहणगव्वं वहसि तं दंसेहि मालविआए सरीरे विवाह-णेवत्थं त्ति। ताए सविसेसालंकिदा मालविआ। तत्तहोदी कदावि पूरए भवदो वि मणोरहं। (अद्य किल देव्या एवं पण्डित-कौशिकी भणिता—भगवती! यत् त्वं प्रसाधनगर्वं वहसि तद् दर्शय मालविकायाः शरीरे विवाहनेपथ्यमिति। तया सविशेषालंकृता मालविका। तत्रभवती कदाचित् पूरयेद् भवतोऽपि मनोरथम्।)

राजा—सखे! मदपेक्षानुवृत्त्या निवृत्तेर्ष्यायाॱ[1] धारिण्या पूर्वाचरितैः संभाव्यत एवैतत्।

प्रति०—(उपगम्य) जेदु जेदु भट्टा। देवी विण्णावेदि—तवणीआसोअस्स कुसुमसहदंसणेण मह आरम्भो सफलो करीअदु त्ति। (जयतु जयतु भर्ता। देवी विज्ञापयति—तपनीयाशोकस्य कुसुमसहदर्शनेन ममारम्भः सफलः क्रियतामिति।)

राजा—ननु तत्रैव देवी तिष्ठति?

प्रति०—अह इं। जहरिहसंमाणसुहिअं अन्तेउरं विसज्जिअ मालविआ-पुरोएण अत्तणो परिअणेण सह देवं पडिवालेदि। (अथ किम्। यथार्हसम्मानसुखितमन्तःपुरं विसृज्य मालविकापुरोगेण आत्मनः परिजनेन सह देवं प्रतिपालयति।)

---

१. मनुप्राप्य अनया नि-४, च.

राजा—(सहर्षं विदूषकं विलोक्य) जयसेने । गच्छाग्रतः ।

प्रति०—एदु एदु देवो । (एत्वेतु देवः ।) (परिक्रामति ।)

विदू०—(विलोक्य) भो वअस्स । किंवि परिवुत्तजोव्वणो विअ वसन्तो पमदवणे लक्खीअदि । (भो वयस्य ! किंचित्परिवृत्तयौवन इव वसन्तः प्रमदवने लक्ष्यते ।)

राजा—यथाह भवान्

अग्रे विकीर्ण-कुरवक-फल-जालकभिद्यमान-सहकारम् ।
परिणामाभिमुखमृतोरुत्सुकयति यौवनं चेतः ।।४।।

विदू०—(परिक्रम्य) अहो । अअं सो दिण्णणेवत्थो विअ कुसुमत्थवएहिं तवणीआसोओ । ओलोअदु भवं । (अहो । अयं स दत्तनेपथ्य इव कुसुमस्तवकैस्तपनीयाशोकः । अवलोकयतु भवान् ।)

राजा—स्थाने खलु प्रसवमन्थरोऽयमभूत् । यदिदानीमनन्यसाधारणीं शोभामुद्वहति । पश्य—

सर्वाशोकतरूणां प्रथमं सूचितवसन्तविभवानाम् ।
निर्वृत्तदोहदेऽस्मिन् संक्रान्तानीव कुसुमानि ।।५।।

विदू०—तह । भो वीसद्धो होहि अम्हेसु संणिहिदेसु वि धारिणी पासपरिवट्टिणीं मालविअं अणुमण्णेदि । (तथा । भोः विस्रब्धो भव । अस्मासु संनिहितेष्वपि धारिणी पार्श्वपरिवर्तिनीं मालविकामनुमन्यते ।)

राजा—(सहर्षम्) सखे । पश्य—

मामियमभ्युत्तिष्ठति देवी विनयादनूत्थिता प्रियया ।
विस्मृत[1]-हस्त-कमलया नरेन्द्रलक्ष्म्या वसुमतीव ।।६।।

(ततः प्रविशति धारिणी मालविका परिव्राजिका विभवतश्च परिवारः ।)

माल०—(आत्मगतम्) जाणामि णिमित्तं कोदुआलंकारस्स । तह वि मे हिअअं विसिणीपत्तगदं विअ सलिलं वेवदि । अवि अ दक्खिणेदरं वि मे णअणं बहुसो फुरदि । (जानामि निमित्तं [2]कौतुकालंकारस्य ।

---

१. विस्तृत०. २. कौतुकं विवाहहस्तसूत्रं कङ्कणनाम्ना प्रतीतम् ।

अथापि मे हृदयं बिसिनीपत्रगतमिव सलिलं वेपते। अपि च दक्षिणेतरमपि मे नयनं बहुशः स्फुरति।)

विदू०—भो वअस्स ! विवाहणेवत्थेण सविसेसं क्खु सोहदि मालविआ। (भो वयस्य ! विवाहनेपथ्येन सविशेषं खलु शोभते मालविका।)

राजा—पश्याम्येनाम्। यैषा—

अनतिलम्बिदुकूलनिवासिनी
बहुभिराभरणैः प्रतिभाति मे।
उडुगणैरुदयोन्मुखचन्द्रिका
हतहिमैरिव चैत्रविभावरी ॥७॥

धारि०—(उपेत्य) जेदु जेदु अज्जउत्तो। (जयतु जयत्वार्यपुत्रः)

विदू०—वड्ढदु भोदी। (वर्धतां भवती।)

परि०—विजयतां देवः।

राजा—भगवति अभिवादये।

परि०—अभिप्रेतसिद्धिरस्तु।

धारि०—(सस्मितम्) अज्जउत्त ! एस से अम्हेहिं तरुणीजणसहाअस्स असोओ संकेदघरो कप्पिदो। (आर्यपुत्र ! एष ते अस्माभिस्तरुणीजनसहायस्य अशोकः संकेतगृहं कल्पितः।)

विदू०—भो आराहिओसि। (भोः आराधितोऽसि)

राजा—(सव्रीडमशोकमभितः परिक्रामन्।)

नायं देव्या भाजनत्वं न नेयः
सत्काराणामीदृशानामशोकः।
यः सावज्ञो माधवश्रीनियोगे
पुष्पैः शंसत्यादरं त्वत्प्रयत्ने ॥८॥

विदू०—भो वीसद्धो भविअ तुमं जोव्वणवदिं इमं पेक्ख। (भो विस्रब्धो भूत्वा त्वं यौवनवतीमिमां पश्य।)

धारि०—कं ? (काम् ?)

विदू०—भोदि तवणीआसोअस्स कुसुमसोहम्। (भवति ! तपनीयाशोकस्य कुसुमशोभाम्।)

(सर्वे उपविशन्ति।)

राजा—(मालविकां विलोक्य आत्मगतम्) कष्टः खलु संनिधिवियोगः

अहं रथाङ्गनामेव प्रिया सहचरीव मे।
अननुज्ञातसंपर्का धारिणी रजनीव नौ ॥६॥

(प्रविश्य)

कञ्चु०—विजयतां देवः ! अमात्यो विज्ञापयति—विदर्भविषयोपायने द्वे शिल्पकारिके मार्गपरिश्रमादलघुशरीरे इति पूर्वं न प्रवेशिते। संप्रति देवोपस्थानयोग्ये संवृत्ते। तदाज्ञां देवो दातुमर्हतीति।

राजा—प्रवेशय ते।

कञ्चु०—यदाज्ञापयति देवः। (निष्क्रम्य ताभ्यां सह प्रविश्य) इत इतो भवत्यौ।

प्रथ०—(जनान्तिकम्) हला मदणिए। अपुव्वं इमं राअउलं[1] पविसन्तीए पसीददि मे हिअअं। (सखि मदनिके ! अपूर्वमिदं राजकुलं प्रविशन्त्याः प्रसीदति मे हृदयम्।)

द्विती०—जोसिणीए। अत्थि क्खु लोअप्पवादो आआमि सुहं दुक्खं वा हिअअसमवस्था कहेदि त्ति। (ज्योत्स्निके ! अस्ति खलु लोकप्रवादः आगामि सुखं दुःखं वा हृदयसमवस्था कथयतीति।)

प्रथ०—सो सच्चो दाणिं होदु। (स सत्य इदानीं भवतु।)

कञ्चु०—एष देव्या सह देवस्तिष्ठति। उपसर्पतां भवत्यौ।

(उभे उपसर्पतः)

(मालविका परिव्राजिका च चेट्यौ विलोक्य परस्परमवलोकयतः।)

उभे— (प्रणिपत्य) जेदु जेदु भट्टा। जेदु जेदु भट्टिणी। (जयतु जयतु भर्ता। जयतु जयतु भट्टिनी।)

(उभे राजाज्ञया उपविष्टे।)

---

१. राजकुलं राजभवनसंनिवेशः दुर्गमिति यावत्।

राजा—कस्यां कलायामभिविनीते भवत्यौ ।

उभे—भट्टा ! संगीदए अब्भन्तरे म्ह । (भर्तः ! संगीतके अभ्यन्तरे स्वः ।

राजा—देवि ! गृह्यतामनयोरन्यतरा ।

धारि॰—मालविए ! इदो पेक्ख । कदरा दे संगीदसहअरिणी रुच्चदि । (मालविके ! इतः पश्य । कतरा ते संगीतसहकारिणी रोचते ।)

उभे—(मालविकां दृष्ट्वा) अम्हो भट्टदारिआ । जेदु जेदु भट्टदारिआ । (अहो भर्तृदारिका । जयतु जयतु भर्तृदारिका ।)

(प्रणम्य तया सह बाष्पं विसृजतः ।) (सर्वे सविस्मयं विलोकयन्ति ।)

राजा—के भवत्यौ ? का वेयम् ?

उभे—भट्टा ! एसा अम्हाणं भट्टारिआ । (भर्तः ! एषास्माकं भर्तृदारिका ।)

राजा—कथमिव ।

उभे—सुणादु भट्टा । जो सो भट्टिणा विजअदण्डेहिं विदब्भणाहं वसीकरिअ वन्धणादो मोइओ कुमारो माहवसेणो णाम तस्स इअं कणीअसी भइणी मालविआ णाम । (शृणोतु भर्ता ! यः स भर्त्रा विजयदण्डैर्विदर्भनाथं वशीकृत्य बन्धनान्मोचितः कुमारो माधवसेनो नाम तस्येयं कनीयसी भगिनी मालविका नाम ।)

धारि॰—कहं राअदारिआ इअं । चन्दणं क्ख मए पादुओवओएण दूसिदं । (कथम् राजदारिकेयम् । चन्दनं खलु मया पादुकोपयोगेन दूषितम् ।)

राजा—अथ, अत्रभवती, कथमित्थंभूता ?

माल॰—(निःश्वस्यात्मगतम्) विहिणिओएण । (विधिनियोगेन ।)

द्विती॰—सुणादु भट्टा । दाआदवसंगदे भट्टदारए माहवसेणे तस्स अमच्चेण अज्जसुमदिणा अम्हारिसं परिअणं उज्झिअ गूढं आणीदा एसा । (शृणोतु भर्ता । दायादवशंगते भर्तृदारके माधवसेने तस्यामात्येनार्यसुमतिनास्मादृशं परिजनमुज्झित्वा गूढमानीतैषा ।)

राजा—श्रुतपूर्वं मयैतत् । ततस्ततः ।

द्वितीο—भट्टा ! अदो वरं ण आणामि । (भर्तः ! अतः परं न जानामि ।)

परिο—ततः परं मन्दभागिनी कथयिष्यामि ।

उभे—भट्टदारिए । अज्जकोसिईए विअ सरसंजोओ । णं सा एव्व । (भर्तृदारिके ! आर्यकौशिक्या इव स्वरसंयोगः ? ननु सैव ।)

मालο—अह इम् । (अथ किम् ।)

उभे—जदिवेसधारिणी अज्जकोसिई दुक्खेण विभावीअदि । भअवदि ! णमो दे । (यतिवेषधारिणी आर्यकौशिकी दुःखेन विभाव्यते । भगवति ! नमस्ते ।)

परिο—स्वस्ति भवतीभ्याम् ।

राजा—कथम्, आप्तवर्गोऽयं भगवत्याः ।

परिο—एवमेतत् ।

विदूο—तेण हि कहेदु भअवदी अत्तहोदोए वुत्तन्तं दाव असेसं । (तेन हि कथयतु भगवती अत्रभवत्या वृत्तान्तं तावदशेषम् ।)

परिο—(सवैक्लव्यम्) तावच्छ्रूयताम् । माधवसेनसचिवं ममाग्रजं सुमतिमवगच्छ ।

राजा—उपलक्षितः । ततस्ततः ।

परिο—स इमां तथागतभ्रातृकां मया सार्धमपवाह्य भवत्सम्बन्धापेक्षया पथिकसार्थं विदिशागामिनमनुप्रविष्टः ।

राजा—ततस्तः ।

परिο—स च अटव्यन्तरे निविष्टो गताध्वा वणिग्गणः ।

राजा—ततस्ततः ।

परिο—ततः

तूणीरपट्टपरिणद्धभुजान्तराल-
मापार्ष्णिलम्बिशिखिवर्हकलापधारि ।
कोदण्डपाणि विनदत्प्रतिरोधकाना-
मापातदुष्प्रसहमाविरभूदनीकम् ॥१०॥

(मालविका भयं रूपयति ।)

विदू०—भोदि ! मा भआहि । अदिक्कन्तं क्खु तत्तहोदी कहेदि । (भवति ! मा बिभेहि । अतिक्रान्तं खलु तत्रभवती कथयति ।)

राजा—ततस्ततः ।

परि०—ततो मुहूर्तं वद्धायुधास्ते पराङ्मुखीभूताः सार्थवाहयोद्धारस्तस्करैः ।

राजा—हन्त । इतः परं कष्टतरं श्रोतव्यम् ।

परि०—ततः स मत्सोदर्यः

इमां परीप्सुर्दुर्जाते पराभिभवकातराम् ।
भर्तृप्रियः प्रियैर्भर्तुरानृण्यमसुभिर्गतः ॥११॥

प्रथ०—हा हदो सुमदी । (हा हतः सुमतिः ।)

द्विती०—तदो क्खु इअं भट्टदारिआए समवत्था संवुत्ता । (ततः खल्वियं भर्तृदारिकायाः समवस्था संवृत्ता)

(परिव्राजिका बाष्पं विसृजति ।)

राजा—भगवति ! तनुत्यजामीदृशी लोकयात्रा । न शोच्यस्तत्रभवान् सफलीकृतभर्तृपिण्डः । ततस्ततः ।

परि०—ततोऽहं मोहमुपगता यावत् संज्ञां लभे तावदियं दुर्लभदर्शना संवृत्ता ।

राजा—महत् खलु कृच्छ्रमनुभूतं भगवत्या ।

परि०—ततो भ्रातुः शरीरमग्निसात्कृत्वा पुनर्नवीकृतवैधव्यदुःखया मया त्वदीयं देशमवतीर्य इमे काषाये गृहीते ।

राजा—युक्तः सज्जनस्यैष पन्थाः । ततस्ततः ।

परि०—सेयमाटविकेभ्यो वीरसेनं वीरसेनाच्च देवीं गता । देवीगृहे लब्धप्रवेशया मया चानन्तरं दृष्टेत्येतदवसानं कथायाः ।

माल०—(आत्मगतम्) किं णु क्खु संपदं भट्टा भणादि । (किं नु खलु सांप्रतं भर्ता भणति)

राजा—अहो परिभवोपहारिणो विनिपाताः । कुतः—

प्रेष्यभावेन नामेयं देवीशब्दक्षमा सती ।
स्नानीयवस्त्रक्रियया पत्त्रोर्णं वोपयुज्यते ॥१२॥

धारि०—भअवदि ! तुए अभिजणवदिं मालविअं अणाचक्खन्तीए असंपदं किदं (भगवति ! त्वया अभिजनवतीं मालविकामनाचक्षाणया असांप्रतं कृतम् ।)

परि०—शान्तं पापम् । केनचित् कारणेन खलु मया नैर्घृण्यमवलम्बितम् ।

धारि०—किं विअ तं कारणम् ? (किमिव तत् कारणम् ?)

परि०—इयं पितरि जीवति केनापि देवयात्रागतेन सिद्धादेशकेन साधुना मत्समक्षं समादिष्टा—आसंवत्सरमात्रमियं प्रेष्यभावमनुभूय ततः सदृशभर्तृगामिनी भविष्यतीति । तदेवं भाविनमादेशमस्यास्त्वत्पादशुश्रूषया परिणमन्तमवेक्ष्य कालप्रतीक्षया मया साधु कृतमिति पश्यामि ।

राजा—युक्ता प्रतीक्षा ।

कञ्चु०—देव ! कथान्तरेणान्तरितम् । अमात्यो विज्ञापयति—विदर्भगतमनुष्ठेयमनुष्ठितमभूत्, देवस्य तावदभिप्रायं श्रोतुमिच्छामीति ।

राजा०—मौद्गल्य ! तत्रभवतोर्यज्ञसेनमाधवसेनयोर्द्वैराज्यमिदानीमवस्थापयितुकामोऽस्मि ।

तौ पृथग् वरदाकूले शिष्टामुत्तरदक्षिणे ।
नक्तन्दिवं विभज्योभौ शीतोष्णकिरणाविव ॥१३॥

कञ्चु०—देव ! एवममात्यपरिषदे निवेदयामि ।

(राजा अङ्गुल्यानुमन्यते)

(निष्क्रान्तः कञ्चुकी)

प्रथमा—(जनान्तिकम्) भट्टदारिए। दिट्ठिआ भट्टिणा भट्टिदारओ अद्धरज्जे पडिट्ठं गमइस्सदि। (भर्तृदारिके। दिष्ट्या भर्त्रा भर्तृदारकः अर्द्धराज्ये गमिष्यते।)

माल०—एवं दाव बहु मणिदव्वं जं जीविदसंसआदो मुत्तो (एतत् तावद् बहु मन्तव्यम् यज्जीवितसंशयान्मुक्तः।)

(प्रविश्य)

कञ्चु०—विजयतां देवः! देव अमात्यो विज्ञापयति—कल्याणी देवस्य बुद्धिः। मन्त्रिपरिषदोऽप्येतदेव दर्शनम्। कुतः—

द्विधा विभक्तां श्रियमुद्वहन्तौ
धुरं रथाश्वाविव संग्रहीतुः।
तौ स्थास्यतस्ते [1]नृपतेर्निदेशे
[2]परस्परोपग्रहनिर्विकारौ ॥१४॥

राजा—तेन हि मन्त्रिपरिषदं ब्रूहि—सेनान्ये वीरसेनाय लेख्यताम् एवं क्रियतामिति।

कञ्चुकी—यदाज्ञापयति देवः। (निष्क्रम्य सप्राभृतकं लेखं गृहीत्वा पुनः प्रविष्टः।) अनुष्ठिता प्रभोराज्ञा। अयं देवस्य सेनापतेः पुष्यमित्रस्य सकाशात् सोत्तरीयप्राभृतको लेखः प्राप्तः। प्रत्यक्षीकरोत्वेनं देवः।

(राजोत्थाय सप्राभृतकं लेखं सोपचारं गृहीत्वा परिजनायार्पयति।)

(परिजनो लेखं नाट्येनोद्घाटयति।)

धारि०—(आत्मगतम्) अम्हो। तदोमुहं एव्व णो हिअअं। सुणस्सं दाव गुरुअणस्स कुसलाणन्तरं वसुमित्तस्स वुत्तन्तं। अदिघोरे क्खु पुत्तओ सेनावदिणा णिउत्तो। (अहो! ततोमुखमेव नो हृदयम्। श्रोष्यामि तावद् गुरुजनस्य कुशलानन्तरं वसुमित्रस्य वृत्तान्तम्। अतिघोरे खलु पुत्रकः सेनापतिना नियुक्तः।)

---

१. नृपती पा० २. परस्पराव० पा.

राजा—(उपविश्य लेखं सोपचारं गृहीत्वा वाचयति ।) स्वस्ति । यज्ञशरणात् सेनापतिः पुष्यमित्रो वैदिशस्थं पुत्रमायुष्मन्तमग्निमित्रं स्नेहात् परिष्वज्येदमनुदर्शयति 'विदितमस्तु,योऽसौ राजयज्ञदीक्षितेन मया राजपुत्रशतपरिवृतं वसुमित्रं गोप्तारमादिश्य वत्सरोपावर्त्तनीयो[1] निरर्गलस्तुरङ्गो विसृष्टः । स सिन्धोर्दक्षिणरोधसि चरन्नश्वानीकेन यवनेन प्रार्थितः । ततः उभयोः सेनयोर्महानासीत् संमर्दः ।

(देवी विषादं नाटयति)

राजा—कथमीदृशं संवृत्तम् । (शेषं पुनर्वाचयति)

ततः परान् पराजित्य वसुमित्रेण धन्विना ।
प्रसह्य ह्रियमाणो मे वाजिराजो निर्वितत: ।।१५।।

धारि०—इमिणा आससिदं मे हिअअं । (अनेनाश्वस्तं मे हृदयम् ।)

राजा—(शेषं पुनर्वाचयति ।) सोऽहमिदानीमंशुमता सगरपुत्रेणेव प्रत्याहृताश्वो यक्ष्ये । तदिदानीमकालहीनं विगतरोषचेतसा भवता वधूजनेन सह यज्ञसेवनायागन्तव्यमिति ।

राजा—अनुगृहीतोऽस्मि ।

रि०—दिष्टचा पुत्रविजयेन दम्पती वर्धेते ।

भर्त्रासि वीरपत्नीनां श्लाघ्यानां स्थ। पिता धुरि ।
वीरसूरिति शब्दोऽयं तनयात् त्वामुपस्थितः ।।१६।।

धारि०—भअवदि ! परितुट्ठम्हि जं पितरं अणजादो मे वच्छओ । (भगवति ! परितुष्टास्मि यत् पितरमनुजातो मे वत्सकः ।)

राजा—मौद्गल्य ! ननु कलभेन यूथपतेरनुकृतम् ।

कञ्चु०—देव ! अयं कुमारः—

नैतावता वीरविजृम्भितेन
चित्तस्य नो विस्मयमादधाति ।
यस्याप्रधृष्यः प्रभवस्त्वमुच्चै-
रग्नेरपां दग्धुरिवोरुजन्मा ।।१७।।

---

१. ०पात्तनियमो नि-४. च.

राजा—मौद्गल्य ! यज्ञसेनश्यालमुररीकृत्य मोच्यन्तां सर्वे बन्धनस्थाः ।

कञ्चु०—यदाज्ञापयति देवः ।

(निष्क्रान्तः ।)

धारि०—जयसेणे । गच्छ । इरावदपीमुहाणं अंतेउराणं पुत्तस्स वुत्तन्तं णिवेदेहि । (जयसेने ! गच्छ । इरावतीप्रमुखेभ्योऽन्तःपुरेभ्यः पुत्रस्य वृत्तान्तं निवेदय ।)

(प्रतीहारी प्रस्थिता ।)

धारि०—एहि दाव । (एहि तावत् ।)

प्रति०—(प्रतिनिवृत्य) इअ म्हि । (इयमस्मि ।)

धारि०—(जनान्तिकम्) जं मए असोअदोहलणिओए मालविआए पइण्णादं तं से अभिजणं च णिवेदिअ मह वअणेण इरावदिं अणुणेहि–तुए अहं सच्चादो ण विब्भंसिदव्वे त्ति । (यन्मयाशोकदोहदनियोगे मालविकायै प्रतिज्ञातम् तदस्या अभिजनं च निवेद्य मम वचनेनेरावती-मनुनय—त्वया अहं सत्यान्न विभ्रंशयितव्येति ।)

प्रती०—जं देवी आणवेदी । (निष्क्रम्य पुनः प्रविश्य) भट्टिणी ! पुत्तविजअणिमित्तेण परितोसेण अंतेउराणं आहरणाणं मंजूसम्हि संवुत्ता । (यद् देवी आज्ञायति । (निष्क्रम्य पुनः प्रविश्य) भट्टिनि ! पुत्रविजयनिमित्तेन परितोषेण अन्तःपुराणामाभरणानां मञ्जूषास्मि संवृत्ता ।)

धारि०—एदं किं अच्चरिअं । साहारणो क्खु ताणं मह अ अअं अब्भ-दओ । (एतत्किमाश्चर्यम् । साधारणः खलु तासां मम चायमभ्युदयः ।)

प्रती०—(जनान्तिकम्) भट्टिणी ! इरावदी उण विण्णवेदी—सरिसं देवीए पहवन्तीए । तुह वअणं संकप्पिदं ण जुज्जदि अण्णहा कादुं त्ति । (भट्टिनि ! इरावती पुनर्विज्ञापयति—सदृशं देव्याः प्रभवन्त्याः । तव वचनं संकल्पितं न युज्यते अन्यथा कर्तुमिति ।)

धारि०—भअवदी ! तुए अणुमदा इच्छामि अज्जसुमदिणा पढमसंकप्पिदं मालविअं अज्जउत्तस्स पडिवादेदु । (भगवति ! त्वयानुमता इच्छामि आर्यसुमतिना प्रथमसंकल्पितां मालविकामार्यपुत्राय प्रतिपादयितुम् ।)

परि०—इदानीमपि त्वमेवास्याः प्रभवसि ।

धारि०—(मालविकां हस्ते गृहीत्वा ।) इदं अज्जउत्तो पिअणिवेदणाणुरूवं पारितोसिअं पडिच्छदु त्ति । (इदमार्यपुत्रः प्रियनिवेदनानुरूपं पारितोषिकं प्रतीच्छत्विति ।)

(राजा व्रीडां नाटयति ।)

धारि०—(सस्मितम्) किं अवधीरेदिअज्जउत्तो । (किम् अवधीरयत्यार्यपुत्रः ।)

विदू०—भोदि ! एसो लोअव्ववहारो । सव्वो णववरो लज्जादुरो होदि त्ति । (भवति ! एष लोकव्यवहारः सर्वो नववरो लज्जातुरो भवतीति ।)

(राजा विदूषकमवेक्षते ।)

विदू०—अह देवीए एव्व किदप्पणअविसेसं दिण्णदेवीसद्दं मालविअं अत्तभवं पडिग्गहीदुं इच्छदि । (अथ देव्यैव कृतप्रणयविशेषां दत्तदेवीशब्दां मालविकामत्रभवान् प्रतिग्रहीतुमिच्छति ।)

धारि०—एदाए राअदारिआए अहिजणेण एव्व दिण्णो देवीसद्दो किं पुणरुत्तेण । (एतस्या राजदारिकाया अभिजनेनैव दत्तो देवीशब्दः किं पुनरुक्तेन ।)

परि०—मा मैवम् ।

अप्याकरसमुत्पन्नो रत्नजातिपुरस्कृतः ।
जातरूपेण कल्याणि ! मणिः संयोगमर्हति ॥१८॥

धारि०—(स्मृत्वा) मरिसेदु भअवदी अब्भुदअकहाए उइदं ण लक्खिदं । जअसेणे । गच्छ दाव । कोसेअपत्तोण्णजुअलं उवणेहि । (मर्षयतु भगवती । अभ्युदयकथयोचितं न लक्षितम् । जयसेने । गच्छ तावत् । कौशेयपत्रोर्णयुगलमुपनय ।)

प्रती०—जं देवो आणवेदि । (निष्क्रम्य पत्रोर्णं गृहीत्वा पुनः प्रविश्य) देवी ! एदम् । (यद् देव्याज्ञापयति । (निष्क्रम्य पत्रोर्णं गृहीत्वा पुनः प्रविश्य) देवि ! एतत् ।)

धारि०—(मालविकामवगुण्ठनवतीं कृत्वा) अज्जउत्तो । दाणिं इमं पडिच्छदु । (आर्यपुत्र ! इदानीमिमां प्रतीच्छतु ।)

राजा—त्वच्छासनात् प्रवृत्ता एव वयम् । (अपवार्य) हन्त प्रतिगृहीता ।

विदू०—अहो देवीए अणुऊलदा । (अहो देव्या अनुकूलता ।)

(देवी परिजनमवलोकयति ।)

प्रती०—(मालविकामुपेत्य ।) जेदु भट्टिणी । (जयतु भट्टिनी ।)

(देवी परिव्राजिकां निरीक्षते ।)

परि०—नैतच्चित्रं त्वयि ।

प्रतिपक्षेणापि पतिं सेवन्ते भर्तृवत्सलाः साध्व्यः ।
अन्यसरितामपि [1]जलं समुद्रगाः प्रापयन्त्युदधिम् ॥१९॥

(प्रविश्य)

निपु०—जेदु भट्टा । इरावदी विण्णावेदि—'जं उवआरातिक्कमेण तदा भट्टिणो अवरद्धा तं सअं एव्व भत्तुणो अणुऊलं णाम मए आअरिदं । संपदं पुण्णमणोरहेण भत्तुणा पसादमत्तेण संभावइदव्वेत्ति । (जयतु भर्ता । इरावती विज्ञापयति—यदुपचारातिक्रमेण भर्त्रे अपराद्धा तत् स्वयमेव भर्तुरनुकूलं नाम मया आचरितम् । साम्प्रतं पूर्णमनोरथेन भर्त्रा प्रसादमात्रेण संभावयितव्येति ।)

धा०—णिउणिए । अवस्सं से सेविदं अज्जउत्तो जाणिस्सदि । (निपुणिके ! आवश्यमस्याः सेवितमार्यपुत्रो ज्ञास्यति ।)

निपु०—अणुग्गहीदम्हि । (अनुगृहीतास्मि ।)

परि०—देव ! अमुना युक्तसंबन्धेन चरितार्थं माधवसेनं सभाजयितुं गच्छामः ।

---

१. ०तां शतानि क.

धारि०—भअवदीए ण जुत्तं अम्हे परिच्चइदुं ।
(भगवत्या न युक्तमस्मान् परित्यक्तुम् ।)

राजा—भगवति ! मदीयेष्वेव लेखेषु तत्रभवतस्त्वामुद्दिश्य सभाजनाक्षराणि पातयिष्यामः ।

परि०—युवयोः स्नेहात् परवानयं जनः[1] ।

धारि०—अज्जउत्त ! किं ते भूओ वि पिअं उवहरामि ।
(आर्यपुत्र ! किं ते भूयोऽपि प्रियमुपहरामि ।)

राजा—

त्वं मे प्रसादसुमुखी भव देवि ! नित्य-
मेतावदेव हृदये प्रतिपालनीयम् ।

तथापीदमस्तु ।

(भरतवाक्यम्)

आशास्यमी[2]तिविगमप्रभृति प्रजानां
संपत्स्यते न खलु गोप्तरि[3] नाग्निमित्रे ॥२०॥

(निष्क्रान्ताः सर्वे ।)

॥ इति पञ्चमोऽङ्कः ॥

॥ समाप्तमिदं श्रीकालिदासकविकृतं मालविकाग्निमित्रं नाम नाटकम् ॥

१. र ८।८१.   २. र १।६३.
३. कु २।५२, र २।१४, २४ प्रभृति.

विक्रमोर्वशीयम्

पात्राणि

पुरुषाः

सूत्रधारः—नाटकस्य प्रबन्धकः।

पारिपार्श्विकः—सूत्रधारस्य सहचरः।

पुरूरवाः—सोमवंश्यो राजा,
अत्र नायकः।

माणवकः— विदूषकः।

आयुः—पुरूरवसः पुत्रः।

नारदः—देवर्षिः।

चित्ररथः—गन्धर्वेश्वरः।

कञ्चुकी—अन्तःपुराध्यक्षः।

पल्लवः, गालवश्च } भरतमुनेः शिष्यौ।

स्त्रियः

उर्वशी— अप्सरोविशेषः।
अत्र नायिका।

चित्रलेखा— अप्सरोविशेषः।
उर्वश्याः सखी।

सहजन्या, रम्भा, मेनका } अप्सरोऽन्तराणि

देवी—राज्ञी। काशिराजस्य कन्या।

निपुणिका—राज्ञ्याः परिचारिका।

तापसी—तपस्विनी।

परिजनः—राज्ञ्याः परिचारिकाः।

यवनी—राज्ञः परिचारिका।

विक्रमोर्वशीयम्

[[1]पूर्वरङ्गः : नान्दी]

वेदान्तेषु[2] यमाहुरेकपुरुषं व्याप्य स्थितं रोदसी
यस्मिन्नीश्वर इत्यनन्यविषयः[3] शब्दो यथार्थाक्षरः ।
अन्तर्यश्च मुमुक्षुभिर्नियमितप्राणादिभिर्मृग्यते[4]
स स्थाणुः स्थिरभक्तियोगसुलभो निःश्रेयसायास्तु वः ।।१।।

(नान्द्यन्ते)

।। [5]अथ प्रस्तावना ।।

सूत्रधार—(नेपथ्याभिमुखमवलोक्य ।) अलमतिविस्तरेण मारिष ! इतस्तावत् । (प्रविश्य)

पारिपार्श्विकः—भाव ! अयमस्मि ।

सूत्र०—[6]मारिष ! परिषदेषा पूर्वेषां कवीनां दृष्टरसप्रबन्धा । अहमस्यां कालिदासग्रथितवस्तुना नवेन विक्रमोर्वशीयनामधेयेन [7]त्रोटकेनोपस्थास्ये । तदुच्यतां पात्रवर्गः स्वेषु स्वेषु पाठेष्ववहितैर्भवितव्यमिति ।

---

१. इयमस्मत्कृता योजना । एतदर्थं द्रष्टव्याऽत्रैव मालविकाग्निमित्रारम्भेऽस्माकं पादटिप्पणी ।

२. वेदान्तेषूपनिषत्सु । 'तस्मिन्नपो मातरिश्वा दधाती'-तीशोपनषदि; 'तस्मिन्नु खल्वाकाशमोतं च प्रोतं चे'-त्यन्यत्र ।

३. कु० ६।७५, र० ३।४९. | एवं हि कुमारसंभवादिकर्त्रभिन्नकर्तृकत्वमेव
४. कु० ६।७७, ३।५०. | नाटकेष्वप्यमीषु स्थिरम् ।

५. प्रस्तावनापदमत्रमस्माभिर्योजितम् ।

६. मारिष, बहुशस्तु परिषदा पूर्वेषां कवीनां दृष्टः प्रयोगबन्धः । सोऽहमद्य विक्रमोर्वशीयं नामापूर्वं नाटकं प्रयोक्ष्ये । सा.

७. त्रोटकं नाम दिव्यादिव्यनायकाश्रितार्थं नाट्यम् ।

पारि०—यदाज्ञापयति भावः। (निष्क्रान्तः)

सूत्र०—यावदिदानीमार्यमिश्रान् विज्ञापयामि। (प्रणिपत्य)

प्रणयिषु वा दाक्षिण्यादथवा सद्-वस्तु-पुरुष-बहुमानात्।
शृणुत जना अवधानात् क्रियामिमां कालिदासस्य ॥२॥

(नेपथ्ये)

अज्जा परित्ताअध परित्ताअध, जो सुरपक्खवादो जस्स वा अम्बरअले गई अत्थि। (आर्याः परित्रायध्वम् परित्रायध्वम्, यः सुरपक्षपाती यस्य वाम्बरतले गतिरस्ति।)

सूत्र०—(कर्णं दत्वा) अये किं नु खलु मद्विज्ञापनानन्तरमार्तानां कुररीणामिवाकाशे शब्दः श्रूयते—

मत्तानां कुसुमरसेन षट्पदानां
शब्दोऽयं, परभृतनाद एष धीरः।
आकाशे सुरगणसेविते समन्तात्
किं [1]नार्यः कल-मधुराक्षरं प्रगीताः ॥३॥

(विचिन्त्य) भवतु। ज्ञातम्।

ऊरूद्भवा नरसखस्य मुनेः सुरस्त्री
कैलासनाथमुपसृत्य निवर्तमाना।
बन्दीकृता विबुधशत्रुभिरर्धमार्गे
क्रन्दत्यतः करुणमप्सरसां गणोऽयम् ॥४॥

(निष्क्रान्तः)

॥ इति प्रस्तावना ॥

१. किन्नर्यः पा०

अथ प्रथमोऽङ्कः

(ततः प्रविशन्त्यप्सरसः ।)

अप्स०—अज्जा परित्ताअध परित्ताअध । जो सुरपक्खवादी जस्स वा अम्वरअले गई अत्थि । (आर्याः परित्रायध्वं परित्रायध्वम् । यः सुरपक्षपाती यस्य वाम्वरतले गतिरस्ति ।)

(ततः प्रविशतोऽपटीक्षेपेण रथाधिरूढो राजा सूतश्च ।)

राजा—अलमाक्रन्दितेन । सूर्योपस्थाननिवृत्तं पुरूरवसं, मामेत्य कथ्यतां, कुतो भवत्यः परित्रातव्याः ।

रम्भा—असुरावलेवादो । (असुरावलेपात् ।)

राजा—किं पुनरसुरावलेपेन भवतीनामपराद्धम् ।

रम्भा—सुणादु महाराओ । जा तवोविसेससंकिदस्स सुउमारं पहरणं महिंदस्स, पच्चादेसो रूवगव्विदाए सिरिगोरिए, अलंकारो सग्गस्स, सा णो पिअसही उव्वसी कुबेरभवणादो णिवत्तमाणा केणावि दाणवेण चित्तलेहादुदीआ अद्धपथं ज्जेव बंदिग्गाहं गिहीदा । (शृणोतु महाराजः । या तपोविशेषशङ्कितस्य सुकुमारं प्रहरणं महेन्द्रस्य, प्रत्यादेशो रूपगर्वितायाः श्रीगौर्याः, अलंकारः सर्गस्य, सा नः प्रियसखी उर्वशी, कुबेरभवनान्निवर्तमाना, केनापि दानवेन, चित्रलेखा द्वितीया, अर्धपथ एव, बन्दिग्राहं गृहीता ।)

राजा—अपि ज्ञायते कतमेन दिग्विभागेन गतः स जाल्मः ।

अप्स०—ईसाणीए दिसाए । (ऐशान्या दिशा ।)

राजा—तेन हि मुच्यतां विषादः । यतिष्ये वः सखीप्रत्यानयनाय ।

अप्स०—सरिसं एवं सोमवंससंभवस्स । (सदृशमेतत् सोमवंशसंभवस्य ।)

राजा—क्व पुनर्मां भवत्यः प्रतिपालयिष्यन्ति ।

अप्स०—एदस्सिं हेमकूडसिहरे । (एतस्मिन् हेमकूटशिखरे ।)

राजा—सूत ! ऐशानीं दिशं प्रति चोदयाश्वानाशुगमनाय ।

सूतः—यदाज्ञापयत्यायुष्मान् । (यथोक्तं करोति ।)

राजा—(रथवेगं रूपयित्वा।) साधु साधु। अनेन रथवेगेन पूर्वप्रस्थितं वैनतेयमप्यासादयेयम्। किं पुनस्तम् अपकारिणं मघोनः। मम

अग्रे यान्ति रथस्य रेणुपदवीं चूर्णीभवन्तो घना-
श्चक्रभ्रान्तिररान्तरेषु वितनोत्यन्यामिवारावलीम्।
चित्रारम्भविनिश्चलं हरिशिरस्यायामवच्चामरं
यन्मध्ये समवस्थितो ध्वजपटः प्रान्ते च वेगानिलात् ॥५॥

(निष्क्रान्तो रथेन राजा सूतश्च)

सहज०—हला! गदो राएसो। ता अम्हे वि जधासंदिट्ठं पदेसं गच्छम्ह। (हला! गतो राजर्षिः। तद् वयमपि यथासंदिष्टं प्रवेशं गच्छेम।)

मेनका—सहि! एव्वं करेम्ह (सखि! एवं कुर्मः।)

(हेमकूटशिखरे नाट्येनाधिरोहन्ति)

रम्भा—अवि णाम सो राएसी उद्धरदि णो हिअअसल्लं। (अपि नाम स राजर्षिरुद्धरति नो हृदयशल्यम्।)

मेनका—सहि! मा दे संसओ भोदु। (सखि? मा ते संशयो भवतु।)

रम्भा—णं दुज्जआ दाणवा। (ननु दुर्जया दानवाः।)

मेन०—उवट्ठिदसंपराओ महिंदो वि मज्झमलोआदो सवहुमाणं आणाविअ तं एव्व विबुधविजआअ सेणामुहे णिओजेदि। (उपस्थितसंपरायो महेन्द्रोऽपि मध्यमलोकात् सबहुमानमानाय्य तमेव विबुधविजयाय सेनामुखे नियुङ्क्ते।)

रम्भा—सव्वहा विअई भोदु। (सर्वथा विजयी भवतु।)

मेन०—(क्षणमात्रं स्थित्वा) हला समस्ससध समस्ससध। एस उल्लसिदहरिणकेदणो तस्स राएसिणो सोमदत्तो रहो दीसदि। ण एसो अकिदत्थो पडिणिउत्तिस्सदि त्ति तक्केमि। (सख्यः समाश्वसित समाश्वसित। एष उल्लसितहरिणकेतनः तस्य राजर्षेः सोमदत्तो रथो दृश्यते। नैषः अकृतार्थः प्रतिनिवर्तिष्यत इति तर्कयामि।)

(निमित्तं सूचयित्वावलोकन्त्यः, स्थिताः)

(ततः प्रविशति रथारूढो राजा सूतश्च। भयनिमीलिताक्षी चित्रलेखादक्षिणहस्तावलम्बिता उर्वशी च।)

चित्र०—सहि समस्सस समस्सस । (सखि समाश्वसिहि समाश्वसिहि ।)

राजा—सुन्दरि ! समाश्वसिहि

गतं भयं भीरु सुरारिसंभवं
त्रिलोकरक्षी महिमा हि वज्रिणः ।
तदेतदुन्मीलय चक्षुरायतं
निशावसाने नलिनीव पङ्कजम् ॥६॥

चित्र०—अम्महे कहं उस्ससिदमेत्तसंभाविदजीविदा अज्ज वि एसा सण्णं ण पडिवज्जदि । (अहो कथमुच्छ्वसितमात्रसंभावितजीविता, अद्याप्येषा संज्ञां न प्रतिपद्यते ।)

राजा—वलवदत्रभवती परित्रस्ता । तथाहि—

मन्दारकुसुमदाम्ना गुरुरस्याः सूच्यते हृदयकम्पः ।
मुहुरुच्छ्वसता मध्ये परिणाहवतोः पयोधरयोः ॥७॥

चित्र०—(सकरुणम्) हला उव्वसि ! पज्जवत्थावेहि अत्ताणम् । अणच्छरा विअ पडिभासि । (सखि उर्वशि ! पर्यवस्थापयात्मानम् । [1]अनप्सरेव प्रतिभासि ।)

राजा—मुञ्चति न तावदस्या भयकम्पः कुसुमकोमलं हृदयम् ।
सिचयान्तेन कथञ्चित् स्तनमध्योच्छ्वासिना कथितः ॥८॥

(उर्वशी प्रत्यागच्छति)

राजा—(सहर्षम्) चित्रलेखे दिष्टया वर्धसे । प्रकृतिमापन्ना ते प्रियसखी ।

पश्य—आविर्भूते शशिनि तमसा मुच्यमानेव रात्रि-
र्नैशस्यार्चिर्हुतभुज इव च्छिन्नभूयिष्ठधूमा ।
मोहेनान्तर्वरतनुरियं लक्ष्यते मुक्तकल्पा
गङ्गा रोधःपतनकलुषा गच्छतीव प्रसादम् ॥९॥

चित्र०—सहि उव्वसि । वीसद्धा भव । आवण्णाणुकंपिणा महाराएण पडिहदा क्खु दे तिदसपरिपंथिणो हदासा दाणवा । (सखि उर्वशि ! विस्रब्धा भव । आपन्नानुकम्पिना महाराजेन प्रतिहताः खलु ते त्रिदशपरिपन्थिनो हताशा दानवाः ।)

---

१. अप्सरःशब्द एकवचनान्तोऽप्यस्तीति हेमाद्री रघुवंशटीकायाम् ।

उर्व०—(चक्षुषी उन्मील्य ।) किं पहावदंसिणा महिंदेण अब्भुवपह्लम्हि ।
(किं प्रभावदर्शिना महेन्द्रेणाभ्युपपन्नास्मि ।)

चित्र०—ण महिंदेण । महिंदसरिसाणुभावेण राएसिणा पुरूरवसेण ।
(न महेन्द्रेण । महेन्द्रसदृशानुभावेन राजर्षिणा पुरूरवसा ।)

उर्व०—(राजानमवलोक्य । आत्मगतम् ।) उवकिदं क्खु दाणवेंदसंरंभेण ।
(उपकृतं खलु दानवेन्द्रसंरम्भेण ।)

राजा—(उर्वशीं विलोक्य । आत्मगतम् ।) स्थाने खलु नारायणमृषिं विलोभयन्त्यः, तदूरुसंभवामिमां विलोक्य व्रीडिताः सर्वा अप्सरस इति । अथवा नेयं तपस्विनः सृष्टिरित्यवैमि—

अस्याः सर्गविधौ प्रजापतिरभूच्चन्द्रो नु कान्तिप्रदः
शृङ्गारैकरसः स्वयं नु मदनो मासो नु पुष्पाकरः ।
वेदाभ्यासजडः कथं नु विषयव्यावृत्तकौतूहलो
निर्मातुं प्रभवेन्मनोहरमिदं रूपं पुराणो मुनिः[1] ॥१०॥

उर्व०—हला—चित्तलेहे सहीअणो कहिं क्खु भवे । (सखि चित्रलेखे ! सखीजनः कुत्र खलु भवेत् ।)

चित्र०—सहि अभअप्पदाई महाराओ जाणादि ।
(सखि अभयप्रदायी महाराजो जानाति ।)

राजा—(उर्वशीं विलोक्य) महति विषादे वर्तते सखीजनः । पश्यतु भवती—

यदृच्छया त्वं सकृदप्यवन्ध्ययोः
पथि स्थिता सुन्दरि यस्य नेत्रयोः ।
त्वया विना सोऽपि समुत्सुको भवेत्
सखीजनस्ते किमुदार्द्रसौहृदः[2] ॥११॥

उर्व०—(आत्मगतम् ।) अमिअं क्खु दे वअणम् । अहवा चंदादो अमिअं त्ति किं अच्चरिअम् । (प्रकाशम्) अदो एव्व मे पेक्खिदुं तुवरदि हिअअम् । (अमृतं खलु ते वचनम् । अथवा चन्द्रादमृतमिति किमाश्चर्यम् । (प्रकाशम्) अत एव मे प्रेक्षितुं त्वरते हृदयम् ।)

---

१. मुनिर्नारायण ऋषिः, न तु ब्रह्मा, यथा प्रतिपन्नं कैश्चित् ।
२. ०त्त०. पा०

राजा—(हस्तेन दर्शयन्)

एताः सुतनु मुखं ते सख्यः पश्यन्ति हेमकूटगताः ।
उत्सुकनयना लोकाश्चन्द्रमिवोपप्लवान्मुक्तम् ॥१२॥

(उर्वशी साभिलाषं पश्यति ।)

चित्र०—हला किं पेक्खमि । (सखि किं प्रेक्षसे ।)

उर्व०—णं समदुक्खगदो पिवीअदि लोअणेहिं ।
(ननु समदु:खगतः पीयते लोचनाभ्याम्)

चित्र०—(सस्मितम्) अइ को । (अयि कः ।)

उर्व०—णं पणइअणो । (ननु प्रणयिजनः ।)

रम्भा—(सहर्षमवलोक्य) हला! चित्तलेहादुदीअं पिअसही उव्वसीं गेण्हिअ विसाहासहिदो विअ भअवं सोमो समुवट्ठिदो राएसी । (सखी! चित्रलेखाद्वितीयां प्रियसखीमुर्वशीं गृहीत्वा विशाखासहित इव भगवान् सोमः, समुपस्थितो राजर्षिः ।)

मेनका—(निर्वर्ण्य) हला दुवे वि णो एत्थ प्पिआ उवणदा— इअं पच्चाणीदा पिअसही, अअं च अपरिक्खदसरीरो राएसी । (सखि ! द्वे अपि नोऽत्र प्रिये उपनते— इयं प्रत्यानीता प्रियसखी, अयं चापरिक्षतशरीरो राजर्षिः ।)

सहज०—सहि जुत्तं भणासि दुज्जओ दाणओ त्ति ।
(सखि ! युक्तं भणसि दुर्जयो दानव इति)

राजा—सूत इदं तच्छैलशिखरम् । अवतारय रथम् ।

सूतः—यदाज्ञापयत्यायुष्मान् । (तथा करोति)
(उर्वशी रथावतारक्षोभं नाटयन्ती सत्रासं राजानमवलम्बते ।)

राजा—(स्वगतम्) हन्त सफलो मे विषमावतारः[१] ।

यदिदं रथसंक्षोभादङ्गेनाङ्गं ममायतेक्षणया ।
स्पृष्टं सरोमकण्टकमङ्कुरितं मनसिजेनेव ॥१३॥

उर्व०—हला किं वि परदो ओसर । (सखि किमपि परतोऽपसर ।)

१. विषयावतारः पा०

चित्र०—णाहं सक्केमि । (नाहं शक्नोमि ।)

रम्भा—एत्थ पिअआरिणं संभावेम्ह राएसिं।
(अत्र प्रियकारिणं संभावयामो राजर्षिम् ।) (सर्वा उपसर्पन्ति ।)

राजा—सूत उपश्लेषय रथम् ।

यावत् पुनरियं सुभ्रूरुत्सुकाभिः समुत्सुका ।
सखीभिर्याति संपर्कं लताभिः श्रीरिवार्तवी ॥१४॥

(सूतो रथं स्थापयति)

अप्स०—दिट्ठिआ महाराओ विजएण वड्ढदि ।
(दिष्ट्या महाराजो विजयेन वर्धते ।)

राजा—भवत्यश्च सखीसमागमेन ।

उर्व०—(चित्रलेखादत्तहस्तावलम्बा रथादवतीर्य) हला अहिअं परिस्सजह । ण क्खु मे आसी आसासो जहा पुणो वि सहीअणं पेक्खिस्सं त्ति । (सख्यः अधिकं परिष्वजथ । न खलु मे आसीदाश्वासो यथा पुनरपि सखीजनं प्रेक्षिष्य इति ।) (सख्यः परिष्वजन्ते)

मेनका—(साशंसम्) सव्वहा कप्पसदं महाराओ पुहविं पालअंतो होदु । (सर्वथा कल्पशतं महाराजः पृथिवीं पालयन् भवन्तु ।)

सूतः—आयुष्मन् ! पूर्वस्यां दिशि महता रथवेगेनोपदर्शितः शब्दः

अयं च गगनात् कोऽपि तप्तचामीकराङ्गदः ।
अधिरोहति शैलाग्रं तडित्वानिव तोयदः ॥१५॥

अप्स०—(पश्यन्त्यः) अम्मो चित्तरहो । (अहो चित्ररथः ।)

(ततः प्रविशति चित्ररथः ।)

चित्र०—(राजानं दृष्ट्वा सबहुमानम् ।) दिष्ट्या महेन्द्रोपकारपर्याप्तेन विक्रममहिम्ना वर्धते भवान् ।

राजा—अये गन्धर्वराजः । (रथादवतीर्य ।) स्वागतं प्रियसुहृदे ।

(परस्परं हस्तौ स्पृशतः)

चित्र०—वयस्य केशिना हृतामुर्वशीं नारदादुपश्रुत्य प्रत्याहरणार्थमस्याः शतक्रतुना गन्धर्वसेना समादिष्टा । ततो वयम् अन्तरा चारणेभ्य-

स्त्वदीयं जयोदाहरणं[1] श्रुत्वा त्वामिहस्थमुपागताः। स भवानिमां पुरस्कृत्य सहास्माभिर्मघवन्तं द्रष्टुमर्हति। महत् खलु तत्रभवतो मघोनः प्रियमनुष्ठितं भवता। पश्य—

पुरा नारायणेनेयमतिसृष्टा मरुत्वते।
दैत्यहस्तादपाच्छिद्य सुहृदा संप्रति त्वया ॥१६॥

राजा—सखे मैवम्—

ननु वज्रिण एव वीर्यमेतद्
विजयन्ते द्विषतो यदस्य पक्ष्याः।
वसुधाधर—कन्दरा—विसर्पी
प्रतिशब्दोऽपि[2] हरेर्हिनस्ति नागान् ॥१७॥

चित्र०—युक्तमेतत्। अनुत्सेकः खलु विक्रमालङ्कारः।

राजा—सखे नायमवसरो मम शतक्रतुं द्रष्टुम्। अतः स्त्वमेवात्रभवतीं प्रभोरन्तिकं प्रापय।

चित्र०—यथा भवान् मन्यते। इत इतो भवत्यः। (सर्वा प्रस्थिताः।)

उर्व०—(जनान्तिकम्) हला चित्तलेहे, उवआरिणं राएसिं ण सक्कणोमि आमंतेदुम्। ता तुमं एव्व मे मुहं होहि। (सखि चित्रलेखे। उपकारिणं राजर्षि न शक्नोम्यामन्त्रयितुम् तत् त्वमेव मे मुखं भव।)

चित्र०—(राजानमुपेत्य।) महाराअ उव्वसी विण्णवेदि—महाराएण अब्भणुण्णादा इच्छामि पिअसहिं विअ महाराअस्स किर्त्ति सुरलोअं णेदुं। (महाराज! उर्वशी विज्ञापयति—महाराजेनाभ्यनुज्ञाता इच्छामि प्रियसखीमिव महाराजस्य कीर्ति सुरलोकं नेतुम्।)

राजा—गम्यतां पुनर्दर्शनाय।

(सर्वाः सगन्धर्वा आकाशोत्पतनं रूपयन्ति।)

उर्वशी—(उत्पतनभङ्गं रूपयित्वा) अम्मो लदाविडवे एसा एआवली वेजयंतिआ[3] मे लग्गा। (सव्याजमुपसृत्य राजानं पश्यन्ती।) सहि चित्तलेहे मोआवेहि दाव णं। (अहो लताविटपे एषैकावली वैजयन्तिका मे लग्ना। (सव्याजमुपसृत्य राजानं पश्यन्ती) सखि चित्रलेखे मोचय तावदेनाम्।)

---

१. र. ४,७८, वि. २।१३ २. हि पा० ३. वेआअन्तिआ पा०

चित्र०—(विलोक्य विहस्य च।) आं दिढं क्खु लग्गा सा। असक्का मोग्रावितुं। (आम्, दृढं खलु लग्ना सा। अशक्यं मोचयितुम्।)

उर्वशी—अलं पडिहासेन। मोआवेहि दाव णं। (अलं परिहासेन। मोचय तावदेनाम्।)

चित्र०—आं दुम्मोआ विअ मे पडिहादि। तहा वि मोआइस्सं दाव। (आम् दुर्मोच्येव मे प्रतिभाति। तथापि मोचयिष्ये तावत्।)

उर्वशी—(स्मितं कृत्वा) पिअसहि सुमरेहि क्खु एदं अत्तणो वअणं। (प्रयसखि! स्मर खल्वेतदात्मनो वचनम्।)

राजा—(स्वगतम्)

प्रियमाचरितं लते त्वया मे गमनेऽस्याः क्षणविघ्नमाचरन्त्या।
यदियं पुनरप्यपाङ्गनेत्रा परिवृत्तार्धमुखी मया हि दृष्टा ॥१८॥

(चित्रलेखा मोचयति। उर्वशी राजानमालोकयन्ती सखीजनमुत्पतन्तं पश्यति।)

सूतः—आयुष्मन्!

अदः सुरेन्द्रस्य कृतापराधान् प्रक्षिप्य दैत्याँल्लवणाम्बुराशौ।
वायव्यमस्त्रं शरधिं पुनस्ते महोरगः श्वभ्रमिव प्रविष्टम् ॥१९॥

राजा—तेन ह्युपश्लेषय रथम्। यावदारोहामि।

(सूतस्तथा करोति। राजा नाट्येन रथमारोहति।)

उर्वशी—(सस्पृहं राजानमवलोकयन्ती।) अवि णाम पुणो वि उअआरिणं एदं पेक्खिस्सं (अपि नाम पुनरप्युपकारिणमेनं प्रेक्षिष्ये।)

(सगन्धर्वा सह सखीभिर्निष्क्रान्ता)

राजा—(उर्वशीवर्त्मोन्मुखः) अहो दुर्लभाभिलाषी मदनः—

एषा मनो मे प्रसभं शरीरात् पितुः पदं मध्यमुत्पतन्ती।
पुराङ्गना कर्षति खण्डिताग्रात् सूत्रं मृणालादिव राजहंसी ॥२०॥

(निष्क्रान्ताः सर्वे।)

॥ इति प्रथमोऽङ्कः ॥



।। अथ मिश्रविष्कम्भः ।।[1]

(ततः प्रविशति विदूषकः ।)

विदू०—ही ही भो णिमंतणिओ परमण्णेण विअ राअरहस्सेण फुट्टमाणो ण सक्कणोमि जणाइण्णे अत्तणो जीहं धारिदुं । ता जाव सो राआ धम्मासणगदो इदो आअच्छइ दाव इमस्सिं विरलजणसंवादे देवच्छंदअप्पासादे आरुहिअ चिट्ठिस्सं। (ही ही भोः निमन्त्रणिकः परमान्नेनेव राजरहस्येन स्फुटन् न शक्नोमि जनाकीर्णे आत्मनो जिह्वां धारयितुम् । तद् यावत् स राजा धर्मासनगत इत आयाति तावदेतस्मिन् विरलजनसंपाते देवच्छन्दकप्रसादे, आरुह्य स्थास्यामि) (परिक्रम्योपविश्य पाणिभ्यां मुखं पिधाय स्थितः ।)

(ततः प्रविशति चेटी)

चेटी—आणत्तम्हि देवीए कासिराअदुहिदाए जधा—हंजे णिउणिए जदो पहुदि भअअदो सुज्जस्स उअत्थाणं कदुअ पडिणिउत्तो महराओ तदो पहुदि सुण्णहिअओ विअ लक्खीअदि। ता तुमं वि दाव अज्जमाणवआदो जाणाहि से उक्कण्ठकालणं त्ति । ता कहं सो बम्हवन्धु अदिसंधादव्वो । अहवा तिणग्गलग्गं विअ अवस्साअसलिलं ण तस्सिं राअरहस्सं चिरं चिट्ठदि त्ति तक्केमि । ता जा णं अण्णेसामि । (परिक्रम्यावलोक्य च ।) अम्मो आलेक्खवाणरो विअ किंपि मंतअंतो णिहदो अज्जमाणअवो चिट्ठदि । ता जाव णं उवसप्पामि । (उपसृत्य।) अज्ज वंदामि । (आज्ञप्तास्मि देव्या काशिराजदुहित्रा यथा—हञ्जे निपुणिके यतः प्रभृति भगवतः सूर्यस्योपस्थानं कृत्वा प्रतिनिवृत्तो महाराजः, स्ततः प्रभृति शून्य-हृदय इव लक्ष्यते । तत् त्वमपि तावदार्यमाणवकाज्जानीहि अस्योत्कण्ठा-कारणमिति । तत्, कथं स ब्रह्मबन्धुरतिसंधातव्यः? अथवा तृणाग्रलग्नमिवा-वश्यायसलिलं न तस्मिन् राजरहस्यं चिरं तिष्ठतीति तर्कयामि । तद्

---

१. इयमस्मत्कृता योजना । वैतालिकोक्तेः संस्कृतमयत्वान्नायं प्रवेशकः ।

तावदेनमन्वेषयामि। (परिक्रम्यावलोक्य च) अहो आलेख्यवानर इव किमपि मन्त्रयन् निभृत आर्यमाणवकस्तिष्ठति। तद्, यावदेनमुपसर्पामि। (उपसृत्य) आर्य! वन्दे।)

विदू०—सत्थि भोदीए। (आत्मगतम्) एदं दुट्ठचेडिअं पेक्खिअ तं राअरहस्सं हिअअं भिंदिअ णिक्कमदि विअ (किंचिन्मुखं संवृत्य, प्रकाशम्) भोदि णिउणिए संगीदवावारं उज्झिअ कहिं पत्थिदासि। (स्वस्ति भवत्यै। एतां दुष्टचेटिकां प्रेक्ष्य तद् राजरहस्यं हृदयं भित्त्वा निष्क्रामतीव। (किञ्चिन्मुखं संवृत्य प्रकाशम्) भवति निपुणिके संगीतव्यापारमुज्झित्वा कुत्र प्रस्थितासि।)

चेटी—देवीए वअणेण अज्जं एव्व पेक्खिदुम्।
(देव्या वचनेनार्यमेव प्रेक्षितुम्।)

विदू०—किं तत्तभोदो आणवेदि। (किं तत्रभवती आज्ञापयति।)

चेटी—देवी भणादि जधा—अज्जस्स मम उअरि अदक्खिण्णं। ण मं अणुइदवेदणं दुक्खिदं अवलोअदि त्ति। (देवी भणति यथा—आर्यस्य ममोपरि अदाक्षिण्यम्। न मामनुचितवेदनां दुःखितामवलोकयतीति।)

विदू०—णिउणिए किं वा पिअवअस्सेण तत्तभोदीए पडिऊलं किंवि समाचरिदं। (निपुणिके! किंवा प्रियवयस्येन तत्रभवत्याः प्रतिकूलं किमपि समाचरितम्।)

चेटि—जं णिमित्तं उण भट्टा उक्कण्ठिदो ताए इत्थिआए णामेण भट्टिणा देवी आलविदा। (यन्निमित्तं पुनर्भर्ता उत्कण्ठितः, तस्याः स्त्रिया नाम्ना आलपिता।)

विदू०—(स्वगतम्) कहं सअं एव्व तत्तभोदा वअस्सेण रहस्सभेदो किदो। किं दाणिं अहं [1]जीहाजंतणेण दुक्खं अणुहवम्मि। (प्रकाशम्।) किं उव्वसीणामधेएण आमंतिदा। (कथं स्वयमेव तत्रभवता वयस्येन रहस्यभेदः कृतः। किमिदानीमहं जिह्वायन्त्रणेन दुःखमनुभवामि (प्रकाशम्)। किं तत्र भवता उर्वशीनामधेयेनामन्त्रिता।)

चेटी—अज्ज का सा उव्वसी? (आर्य का सा उर्वशी?)

---

१. बम्हणो जीहं रक्खिहुं समत्थोम्हि. शा. नि-४.

विदू०—अत्थि उव्वसि त्ति अच्छरा। ताए दंसणेण उम्मादिदो ण केवलं तं आआसेदि, मं वि बम्हणं असिदव्वविमुहं दिढं पीडेदि। (अस्ति उर्वशीत्यप्सराः। तस्या दर्शनेनोन्मादितो न केवलं तामायासयति मामपि ब्राह्मणमशितव्यविमुखं दृढं पीडयति।)

चेटी—(स्वगतम्।) उव्वादिदो मए भेओ भट्टिणो रहस्सदुग्गस्स। ता गदुअ देवीए एवं णिवेदेमि। (उत्पादितो मया भेदी भर्तू रहस्य-दुर्गस्य। तद् गत्वा देव्यै एतन्निवेदयामि।) (प्रस्थिता।)

विदू०—णिउणिए! विण्णावेहि मम वअणेण कासिराअदुहिदरं—परिस्संतम्हि इमाए मिअतिण्हिआए वअस्सं णिअत्तावेदु। जइ भोदीए मुहकमलं पेक्खिस्सदि तदो णिअत्तिस्सदि त्ति। (निपुणिके! विज्ञापय मम वचनेन काशीराजदुहितरम्—परिश्रान्तोऽस्म्येतस्या मृगतृष्णिकाया वयस्यं निवर्तयितुम्। यदि भवत्या मुखकमलं प्रेक्षिष्यते ततो निवर्तिष्यत इति।)

चेटी—जं अज्जो आणवेदि। (यदार्य आज्ञापयति) (निष्क्रान्ता[1]।)

(नेपथ्ये वैतालिकः।)

जयतु जयतु देवः।

आ लोकान्तात् प्रतिहततमोवृत्तिरासां प्रजानां
तुल्योद्योगस्तव च सवितुश्चाधिकारो मतो नः।
तिष्ठत्येकः क्षणमधिपतिर्ज्योतिषां व्योममध्ये
षष्ठे काले त्वमपि लभसे देव विश्रान्तिमह्नः॥१॥

विदू०—(कर्णं दत्वा) एसो उण पिअवअस्सो धम्मासणसमुत्थिदो इदो जेव्व आअच्छदि। ता जाव पासपडिवत्ती होमि। (एष पुनः प्रियवयस्यो धर्मासनसमुत्थित इत एवागच्छति। तद् यावत् पार्श्वपरिवर्ती भवामि।) (निष्क्रान्तः।)

॥ [2]इति मिश्रविष्कम्भः॥

---

१. अत्रैव प्रवेशकसमाप्तिरिति सर्वे। २. इयमस्मद्योजना.

अथ द्वितीयोऽङ्कः

(ततः प्रविशत्युत्कण्ठितो राजा विदूषकश्च)

राजा— आ दर्शनात् प्रविष्टा सा मे सुरलोकसुन्दरी हृदयम् ।
बाणेन मकरकेतोः कृतमार्गमवन्ध्यपातेन ।।२।।

विदू०—सपीडा क्खु जादा तत्तभोदो कासिराअदुहिदा ।
(सपीडा खलु जाता तत्रभवती काशिराजदुहिता ।)

राजा—(निरीक्ष्य) अपि रक्ष्यते भवता रहस्यनिक्षेपः ?

विदू०—(आत्मगतम्) हा धिग्, वंचिदोम्हि दुट्ठ दासीए णिउणिआए। अण्णधा कथं एव्वं पुच्छदि वअस्सो । (हा धिक् ? वञ्चितोऽस्मि दुष्टदास्या निपुणिकया । अन्यथा कथमेवं पृच्छति वयस्यः ।)

राजा—किं भवाँस्तूष्णीमास्ते ।

विदू०—भो एव्वं मए जीहा संजंतिदा जेण भवदो वि णत्थि पदिवअणं ।
(भोः एवं मया जिह्वा संयन्त्रिता येन भवतोऽपि नास्ति प्रतिवचनम् ।)

राजा—युक्तम् । अथ केनेदानीमात्मानं विनोदयामि ।

विदू०—भो महाणसं गच्छम्ह । (भो महानसं गच्छाव ।)

राजा—किं तत्र ।

विदू०—तहिं पंजविहस्स अब्भवहारस्स उवणदसंभारस्स जोअणां पेक्खमाणेहिं सक्कं उक्कंठां विणोदेदुं । (तत्र पञ्चविधस्य अभ्यवहारस्य उपनतसंभारस्य योजनां प्रेक्षमाणाभ्यां शक्यमुत्कण्ठां विनोदयितुम् ।)

राजा—(सस्मितम्) तत्र ईप्सितसंनिधानाद् भवान् रंस्यते । मया खलु दुर्लभप्रार्थनः कथमात्मा विनोदयितव्यः ।

विदू०—णं, भवं वि तत्तभोदीए उव्वसीए दंसणपहं गदो ?
(ननु, भवानपि तत्रभवत्या उर्वश्या दर्शनपथं गतः ?)

राजा—ततः किम् ।

विदू०—ण क्खु दे दुल्लहं त्ति तक्केमि । (न खलु ते दुर्लभेति तर्कयामि ।)

राजा—पक्षपातोऽपि तस्यां सद्रूपस्यालौकिक एव ।

विदू०—एव्वं मंतअंतेण मे वड्ढिदं कोदूहलं । किं तत्तभोदी उव्वसी अद्दुदीआ रूवेण अहं विअ विरूवदाए । (एवं मन्त्रयता मम वर्धितं कौतूहलम् । किं तत्रभवती उर्वशी अद्वितीया रूपेण अहमिव विरूपतया ।)

राजा—माणवक ! प्रत्यवयवमशक्यवर्णनां तामवेहि । तेन हि समासतः श्रूयताम् ।

विदू०—भो ! अवहिदोम्मि । (भोः ! अवहितोऽस्मि ।)

राजा—
आभरणस्याभरणं प्रसाधनविधेः प्रसाधनविशेषः ।
उपमानस्यापि सखे प्रत्युपमानं वपुस्तस्याः ॥३॥

विदू०—अदो दाव तुए दिव्वरसाहिलासिणा चादअव्वदं गहीदं । ता दाव तुमं कहिं पत्थिदो । (अतस्तावत् त्वया दिव्यरसाभिलाषिणा चातकव्रतं गृहीतम् । तत् तावत् त्वं कुत्र प्रस्थितः ।)

राजा—विविक्तादृते नान्यदुत्सुकस्य शरणम् । तद्, भवान् प्रमदवन-मार्गमादेशयतु ।

विदू०—(आत्मगतम्) का गदी । (प्रकाशम्) इदो इदो भवं ।
(का गतिः । (प्रकाशम्) इत इतो भवान्) (परिक्रामतः ।)

विदू०—एसो पमदवणपरिसरो । आणमिअ पच्चुवगदो भवं आअन्तुओ दक्खिणमारुदेण । (एष प्रमदवनपरिसरः । आनम्य प्रत्युपगतो भवानागन्तुको दक्षिणमारुतेन ।)

राजा—(विलोक्य) उपपन्नं विशेषणमस्य वायोः । अयं हि—

निषिञ्चन् माधवीं लक्ष्मीं लतां कौन्दीं च लासयन् ।
स्नेहदाक्षिण्ययोर्योगात् कामीव प्रतिभाति मे ॥४॥

विदू०—सरिसो एव्व से अहिणिवेसो । (परिक्रामन् ।) एदं पमद-वणम् । पविसदु भवम् । (सदृश एवास्याभिनिवेशः । (परिक्रामन्) एतत् प्रमदवनम् । प्रविशतु भवान् ।)

राजा—वयस्य प्रविश अग्रतः। (उभौ प्रवेशं नाटयतः)

राजा—(त्रासं रूपयित्वा।) वयस्य! साधु मनसा समर्थित आपत्प्रतीकारः किल ममोद्यानप्रवेशः। तच्चान्यथैवोपपन्नम्।

विविक्षोर्यदिदं नूनमुद्यानं तापशान्तये।
स्रोतसेवोह्यमानस्य प्रतीपतरणं महत् ॥५॥

विदू०—कहं विअ? (कथमिव?)

राजा— इदमसुलभवस्तुप्रार्थनादुर्निवारं
प्रथममपि मनो मे पञ्चबाणः क्षिणोति।
किमुत मलयवातोन्मूलिताऽऽपाण्डुपत्रै-
रुपवनसहकारैर्दर्शितेष्वङ्कुरेषु ॥६॥

विदू०—अलं परिदेविदेण। अइरेण दे इट्ठसंपादणेण अणंगो एव्व दे सहाओ भविस्सदि। (अलं परिदेवितेन। अचिरेण तवेष्टसम्पादनेनानङ्ग एव ते सहायो भविष्यति।)

राजा—प्रतिगृहीतं ब्राह्मणवचनम्। (परिक्रामतः)

विदू०—पेक्खदु भवं वसंतावदार-सूअअं अहिरामत्तणं पमदवणस्स। (प्रेक्षतां भवान् वसन्तावतारसूचकमभिरामत्वं प्रमदवनस्य।)

राजा—ननु प्रतिपादपमेव अवलोकयामि। अत्र हि—

अग्रे स्त्रीनखपाटलं कुरबकं श्यामं द्वयोर्भागयो
रक्ताशोकमुपोढरागसुभगं भेदोन्मुखं तिष्ठति।
ईषद्वद्धरजःकणाग्रकपिशा चूते नवा मञ्जरी
मुग्धत्वस्य च यौवनस्य च सखे! मध्ये मधुश्रीः स्थिता ॥७॥

विदू०—भो एसो क्खु मणिशिलापट्टअसणाहो अदिमुत्तलदामंडवो भमरसंघट्टपडिदेहिं कुसुमेहिं सअं विअ किदोवआरो भवंतं पडिच्छदि। ता अणुगेण्हिअदु दाव एसो। (भोः एष खलु मणिशिलापट्टकसनाथः अतिमुक्तलतामण्डपः भ्रमरसङ्घट्टपतितैः कुसुमैः स्वयमिव कृतोपचारो भवन्तं प्रतीच्छति। तदनुगृह्यतां तावदेषः।)

राजा—यथा भवते रोचते। (परिक्रम्योपविशतः।)

विदू०—दाणिं इह सुहासीणो भवं ललिदलदाविलोहीअमाणणअणो उव्वसीगदं उक्कंठं विणोदेदु । (इदानीमिह सुखासीनो भवाँल्ललित-लता-विलोभ्यमान-नयनः, उर्वशीगतामुत्कण्ठां विनोदयतु ।)

राजा—(निःश्वस्य)

मम कुसुमितास्वपि सखे नोपवनलतासु नम्रविटपासु ।
चक्षुर्बध्नाति धृतिं तद्रूपालोकदुर्ललितम् ॥८॥

तदुपायश्चिन्त्यतां यथा सफलप्रार्थनो भवेयम् ।

विदू०—(विहस्य) भो अहल्लाकामुअस्स महिंदस्स वज्जो[1] सचिवो, उव्वसीपज्जुच्छुअस्स अ भवदो अहं । दुवेवि एत्थ उम्मत्तआ । (भोः, अहल्याकामुकस्य महेन्द्रस्य वज्रः सचिवः, उर्वशीपर्युत्सुकस्य च भवतः अहम् । द्वावप्यत्रोन्मत्तौ ।)

राजा—[2]मा मैवम् । अतिस्नेहः खलु कार्यदर्शी । तत् उपायश्चिन्त्यताम् ।

विदू०—एसो चिंतेमि । मा उण परिदेविदेण मम समाधिं भिंधि । (एष चिन्तयामि । मा पुनः परिदेवितेन मम समाधिं भिन्धि ।)

(चिन्तां नाटयति ।)

राजा—(निमित्तं सूचयित्वा । स्वगतम् ।)

न सुलभा सकलेन्दुमुखी च सा
किमपि चेदमनङ्गविचेष्टितम् ।
अभिमुखीष्विव काङ्क्षितसिद्धिषु
व्रजति निर्वृतिमेकपदे मनः ॥९॥

(जाताशस्तिष्ठति)

(ततः प्रविशत्याकाशयानेनोर्वशी चित्रलेखा च ।)

चित्र०—हला कहिं दाणिं अणिद्दिट्ठकालणं गच्छीअदि । (हला क्वेदानीमनिर्दिष्टकारणं गम्यते ।)

उर्व०—(मदनवेदनामभिनीय सलज्जम्) सहि तदा हेमऊडसिहरे लदाविडवेण खणविग्घिदआआसगमणं मं 'ओहसिअ किं दाणिं पुच्छसि कहिं गच्छीअदि त्ति । (सखि ! तदा हेमकूटशिखरे लताविटपेन क्षण-विघ्निताकाशगमनां मामुपहस्य किमिदानीं पृच्छसि क्व गम्यते इति ।)

---

१. वेज्जो=वैद्यः. पं. अ. च. २. 'न खलु चिन्तयति भवान्'-नि-४. शा.

चित्र०—किं णु क्खु तस्स राएसिणो पुरूरवस्स सआसं पत्थिदासि ?
(किं नु खलु तस्य राजर्षेः पुरूरवसः सकाशं प्रस्थितासि ?)

उर्व०—अह इं। अअं मे अवहत्थिदलज्जो ववसाओ।
(अथ किम्। अयं मे अपहस्तितलज्जो व्यवसायः।)

चित्र०—को उण सहीए तहिं पुढमं पेसिदो।
(कः पुनः सख्या तत्र पुरतः प्रेषितः।)

उर्व०—णं हिअअं। (ननु हृदयम्।)

चित्र०—तथा वि सअं एव्व साहु संपधारिअदु दाव।
(तथापि स्वयमेव साधु सम्प्रधार्यतां तावत्।)

उर्व०—सहि मअणो क्खु मं णिओएदि। किं एत्थ संपधारीअदि ?
(सखि ! मदनः खलु मां नियोजयति। किमत्र सम्प्रधार्यते ?)

चित्र०—अदोवरं णत्थि मे वअणम्। (अतः परं नास्ति मे वचनम्।)

उर्व०—तेण हि आदिसीअदु मग्गो जेण तहिं गच्छन्तीणं अंतराओ ण भवे। (तेन ह्यादिश्यतां मार्गो येन तत्र गच्छन्त्योः,अन्तरायो न भवेत्।)

चित्र०—सहि ! विस्सद्धा होहि। णं भअवदा देवगुरुणा अवराइदं णाम सिहाबंधणविज्जं उवदिसंतेण तिदसपडिवक्खस्स अलंघणिज्जा कदम्ह। (सखि ! विस्रब्धा भव। ननु भगवता देवगुरुणा अपराजितां नाम शिखाबन्धनविद्यामुपदिशता त्रिदशप्रतिपक्षस्यालङ्घनीये कृते स्वः।)

उर्व०—(सलज्जम्) अहो विसुमरिदं मे हिअअं।
(अहो ! विस्मृतं मे हृदयम्।) (उभे भ्रमणं रूपयतः।)

चित्र०—सहि पेक्ख पेक्ख। इदं भअवदीए भाईरहीए जमुणासंगमविसेसपावणेसु सलिलेसु अत्ताणअं ओलोअंतस्स विअ पइट्ठाणस्स सिहाहरणभूदं तस्य राएसिणो भवणं उवट्ठिदम्ह। (सखि ! प्रेक्षस्व प्रेक्षस्व। एतद् भगवत्याः भगीरथ्याः यमुनासङ्गमविशेषपावनेषु सलिलेष्वात्मानमवलोकयत इव प्रतिष्ठानस्य[1] शिखाभरणभूतं तस्य राजर्षेर्भवनमुपस्थिते स्वः।)

उर्व०—(सस्पृहमवलोक्य) णं वत्तव्वं ठाणंतरगदो सग्गो त्ति। (विमृश्य)

१. तन्नाम्नो नगरस्य

सहि कहिं णु क्खु सो आवण्णाणुकंपी भवे ? (ननु वक्तव्यं स्थानान्तरगतः स्वर्ग इति । (विमृश्य) सखि ! क्व नु खलु स आपन्नानुकम्पी भवेत् ?)

चित्र०—हला एदस्सिं णंदणवणेक्कदेसे विअ पदमवण ओदरिअ जाणिस्सामो । (हला एतस्मिन् नन्दनवनैकदेश इव प्रमदवने अवतीर्य ज्ञास्यावः ।) (उभे अवतरतः ।)

चित्र०—(राजानं दृष्ट्वा सहर्षम्) सहि ! एसो क्खु पढमोदिदो विअ चंदो कोमुदिं विअ तुमं पडिच्छदि । (सखि ! एष खलु प्रथमोदित इव चन्द्रः कौमुदीमिव त्वां प्रतीच्छति ।)

उर्व०—(विलोक्य) हला दाणिं पढमदंसणादो सविसेसं पिअदंसणो महाराओ पडिहादि । (हला ! इदानीं प्रथमदर्शनात् सविशेषं प्रियदर्शनो महाराजः प्रतिभाति ।)

चित्र०—जुज्जदि । ता एहि उवसप्पम्ह । (युज्यते । तदेहि उपसर्पावः)

उर्व०—ण दाव उवसप्पिस्सं । तिरक्खरिणीपडिच्छण्णा पासगदा से भविअ सुणिस्सं दाव पासवत्तिणा वअस्सेण सह विअणे किं मंतअंतो चिट्ठदि त्ति । (न तावदुपसर्पिष्यामि । तिरस्करिणीप्रतिच्छन्ना पार्श्वगतास्य भूत्वा श्रोष्यामि तावत् पार्श्ववर्तिना वयस्येन सह विजने किं मन्त्रयमाणस्तिष्ठतीति ।)

चित्र०— जं दे रोअहि । (यत् ते रोचते ।) (उभे यथोक्तमनुतिष्ठतः)

विदू०—भो, चिंतिदो मए दुल्लहप्पणइणीसमाअमोवाओ ।
(भोः चिन्तितो मया दुर्लभ-प्रणयिनी-समागमोपायः ।)

(राजा तूष्णीमास्ते)

उर्व०—(सेर्ष्यम्) का णु क्खु धण्णा इत्थिआ जा इमिणा पत्थिअमाणा अत्ताणअं किदित्थेइ । (का नु खलु धन्या स्त्री या अनेन प्रार्थ्यमानात्मानं कृतार्थयति ।)

चित्र०—किं उण माणुस्सअं विडंबीअदि । (किं पुनर्मानुष्यकं विडम्ब्यते ।)

उर्व०—सहि भीआमि सहसा पभावादो विण्णादुं ।
(सखि ! बिभेमि सहसा प्रभावाद् विज्ञातुम् ।)

विदू०—भो ! णं भणामि चिंतिदो मए उवाओ त्ति ।
(भोः ! ननु भणामि चिन्तितो मया उपाय इति ।)

राजा—तेन हि कथ्यताम् ।

विदू०—सिविणसमाअमआरिणिं णिद्दं सेवदु भवं । अहवा तत्तभोदीए उव्वसीए पडिकिदिं चित्तफलए आलिहिअ ओलोअंदो चिट्ठदु ।
(स्वप्नसमागमकारिणीं निद्रां सेवतां भवान् । अथवा तत्रभवत्या उर्वश्याः प्रतिकृतिं चित्रफलके आलिख्य अवलोकयंस्तिष्ठतु ।)

उर्व०—(सहर्षमात्मगतम्) हीणसत्त हिअअ ! समस्सस समस्सस ।
(हीनसत्त्व हृदय ! समाश्वसिहि समाश्वसिहि ।)

राजा—उभयमप्यनुपपन्नम् । पश्य—

हृदयमिषुभिः कामस्यान्तः सशल्यमिदं सदा
कथमुपलभे निद्रां स्वप्ने समागमकारिणीम् ।
न च सुवदनामालेख्येऽपि प्रियामसमाप्य तां
मम[1] नयनयोरुद्वाष्पत्वं सखे न भविष्यति ॥१०॥

चित्र०—सुदं तुए अवणं । (श्रुतं त्वया वचनम् ।)

उर्व०—सहि सुदं । ण उण पज्जत्तं हिअअस्स ।
(सखि ! श्रुतं । न पुनः पर्याप्तं हृदयस्य ।)

विदू०—एत्तिओ एव्व मे मदिविहओ । (एतावानेव मे मतिविभवः ।)

राजा—(निःश्वस्य)

नितान्तकठिनां रुजं मम न वेद सा मानसीं
प्रभावविदितानुरागमवमन्यते वापि माम् ।
अलब्धफलनीरसं मम विधाय तस्मिञ्जने
समागम-मनोरथं भवतु पञ्चबाणः कृती ॥११॥

चित्र०—सहि सुदं तुए । (सखि ! श्रुतं त्वया ।)

उर्व०—हद्धी हद्धी । मं एव्वं अवगच्छदि । (सखीमवलोक्य) सहि असमत्थम्हि अग्गदो भविअ अत्ताणं दस्सिदुं[2] । ता पहाव-

---

१. मे. ३।४२. शा. ६।२२. २. से पडिवअणस्स पं अ. च.

णिम्मिदेण भुज्जवत्तेण लेहं संपादिअ अंतरा खिपिदुं[1] इच्छामि। (हा धिक् हा धिक्। माम्, एवमवगच्छति। (सखीमवलोक्य) सखि! असमर्थास्म्यग्रतो भूत्वा आत्मानं दर्शयितुम्। तत्, प्रभावनिर्मितेन भूर्जपत्रेण लेखं संपाद्य अन्तरा क्षेप्तुमिच्छामि।)

चित्र०—हला अणुमदं मे। (हला अनुमतं मे।)

(उर्वशी नाट्येन ससंभ्रममभिलिख्यान्तरा क्षिपति।)

विदू०—(दृष्ट्वा ससंभ्रमम्) अविहा अविहा। भो किं णु क्खु एदं? भुअंगणिम्मोअं मं खादिदुं णिवडिदो। (अविधा अविधा, भोः किंनु खलु एतत्? भुजङ्गनिर्मोकः किं मां खादितुं निपतितः।)

राजा—(विभाव्य विहस्य च।) वयस्य! नायं भुजङ्गनिर्मोकः भूर्जपत्रगतोऽयमक्षरविन्यासः।

विदू०—णं अदिट्ठाए उव्वसीए भवदो परिदेविदं सुणिअ समाणानुराअसूअआइं अक्खराइँ विसज्जिआइँ होन्ति। (ननु अदृष्टया उर्वश्या भवतः परिदेवितं श्रुत्वा समानानुरागसूचकान्यक्षराणि विसृष्टानि स्युः।)

राजा—नास्त्यगतिर्मनोरथानाम्[2]। (गृहीत्वानुवाच्य च सहर्षम्) सखे! [3]प्रसन्नस्ते तर्कः।

विदू०—ही ही भो। किं वम्हणवअणाणि अण्णधा होन्ति। दाणिं पसीददु भवं। जं एत्थ लिहिदं तं सुणिदुं इच्छामि। (ही ही भोः। किं ब्राह्मणवचनान्यन्यथा भवन्ति। तदिदानीं प्रसीदतु भवान्। यदत्र लिखितं तच्छ्रोतुमिच्छामि।)

उर्व०—साहु अज्ज णाअरोसि। (साधु आर्य! नागरोऽसि।)

राजा—वयस्य श्रूयताम्।

विदू०—अवहिदो म्हि। (अवहितोऽस्मि।)

राजा—श्रूयताम् (वाचयति)

सामिअ[4] संभाविआ[5] जहा अहं तुए अमुणिआ
तह अणुरत्तस्स जइ णाम तुज्झ उवरि अहं।

---

१. ०त्तेण संवादिदउत्तरा होदुं इच्छामि पं अ. च. २. कु. ५।६४
३. प्रसिद्ध इति पाठे।
४. बहुतरमत्र पाठान्तरम्। स्वच्छार्थतया का. पाठं त्वाद्रियामहे, किञ्चिदन्तरेण।
५. सामि असंभाविआ. का.

किं मे ललिअपारिआअ-सणिज्जअंमि होन्ति
णंदणवण-वादा वि अच्चुण्हआ[1] सरीरए ॥१२॥[2]

(स्वामिन् संभाविता यथाहं त्वयाऽज्ञाता
तथानुरक्तस्य यदि नाम तवोपरि अहम् ।
किं मे ललितपारिजातशयनीये भवन्ति
नन्दनवनवाता अप्यत्युष्णकाः शरीरके ॥)

उर्वशी—किं णु क्खु संपदं भणिस्सदि । (किं नु खलु साम्प्रतं भणिष्यति ।)

चित्र० —णं भणिदं एव्व मिलाणकमलणालाअमाणेहिं अंगेहिं[a] ।
(ननु भणितमेव म्लान-कमलनालायमानैरङ्गैः ।)

विदू०—दिट्ठिआ मए बुभुक्खिदेण सोत्थिवाअणं विअ, उवलद्धं भवदा उक्कंठिदेण समासासणं । (दिष्टचा, मया बुभुक्षितेन स्वस्तिवाचनमिव, उपलब्धं भवता उत्कण्ठितेन समाश्वासनम् ।)

राजा—समाश्वासनमिति किमुच्यते

तुल्यानुरागपिशुनं ललितार्थबन्धं
पत्रे निवेशितमुदाहरणं[3] प्रियायाः ।
उत्पक्ष्मणा मम सखे मदिरेक्षणायाः
तस्याः समागतमिवाननमाननेन ॥१३॥

उर्वशी—एत्थ णो समविभाआ पीदी । (अत्रावयोः समविभागा प्रीतिः ।)

राजा—वयस्य अङ्गुलिस्वेदेन दूष्येरन्नक्षराणि । धार्यतामयं मम प्रियायाः स्वहस्तः[4] ।

विदू०—(गृहीत्वा)

किं दाणिं तत्तभोदी उव्वसी भवदो मणोरहाणं कुसुमं दंसिअ

---

१. आच्चण्हा. का.

२. इमे द्वे गाथे इति अर्त्ते, अन्ये च कतिपये । a द्र. पृ. २९३

३. उदाहरणं गीतबन्धः । र. ४/७८, अत्रैव ३४७ पृ० 'उदाजहार द्रुपदात्मजा गिर' इति भारविश्च ।

४. भाषायां हस्ताक्षरम् इति Signature इति च यत् प्रसिद्धं तदर्थं स्वहस्त इति संस्कृतं भोजराजादिदानशासनेषु प्रतीतम् । अत्र पुनः 'स्वहस्त-लिखितोऽक्षरविन्यास' इत्यर्थः । एवमग्रे २/१९ पद्येऽपि ।

फले विसंवददि। (किमिदानीं तत्रभवती उर्वशी भवतो मनोरथानां कुसुमं दर्शयित्वा फले विसंवदति।)

उर्वशी—सहि जाव उवगमणकादरं हिअअं पज्जवत्थावेमि दाव तुमं से अत्ताणं दंसिअ जं मे खमं तं भणाहि। (सखि यावदुपगमनकातरं हृदयं पर्यवस्थापयामि, तावत्, त्वमस्य आत्मानं दर्शयित्वा, यन्मम क्षमं, तद् भण।)

चित्र०—तह (तथा) (तिरस्करिणीमपनीय राजानमुपेत्य) जेदु जेदु महाराओ। (तिरस्करिणीमपनीय राजानमुपेत्य) (जयतु जयतु महाराजः।)

राजा—(दृष्ट्वा सहर्षं) स्वागतं भवत्यै (पार्श्वमवलोक्य) भद्रे !

न तथा नन्दयसि मां सख्या विरहिता तया।
सङ्गमे दृष्टपूर्वेव यमुना गङ्गया विना ॥१४॥

चित्र०—णं पढमं मेहराई दीसदि पच्छा विज्जुलदा। (ननु प्रथमं मेघराजिर्दृश्यते पश्चाद् विद्युल्लता।)

विदू०—(अपवार्य) कहं ण एसा उव्वसी। ताए तत्तहोदीए अहिमदा सहअरी। (कथं नैषोर्वशी। तस्यास्तत्रभवत्या अभिमता सहचरी ?)

राजा—एतदासनमास्यताम्।

चित्र०—उव्वसी महाराअं सिरसा पणमिअ विण्णवेदि। (उर्वशी महाराजं शिरसा प्रणम्य विज्ञापयति।)

राजा—किमाज्ञापयति ?

चित्र०—तस्सिं सुरारिसंभवे दुज्जादे महाराओ एव्व मं सरणं आसि। सा अहं संपदं, तुह दंसणसमुत्थेण मअणेण, वलिअं वाहीअमाणा, भूओवि महाराएण अणुकंपणीअत्ति। (तस्मिन् सुरारिसम्भवे दुर्जाते महाराज एव मम शरणमासीत्। साहं साम्प्रतं तव दर्शनसमुत्थेन मदनेन, बलवद् बाध्यमाना भूयोऽपि महाराजस्यानुकम्पनीया भवामि इति।)

राजा—अयि भद्रमुखि !

पर्युत्सुकां कथयसि प्रियदर्शनां ताम्,
आर्तं न पश्यसि पुरूरवसं तदर्थे।

साधारणोऽयमुभयोः [1]प्रणयः स्मरस्य
तप्तेन तप्तमयसा घटनाय योग्यम् ॥१५॥

चित्र०—(उर्वशीमुपेत्य) सहि एहि । तुवत्तोवि णिद्दअदरं मअणं पेक्खिअ पिअतमस्स दे दूदिम्हि संवुत्ता । (सखि एहि ! त्वत्तोऽपि निर्दयतरं मदनं प्रेक्ष्य प्रियतमस्य ते दूत्यस्मि संवृत्ता ।)

उर्वशी—(तिरस्करिणीमपनीय) अम्महे लहुअं तुए उज्झिदम्हि । (अहो लघु त्वया उज्झितास्मि ।)

चित्र०—(सस्मितम्) सहि ! इदो मुहुत्तादो जाणिस्सं का कं उज्झिस्सदि । आआरं दाव पडिवज्ज । (सखि ! इतो मुहूर्तादेव ज्ञास्यामि का कामुज्झिष्यतीति । आचारं तावत् प्रतिपद्यस्व ।)

उर्वशी—(ससाध्वसं राजानमुपेत्य प्रणम्य च सव्रीडम्) जेदु जेदु महाराओ । (जयतु-जयतु महाराजः ।)

राजा—(सहर्षम्) सुन्दरि !

मया नाम जितं यस्य त्वयायं समुदीर्यते ।
जयशब्दः सहस्राक्षादगतः[2] पुरुषान्तरम् ॥१६॥
(हस्ते गृहीत्वैनामुपवेशयति ।)

विदू०—भोदि ! रण्णो पिअवअस्सो वम्हणो किं ण वन्दीअदि । (भवति ! राज्ञः प्रियवयस्यो ब्राह्मणः किं न वन्द्यते ।)

(उर्वशी सस्मितं प्रणमति)

विदू०—सत्थि भोदीए । (स्वस्ति भवत्यै ।)

(नेपथ्ये देवदूतः)

चित्रलेखे ! त्वरय त्वरय उर्वशीम् ।

मुनिना भरतेन यः प्रयोगो
भवतीष्वष्टरसाश्रयो नियुक्तः[3] ।
ललिताभिनयं तमद्य भर्ता
मरुतां द्रष्टुमनाः सलोकपालः ॥१७॥

---

१. याच्ञा । 'प्रणयास्त्वमी विस्रम्भयाच्ञाप्रेमाणः ।' द्र. पृ. २३० पादटि.
२. आगत इति पाठे पुरुषान्तरपदस्यान्तरशब्दो विशेषपरः । ३. निबद्ध पा०

(सर्वे कर्णं ददति । उर्वशी विषादं रूपयति)

चित्र०—सुदं पिअसहीए देवदूदस्स वअणं । ता अणुमाणीअदु महाराओ । (श्रुतं प्रियसख्या देवदूतस्य वचनम् । तदनुमान्यतां महाराजः ।)

उर्वशी—णत्थि मे वाआ । (नास्ति मे वाचा ।)

चित्र०—महाराअ उव्वसी विण्णवेदि—परवसो अअं जणो । ता महाराएण अब्भणुण्णादा इच्छामि देवेसु अणवरद्धं अत्ताणअं कादुं त्ति । (महाराज ! उर्वशी विज्ञापयति—परवशोऽयं जनः । तन्महाराजेनाभ्यनुज्ञाता इच्छामि देवेष्वनपराद्धमात्मानं कर्तुम्—इति ।)

राजा—(कथं कथमपि वाचं व्यवस्थाप्य ।) नास्मि भवत्योः ईश्वरनियोगप्रत्यर्थी । स्मर्तव्यस्त्वयं जनः ।

(उर्वशी वियोगदुःखं रूपयित्वा राजानं पश्यन्ती सह सख्या निष्क्रान्ता ।)

राजा—(निःश्वस्य) सखे वैयर्थ्यमिव मे चक्षुषोः संप्रति ।

विदू०—(पत्रं दर्शयितुकामः) णं एदं (अर्धोक्ते सविषादमात्मगतम्) हद्धी हद्धी उव्वसीदंसणविम्हिदेण मए तं भुज्जावत्तअं पब्भट्टं वि हत्थादो पमादेण ण विण्णादं । (ननु एतत् (इत्यर्धोक्ते सविषादमात्मगतम्) हा धिक् हा धिक् ! उर्वशीदर्शनविस्मितेन मया तद् भूर्जपत्रं प्रभ्रष्टमपि हस्तात् प्रमादेन न विज्ञातम् ।)

राजा—भद्र ! किमपि वक्तुकाम इव ?

विदू०—एव्वं वत्तुकामोम्हि—मा भवं अंगाइँ मुंचदु । दिढं क्खु तुइ वद्धभावा उव्वसी । ण सा इदोगदं अणुराअं सिढिलेदि त्ति । (एवं वक्तुकामोऽस्मि—'मा भवानङ्गानि मुञ्चतु । दृढं खलु त्वयि बद्धभावा उर्वशी । न सा इतोगतमनुरागं शिथिलयति'—इति ।)

राजा—ममाप्येतदाशंसि मनः । तया खलु प्रस्थाने—

अनीशया शरीरस्य स्ववशं हृदयं मयि ।
स्तनकम्पक्रियालक्ष्यैर्न्यस्तं निःश्वसितैरिव ॥१८॥

विदू०—(स्वगतम्) वेवदि मे हिअअं इमं वेलं अत्तभवदा तस्स भुज्जवत्तस्स णाम गेण्हिदव्वं त्ति । (वेपते मे हृदयमिमां वेलामत्रभवता तस्य भूर्जपत्रस्य नाम ग्रहीतव्यमिति ।)

राजा—वयस्य केनेदानीं दृष्टिं विलोभयामि । (स्मृत्वा) आः, उपनयतु भवान् भूर्जपत्रम् ।

विदू०—(सर्वतो दृष्ट्वा विषादं नाटयति) हंत ण दिस्सदि । भो दिव्वं क्खु तं भुज्जवत्तं गदं उव्वसीए मग्गेण । (हन्त न दृश्यते । भोः दिव्यं खलु तद् भूर्जपत्रं गतमुर्वश्या मार्गेण ।)

राजा—(सासूयम्) अहो सर्वत्र प्रमादी वैधेयः । ननु विचिनोतु भवान् ।

विदू०—(उत्थाय) णं इदो भवे, इह वा भवे, इह वा भवे । (ननु इतो भवेत्, इह वा भवेत्, इह वा भवेत् ।) (विचेतव्यं नाटयति)

(ततः प्रविशति सपरिवारा काशिराजपुत्री देवी चेटी च)

देवी—हंजे णिउणिए ! सच्चं तुए भणिदं इमं लदागेहं पविसंतो अज्ज-माणवअ-सहाओ अज्जउत्तो दिट्ठो त्ति । (हञ्जे निपुणिके ! सत्यं त्वया भणितमिदं लतागृहं प्रविशन्नार्यमाणवकसहाय आर्यपुत्रो दृष्ट इति ।)

निपु०—किं अण्णहा भट्टिणी मए कदावि विण्णविदपुव्वा ? (किमन्यथा भट्टिनी मया कदापि विज्ञापितपूर्वा ?)

देवी—तेण हि लदाविडवंतरिदा सुणिस्सं दाव से विस्सद्ध मंत्तिदाणि जं तुए कहिदं तं सच्चं ण व त्ति । (तेन हि लताविटपान्तरिता श्रोष्यामि तावदस्य विस्रब्धमन्त्रितानि यत् त्वया कथितं तत् सत्यं न वेति ।)

निपु०—जं भट्टिणीए रोअदि । (यद् भट्टिन्यै रोचते ।)

देवी—(परिक्रम्य पुरस्तादवलोक्य च) हंजे णिउणिए किं णु क्खु एदं जिण्ण-चीअरं विअ इदोमुहं दक्खिण-मारुदेण आणीअदि । (हञ्जे निपुणिके ! किं नु खल्वेतज्जीर्णचीवरमिव इतोमुखं दक्षिणमारुतेनानीयते ।)

निपु०—(विभाव्य) भट्टिणी ! पडिवत्तणविभाविदक्खरं भुज्जवतं क्खु एदं । हंत भट्टिणीए एव्व णेउरकोडीए लग्गं । (गृहीत्वा) णं वाईअदु एदम् । (भट्टिनि ! परिवर्त्तनविभाविताक्षरं भूर्जपत्रं खल्वेतत् । हन्त भट्टिन्या एव नूपुरकोट्यां लग्नम् । (गृहीत्वा) ननु वाच्यतामेतत् ।)

देवी—अणुवाएहि दाव एदं । जदि अविरुद्धं तदो सुणिस्सं । (अनुवाचय तावदेतत् । यद्यविरुद्धं ततः श्रोष्यामि ।)

निपु०—(तथा कृत्वा) भट्टिणी ! तं एव्व कोलीणं विअ पडिहादि भट्टारग्रं उद्दिसिअ उव्वसीए कव्वबंधो त्ति तक्केमि, अज्जमाणवअ-प्पमादेण अम्हाणं हत्थं आगदो त्ति । (भट्टिनि ! तदेव कौलीनमिव प्रतिभाति । भट्टारकमुद्दिश्य उर्वश्याः काव्यबन्ध इति तर्कयामि, आर्य-माणवक-प्रमादेन आवयोर्हस्तमागत इति ।)

देवी—तेण हि से गहीदत्था ह्रोमि । (तेन ह्यस्य गृहीतार्था भवामि ।)

(निपुणिका वाचयति)

देवी—(श्रुत्वा) एहि इमिणा एव्व उवाअणेण दं अच्छराकामुग्रं पेक्खामि । (एहि, अनेनैवोपायनेन तमप्सरःकामुकं प्रेक्षे ।)

निपु०—तह । (तथा ।)

(परिजनसहिते लतागृहं परिक्रामतः ।)

विदू०—(विलोक्य) भो वअस्स ! किं एदं पवणवसगामि पमदवणसमीव-गदकीलापव्वदपज्जंते दीसदि । (भो वयस्य ! किमेतत् पवनवशगामि प्रमदवनसमीपगतक्रीडापर्वतपर्यन्ते दृश्यते ।)

राजा—(उत्थाय) भगवन् वसन्त-प्रिय दक्षिणवायो !

वासार्थं हर संभृतं सुरभिणा पौष्पं रजो वीरुधां
किं [१]मिथ्या भवतो हृतेन दयितास्नेह-[२]स्वहस्तेन मे ।
जानात्येव[३] मनोविनोदन[४]शतैरेवंविधैर्धारितं
कामार्तं [६]जनमञ्जनां प्रति भवानालक्षितप्रार्थनः ॥१९॥

निपु०—भट्टिणि ! पेक्ख पेक्ख । एदस्स एव्व अण्णेसणा वट्टदि । (भट्टिनी ! प्रेक्षस्व प्रेक्षस्व । एतस्यैवान्वेषणा वर्तते ।)

देवी—णं पेक्खामि दाव । तुण्हि चिट्ठ । (ननु पश्यामि तावत् । तूष्णीं तिष्ठ)

---

१. कार्यं. च.

२. द्र. ३६०-पृष्ठगता ४-पादटिप्पनी.

३. 'जानीते हि' च. सा. पं. अ. शा. एतच्चाबहुहस्तलेखमतम्, अन्वाख्यान-विरुद्धं च, ज्ञाधातोरकर्मकत्व एवात्मनेपदित्वात् ।

४. भवान्. च.

५. -फलैः. च.

६. जनमञ्जसाभिभवितुं नालम्बितप्रार्थनम् शा. । दक्षिणवायोर्वियोगिजनविरुद्ध-त्वादानुकूल्यायाञ्जनेतिहासोपन्यास उचितः ।

विदू०—(सविषादम्) हद्धी हद्धी भो मिलाअमाणकेसरच्छविणा मोर-पिच्छेण विप्पलद्धो म्हि। (हा धिक् हा धिक् भोः म्लायमान-केसरच्छविना मयूरपिच्छेन विप्रलब्धोऽस्मि।)

राजा—सर्वथा हतोऽस्मि।

देवी—(सहसोपसृत्य) अज्जउत्त अलं आवेएण। एदं तं भुज्जवत्तं। (आर्यपुत्र ! अलमावेगेन। एतत् तद् भूर्जपत्रम्)

राजा—(ससंभ्रमम्) अये देवी। स्वागतं देव्यै।

विदू०—(अपवार्य) दुरागदं दाणिं संवुत्तं। (दुरागतमिदानीं संवृत्तम्)

राजा—(जनान्तिकम्) वयस्य ! किमत्र प्रतिविधेयम्।

विदू०—(अपवार्य) लोत्तेण गहीदस्स कुंभीलअस्स अत्थि वा पडिवअणं। (लोप्त्रेण गृहीतस्य कुंभीलकस्यास्ति वा प्रतिवचनम्।)

राजा—(जनान्तिकम्) मूढ नायं परिहासकालः। (प्रकाशम्) देवि ! नेदं मया मृग्यते। अयं खलु परान्वेषणार्थमारम्भः।

देवी— जुज्जदि अत्तणो सोहग्गं पच्छदेवुं। (युज्यते आत्मनः सौभाग्यं[1] प्रच्छादयितुम्।)

विदू०—भोदि ! तुवरेहि से भोअणं जं पित्तोवसमणसमत्थं होदि। (भवति त्वरय अस्य भोजनं यत् पित्तोपशमनसमर्थं भवति।)

देवी— णिउणिए सोहणं क्खु वम्हणेण अणुमाणिदो वअस्सो। (निपुणिके ! शोभनं खलु ब्राह्मणेनानुमानितो वयस्यः।)

विदू०—भोदि णं पेक्ख आवेसिदो पिसाचोवि भोअणेण उज्झइ। (भवति ! ननु पश्य आवेशितः पिशाचोऽपि भोजनेन उज्झति।)

राजा—मूर्ख ! बलादपराधिनं मां प्रतिपादयसि।

---

१. सौभाग्यमत्र प्रणयिनीजनाऽऽगतः प्रेमा। प्रणयिनोरन्योन्यं प्रति यः प्रीतिबन्धस्तस्यैव सौभाग्यमिति परिभाषा। द्रष्टव्योऽस्माकं-'कालिदासभारती'-तिलेख-मालाया द्वितीयो लेखः सागरिका ४/२ अङ्के। व. द्र. पृ. २९७.

देवी— णत्थि क्खु भवदो अवराहो । अहं एव्व एत्थ अवरद्धा जा पडिऊलदंसणा भविअ अग्गदो दे चिट्ठामि । इदो अहं गमिस्सं । णिउणिए, एहि गच्छम्ह । (नास्ति खलु भवतोऽपराधः । अहमेवात्र अपराद्धा, या प्रतिकूलदर्शना भूत्वा अग्रतस्ते तिष्ठामि । इतोऽहं गमिष्यामि । निपुणिके ! एहि गच्छामः ।)

(कोपं नाटयित्वा प्रस्थिता ।)

राजा—(अनुसृत्य)

अपराधी नामाहं प्रसीद रम्भोरु ! विरम संरम्भात् ।
सेव्यो जनश्च कुपितः कथं च दासो निरपराधः ॥२०॥

(पादयोः पतति ।)

देवी—(स्वगतम्) मा क्खु लहुहिअआ अहं अणुणअं वहु मण्णे । किं दु अदक्खिण्णकिदस्स पच्छादावस्स भाएमि । (मा खलु लघुहृदयाहमनुनयं वहु मन्ये । किंतु अदाक्षिण्यकृतात् पश्चात्तापाद् बिभेमि ।)

(राजानमपहाय सपरिवारा निष्क्रान्ता ।)

विदू०—पाउसणदी विअ अप्पसण्णा गदा देवी । ता उट्ठेहि ।
(प्रावृण्नदीव अप्रसन्ना गता देवी । तदुत्तिष्ठ ।)

राजा—(उत्थाय) वयस्य, नेदमनुपपन्नम् । पश्य—

प्रियवचनकृतोऽपि योषितां दयितजनानुनयो रसादृते ।
प्रविशति हृदयं न तद्विदां मणिरिव कृत्रिमरागयोजितः ॥२१॥

विदू०—अणुऊलं एव्व एत्थभवदो एदं । ण क्खु अक्खिदुक्खिदस्स पमुहे दीवसिहा सहेदि । (अनुकूलमेवात्रभवत एतत् । न खलु अक्षिदुःखितस्य प्रमुखे दीपशिखा[1] सहते ।)

राजा—मा मैवम् ! उर्वशीगतमनसोऽपि मे स एव देव्यां वहुमानः । किन्तु प्रणिपातलङ्घनाद् अहमस्यां धैर्यमवलम्बिष्ये ।

विदू०—भो चिट्ठदु दाव भवदो धीरदा । बुभुक्खिदस्स बम्हणस्स जीविदं अवलंवदु भवं । समओ क्खु ण्हाणभोअणं सेविदुं (भो तिष्ठतु

१. न खल्वक्षिदुःखितोऽभिमुखे दीपशीखां सहते सा. पं. अ. च. । अत्राकर्मकः सहिः । शोभत इति च तदर्थः । सोऽयमभिजातो वाग्योगः कालिदासस्य ।

तावद् भवतो धीरता । बुभुक्षितस्य ब्राह्मणस्य जीवितमवलम्बतां भवान् । समयः खलु स्नानभोजनं सेवितुम् ।)

राजा—(उर्ध्वमवलोक्य) गतमर्धं दिवसस्य । अतः खलु—

उष्णालुः शिशिरे निषीदति तरोर्मूलालवाले शिखी
निर्भिद्योपरि कर्णिकारमुकुलान्यालीयते षट्पदः ।
तप्तं वारि विहाय तीरनलिनीं कारण्डवः सेवते
क्रीडावेश्मनि चैष पञ्जरशुकः क्लान्तो जलं याचते ।।२२।।

(निष्क्रान्तौ)

।। इति द्वितीयोऽङ्कः ।।



।। [1]अथ मिश्रविष्कम्भकः ।।

(ततः प्रविशतो भरतशिष्यौ)

गाल०—सखे पेलव ! महेन्द्रभवनं गच्छता भगवतोपाध्यायेन त्वमासनं प्रतिग्राहितः । अग्निशरणसंरक्षणाय स्थापितोऽहम् । अतः खलु पृच्छामि—अपि गुरोः प्रयोगेण दिव्या परिषदाराधिता ।

पेल०—गालव । ण जाणे आराहिदा ण व त्ति । तस्सिं उण सरस्सई-किदकव्वबंधे लच्छीसअंवरे तेसु तेसु रसंतरेसु तम्मई आसि । किंतु—। (गालव ! न जाने आराधिता न वा इति । तस्मिन् पुनः सरस्वतीकृतकाव्यबन्धे लक्ष्मीस्वयंवरे तेषु तेषु रसान्तरेषु [2]तन्मयी आसीत् । किन्तु—)

गाल०—सदोषावकाश इव ते वाक्यशेषः ।

पेल०—आम् तस्सिं उव्वसीए वअणं पमादक्खलिदं आसि । (आम्, तस्मिन् उर्वश्या वचनं प्रमादस्खलितमासीत् ।)

गाल०—कथमिव ?

पेल०—लच्छीभूमिआए वट्टमाणा उव्वसी वारुणीभूमिआए वट्टमाणाए मेणआए पुच्छिदा—सहि समागदा एदे तेलोक्कसुपुरिसा सकेसवा लोअवाला । कदमस्सिं दे [3]भावाहिणिवेसोत्ति । (लक्ष्मीभूमिकायां वर्त्तमाना उर्वशी वारुणीभूमिकायां वर्त्तमानया मेनकया पृष्टा—सखि ! समागता एते त्रैलोक्यसुपुरुषाः सकेशवाश्च लोकपालाः । कतमस्मिंस्ते भावाभिनिवेश इति ।)

---

१. इयमस्मत्कृता योजना ।

२. तन्मयीति परिषद्विशेषणम् । अत्र 'उव्वसी तम्मआ आसी' सा. शा. । किन्तु न युज्यतेऽत्रोर्वशीपदयोजना । परिषद एवाराध्यत्वेन प्रस्तुतत्वात्, पेलवस्य द्वितीये वाक्ये सर्वपठितस्य उर्वशीपदस्य पुनरुक्तत्वाच्च, सर्वनाम्नैवोपपत्तेः ।

३. हृदयाभिनिवेशः शा.

गाल०—ततस्ततः ।

पेल०—तदो ताए पुरुसत्तमे त्ति भणिदव्वे पुरूरवसि त्ति ताए णिग्गदा वाणी । (ततः पुरुषोत्तमे इति भणितव्ये पुरूरवसीति तस्या निर्गता वाणी)

गाल०—भवितव्यतानुविधायीनि इन्द्रियाणि । न खलु तामभिक्रुद्धो गुरुः ?

पेल०—सा क्खु सत्ता उवज्झाएण । महिंदेण उण अणुग्गिहीदा । (सा खलु शप्ता उपाध्यायेन । महेन्द्रेण पुनरनुगृहीता ।)

गाल०—कथमिव ?

पेल०—जेण मम उवदेसो तुए लंघिदो तेण ण दे दिव्वं ठाणं हविस्सदि त्ति उवज्झाअस्स सावो । महिंदेण उण पेक्खणावसाणे लज्जावणदमुही सा एव्वं भणिदा—जस्सिं तुमं बद्धभावासि तस्य मे रणसहाअस्स राएसिणो पिअं एत्थ करणिज्जं । ता दाव तुमं जहाकामं पुरूरवसं उवचिट्ठ जाव सो तुइ दिट्ठसंताणो भोदि त्ति । (येन ममोपदेशस्त्वया लङ्घितः तेन न ते दिव्यं स्थानं भविष्यति इति उपाध्यायस्य शापः । महेन्द्रेण पुनः प्रेक्षणावसाने लज्जावनतमुखी सा एवं भणिता—यस्मिंस्त्वं बद्धभावासि तस्य मे रणसहायस्य राजर्षेः प्रियमत्र करणीयम् । तत् तावत् त्वं यथाकामं पुरूरवसमुपतिष्ठस्व यावत् स [1]त्वयि दृष्टसन्तानो भवेदिति ।)

गाल० —सदृशमेतत् पुरुषान्तरविदो महेन्द्रस्य ।

पेल०—(सूर्यमवलोक्य) कधापसंगेण अम्हेहिं अवरद्धा अहिसेअवेला क्खु उवज्झाअस्स । ता एहि । से पासवत्तिणो होम । (कथाप्रसंगेनास्माभिः अपराद्धा अभिषेकवेला खलु उपाध्यायस्य । तदेहि । अस्य पार्श्ववर्तिनौ भवाव ।

गाल०—तथा ।

(निष्क्रान्तौ[2])

---

१. यावत् स परिदृष्ट. सा. शा.

२. सर्वत्रात्रैव विष्कम्भकसमाप्तिः ।

(ततः प्रविशति कञ्चुकी)

कञ्चु०—(विनिःश्वस्य)

सर्वः कल्पे वयसि यतते लब्धुमर्थान् कुटुम्बी
पश्चात् पुत्रैरपहृतभरः कल्पते विश्रमाय।
अस्माकं तु प्रतिदिनमियं [1]साधयन्ती प्रतिष्ठां
सेवा कारा-[2]परिणतिरहो[3]स्त्रीषु कष्टोऽधिकारः ॥१॥

(परिक्रम्य) आदिष्टोस्मि सनियमया काशिराजपुत्र्या—व्रतसम्पादनार्थं मया मानमुत्सृज्य निपुणिकामुखेन पूर्वं याचितो महाराजः। तदेव त्वं मद्वचनाद् विज्ञापय इति। यावदहमिदानीम् अवसितसन्ध्याजप्यं महाराजं पश्यामि। (परिक्रम्यावलोक्य च) रमणीयः खलु दिवसावसानवृत्तान्तो राजवेश्मनः। इह हि--

उत्कीर्णा इव वासयष्टिषु निशानिद्रालसा बर्हिणो
धूपैर्जालविनिःसृतैर्वलभयः संदिग्धपारावताः।
आचारप्रयतः सपुष्पबलिषु स्थानेषु चार्चिष्मतीः
सन्ध्या-मङ्गलदीपिका विभजते शुद्धान्तवृद्धो जनः ॥२॥

(नेपथ्याभिमुखमवलोक्य) अये इत एव प्रस्थितो देवः—

परिजनवनिताकरार्पिताभिः
परिवृत एष विभाति दीपिकाभिः।
गिरिरिव गतिमानपक्षसादाद्,
अनुतटपुष्पितकर्णिकारयष्टिः ॥३॥

यावदेनमवलोकनमार्गे स्थितः प्रतिपालयामि।

(परिक्रम्य स्थितः।)

॥ [4]इति मिश्रविष्कम्भकः ॥

---

१. सादयन्ती शरीरं सा. पं. अ.; सादयन्ती प्रतिष्ठां शा.
२. सेवाकारा परि० सा. च. पं. अ. ३. ०रभूत्
४. इयमस्माकं वस्तुयोजना.

[a]अथ तृतीयोऽङ्कः

(ततः प्रविशति यथानिर्दिष्टो राजा विदूषकश्च ।)

राजा—(स्वगतम्) आः ।

कार्यान्तरितोत्कण्ठं दिनं मया नीतमनतिकृच्छ्रेण ।
अविनोददीर्घयामा कथं नु रात्रिर्गमयितव्या[1] ॥४॥

कञ्चु०—(उपसृत्य)जयतु जयतु देवः ! देव ! देवी विज्ञापयति—मणिहर्म्यपृष्ठे सुदर्शनश्चन्द्रः । तत्र संनिहितेन देवेन प्रतिपालयितुमिच्छामि यावद् रोहिणीसंयोग इति ।

राजा—आर्य लातव्य ! विज्ञाप्यतां देवी यस्ते छन्द इति ।

कञ्चु०—यदाज्ञापयति देवः । (निष्क्रान्तः)

राजा—वयस्य ! किं परमार्थत एव देव्या व्रतनिमित्तोऽयमारम्भः स्यात् ?

विदू०— भो तक्केमि संजादपच्छादावा तत्तभोदी वदावदेसेण भवदो पणिपादलंघणं पमज्जिदुकाम त्ति । (भोः तर्कयामि सञ्जातपश्चात्तापा तत्रभवती व्रतापदेशेन भवतः प्रणिपातलङ्घनं प्रमार्ष्टुकामेति ।)

राजा—उपपन्नं भवानाह—

अवधूतप्रणिपाताः पश्चात् सन्तप्यमानमनसो हि[2] ।
[3]निभृतैर्व्यपत्रपन्ते दयितानुनयैर्[4]मनस्विन्यः[5] ॥५॥

तदादेशय मणिहर्म्य-पृष्ठमार्गम् ।

विदू०—इदो इदो भवं । इमिणा गंगातरंगसस्सिरीएण फलिअमणिसोवाणेण आरोहदु भवं पदोसावसररमणिज्जं मणिहम्मिअपिट्ठं । (इत इतो भवान् । एतेन गङ्गातरङ्गसश्रीकेण[6] स्फटिकमणिसोपानेनारोहतु भवान् प्रदोषावसररमणीयं मणिहर्म्यपृष्ठम्)

---

a. इयमस्मद्योजना । १. मे. २।२५. २. ऽपि सा. शा. पं. अ.
३. विविधैरनुतप्यन्ते च. ४. अनुशयैः शा.
५. अयमेव हि पाठो विदूषकोक्त्या संवदति । ६. शिशिरेण शा.

राजा—आरोहाग्रतः । (सर्वे सोपानारोहणं नाट्यन्ति ।)

विदू०—(निरूप्य) भो पच्चासण्णेण चंदोदएण होदव्वं जह तिमिररेई-अमाणं पुव्वदिसामुहं आलोअसुहअं दीसदि । (भोः प्रत्यासन्नेन चन्द्रोदयेन भवितव्यम्, यथा तिमिररिच्यमानं पूर्वदिशामुखमालोक-सुभगं दृश्यते ।)

राजा—सम्यग् भवान् मन्यते—

उदयगूढशशाङ्कमरीचिभि-
स्तमसि दूरतरं प्रतिसारिते ।
अलकसंयमनादिव लोचने
हरति मे हरिवाहनदिङ्मुखम् ॥६॥

विदू०—(विलोक्य) ही ही भो, एसो क्खु खंडमोदअसरिसो[1] उदिदो राआ दुआदीणं । (ही ही भोः, एष खलु खण्डमोदकसदृशः उदितो राजा द्विजातीनाम् ।)

राजा—(सस्मितम्) सर्वत्रौदरिकस्य अभ्यवहार्यमेव विषयः । (प्राञ्जलिः प्रणम्य) भगवन् क्षपानाथ—

रविभावसते सतां क्रियायै
सुधया तर्पयते सुरान् पितॄँश्च[2] ।
तमसां निशि मूर्च्छतां निहन्त्रे
हरचूडानिहितात्मने नमस्ते ॥७॥

(उपतिष्ठते)

विदू—भो वम्हणसंकामिदक्खरेण दे पिदामहेण अब्भणुण्णादो सि । ता आसणट्ठिदो होहि जाव अहं वि सुहासीणो होमि । (भोः ब्राह्मणसंक्रामिताक्षरेण ते पितामहेनाभ्यनुज्ञातोऽसि । तत्, आसन-स्थितो भव । यावदहमपि सुखासीनो भवामि ।)

राजा—(विदूषकवचनं परिगृह्योपविष्टः परिजनं विलोक्य ।) अभिव्यक्तायां चन्द्रिकायां किं दीपिकापौनरुक्त्येन ? तद् विश्राम्यन्तु भवत्यः ।

---

१. सस्सिरीओ = सश्रीकः सा. पं. अ. च. २. पितॄन् सुरांश्च शा.

परि०—जं देवो आणवेदि। (यद् देव आज्ञापयति।) (निष्क्रान्तः)

राजा—(चन्द्रमसमवलोक्य विदूषकं प्रति) वयस्य ! परं मुहूर्तादागमनं देव्याः। तद् विविक्ते कथयिष्यामि स्वामवस्थाम्।

विदू०—णं दीसदि एव्व सा। किदु तारिसं अणुराअं पेक्खिअ सक्कं क्खु आसाबंधेण अत्ताणं धारेदुं। (ननु दृश्यत एव सा। किन्तु तादृशमनुरागं प्रेक्ष्य शक्यं खलु [1]आशाबन्धेनात्मानं धारयितुम्।)

राजा—एवमेतत्। वलवान् पुनर्मे मनसोऽभितापः।

नद्या इव प्रवाहो विषमशिलासङ्कटस्खलितवेगः।
विघ्नितसमागमसुखो मनसिशयः [2]शतगुणीभवति ॥८॥

विदू०—भो जहा परिहीअमाणेहिं अंगेहिं अहिअं सोहसि तहा अदूरे पिआसमागमं दे पेक्खामि। (भोः यथा परिहीयमानैरङ्गैरधिकं शोभसे तथा अदूरे प्रियासमागमं ते प्रेक्षे।)

राजा—(निमित्तं सूचयन्।) वयस्य—

वचोभिराशाजननै[3]-र्भवानिव गुरुव्यथम्।
अयं मां स्पन्दितैर्वाहुराश्वासयति दक्षिणः ॥९॥

विदू०—ण क्खु अण्णहा वम्हणस्स वअणं।
(न खल्वन्यथा ब्राह्मणस्य वचनम्)

(राजा सप्रत्याशस्तिष्ठति।)

(ततः प्रविशति आकाशयानेनाभिसारिकावेषा उर्वशी चित्रलेखा च)

उर्वशी—(आत्मानमवलोक्य) हला चित्तलेहे ! अवि रोअदि दे अअं मम मोत्ता[4]हरणभूसिदो णोलंसुअपरिग्गहो अहिसारिआवेसो। (हला चित्रलेखे ! अपि रोचते ते अयं मम मुक्ताऽऽभरणभूषितः नीलांशुकपरिग्रहः अभिसारिकावेषः।)

---

१. मेघदूत-१/१०, शा. ४ १५
२. 'त्वनुगुणो' शा.। पाठ एष पूर्वार्धप्रदिष्टदृष्टान्ताननुगुणः। द्र. कु. ५/८५
३. आशाजनन-शब्दाय शा. ७/२०-२१ ग.
४. अप्पाभरण० = अल्पाभरण० च. सा. पं. अ.। नीलांशुके मौक्तिकानि त्रिवेणीसौभाग्यमावहन्तीति 'मुक्ता'—पाठ एष हृदि सजते।

चित्र०—सहि ! णत्थि मे वाआविहवो पसंसिदुं । इदुं तु चिंतेमि अवि णाम अहं पुरूरवा भवेअं त्ति । (सखि ! नास्ति मे वाग्विभवः प्रशंसितुम् । इदं तु चिन्तयामि अपि नामाहं पुरूरवा भवेयमिति ।)

उर्व०—सहि ! मदणो क्खु तुमं आणवेदि । ता सिग्घं णेहि मं तस्स सुहअस्स[1] वसदिं । (सखि ! मदनः खलु त्वामाज्ञापयति । तच्छीघ्रं नय मां तस्य [1]सुभगस्य वसतिम् ।)

चित्र०—(विलोक्य) णं एदं परिवत्तिदं विअ केलाससिहरं पिअदमस्स दे भवणं उवगद म्ह । (नन्वेतत् परिवर्तितमिव[2] कैलासशिखरं प्रियतमस्य ते भवनमुपगते स्वः ।)

उर्व०—तेण हि पहावदो जाणीहि दाव कहिं सो मम हिअअचोरो किं वा अणुचिट्ठदि त्ति । (तेन हि प्रभावाज्जानीहि तावत्, क्व स मम हृदयचौरः, किं वानुतिष्ठतीति ।)

चित्र०—(ध्यात्वा विहस्यात्मगतम्) भोदु कीलिस्सं दा एदाए । (प्रकाशम्) हला दिट्ठो एसो मणोअहलद्धपिआसमाअमसुहं अणुहवंतो उवहोअक्खमे ओआसे चिट्ठदि त्ति । (भवतु । क्रीडिष्यामि तावदेतया । (प्रकाशम्) हला दृष्टो मया एष मनोरथलब्धप्रियासमागमसुखमनुभवन् उपभोगक्षमे अवकाशे तिष्ठतीति ।)

उर्व०—[3](विषादं नाटयति । निःश्वस्य) धण्णो सो जणो जो एव्वं भवे । (धन्यः स जनो य एवं भवेत् ।)

चित्र०—मुद्धे ! का उण चिंता तुए विणा अण्णपिआ-समाअमस्स ? (मुग्धे ! का पुनश्चिन्ता त्वया विना अन्यप्रियासमागमस्य ?)

उर्व०—(सोच्छ्वासम्) सहि अदक्खिणं संदेहदि मे हिअअं । (सखि ! अदक्षिणं संदेग्धि मे हृदम् ।)

---

१. स खलु सुभगो यमङ्गनाः कामयन्ते, मल्लि० मे. १।२९., द्र. ३६६ पृ. पादटि. 'सहि असमत्था क्खु अहं । तुं आणेहि तं सिग्घं । णेहि मं तस्स वा' । शा.

२. अत्र पाठः 'णं पडिबिंबिअं जामिणीजमुणाए कैलाससिहरसस्सिरीअं' का. शा.

३. इतः परं 'एसो मणिहम्म' इत्यादेः पूर्वं च 'उर्वशी-अवेहि हिअअं मे ण पत्तीअदि । हला चित्तलेहे हिअए काऊण किं वि जप्पसि । पिअसमागमस्स अग्गदो एव्व अणेण अवहरिदं मे हिअअं'—शा. ।

चित्र०—एसो मणिहम्मिअप्पासादपिट्ठगदो वअस्समेत्तसहाओ राएसी। ता एहि उवसप्पाम णं। (एष मणिहर्म्यप्रासादपृष्ठगतः, वयस्यमात्रसहायो राजर्षिः। तदेहि उपसर्पाव एनम्।)

(उभे अवतरतः)

राजा—वयस्य रजन्या सह विजृम्भते मदनबाधा।

उर्व०—अणिब्भिण्णत्थेण इमिणा वअणेण आकंपिदं मे हिअअं। ता अंतरिदा एव्व सुणाम से सेरालावं जाव णो संसअच्छेदो होदि। (अनिर्भिन्नार्थेनानेन वचनेन आकम्पितं मे हृदयम्। तदन्तर्हिते शृणुवः अस्य स्वैरालापं यावदावयोः संशयच्छेदो भवति।)

चित्र०—जं दे रोअदि। (यत्ते रोचते।)

विदू०—णं इमे अमिअगब्भा सेवीअंदु चंदवादा।
(नन्वेते अमृतगर्भाः सेव्यतां चन्द्रपादाः।)

राजा—वयस्य! एवमादिभिरनुपक्रम्योऽयमातङ्कः। पश्य—

कुसुमशयनं न प्रत्यग्रं न चन्द्रमरीचयो
न च मलयजं सर्वाङ्गीणं न वा मणियष्टयः।
मनसिजरुजं सा वा दिव्या ममालमपोहितुं

उर्व०—(उरसि हस्तं दत्वा[1]।) का वा अवरा। (का वा अपरा।)

राजा— रहसि लघयेदारब्धा वा तदाश्रयिणी कथा ॥१०॥

उर्व०—हिअअ! मं उज्झिअ इदो संकंतेण तुए दाणिं फलं उवलद्धं।
(हृदय! मामुज्झित्वा इतः संक्रान्तेन त्वयेदानीं फलमुपलब्धम्।)

विदू०—आम्। हं वि पत्थयंतो जदा [2]मिट्ठहरिणीमंसभोअणं ण लहे तदा णं संकित्तअंतो आसासेमि अत्ताणं। (आम्। अहमपि प्रार्थयमानो यदा मिष्ट-हरिणीमांस-भोजनं न लभे तदैतत् सङ्कीर्तयन्नाश्वासयाम्यात्मानम्।)

---

१. कोष्ठकांशः सा. शा. पं० अ. न। 'उर्वशी—अवरा' शा. न।
२. सिहरिणीं रसालं वा. सा. शा. नि-४। मिष्टहरिणीमांसपाठः—

राजा—सम्पद्यते पुनरिदं भवतः।

विदू०—भवं वि तं अइरेण पाविस्सदि। (भवानपि तामचिरेण प्राप्स्यसि।)

राजा—सखे! एवं मन्ये—।

चित्र०—सुणु, असंतुट्ठे सुणु (शृणु, असन्तुष्टे! शृणु।)

विदू०—कहं विअ। (कथमिव)

राजा—

अयं तस्या रथक्षोभादंसेनांसो निपीडितः।
एकः कृती शरीरेऽस्मिन् शेषमङ्गं भुवो भरः॥११॥

चित्र०—सहि! किं दाणिं विलंबीअदि। (सखि! किमिदानीं विलम्ब्यते।)

उर्व०—(सहसोपसृत्य) हला! अग्गदो वि मम ट्ठिदाए उदासीणो विअ महाराओ। (हला! अग्रतोऽपि मम स्थिताया उदासीन इव महाराजः।)

चित्र०—(सस्मितम्) अइ अदितुवरिदे! अणक्खित्ततिरक्खरिणीआसि। (अयि अतित्वरिते! अनाक्षिप्ततिरस्करिणिकासि।)

(नेपथ्ये)

इदो इदो भट्टिणी। (इत इतो भट्टिनी)

(सर्वे कर्णं ददति। उर्वशी सह सख्या विषण्णा।)

विदू०—(सविस्मयम्) अइ भो! उवट्ठिदा देवी। ता वाचंजमो होहि। (अयि भोः! उपस्थिता देवी। तद् वाचंयमो भव।)

राजा—भवानपि संवृताकारमास्ताम्।

उर्व०—सहि! किं एत्थ करणिज्जं। (सखि! किमत्र करणीयम्।)

—पुनः प्रतीयमानार्थसंपदतिशयस्पन्दसुभगतया सहृदयजननेदीयान्। मांसभोजनं च कालिदासे प्रसिद्धमेव शाकुन्तलस्य द्वितीयाङ्कारम्भे विदूषकस्यैवोक्त्या। शिखरिणीशब्दार्थश्च ध्वन्यालोक-३।४२—लोचने स्पष्टः। तत्रापि मांसचर्चाऽस्त्येव। सितादधिसंमिश्रः सेति च भावप्रकाशे।

चित्र०—अलं आवेएण। अंतरिदा दाणिं वयं। विहिद-णिअम-वेसा राएसि-महिसी दीसदि। ता ण एसा इह चिरं चिट्ठिस्सदि। (अलमावेगेन। अन्तर्हिते इदानीमावाम्। विहितनियमवेषा राजर्षिमहिषी दृश्यते। तन्नैषेह चिरं स्थास्यति।)

(ततः प्रविशति औपहारिकहस्तपरिजना देवी चेटी च)

देवी—(परिक्रम्य चन्द्रमसमवलोक्य च) हंजे णिउणिए! एसो रोहिणी-संजोएण अहिअं सोहदि भअवं मिअलंछणो। (हञ्जे निपुणिके! एष रोहिणीसंयोगेनाधिकं शोभते भगवान् [1]मृगलाञ्छनः।)

चेटी—णं भट्टिणीसहिदो भट्टा विसेसरमणिज्जो। (ननु भट्टिनीसहितो भर्त्ता विशेषरमणीयः।)

(परिक्रामतः)

विदू०—(दृष्ट्वा।) भो ण जाणामि सोत्थिवाअणं मे देइ त्ति, आदु वदव्ववदेसेण मुक्करोसा भवदो पणिपादलंघणं पमज्जिदुकाम त्ति। अज्ज मे अक्खीणं सुहदंसणा देवी। (भोः न जानामि स्वस्तिवाचनं मे ददातीति अथवा व्रतव्यपदेशेन मुक्तरोषा भवतः प्रणिपातलङ्घनं प्रमार्ष्टुकामेति। अद्य मे अक्ष्णोः शुभदर्शना देवी।)

राजा—(सस्मितम्) उभयमपि घटते। तथापि भवता यत् पश्चादभिहितं तन्मां प्रतिभाति। यदत्रभवती—

सितांशुका मङ्गलमात्रभूषणा
पवित्रदूर्वाङ्कुरलाञ्छितालका।
व्रतापदेशोज्झितगर्ववृत्तिना
मयि प्रसन्ना वपुषैव लक्ष्यते ॥१२॥

देवी—(उपसृत्य) जेदु जेदु अज्जउत्तो। (जयतु जयतु आर्यपुत्रः।)

परि०—जेदु जेदु भट्टारओ। (जयतु जयतु भट्टारकः।)

विदू०—सत्थि भोदीए। (स्वस्ति भवत्यै)

राजा—स्वागतं देव्यै। (तां हस्तेन गृहीत्वोपवेशयति।)

---

१. पर्यायवक्रतेयं प्रतीयमानाधिक्षेपगर्भा।

उर्वशी—हला ठाणे क्खु इअं देवीसद्देण उवअरीअदि । ण किं वि परिहीअदि सचीए ओजस्सिदाए । (हला ! स्थाने खलु इयं देवीशब्देनोपचर्यते । न किमपि परिहीयते शच्या ओजस्वितया ।)

चित्र०—साहु असूआपरम्मुहं मंतिदं तुए । (साधु असूयापराङ्मुखं मन्त्रितं त्वया ।)

देवी— अज्जउत्तं पुरोकरिअ कोवि वदविसेसो मए संपादणीओ । ता मुहुत्तं उवरोधो सहीअदु । (आर्यपुत्रं पुरस्कृत्य कोऽपि व्रतविशेषो मया संपादनीयः । तन्मुहूर्तमुपरोधः सह्यताम् ।)

राजा—मा मैवम् । अनुग्रहः खलु अयम्, नोपरोधः ।

विदू०—ईरिसो सोत्थिवाअणवंतो उवरोहो वहुसो होदु । (ईदृशः स्वस्तिवाचनवानुपरोधो बहुशो भवतु ।)

राजा—किं नामधेयमेतद् देव्या व्रतम् ?

(देवी निपुणिकामुखमवेक्षते ।)

निपु०—भट्टा पिआणुप्पसादणं णाम । (भर्तः प्रियानुप्रसादनं नाम ।)

राजा—(देवीं विलोक्य) यद्येवम्—

अनेन कल्याणि मृणालकोमलं
व्रतेन गात्रं ग्लपयस्यकारणम् ।
प्रसादमाकाङ्क्षति यस्तवोत्सुकः
स किं त्वया दासजनः प्रसाद्यते ।।१३।।

उर्वशी—महंतो क्खु से इमस्सिं वहुमाणो । (महान् खलु अस्य एतस्यां बहुमानः ।)

चित्र०—अइ मुद्धे अण्णसंकंतप्पेमाणो णाअरा भारिआए अहिअं दक्खिणा होन्ति । (अयि मुग्धे ! अन्यसक्रांतप्रेमाणो नागरा भार्यायामधिकं दक्षिणा भवन्ति ।)

देवी—(सस्मितम्) णं इमस्स वदपरिग्गहस्स अअं पहावो जं एत्तिअं मंताविदो अज्जउत्तो । (नन्वेतस्य व्रतपरिग्रहस्यायं प्रभावो यदेतावन्मन्त्रित आर्यपुत्रः ।)

विदू०—विरमदु भवं । ण जुत्तं सुहासिदं पच्चाचक्खिदुं ।
(विरमतु भवान् । न युक्तं सुभाषितं प्रत्याख्यातुम् ।)

देवी—दारिआओ ! आणेध ओवहारिअं जाव मणिहम्मिअपिट्ठगदे चंदपादे अच्चेमि । (दारिकाः आनयतऔपहारिकं यावन्मणिहर्म्यपृष्ठगतांश्चन्द्रपादानर्चामि ।)

परि०—जं भट्टिणी आणवेदी । एसो गंधकुसुमादिउवहारो ।
(यद् भट्टिनी आज्ञापयति । एष गन्धकुसुमाद्युपहारः ।)

देवी—उवणेध । (नाटचेन गन्धपुष्पादिभिश्चन्द्रपादानभ्यर्च्य ।) हंजे णिउणिए ! इमे ओहारिअमोदए अज्जमाणवअं लंभावेहि । (हञ्जे निपुणिके ! एतानौपहारिक-मोदकानार्यमाणवकं लम्भय ।)

निपु०—जं भट्टिणी आणवेदी । अज्ज माणवअ एवं दाव दे ।
(यद् भट्टिन्या-ज्ञापयति । माणवक इदं तावत् ते ।)

विदू०—(मोदकशरावं गृहीत्वा ।) सोत्थि भोदीए । वहुफलो दे एसो वदो भोदु । (स्वस्ति भवत्यै । बहुफलं तवैतद् व्रतं भवतु ।)

देवी—अज्जउत्त इदो दाव । (आर्यपुत्र इतस्तावत् ।)

राजा०—अयमस्मि ।

देवी—(राज्ञः पूजामभिनीय प्राञ्जलिः प्रणम्य ।) एसा अहं देवदामिहुणं रोहिणीमिअलंछणं सक्खीकरिअ अज्जउत्तं अणुप्पसादेमि 'अज्जप्पहुदि जं इत्थिअं अज्जउत्तो पत्थेदि, जा अ अज्जउत्तस्स समाअमप्पणयिणी ताए सह मए पीदिबंधेण वत्तिदव्वं त्ति । (एषाहं देवता मिथुनं रोहिणीमृगलाञ्छनं साक्षीकृत्यार्यपुत्रमनुप्रसादयामि—'अद्यप्रभृति यां स्त्रियमार्यपुत्रः प्रार्थयते, या चार्यपुत्रस्य समागमप्रणयिनी तया सह मया प्रीतिबन्धेन वर्तितव्यम्' इति ।)

उर्व०—अम्महे ण आणे किंपरं से वअणं त्ति । मम उण विस्सासविसदं हिअअं संवुत्तं । (अहो न जाने किं परमस्या वचनमिति । मम पुनर्विश्वासविशदं हृदयं संवृत्तम् ।)

चित्र०—सहि महाणुहावाए पदिव्वदाए अब्भणुण्णादो अणंतराओ दे पिअसमाअमो हविस्सदि । (सखि ! महानुभावया पतिव्रतया अभ्यनुज्ञातः अनन्तरायस्ते प्रियसमागमो भविष्यति ।)

विदू०—(अपवार्य।) [1]छिन्नहत्थे [2]मच्छे पलायिदे णिव्विण्णो धीवरो भणदि—गच्छ धम्मो मे हविस्सदि त्ति। (प्रकाशम्) भोदि! किं [3]तारिसो दे पिओ तत्तभवं? (छिन्नहस्ते मत्स्ये पलायिते निर्विण्णो धीवरो भणति—गच्छ धर्मो मे भविष्यतीति। (प्रकाशम्) भवति! किं तादृशस्ते प्रियस्तत्रभवान्?)

देवी—मूढ! अहं क्खु अत्तणो सुहावसाणेण अज्जउत्तं णिव्वुदसरीरं कादुं इच्छामि। एत्तिएण चिंतेहि दाव पिओ ण वत्ति। (मूढ! अहं खलु आत्मनः सुखावसानेनार्यपुत्रं निर्वृतशरीरं कर्तुमिच्छामि। एतावता चिन्तय तावत् प्रियो न वेति।)

राजा—

दातुं वा प्रभवसि मामन्यस्मै कर्तुमेव वा दासम्।
नाहं पुनस्तथा त्वयि यथा हि मां शङ्कसे भीरु ॥१४॥

देवी—होहि वा मा वा। जधाणिद्दिट्ठं संपादिदं मए पिआणुप्पसादणं णाम वदं। दारिआओ एध गच्छम्ह। (भव वा, मा वा। यथा-निर्दिष्टं संपादितं मया प्रियानुप्रसादनं नाम व्रतम्। दारिकाः एत गच्छाम।)

(प्रस्थिता)

राजा—प्रिये! न खलु प्रसादितोऽस्मि यदि संप्रति विहाय गम्यते।

देवी—अज्जउत्त! अलंघिदपुव्वो मए णिअमो।
(आर्यपुत्र! अलङ्घितपूर्वो मया नियमः।)

(सपरिवारा निष्क्रान्ता)

उर्व०—सहि! पिअकलत्तो राएसी। ण उण हिअअं णिवत्तेदुं सक्केमि। (सखि! प्रियकलत्रो राजर्षिः। न पुनर्हृदयं निवर्तयितुं शक्नोमि।)

---

१. छिन्नहत्थो सा. शा, पं. अ., भिन्नहस्ते च.
२. पुरठो वज्झे शा.
३. भोदि किं उदासीणो तत्रभवं। सा.

चित्र०—किं उण तुए [1]णिरासाए णिवत्तीअदि ।
(किं पुनस्त्वया निराशया निवर्त्यते ।)

राजा—(आसनमुपेत्य)वयस्य न खलु दूरं गता देवी ।

विदू०—भण विस्सद्धं जं सि वत्तुकामो । असज्झो त्ति वेज्जेण आदुरो विअ सेरं मुत्तो भवं तत्तहोदीए । (भण विस्रब्धं यदसि वक्तुकामः । असाध्य इति वैद्येनातुर इव स्वैरं मुक्तो भवाँस्तत्रभवत्या ।)

राजा—अपि नामोर्वशी ।

उर्व०—(आत्मगतम्)अज्ज किदत्था भवे । (अद्य कृतार्था भवेत् ।)

राजा—

गूढा नूपुरशब्दमात्रमपि मे [2]कान्तं श्रुतौ पातयेत्
पश्चादेत्य शनैः कराम्बुजवृते कुर्वीत वा लोचने ।
हर्म्येऽस्मिन्नवतीर्य साध्वसवशान्मन्दायमाना वलात्,
आनीयेत पदात् पदं चतुरया सख्या ममोपान्तिकम् ॥१५॥

चित्र—सहि ! उव्वसि इमं दाव से मणोरहं संपादेहि ।
(सखि ! उर्वशी इमं तावदस्य मनोरथं सम्पादय ।)

उर्व०—(ससाध्वसम्) भोदु । कीलिस्सं दाव । (भवतु क्रीडिष्यामि तावत् ।)

(तिरस्करणीमपनीय पृष्ठतो गत्वा राज्ञो नयने संवृणोति ।)
(चित्रलेखा तिरस्करिणीयपनीय विदूषकं संज्ञापयति ।)

विदू०—भो वअस्स ! का उण एसा । (भो वयस्य का पुनः एषा ।)

राजा—(स्पर्शं रूपयित्वा) सखे ! नारायणोरुसंभवा सेयं वरोरूः ।

विदू०—कहं भवं अवगच्छदि । (कथं भवानवगच्छति ।)

राजा—किमत्र ज्ञेयम् ।

[3]अङ्गमनङ्गक्लिष्टं सुखयेदन्या न मे करस्पर्शात् ।
नोच्छ्वसिति तपनकिरणैश्चन्द्रस्यैवांशुभिः[4] कुमुदम् ॥१६॥

---

१. त्थिरासो = स्थिराशः शा.
२. कान्ता सा. पं. अ.
३. अन्यत् कथमिव पुलकैः कलितं मम गात्रकं. शा.
४. चन्द्रस्येवांशुभिः सा. शा. पं. अ. । द्र. र. ६।३६, शा ५।२८.

उर्व०—(हस्तौ अपनीय उत्तिष्ठति। किञ्चिदपसृत्य)जेदु जेदु महाराश्रो।
(जयतु जयतु महाराजः।)

राजा—सुन्दरि! स्वागतम्। (इत्येकासन उपवेशयति।)

चित्र०—अवि सुहं वअस्सस्स। (अपि सुखं वयस्यस्य।)

राजा—नन्वेतदुपपन्नम्।

उर्व०—हला देवीए दिण्णो महाराओ। अदो से पणअवदी विअ सरीरसंपक्कं गदम्हि। मा क्खु मं पुरोभाइणिं समत्थेहि। (हला! देव्या दत्तो महाराजः। अतोऽस्य प्रणयवतीव शरीरसम्पर्कं गतास्मि। मा खलु मां [1]पुरोभागिनीं समर्थयस्व।)

विदू०—कहं इह ज्जेव दुम्हाणं अत्थमिदो सुज्जो।
(कथं इहैव युवयोरस्तमितः सूर्यः।[2])

राजा—(उर्वशीमवलोकयन्)
देव्या दत्त इति यदि व्यापारं व्रजसि मे शरीरेऽस्मिन्।
प्रथमं कस्यानुमते चोरितमयि मे त्वया हृदयम्॥१७॥

चित्र०—वअस्स णिरुत्तरा एसा। संपदं मह विण्णवणा सुणीअदु।
(वयस्य! निरुत्तरा एषा। साम्प्रतं मम विज्ञापना श्रूयताम्।)

राजा—अवहितोऽस्मि।

चित्र०—वसंताणंतरं उण्हसमए भअवं सुज्जो मए उवचरिदव्वो ता जहा इअं मे पिअसही सग्गस्स ण उक्कंठेदि तहा वअस्सेण कादव्वं। (वसन्तानन्तरमुष्णसमये भगवान् सूर्यो मयोपचरितव्यः। तद् यथेयं मे प्रियसखी स्वर्गाय नोत्कण्ठते तथा वयस्येन कर्तव्यम्।)

विदू०—किं वा सग्गे सुमरिदव्वं। ण वा तत्थ खादीअदि ण वा पीअदि। केवलं अणिमिसेहिं णअणेहिं मीणा विडंबीअंदि। (किं वा स्वर्गे स्मर्तव्यम्? न वा तत्र खाद्यते, न वा पीयते। केवलमनिमिषैर्नयनैर्मीना विडम्ब्यन्ते।)

---

१. स्वत एवाभिसरणशीलां कृताक्षिमीलनधाष्ट्र्यां वा। द्र. शाकुन्तले 'पुरोभागिनि' ५।२७.

२. आ सन्ध्याकालोदयादत्रैव तिष्ठतो येन देवीव्यतिकरं जानीथ इत्यर्थः।

राजा—भद्रे !

अनिर्देश्यसुखः स्वर्गः कस्तं विस्मारयिष्यति ।
अनन्यनारीसामान्यो दासस्त्वस्याः पुरूरवाः ॥१८॥

चित्र०—अणुगहीदम्हि । हला उव्वसि अकादरा भविअ विसज्जेहि मं ।
(अनुगृहीतास्मि । हला उर्वशी अकातरा भूत्वा विसर्जय माम् ।)

उर्व०—(चित्रलेखां परिष्वज्य सकरुणम्) सहि मा क्खु मं विसुमरेहि ।
(सखि ! मा खलु मां विस्मर ।)

चित्र०—(सस्मितम्) वअस्सेण संगदा तुमं एव्व एदं मए जाचिदव्वा ।
(वयस्येन सङ्गता त्वयैवैतन्मया याचितव्या ।)
(राजानं प्रणम्य निष्क्रान्ता ।)

विदू०—दिट्ठिआ मणोरहसंपदीए वड्ढदि भवं ।
(दिष्ट्या मनोरथसम्पत्त्या वर्धते भवान् ।)

राजा—इयं तावद् वृद्धिर्मम । पश्य—

सामन्त-मौलिमणिरञ्जित-पादपीठम्,
एकातपत्रमवनेर्न तथा प्रभुत्वम् ।
अस्याः सखे ! चरणयोरहमद्य कान्तम्,
आज्ञाकरत्वमधिगम्य यथा कृतार्थः ॥१९॥

उर्व०—णत्थि मे वाआविहवो अदो पिअदरं मंतिदुं ।
(नास्ति मे वाग्विभवः अतः प्रियतरं मन्त्रयितुम् ।)

राजा—(उर्वशीं हस्तेनावलम्ब्य) अहा विरुद्धसंवर्धन ईप्सितलाभो नाम ।
यतः—

पादास्त एव शशिनः सुखयन्ति गात्रं
बाणास्त एव मदनस्य मनोऽनुकूलाः ।
संरम्भरूक्षमिव सुन्दरि ! यद् यदासीत्
त्वत्सङ्गमेन मम तत् तदिवानुनीतम्[1] ॥२०॥

उर्व— अवरद्धम्हि चिरकारिया अज्जउत्तस्स ।
(अपराद्धास्मि चिरकारिका आर्यपुत्रस्य ।)

१. ०नीतम् इत्येव पं. अ. नि–४ शा. सा.; ०नुलोमम्. पा०

राजा—सुन्दरि ! मा मैवम् ।

यदेवोपनतं दुःखात् सुखं तद् रसवत्तरम् ।
निर्वाणाय तरुच्छाया तप्तस्य हि विशेषतः ।।२१।।

विदू॰—भो सेविदा पदोस-रमणीआ चंदवादा । समओ क्खु दे वासघर-पवेसस्स । (भोः सेविताः प्रदोषरमणीयाश्चन्द्रपादाः । समयः खलु ते वासगृहप्रवेशस्य ।)

राजा॰—तेन हि सख्यास्ते मार्गमादेशय ।

विदू॰—इदो इदो भवदी । (इत इतो भवती ।)

(सर्वे परिक्रामन्ति)

राजा—सुन्दरि ! इयमिदानीं मेऽभ्यर्थना ।

उर्वशी—कीरिसी सा (कीदृशी सा)

राजा—

अनुपनतमनोरथस्य पूर्वं
शतगुणितेव गता मम त्रियामा ।
यदि तु तव समागमे तथैव
प्रसरति सुभ्रु ततः कृती भवेयम् ।।२२।।

(निष्क्रान्ताः सर्वे)

।। इति तृतीयोऽङ्कः ।।

॥ [1]अथ प्रवेशकः ॥

[1]प्रक्षेपः (नेपथ्ये चित्रलेखासहजन्ययोः[2] प्रावेशिकी [3]आक्षिप्तिका)

पिअसहिविओअविमणा सहिसहिता वाउला समुल्लवइ ।
सूर-कर-फंस-विअसिअ-तामरसे [4]सरुवरुच्छंगे ॥१॥
(प्रियसखी-वियोगविमनाः सखी-सहिता व्याकुला समुल्लपति ।
सूर्यकरस्पर्शविकसित-तामरसे सरोवरोत्सङ्गे ॥)

(ततः प्रविशति विमनस्का चित्रलेखा सहजन्या च)

प्रक्षेपः—चित्र०—(प्रवेशानन्तरं द्विपदिकया[5] दिशोऽवलोक्य)

सहअरिदुक्खालिद्धअं सरवरअम्मि सिणिद्धअं ।
वाहोवग्गिअ-णअणअं तम्मइ हंसी-जुअलअं ॥२॥
(सहचरी-दुःखालीढं सरोवरे स्निग्धम् ।
बाष्पाववल्गित - नयनं ताम्यति हंसीयुगलकम् ॥)

सह०— (चित्रलेखां विलोक्य सखेदम्) सहि चित्तलेहे! मिआअमाण-सदवत्तस्स विअ दे मुहस्स छाआ हिअअस्स असुत्थदं सूएदि । ता कहेहि अणिव्विति[6]कालणं । दे समदुक्खा भविदुं इच्छामि । (सखि चित्रलेखे! म्लायमानशतपत्रस्येव ते मुखस्य छाया हृदयस्य असुस्थतां सूचयति । तत् कथय ते अनिर्वृतेः कारणम् । ते समदुःखा[7] भवितुमिच्छामि ।)

---

१. इयमस्मत्कृता योजना ।

२. अत्र षष्ठ्याः प्रावेशिकीगर्भिते प्रवेशेऽन्वयः । ३. गीतिविशेषः ।

४. अत्र कर्तृ-वाचकं किमपि नास्ति, द्वितीया च गाथा तृतीयया गतार्था ।

५. द्विपदिकया पाद-द्वय-मात्र-गत्या, न तु गीतिविशेषेण । तथा सति द्विपदिकाया दिगवलोकनानन्तरव्याहृतिकत्वं प्रसज्येत ।

६. णिव्वेदस्स सा. शा. च. पं अ. ७. द्र० रघु. ८।६५.

अत्रेदं बोध्यम्—अस्मिन् प्रवेशके इतः परतनेऽङ्के च या ३३ गाथाः, यश्च २९-३०-श्लोकमध्यश्लोकस्तेषां त्रिचतुरेष्वेव हस्तलेखेषु योगः । एतेषु बहूनामसंगतार्थत्वात्, पुनरुक्तार्थत्वात्, अस्पृष्टकालिदासकविकर्मसादृश्यभावाच्च एकमात्रपात्रोक्तिप्रायेऽस्मिन्नङ्के भावधारां किर्मीरयितुं—

चित्र०—(सकरुणम्) सहि ! अच्छरो[1]वारपज्जाएण इह भअवदो सुज्जस्स पादमूलोवट्ठाणं वट्टदि त्ति बलिअं क्खु उव्वसीए उक्कंठिदम्हि । (सखि ! अप्सरो-वारपर्यायेणेह भगवतः सूर्यस्य पादमूलोपस्थानं वर्तत इति बलवत् खलु उर्वश्या उत्कण्ठितास्मि ।)

सह०—सहि ! जाणे वो अण्णोण्णसिणेहं । तदो तदो ? (सखि ! जानामि युवयोरन्योन्यस्नेहम् । ततस्ततः ?)

चित्र०—तदो इमाइँ दिवसाइँ को णु क्खु वुत्तंतो त्ति पणिधाणट्ठिदाए मए अच्चाहिदं उवलद्धं । (ततः एतेषु दिवसेषु को नु खलु वृत्तान्तः इति प्रणिधानस्थितया मया अत्याहितमुपलब्धम् ।)

सह०—(सावेगम्) सहि कीरिसं तं ? (सखि कीदृशं तत् ?)

चित्र०—(सकरुणम्) उव्वसी किल तं रदि-सहाअं राएसिं अमच्चेसु णिवेसिद-रज्जधुरं गेण्हिअ गंधमादणवणं विहरिदुं गदा । (उर्वशी किल तं रतिसहायं राजर्षिममात्येषु निवेशितराज्यधुरं गृहीत्वा गन्धमादनवनं विहर्तुं गता ।)

सह० --(सश्लाघम्) सो णाम संभोओ जो तारिसेसु पदेसेसु । तदो तदो ? (स नाम संभोगो यस्तादृशेषु प्रदेशेषु । ततस्ततः ?)

चित्र०—तहिं क्खु मंदाइणीए पुलिणेसु गदा सिअदापव्वद-केलीहिं कीलमाणा विज्जाधरदारिआ उदयवदी णाम देण राएसिणा णिज्झाइद त्ति कुविदा उव्वसी । (तत्र खलु मन्दाकिन्याः पुलिनेषु गता सिकतापर्वतकेलीभिः क्रीडन्ती विद्याधरदारिका उदयवती नाम तेन राजर्षिणा निध्यातेति कुपिता उर्वशी ।)

सह०—होदव्वं । दूरारूढो क्खु पणओ असहणो । तदो तदो ? (भवितव्यम् । दूरारूढः खलु प्रणयोऽसहनः । ततस्ततः ?)

चित्र०—तदो सा भट्टिणो अणुणअं अप्पडिवज्जमाणा गुरुसाव-संमूढ-हिअआ विसुमरिद-देवदा-णिअमा इत्थिआ-जण-परिहरणिज्जं कुमारवणं पविट्ठा । पवेसाणंतरं अ काणणोवंत-वत्ति-लदाभावेण

—प्रयोक्तृजनैकयोजितत्वमेवोत्पश्यामः । संवादी चात्र काटयवेमः । सर्प-चुच्छुन्दरीन्यायेन निबिडं तु प्रविष्टास्ता एता न नोऽत्र संगृह्णीमहे, किन्तु प्रक्षेपधियैव विजातीयत्वेन । १. वारः पर्यायः ।

परिणदं से रूवम् । (ततः सा भर्तुः अनुनयमप्रतिपद्यमाना गुरुशाप-संमूढहृदया विस्मृतदेवतानियमा स्त्रीजनपरिहरणीयं कुमारवनं प्रविष्टा । प्रवेशानन्तरं च काननोपान्तवर्तिलताभावेन परिणतमस्या रूपम् ।)

सह०—(सशोकम्) सव्वधा णत्थि विहिणा अलंघणिज्जं णाम । जेण तारिसस्स अणुराअस्स अअं एक्कवदे अण्णारिसो एव्व पलिणामो संवुत्तो । अह किमवत्थो सो राएसी ? (सर्वथा नास्ति विधेरलङ्घनीयं नाम । येन तादृशस्यानुरागस्यायमेकपदे अन्यादृशः एव परिणामः संवृत्तः । अथ किमवस्थः स राजर्षिः ?)

चित्र०—सो वि तस्सिं एव्व काणणे पिअदमं विचिण्णतो अहो-रत्ते अदिवाहेदि । (नभोऽवलोक्य) इमिणा उण णिव्वुदाणं वि उक्कंठाकारिणा मेहोदएण [1]अणत्थाहीणो हविस्सदि । (सोऽपि तस्मिन्नेव कानने प्रियतमां विचिन्वन् अहोरात्रानतिवाहयति । (नभोऽवलोक्य) एतेन पुनर्निर्वृतानामप्युत्कण्ठाकारिणा[2] मेघोदयेनानर्थाधीनो भविष्यति ।)

प्रक्षेपः (नेपथ्ये जम्भलिका[3])

सहअरिदुक्खालिद्धअं सरबरअंमि सिणिद्धअं ।
अविरलवाहजलोल्लअं तम्मइ हंसी-जुअलअं ॥३॥
(सहचरीदुःखालीढं सरोवरे स्निग्धम् ।
अविरलबाष्पजलार्द्रं ताम्यति हंसीयुगलम् ॥)

सह०—सहि ! ण क्खु तारिसा आकिदिविसेसा चिरं दुक्खभाइणो होन्ति । तां अवस्सं किंपि अणुग्गहणिमित्तं भूवोवि समाअमकारणं हविस्सदि । (प्राचीदिशं विलोक्य) ता एहि । उदग्गंमुहस्स भअवदो सुज्जस्स उवठ्ठाणं करेम्ह । (सखि ! न खलु तादृशा आकृतिविशेषाश्चिरं दुःखभागिनो भवन्ति । तदवश्यं किमप्यनुग्रहनिमित्तं भूयोऽपि समागमकारणं भविष्यति (प्राचीदिशं विलोक्य) तदेहि । उदयोन्मुखस्य भगवतः सूर्यस्योपस्थानं कुर्वः)

(निष्क्रान्ते)

---

१. अप्पदीआरो सा. शा. रं. २. द्र. मे. १।३ ३. गीतिविशेषः ।

प्रक्षेपः (नेपथ्ये [1]खण्डधारा)

चिंतादुम्मिअमाणसिआ सहअरिदंसण-लालसिआ ।
विअसिअ-कमल-मणोहरए विहरइ हंसी सरवरए ॥४॥
(चिन्तादूनमानसिका सहचरीदर्शनलालसिका ।
विकसितकमलमनोहरे विहरति हंसी सरोवरे ॥)

॥ इति प्रवेशकः ॥

अथ[2] चतुर्थोऽङ्कः

प्रक्षेपः (नेपथ्ये पुरूरवसः प्रावेशिकी आक्षिप्तिका[3])

गहणं गइंदणाहो पिअविरहुम्माअ-पअलिअ-विआरो ।
विसइ तरुकुसुमकिसलअभूसिअणिअदेहपब्भारो ॥५॥
(गहनं गजेन्द्रनाथः प्रियाविरहोन्मादप्रकटितविकारः ।
विशति तरुकुसुमकिसलयभूषितनिजदेहप्राग्भारः ॥)

(ततः प्रविशति आकाशबद्धलक्ष्यः उन्मत्तवेषो राजा)

राजा—(सक्रोधम्) आः दुरात्मन् रक्षः ! तिष्ठ तिष्ठ । मे प्रियतमामादाय गच्छसि ?

(विलोक्य)—हन्त ! शैलशिखराद् गगनमुत्पत्य बाणैर्मामभिवर्षति ।

प्रक्षेपः (नेपथ्ये)

हिअआहिअपिअदुक्खओ सरवरए धुदपक्खओ ।
वाहोवग्गिअणअणओ तम्मइ हंसजुआणओ ॥६॥
(हृदयाहितप्रियादुःखः सरोवरे धुतपक्षः ।
बाष्पापवल्गितनयनस्ताम्यति हंसयुवा ॥)

(लोष्टं गृहीत्वा हन्तुं धावन् द्विपदिकया विभाव्य सकरुणम्)

---

१. खण्डधारा गीतिभेदः, खँडारधार इति तद्भाषा ।
२. इयमस्मद्योजना ।
३. गीतिभेदः । पुरूरवःप्रवेशं सूचयन्तीति भावः ।

कथम्—

नवजलधरः संनद्धोऽयं न दृप्तनिशाचरः
सुरधनुरिदं दूराकृष्टं न नाम शरासनम् ।
अयमपि पटुर्धारासारो न वाणपरम्परा
कनकनिकषस्निग्धा विद्युत् प्रिया न ममोर्वशी ।।१।।

प्रक्षेपः (नेपथ्ये द्विपदिकया निश्श्वस्य)

मइँ जाणिअँ मिअलोअणी, णिसअरु[1] कोइ हरेइ ।
जाव णु णवतडसामलि, धाराहरु वरिसेइ ।।७।।

(मया ज्ञातं मृगलोचनां निशाचरः कोऽपि हरति ।
यावन्नु नवतडिच्छ्यामलो धाराधरो वर्षति ।।)

(विचिन्त्य सकरुणम्) क्व नु खलु सा रम्भोरूर्गता स्यात् ?

तिष्ठेत् कोपवशात् प्रभावपिहिता, दीर्घं न सा कुप्यति,
स्वर्गायोत्पतिता भवेत्, मयि पुनर्भावार्द्रमस्या मनः ।
तां हर्तुं विबुधद्विषोऽपि न च मे शक्ताः पुरोवर्तिनीं,
सा चात्यन्तमदर्शनं नयनयोर्यातेति कोऽयं विधिः ।।२।।

(दिशोऽवलोक्य सनिःश्वासम् ।) अये ! परावृत्तभागधेयानां दुःखं दुःखानुबन्धि । कुतः—

अयमेकपदे तया वियोगः
प्रियया चोपनतः सुदुःसहो मे ।
नववारिधरोदयादहोभि-
र्भवितव्यं च निरातपत्वरम्यैः ।।३।।

प्रक्षेपः (नेपथ्ये [2]चर्चरी)

जलहर संहर एहु कोपइँ आढत्तओ
अविरलधारासारदिसामुहकंतओ
ए मइँ पुहविं भमंतो जइ पिअँ पेक्खिमि
तव्वे जं जु करीहिसि तं तुं सहीहिमि ।।८।।

---

१. उकारान्तप्रकृतिकत्वात् प्राकृतमिदमपभ्रंशतया परिणतम् । ततश्च प्रसिद्धिः 'कालिदासो ह्यभ्रंशस्याद्यः कवि'-रिति । वस्तुतस्त्वेकपात्रोक्तिप्रायेऽस्मिन्नङ्के रसधारां शवलयितुमसौ परवर्त्तिनां कुशीलवप्रायाणां प्रक्षेपयोगः ।

२. गीतविशेषः रं.

(जलधर संहरैतं कोपमाज्ञप्तः
अविरल–धारासार–दिशामुख–कान्तः ।
ए अहं पृथ्वीं भ्रमन् यदि प्रियां प्रेक्षे
तदा यद् यत् करिष्यसि तत् तत् सहिष्ये ॥)

(विहस्य) मुधैव खलु मया मनसः परितापवृद्धिरुपेक्ष्यते । यथा मुनयोऽपि व्याहरन्ति––राजा कालस्य कारणमिति । तत् किमहं जलदसमयं न प्रत्यादिशामि ?

प्रक्षेपः (नेपथ्ये [१]चर्चरी)

गंधुम्माइअ महुअरगीएहिं
वज्जंतेहिं परहुअ तूरेहिं ।
पसरिअपवणुव्वेलिअपल्लवणिअरु
सुललिअविविहपआरेहिं णच्चइ कप्पअरु ॥९॥
(गन्धोन्मादितमधुकरगीतैः,
वाद्यमानैः परभृततूर्यैः
प्रसृतपवनोद्वेल्लितपल्लवनिकरः
सुललितविविधप्रकारं नृत्यति कल्पतरुः ॥)

अथवा न प्रत्यादिशामि जलदसमयं यत् प्रावृषेण्यैरेव लिङ्गैर्मम राजोपचारः सम्प्रति ।

विद्युल्लेखा-कनकरुचिरं श्रीवितानं ममाभ्रं
व्याधूयन्ते निचुलतरुभिर्मञ्जरीचामराणि ।
घर्मच्छेदात् पटुतरगिरो वन्दिनो नीलकण्ठाः
धारासारोपनयनपरा [२]नैगमाः सानुमन्तः ॥४॥

भवतु । किमेवं परिच्छदश्लाघया ? यावदस्मिन् कानने तां प्रियामन्वेषयामि ।

प्रक्षेपः (नेपथ्ये [३]पाठस्यान्ते भिन्नकः)

दइआरहिओ अहिअं दुहियो विरहाणुगओ परिमंथरओ ।
गिरिकाणणए कुसुमुज्जलए गजजूहवई बहुझीणगई ॥१०॥

१. गीतिभेदः रं २. नैगमा वणिजः। 'नैगमाः क्षुर-वेदान्त-वणिग्वाणिज्य-नागरे' रं.
३. पाठः 'पाठो वाद्याक्षरोत्करः' इति भरतः-रं., भिन्नको गीतिभेदः रं.

(दयितारहितोऽधिकं दुखितो विरहानुगतः परिमन्थरः ।
गिरिकानने कुसुमोज्ज्वले गजयूथपतिर्बहुक्षीणगतिः ॥)

(परिक्रम्यावलोक्य च) हन्त हन्त ! व्यवसितस्य मे संदीपनमिव संवृत्तम् । कुतः—

आरक्तराजिभिरियं कुसुमैर्नवकन्दली सलिलगर्भैः ।
कोपादन्तर्बाष्पे स्मरयति मां लोचने तस्याः ॥५॥

इतो गतेति कथं नु तत्रभवती मया सूचयितव्या । यतः—

पद्भ्यां स्पृशेद् वसुमतीं यदि सा सुगात्री
मेघाभिवृष्टसिकतासु वनस्थलीषु ।
पश्चान्नता गुरुनितम्बतया[1] ततोऽस्या
दृश्येत चारुपदपङ्क्तिरलक्तकाङ्का ॥६॥

(परिक्रम्यावलोक्य च सहर्षम्) उपलब्धमुपलक्षणम् येन तस्याः कोपनाया मार्गोऽनुमीयते ।

हृतोष्ठरागैर्नयनोदबिन्दुभिः, निमग्ननाभेर्निपतद्भिरङ्कितम् ।
च्युतं रुषा भिन्नगतेरसंशयं शुकोदरश्याममिदं स्तनांशुकम् ॥७॥

भवतु । आदास्ये तावत् । (परिक्रम्य विभाव्य च सास्रम्) कथं सेन्द्रगोपं नवशाद्वलमिदम् ? कुतो नु खलु निर्जने वने प्रियाप्रवृत्तिरवगमयितव्या । शिखिनं दृष्ट्वा)
अये ! अयमासारोच्छ्वसितशैलेयस्थलीपाषाणमारूढः—

आलोकयति पयोदान् प्रबलपुरोवाततािडतशिखण्डः ।[2]
केकागर्भेण शिखी दूरोन्नमितेन कण्ठेन ॥८॥

(उपेत्य) भवतु । यावदेनं पृच्छामि ।

प्रक्षेपः (नेपथ्ये खण्डकः[3])

संपात-विसूरणओ तुरिअं परवारणओ ।
पिअअम-दंसण-लालसओ गअवरु विम्हिअ-माणसओ ॥११॥

---

१. द्र. शा. ३।६. २. ०नर्त्तित० पा० ३. गीतिविशेषः रं.

(सम्प्राप्तविसूरणः त्वरितं परवारणः ।
प्रियतमदर्शनलालसो गजवरो विस्मितमानसः ॥

तेनाखण्डकान्तरे[1] चर्चरी

बंहिण पइँ इअ अब्भत्थिअम्मि ओअक्खहि मं ता
एत्थ वणे भम्मंते जइ पइँ दिट्ठी सा मह्ह कंता ।
णिसम्महि मिअंकसरिसवअणा हंसगई
ए चिण्हे जाणीहिसि आअक्खिउ तुज्झ मइँ ॥१२॥

(बर्हिण ! त्वामित्यभ्यर्थये आचक्ष्व मे तत्
अत्र वने भ्रमता यदि त्वया दृष्टा सा मम कान्ता ।
निशामय मृगाङ्कसदृशवदना हंसगतिः
अनेन चिह्नेन ज्ञास्यस्याख्यातं तव मया ॥)

नीलकण्ठ [2]धृतोत्कण्ठा वनेऽस्मिन् वनिता त्वया ।
दीर्घापाङ्गा सितापाङ्ग ! दृष्टा दृष्टिक्षमा भवेत् ॥९॥

(विचिन्त्य) कथमदत्वैव प्रतिवचनं नर्तितुं प्रवृत्तः ? किं नु खलु हर्ष-कारणमस्य ? (विचिन्त्य) आं, ज्ञातम्—

मृदुपवनविभिन्नो मत्प्रियाया विनाशाद्
घनरुचिरकलापो निःसपत्नोऽस्य[3] जातः ।
रतिविगलितबन्धे केशपाशे सुकेश्याः
सति कुसुमसनाथे कं हरेदेष बर्ही[4] ॥१०॥

भवतु । परव्यसननिवृत्तं न खलु एनं पृच्छामि । (परिक्रम्यावलोक्य च) अये इयमातपान्त-संधुक्षितमदा जम्बूविटपमध्यास्ते परभृता । विहङ्गमेषु पण्डिता खलु जातिरेषा । यावदेनामभ्यर्थये ।

प्रक्षेपः (नेपथ्ये खुरकः[5])

विज्जज्झरकाणणलीणओ दुक्खविणिग्गअबाहुप्पीडओ ।
दूरोसारिअहिअआणंदओ अंबरमाणे भमइ गइंदओ ॥१३॥

---

१. तेना इति मङ्गलार्थमक्षरद्वयम्- रं., खण्डकश्चर्चरी च गीतिविशेषौ ।
२. ममो०-सर्वे, हरोत्कण्ठां-पा० ३. अद्य पा. ४. र. ९।६७.
५. खुरको नृत्यविशेषः रं.

(विद्याधरकाननलीनो दुःखविनिर्गतबाष्पोत्पीडः ।
दूरोत्सारितहृदयानन्दोऽम्बरमानेन भ्रमति गजेन्द्रः ॥)
(नर्तित्वा [1]वलन्तिकयोपसृत्य जानुभ्यां च स्थित्वा)
(खुरकान्ते चर्चरी) हेले हेले ।

परहुअ महुरपलाविणि कंती णंदणवणसच्छंद-भमंती ।
जइ पइँ पिअअम सा महु दिट्ठी ता आअक्खहि महु परपुट्ठी ॥१४॥

(परभृते ! मधुरप्रलापिनि कान्ते नन्दनवने स्वच्छन्दं भ्रमन्ती ।
यदि त्वया प्रियतमा सा मम दृष्टा तदाचक्ष्व मे परपुष्टे ।)

भवति ! ([1]वलन्तिकयोपसृत्य)

त्वां कामिनो मदनदूतिमुदाहरन्ति
मानावभङ्गनिपुणं त्वममोघमस्त्रम् ।
तामानय प्रियतमां मम वा समीपं
मां वा नयाशु कलभाषिणि यत्र कान्ता ॥११॥

किमाह भवती । कथं त्वाम् एवमनुरक्तं विहाय गता इति (अग्रतोऽवलोक्य) शृणोतु भवती—

कुपिता, न तु कोपकारणं, सकृदप्यात्मगतं, स्मराम्यहम् ।
प्रभुता रमणेषु योषितां नहि भावस्खलितान्यपेक्षते ॥१२॥

(ससंभ्रममुपविश्य अनन्तरं जानुभ्यां स्थित्वा 'कुपिता'इति पुनः पठित्वा उत्थाय विलोक्य च) कथं कथाविच्छेदकारिणी स्वकार्यं एव व्यासक्ता ।

अथवा—

महदपि परदुःखं शीतलं सम्यगाहुः
प्रणयमगणयित्वा यन्ममापद्गतस्य ।
अधरमिव मदान्धा पातुमेषा प्रवृत्ता
फलमभिनवपाकं राजजम्बूद्रुमस्य ॥१३॥

एवंगतेऽपि प्रियेव मे मञ्जुस्वनेति न मे कोपोऽस्याम् । सुखमास्तां भवती । इतो वयं साधयामस्तावत् ।

(परिक्रम्य कर्णं दत्वा) अये दक्षिणेन वनधारां प्रियाचरणनिक्षेपशंसी नूपुररवः श्रूयते । यावदेनमनुगच्छामि (परिक्रम्य)

---

१. वलन्तिका रागविशेषः—रं., गतिगतमञ्चितमिति वयम् ।

प्रक्षेपः (नेपथ्ये [1]ककुभेन षडुपभङ्गाः[2])

पिअअमविरहकिलामिअ-वअणो
अविरल-वाह-जलाउल - णअणो ।
दूसह-दुक्ख - विसंठुल - गमणो
पसरिअउरुतादी विअअंगो
अहिअं दुम्मि-अमाणसओ
काणणे भमइ गइंदओ ॥१५॥

(प्रियतमाविरहक्लान्तवदनः अविरलबाष्पजलाकुलनयनः ।
दुःसहदुःखविसंष्ठुलगमनः प्रसृतगुरु-ताप-दीप्ताङ्गः ।
अधिकं दूनमानसः कानने भ्रमति गजेन्द्रः ॥)

(द्विपदिका)

पिअकरिणी-विच्छोइओ गुरुसोआणल-दीविओ ।
वाइजलाउललोअणओ करिवरु भमइ समाउलओ ॥१६॥
(प्रियकरिणीवियुक्तो गुरुशोकानलदीप्तः ।
बाष्प-जलाकुल-लोचनः करिवरो भ्रमति समाकुलः ॥)

(अनन्तरं द्विपदिकया दिशोऽवलोक्य सकरुणम्) हा धिक् कष्टम् ।

मेघश्यामा दिशो दृष्ट्वा मानसोत्सुकचेतसाम्[3] ।
कूजितं राजहंसानां नेदं नूपुरशिञ्जितम् ॥१४॥

भवतु । यावदेते मानसोत्सुकाः[3] पतत्त्रिणः सरसोऽस्मान्नोत्पतन्ति तावदेतेभ्यः प्रियाप्रवृत्तिरवगमयितव्या । (उपसृत्य) भो ! भो ! जलविहङ्गमराज !

पश्चात् सरः प्रतिगमिष्यसि मानसं तत्
पाथेयमुत्सृज बिसं[3] ग्रहणाय भूयः ।
मां तावदुद्धर शुचो दयिताप्रवृत्त्या
स्वार्थात् सतां गुरुतरा प्रणयिक्रियैव[4] ॥१५॥

अये ! यथोन्मुखो विलोकयति तथा मया न लक्षितेत्येवं वचनमाह ।

(उपविश्य)

---

१. ककुभो नाम रागः र. २. उपभङ्गा अवच्छेदाः र. ३. मे. १।११
४. द्र. मे. १।५, स्पष्टमेतेन मेघेऽत्र प्रणयशब्दपाठस्यौचित्यम्, वि. ४।१३,३८, र. २।३६, १६।२३, १९।२१.

प्रक्षेपः (चर्चरी)

रे रे हंसा किं गोइज्जइ
(नर्त्तित्वा उत्थाय च)
गइअणुसारें मइँ लक्खिज्जइ।
कइँ पइँ सिक्खिउ ए गइ लालस
सा पइँ दिट्ठी जहणभरालस ॥१७॥

(रे! रे! हंस किं गोपाय्यते गत्यनुसारेण मया लक्ष्यते।
केन तव शिक्षिता एषा गतिः लालसा सा त्वया दृष्टा जघनभरालसा ॥)

यदि हंस गता न ते नतभ्रूः
सरसो रोधसि दर्शनं प्रिया मे।
मदखेलपदं कथं नु तस्याः
सकलं चौर! गतं त्वया गृहीतम् ॥१६॥

अतश्च—

(अञ्जलिं बद्ध्वा)

हंस प्रयच्छ मे कान्तां गतिस्त्वस्यास्त्वया हृता।
विभावितैकदेशेन देयं यदभियुज्यते ॥१७॥

(विहस्य) एष चौरानुशासी राजेति भयादुत्पतितः। यावदन्यमवकाशमवगाहिष्ये। (परिक्रम्यावलोक्य च)

अयमिदानीं प्रियासहायश्चक्रवाकः। तावदेनं पृच्छामि

प्रक्षेपः (नेपथ्ये अतोऽन्तरे)

(कुटिलिका[1]) (मल्लघटी[2])
मंमररणिअमणोहरए कुसुमिअतरुवरपल्लवए।
(चर्चरी)
दइआविरहुम्माइअओ काणणे भमइ गइंदओ ॥१८॥
(मर्मररणितमनोहरे कुसुमिततरुवरपल्लवे।
दयिताविरहोन्मादितः कानने भ्रमति गजेन्द्रः ॥)

प्रक्षेपः (द्विलयान्ते[3] चर्चरी)

गोरोअणा-कुंकुमवण्णा चक्का भणइ मइँ।
महुवासर-कीलंती घणिआ ण दिठ्ठी पइँ ॥१९॥

१-२. नाट्यभेदौ—रं. ३. लयः नृत्तगीतवाद्यानां साम्यम्-रं.

(गोरोचनाकुङ्कुमवर्ण ! चक्र ! भण माम् ।
मधुवासरे क्रीडन्ती धन्या न दृष्टा त्वया ।।)

(चर्चरिकयोपसृत्य जानुभ्यां स्थित्वा)

रथाङ्गनामन् वियुतो रथाङ्गश्रोणिबिम्बया ।
अयं त्वां पृच्छति रथी मनोरथशतैर्वृतः ।।१८।।

कथं कः क[1] इत्याह माम् । मा तावत् । न खलु विदितोऽहमस्य ।

सूर्याचन्द्रमसौ यस्य मातामहपितामहौ ।
स्वयं वृतः पतिर्द्वाभ्यामुर्वश्या च भुवा च यः ।।१९।।

कथं तूष्णीं स्थितः । भवतु । उपालभे तावदेनम् ।

सरसि नलिनीपत्रेणापि त्वमावृतविग्रहां
ननु सहचरीं दूरे मत्वा विरौषि समुत्सुकः ।
इति च भवतो जायास्नेहात् पृथक्स्थितिभीरुता
मयि च विधुरे भावः [2]कान्ताप्रवृत्तिपराङ्मुखः ।।२०।।

सर्वथा मदीयानां भागधेय-विपर्ययाणामयं प्रभावप्रकाशः । यावद् अन्यमवकाशम् अवगाहिष्ये । (पदान्तरे स्थित्वा) भवतु न तावद् गच्छामि । (परिक्रम्यावलोक्य च)

इदं रुणद्धि मां पद्ममन्तःकूजितषट्पदम् ।
मया दष्टाधरं तस्याः ससीत्कारमिवाननम् ।।२१।।

भवतु । इतो गतस्य मेऽनुशयो मा भूदित्यस्मिन्नपि कमलसेविनि मधुकरे प्रणयं करिष्ये ।

प्रक्षेपः (नेपथ्ये अर्धद्विचतुरस्रः[3])
एक्कक्कमवड्ढिअगुरुअरपेम्मरसें ।
सरे हंसजुआणओकीलइ कामरसें ।।२०।।
(एकक्रमवर्धितगुरुतरप्रेमरसेन ।
सरसि हंसयुवा क्रीडति कामरसेन ।।)

---

१. अनुरणनमिदं चक्रवाकरुतीनाम् २. कोऽयं, कीदृक् पा०

३-४. नन्द्यावर्तापरनामकः संस्थानविशेषोऽर्धचतुरस्रः । स एव द्विवारं कृतत्वादर्धद्विचतुरस्रः—रं.

([1]चतुरस्रकेणोपसृत्य)

मधुकर ! मदिराक्ष्याः शंस तस्याः प्रवृत्तिं
(विभाव्य) वरतनुरथवासौ नैव दृष्टा त्वया मे ।
यदि सुरभिमवाप्स्यस्तन्मुखोच्छ्वासगन्धं
तव रतिरभविष्यत् पुण्डरीके किमस्मिन् ।।२२।।

साधयामस्तावत् । (द्विपदिकया परिक्रम्यावलोक्य च)

अये! एष नीपस्कन्धनिषण्णहस्तः करिणीसहायो नागराजस्तिष्ठति । अस्मात् प्रियोदन्तमुपलप्स्ये । यावदेनमुपसर्पामि ।

प्रक्षेपः (नेपथ्ये [2]कुटिलिका) करिणी-विरह-संताविअओ ।
(मल्लघंटी[3]) काणणे गंधुद्धुअ महुअरु ।।२१।।

(करिणीविरहसंतापितः । कानने गन्धोद्धतमधुकरः ।।)

(विलोक्य) अथवा न त्वरा कार्या । न तावदयमुपसर्पणकालः ।

अयमचिरोद्‌गतपल्लवमुपनीतं प्रियकरेणुहस्तेन ।
अभिलषतु तावदासवसुरभिरसं सल्लकीभङ्गम् ।।२३।।

(क्षणमात्रं स्थित्वा । अवलोक्य) हन्त कृताह्निकः संवृत्तः । भवतु । समीपमस्य गत्वा पृच्छामि ।

प्रक्षेपः (चर्चरी)

हउँ पइँ पुच्छिमि आअक्खहि
गअवरु ललिअपहारें णासिअतरुवरु ।
दूरविणिज्जिअ ससहरुकंती
दिट्ठि पिआ पइँ सम्मुह जंती ।।२२।।

---

१. चतुरस्रो नन्द्यावर्त्तार्धसंस्थानविशेषः—रं.

२. कुलिका रं शा., कुलिका गीतिभेदः शा०, कुटिलिका नाट्यभेदः इति ४।१८ गाथायां रं.

३. मन्दघटी-रं शा., सा च गीतिः शा. । मल्लघटी पुनर्नाट्यभेद इति ४।१८ गाथायां रं.

(अहं त्वां पृच्छामि आचक्ष्व गजवर !
ललितप्रहारेण नाशिततरुवर ! ।
दूर-विनिर्जित-शशधर-कान्तिः
दृष्टा प्रिया त्वया सम्मुखं यान्ती ॥)

(पदद्वयं[1] पुरतः उपसृत्य)

मदकल ! युवतिशशिकला गजयूथप ! यूथिकाशबलकेशी ।
स्थिरयौवना स्थिता ते दूरालोके सुखालोका ? ॥२४॥

(आकर्ण्य सहर्षम्) अहह अनेन भवतः स्निग्धमन्द्रेण गर्जितेन प्रियोपलम्भशंसिना समाश्वासितोऽस्मि । साधर्म्याच्च त्वयि मे भूयसी प्रीतिः ।

मामाहुः पृथिवीभृतामधिपतिं, नागाधिराजो भवान्,
अव्युच्छिन्न-पृथुप्रवृत्ति भवतो दानं, ममाप्यर्थिषु ।
स्त्रीरत्नेषु ममोर्वशी प्रियतमा, यूथे तवेयं वशा
सर्वं मामनु ते, प्रियाविरहजां त्वं तु व्यथां माऽनुभूः ॥२५॥

सुखमास्तां भवान् । साधयामस्तावत् । (द्विपदिकया परिक्रम्य पार्श्वतो दृष्टिं दत्वा)

अये ! अयमसौ सुरभिकन्दरो नाम विशेषरमणीयः सानुमानालोक्यते । प्रियश्चायमप्सरसाम् । अपि नाम सा सुतनुरस्योपत्यकायामुपलभ्येत (परिक्रम्यावलोक्य च) कथमन्धकारः ? भवतु विद्युत्प्रकाशेनावलोकयामि । हन्त ! मदीयैर्दुरितपरिणामैर्मेघोऽपि शतह्रदाशून्यः संवृत्तः, तथापि शिलोच्चयमेनमपृष्ट्वा न निवर्तिष्ये ।

प्रक्षेपः (खण्डिकः[2])

पसरिअखरखुरदारिअमेइणि वणगहणे अविचल्लु ।
परिसप्पइ पेच्छह लीणो णिअकज्जुज्जुअ कोलु ॥२३॥

(प्रसृतखरदारितमेदिनिर्वनगहनेऽविचलः ।
परिसर्पति पश्यत लीनो निजकार्योद्युक्तः कोलः ॥)

अपि वनान्तरमल्पकुचान्तरा श्रयति पर्वत-पर्वसु संनता ।
इदमनङ्गपरिग्रहमङ्गना पृथुनितम्ब ! नितम्बवती तव ॥२६॥

---

१. पदद्वयमेवेदं वस्तुतो रङ्गनिर्देशे द्विपदिका । २. गीतभेदः रं.

कथं तूष्णीमेवास्ते। शङ्के विप्रकर्षान्न श्रृणोतीति। भवतु। समीपेऽस्य गत्वा पुनरेनं पृच्छामि।

प्रक्षेपः (चर्चरी)

फलिह-सिलाअल-णिम्मलणिज्झरु बहुविहकुसुमें विरइअसेहरु।
किंणरमहुरुग्गीअमणोहरु देक्खावहि महु पिअअम महिहरु ॥२४॥

(स्फटिकशिलातलनिर्मलनिर्झर! बहुविधकुसुमैर्विरचितशेखर।
किंनरमधुरोद्गीतमनोहर! दर्शय मम प्रियतमां महीधर ॥)

(परिक्रम्य अञ्जलिं बद्ध्वा।)

सर्वक्षितिभृतां नाथ! दृष्टा सर्वाङ्गसुन्दरी।
रामा रम्ये वनान्तेऽस्मिन् मया विरहिता त्वया ॥२७॥

(नेपथ्ये तदेवाकर्ण्य सहर्षम्) कथं यथाक्रमं दृष्टा इत्याह। भवानपि अतः प्रियतरं श्रृणोतु। क्व तर्हि मे प्रियतमा? (पुनरेव सर्वक्षितिभृतामित्यादि पठति, नेपथ्ये तदेवाकर्ण्य। विभाव्य च) हा धिक्। ममैवायं कन्दरमुखविसर्पी प्रतिशब्दः। (मूर्च्छति उत्थाय सविषादम्।) अहह श्रान्तोऽस्मि। अस्यास्तावद् गिरिनद्यास्तीरे स्थितस्तरङ्ग-वातमासेविष्ये। (परिक्रम्यावलोक्य च) इमां नवाम्बुकलुषामपि स्रोतोवहां पश्यतो मे रमते मनः। कुतः—

तरङ्गभ्रूभङ्गा क्षुभितविहगश्रेणिरसना
विकर्षन्ती फेनं वसनमिव संरम्भशिथिलम्।
यथाविद्धं याति स्खलितमभिसन्धाय बहुशो
नदीभावेनेयं ध्रुवमसहना सा परिणता ॥२८॥

भवतु। प्रसादयामि तावदेनाम्। (अञ्जलिं बद्ध्वा।)

प्रक्षेपः (कुटिलिका-नाटयेन)

पसीअ पिअअम सुंदरि ए णए खुहिआकरुण विहंगम ए णए।
सुरसरितीरसमूसूअ ए णए अलिउलझंकारिअ ए णए ॥२५॥
(प्रसीद प्रियतमे! सुन्दरि! नदि! क्षुभिताकरुणविहङ्गमे! नदि!।
सुरसरित्तीरसमुत्सुके! नदि! अलिकुलझङ्कारिते! नदि! ॥)

(नेपथ्ये चर्चरी)

पुव्वदिसापवणाहअकल्लोलुग्गअबाहओ
मेहअंगे णच्चइ स ललिअँ जलणिहिणाहओ ।
हंसविहंगमकुंकुम संखकआभरणु
करिमअराउलकसणकमलकआवरणु ।
वेलासलिलुव्वेल्लिअहत्थदिण्णतालु ।
ओत्थरइ दसदिस रुधेविणु णवमेहआलु ॥२६॥

(पूर्वदिक्पवनाहतकल्लोलोद्गतबाहुः
मेघाङ्गैर्नृत्यति सललितं जलनिधिनाथः ।
हंसविहङ्गमकुङ्कुमशङ्खकृताभरणः
करिमकराकुलकृष्णकमलकृतावरणः ।
वेला सलिलोद्वेल्लितदत्तहस्ततालोऽ-
वस्तृणाति दशदिशो रुद्ध्वा नवमेघकालः ॥)

त्वयि निबद्धरतौ प्रियवादिनि प्रणयभङ्गपराङ्मुखचेतसि[1] ।
कमपराधलवं मयि पश्यसि त्यजसि मानिनि दासजनं यतः ॥२९॥

(विचिन्त्य)

कथं तूष्णीमेवास्ते अथवा परमार्थसरिदेवैषा । न खलूर्वशीपुरूरवसमपहाय समुद्राभिसारिणी भविष्यति । भवतु । अनिर्वेदप्राप्याणि श्रेयांसि । यावत् तमेव प्रदेशं गच्छामि यत्र मे नयनयोः सा सुनयना तिरोहिता । (परिक्रम्य विलोक्य च)

इमं तावत्प्रियाप्रवृत्तये सारङ्गमासोनमभ्यर्थये[2] । (जानुभ्यां स्थित्वा)

१. ०रतेः, ०दिनः, ०तसः, ०लवं मम. शा. सा.

२. इतः परं पद्यम्—

(गलितकः[3])

अभिनवकुसुमस्तबकिततरुवरस्य परिसरे
मदकलकोकिलकूजितरवझङ्कारमनोहरे ।
नन्दनविपिने निजकरिणीविरहानलेन संतप्तो
विचरति गजाजिपतिरैरावतनामा ॥

३. गलितको नाट्यविशेषः रं.

२६

कृष्णशारच्छविर्योऽसौ दृश्यते, काननश्रिया ।
नवसष्पावलोकाय कटाक्ष इव पातितः ॥३०॥

(विलोक्य) किं नु खलु मामवधीरयन्निवा अन्यतोमुखः संवृत्तः । (दृष्ट्वा)

अस्यान्तिकमायान्ती शिशुना स्तनपायिना मृगी रुद्धा ।
तामयमनन्यदृष्टिर्भग्नग्रीवो विलोकयति[1] ॥३१॥

प्रक्षेपः (चर्चरी)
सुरसुन्दरि जहणभरालस पीणुत्तुंग घणत्थणि
थिरजोव्वण तणुसरीरि हंसगई
गअणुज्जलकाणणे मिअलोअणि भमंती
दिठ्ठी पइँ तह विरहसमुद्दन्तरे उत्तारहि मइँ ॥२७॥
(सुरसुन्दरी जघनभरालसा पीनोत्तुङ्गघनस्तनी ।
स्थिरयौवना तनुशरीरा हंसगतिः
गगनोज्ज्वलकानने मृगलोचना भ्रमन्ती
दृष्टा त्वया तर्हि विरहसमुद्रान्तरादुत्तारय माम् ॥)

(उपसृत्य अञ्जलिं वद्ध्वा) हंहो हरिणीपते !
अपि दृष्टवानसि मम प्रियां वने ?
कथयामि ते तदुपलक्षणं शृणु ।
पृथुलोचना सहचरी यथैव ते
सुभगं तथैव खलु सापि वीक्षते[2] ॥३२॥

कथमनादृत्य मद्वचनं कलत्राभिमुखं स्थितः । उपपद्यते 'परिभवास्पदं दशाविपर्ययः' । यावदितोऽहमन्यमवकाशमवगाहिष्ये । (परिक्रम्यावलोक्य च) हन्त ! दृष्टमुपलक्षणं तस्या मार्गस्य ।

'रक्तकदम्बः सोऽयं प्रियया घर्मान्तिशंसि यस्यैकम् ।
कुसुममसमग्रकेसरविषममपि कृतं शिखाभरणम् ॥३३॥

(परिक्रम्य अवलोक्य च)[3]

---

१. द्र. रघु. ९।५५ । २. 'सुभगा०० वीक्ष्यते' नि-४-रं. शा. सा.
३. '०वलोक्य च—'किं नु खलु०'-नि-४-रं. पं. अ. शा. सा.

अये प्रियावामपादप्रियः अशोकः । भवतु अत्र प्रणयी भवामि--[1]

रक्ताशोक ! कृशोदरी क्व नु गता त्यक्त्वानुरक्तं जनं
(पवनधूयमानमूर्धानमवलोक्य सक्रोधम्)
नो दृष्टेति मुधैव चालयसि किं वातावधूतं शिरः ।
उत्कण्ठाघटमानषट्पदघटासङ्घट्टदष्टच्छदस्
तत्पादाहतिमन्तरेण भवतः पुष्पोद्गमोऽयं कुतः ॥३४॥

भवतु । सुखमास्तां भवान् । (परिक्रम्यावलोक्य च)

किं नु खलु एतच्छिलाभेदगतं नितान्तरक्तमवलोक्यते ।
प्रभालेपी नायं हरिहतगजस्यामिषलवः
स्फुलिङ्गो वा नाग्नेर्गहनमभिवृष्टं यत इदम् ।
(विभाव्य) अये रक्ताशोकप्रसवसमरागो मणिरयं
यमुद्धर्तुं पूषा व्यवसित इवालम्बितकरः ॥३५॥

अहो अयं हरति मे मनः । भवतु । आदास्ये तावदेनम् ।

प्रक्षेपः (नेपथ्ये)

पणइणि-बद्धासाइअओ वाहाउल-णिअ-णअणओ ।
गअवइ गहणे दुहिअओ भमइ क्खामिअवअणओ ॥२८॥

(प्रणयिनीबद्धाशः बाष्पाकुलनिजनयनः ।
गजपतिर्गहने दुःखितः भ्रमति क्षामितवदनः ॥)

(ग्रहणं नाटयति । द्विपदिकयोपसृत्य गृहीत्वाऽऽत्मगतम्) अथवा

मन्दारपुष्पैरधिवासितायां यस्याः शिखायामयमर्पणीयः ।
सैव प्रिया सम्प्रति दुर्लभा मे किमेनमस्रोपहतं करोमि ॥३६॥

(उत्सृजति) (नेपथ्ये)

वत्स ! गृह्यतां गृह्यताम् ।
सङ्गमनीयो मणिरिह शैलसुता-चरणरागयोनिरयम् ।
आवहति धार्यमाणः सङ्गममचिरात् प्रियजनेन ॥३७॥

---

१. 'अये०० भवामि' अस्मद्योजना.

राजा—(कर्णं दत्वा) को नु खलु मामेवमनुशास्ति । (अवलोक्य) अये ! अनुकम्पते मां कश्चिन्मृगचारी मुनिर्भगवान् । भगवन् अनुगृहीतोऽस्मि अहमुपदेशाद् भवतः । (मणिमादाय) हंहो सङ्गमनीय !

तया वियुक्तस्य [1]निमग्नमध्यया
भविष्यसि त्वं यदि सङ्गमाय मे ।
ततः करिष्यामि भवन्तमात्मनः
शिखामणिं बालमिवेन्दुमीश्वरः ॥३८॥

(परिक्रम्यावलोक्य च) अये ! किं नु खलु कुसुमरहितामपि लतामिमां पश्यतो मे मनो रमते । अथवा स्थाने मनोरमा ममेयम् । इयं हि—

तन्वी मेघजलार्द्रपल्लवतया धौताधरेवाश्रुभिः
शून्येवाभरणैः स्वकालविरहाद् विश्रान्तपुष्पोद्गमा ।
चिन्तामौनमिवास्थिता मधुलिहां शब्दैर्विना लक्ष्यते
चण्डी मामवधूय पादपतितं जातानुतापेव सा ॥३९॥

यावदस्यां प्रियानुकारिण्यां परिष्वङ्गप्रणयी भवामि ।

प्रक्षेपः (चर्चरी)

लए पेक्ख विणु हिअएँ भमामि । जइ विहिजोएँ पुणि तहिं पाविमि ।
ता रण्णें विणु करमि णिभंती । पुणु णइ मेल्लुइँ ताह कअन्ती ॥२९॥
(लते प्रेक्षस्व विना हृदयेन भ्रमामि । यदि विधियोगेन पुनस्तां प्राप्नोमि ।
तदारण्येन विना करोमि निर्भ्रान्ति । पुनर्न प्रवेशयामि तां कृतान्ताम् ॥

(उपसृत्य लतामालिङ्गति । ततः प्रविशति तत्स्थान एव उर्वशी ।)

राजा—(निमीलिताक्ष एव स्पर्शं रूपयित्वा ।) अये ! उर्वशीगात्रसंस्पर्शादिव निर्वृतं मे शरीरम् । तथापि नास्ति विश्वासः । कुतः—

समर्थये यत् प्रथमं प्रियां प्रति
क्षणेन तन्मे परिवर्ततेऽन्यथा ।
अतो विनिद्रे सहसा विलोचने
करोमि न स्पर्शविभावितप्रियः ॥४०॥

(शनैश्चक्षुष्युन्मील्य) कथं सत्यमेव प्रियतमा । (मूर्च्छितः पतति)

---

१. विलग्न० पं. अ. च.

उर्व०—(वाष्पं विसृज्य) समस्ससदु समस्ससदु महाराओ ।
(समाश्वसितु समाश्वसितु महाराजः ।)

राजा—(संज्ञां लब्ध्वा) प्रिये अद्य जीवितम् ।

तद् वियोगोद्भवे तन्वि मया तमसि मज्जता ।
दिष्ट्या प्रत्युपलब्धासि चेतनेव गतासुना ॥४१॥

उर्व०—अब्भंतरकरणाए मए पच्चक्खीकिदवुत्तन्तो क्खु महाराओ ।
(अभ्यन्तरकरणया मया प्रत्यक्षीकृतवृत्तान्तः खलु महाराजः ।)

राजा—अभ्यन्तरकरणयेति न खलु ते वचनार्थमवैमि ।

उर्व०—कहइस्सं । इदं दाव पसीददु महाराओ जं मए कोववसं गदाए एदं अवत्थंतरं पाविदो महाराओ । (कथयिष्यामि । एतत् तावत्-प्रसीदतु महाराजो यन्मया कोपवशं गतया एतदवस्थान्तरं प्रापितो महाराजः ।)

राजा—कल्याणि ! न तावदहं प्रसादयितव्यः । त्वद्दर्शनादेव प्रसन्न-बाह्यान्तःकरणोऽन्तरात्मा । तत् कथय कथमियन्तं कालम-वस्थिता मया विना भवती ।

प्रक्षेपः (चर्चरी)

मोरां परहुउ हंसु रहंगउ अलि गउ पव्वउ सरिउ कुरंगउ ।
तुज्झह करणे रण्णभमंते को ण हु पुच्छिउ मइँ रोअंते ॥३०॥
(मयूरः परभृता हंसो रथाङ्गः अलिर्गजः पर्वतः सरित्कुरङ्गमः ।
तव कारणेनारण्ये भ्रमता को न खलु पृष्टो मया रुदता ॥)

उर्व०—एव्वं अंतक्करणपच्चक्खीकिदुवुत्तंतो महाराओ ।
(एवमन्तःकरणप्रत्यक्षीकृतवृत्तान्तो महाराजः ।)

राजा—प्रिये ! अन्तःकरणमिति न खल्ववगच्छामि ।

उर्व०—सुणादु महाराओ । पुरा भअवदा कुमारेण सासदं कुमारवदं गेण्हिअ अकलुसो णाम गंधमादणकच्छो अज्झासिदो । किदो अ एस विही । (शृणोतु महाराजः । पुरा भगवता कुमारेण शाश्वतं कुमारव्रतं गृहीत्वा अकलुषो नाम गन्धमादनकच्छोऽध्यासितः । कृतश्चैष विधिः—)

राजा—क इव ?

उर्वशी—जा किल इत्थिआ इमं पदेसं पविसदि सा लदाभावेण परिणमिस्सदि त्ति । किदो अ अअं सावांतो 'गोरीचरणराअसंभवं मणिं विणा तदो ण मुच्चिस्सदि'त्ति । तदो अहं गुरुसावसंमूढहिअआ देवदा-समग्रं विसुमरिअ अगहिदाणुणआ इत्थिआजणपरिहरणिज्जं कुमारवणं पविट्ठा । पवेसाणन्दरं एव्व अ काणणोवंतवत्तिवासंतीलदाभाएण परिणदं रूवं । (या किल स्त्री इमं प्रदेशं प्रविशति सा लताभावेन परिणंस्यतीति । कृतश्चायं शापान्तः गौरीचरणरागसंभवं मणिं विना ततो न मोक्ष्यत इति । ततोऽहं गुरुशापसंमूढहृदया देवतासमयं विस्मृत्य अगृहीतानुनया स्त्रीजनपरिहरणीयं कुमारवनं प्रविष्टा। प्रवेशानन्तरमेव च काननोपान्तवर्तिवासन्तीलताभावेन परिणतं मे रूपम् ।)

राजा—प्रिये सर्वमुपपन्नम् ।

श्रमखेदसुप्तमपि मां शयने या मन्यसे प्रवासगतम् ।
सा त्वं प्रिये सहेथाः कथं मदीयं चिरवियोगम् ॥४२॥

इदं तद् यथाकथितं त्वत्सङ्गमनिमित्तं पुनरुपलभ्य मणिप्रभावादासादिता त्वमस्माभिः । (मणिं दर्शयति)

उर्वशी—अम्मो संगमणीओ अअं मणो । अदो क्खु महाराएण आलिंगिदमेत्त ज्जेव्व पकिदित्थ म्हि संवुत्ता । (अहो ! सङ्गमनीयोऽयं मणिः । अतः खलु महाराजेनालिङ्गितमात्रैव प्रकृतिस्थास्मि संवृत्ता ।)

(मणिमादाय मूर्धनि वहति ।)

राजा—एवमेव सुन्दरि क्षणमात्रं स्थीयताम् ।

स्फुरता विच्छुरितमिदं रागेण मणेर्ललाटनिहितस्य ।
श्रियमुद्वहति मुखं ते बालातपरक्तकमलस्य ॥४३॥

उर्व०—पिअंवद ! महंतो क्खु कालो तुए पइट्ठाणदो णिग्गदस्स । कदाइ असूइस्संति मं पकिदीओ । ता एहि णिवुत्तम्ह । (प्रियम्वद ! महान् खलु कालस्तव प्रतिष्ठानान्निर्गतस्य । कदाचिदसूयिष्यन्ति मह्यं प्रकृतयः । तदेहि निवर्तावहे ।)

राजा—यदाह भवती । (उत्तिष्ठतः ।)

उर्व०—अध कथं महाराओ गंतुं इच्छदि ।
(अथ कथं महाराजो गन्तुमिच्छति ।)

राजा—

अचिरप्रभा-विलसितैः पताकिना
सुरकार्मुकाभिनवचित्रशोभिना ।
गमितेन खेलगमने विमानतां
नय मां नवेन वसतिं पयोमुचा ।।४४।।

(निष्क्रान्तौ)

प्रक्षेपः (नेपथ्ये चर्चरी)

पाविअसहअरिसंगमओ पुलअपसाहिअअंगअओ ।
सेच्छापत्तविमाणओ विहरइ हंसजुआणओ ।।३१।।
(प्राप्तसहचरीसङ्गमः पुलकप्रसाधिताङ्गः ।
स्वेच्छाप्राप्तविमानो विहरति हंसयुवा ।।)

।। इति चतुर्थोऽङ्कः ।।



॥ [1]अथ प्रवेशकः ॥

(ततः प्रविशति हृष्टो विदूषकः)

विदू०—ही ही भो दिट्ठिआ चिरस्स कालस्स उव्वसीसहाओ णंदणवणप्पमुहेसु देवदारण्णेसु विहरिअ पडिणिवुत्तो पिअवअस्सो। पविसिअ णअरं दाणिं ससक्कारोवआरेहिं पकिदीहिं अणुरज्जंतो रज्जं करेदि। असंताणत्तणं वज्जिअ ण किंवि से सोअणीअं। अज्ज तिहि विसेसो त्ति भअवदीणं गंगाजउणाणं संगमे देवीहिं सह किदाहिसेओ संपदं उवआरिअं पविट्ठो। ता जाव तत्तभवदो अलंअरीअमाणस्स अणुलेवणमल्ले अग्गभागी होमि[2]। (ही ही भोः दिष्ट्या चिरस्य कालस्योर्वशीसहायो नन्दनवनप्रमुखेषु देवतारण्येषु विहृत्य प्रतिनिवृत्तः प्रियवयस्यः। प्रविश्य नगरमिदानीं ससत्कारोपचारैः प्रकृतिभिरनुरज्यमानो राज्यं करोति। असन्तानत्वं वर्जयित्वा न किमप्यस्य शोचनीयम्। अद्य तिथिविशेष इति भगवत्योर्गङ्गायमुनयोः गङ्गमे देवीभिः सह कृताभिषेकः साम्प्रतमुपकार्यां प्रविष्टः। तद् यावत् तत्रभवतोऽलंक्रियमाणस्यानुलेपमाल्येऽग्रभागी भवामि।[3]) (परिक्रामति)

(नेपथ्ये)

हद्धी हद्धी। दुऊलुत्तरच्छदे तालवेण्टाधारे णिक्खिविअ णीअमाणो मए भट्टिणो अब्भंतर-विलासिणी-मोलि-रअण-जोग्गो मणी आमिससंकिणा गिद्धेण अक्खित्तो। (हा धिक् हा धिक्!! दूकूलोत्तरच्छदे तालवृन्ताधारे निक्षिप्य नीयमानो मया, भर्तुरभ्यन्तरविलासिनीमौलिरत्नयोग्यो [3]मणिरामिषशङ्किना गृध्रेणाक्षिप्तः।)

विदू०—(कण्णं दत्त्वा) अच्चाहिदं अच्चाहिदं। परं बहुमदो क्खु सो वअस्सस्स संगमणीओ णाम चूणामणी। अदो क्खु असमत्तणेवच्छो एव्व तत्तभवं आसणादो उट्ठिअ इदो आअच्छदि।

---

१. इयस्माकं योजना। अत्र पञ्चमोऽङ्क इति सा. शा. च. नि-४.

२. ०मल्लभाई भादुओ विअ = ०माल्यभागी भ्रातेव. नि. ४, सा.

३. णीअमाणो अच्छराविलासवदीए मोलिरअणो मणी. सा.

जाव णं उवसप्पामि । (अत्याहितमत्याहितम् । परमबहुमतः खलु स वयस्यस्य सङ्गमनीयो नाम चूडामणिः । अतः खल्वसमाप्त-नेपथ्य एव तत्रभवानासनादुत्थाय इत आगच्छति । यावदेनमुपसर्पामि[१] ।)

॥ इति प्रवेशकः ॥

[a]अथ पञ्चमोऽङ्कः

(ततः प्रविशति सावेगपरिजनो राजा[२] ।)

राजा—[३]

आत्मनो वधमाहर्ता क्वासौ विहग-तस्करः ।
येन [४]तत्प्रथमं स्तेयं गोप्तुरेव गृहे कृतम् ॥१॥

किरा०—[५]एसो एसो क्खु मुह कोडि-लग्गहेमसुत्तेण मणिणा आलिहंतो विअ आआसं पडिब्भमदि । (एष एष खलु मुखकोटिलग्नहेमसूत्रेण मणिना आलिखन्निव आकाशं परिभ्रमति ।)

राजा—पश्याम्येनम्—

असौ मुखालम्बितहेमसूत्रं बिभ्रन्मणिं मण्डलचारशीघ्रः[६] ।
अलातचक्रप्रतिमं विहङ्गस्तद्रागलेखावलयं तनोति ॥२॥

किं नु खल्वत्र कर्तव्यम् ।

विदू०—(उपेत्य) भो अलं एत्थ घिणाए । अवराही सासणीओ । (भोः ! अलमत्र घृणया[७] । अपराधी शासनीयः ।)

---

१. 'आसणादो उट्ठिदो । ता पासवत्ती होमि' सा. शा. रं. a. इयमस्मद्योजना.

२. प्रविशति राजा सूतश्च कञ्चुकिरेचकौ कञ्चुकिवेधकौ परिजनश्च सा. शा. रं.

३. राजा—वेधक वेधक शा. च. रं , रेचक रेचक शा.

४. तच्च तत् प्रथममतीव गुरु द्र. कु ७।४३, मे १।२, शा ५।२१ग, ७।१, ९-१०ग, र १०।६७, मा. १।१२ ग. । 'तत् प्रथमं'—सा.

५. किराती सा. च. पं० अ.

६. मण्डलशीघ्रचारः सा. शा. रं.

७. घृणा दया । द्र. शा. ३।१४ णिग्घिण.

राजा—सम्यगाह भवान्। धनुर्धनुस्तावत्।

यवनी—एसा आणइस्सं[1] (एषा आनेष्यामि।) (निष्क्रान्ता[2])

राजा—वयस्य ! न दृश्यते स विहगाधमः। क्व नु खलु गतः।

विदू०—भो ! इदो दक्खिणंतेण स सउणिहदासो।[3]
(भोः ! इतो दक्षिणान्तेन स शकुनिहताशः।)

राजा—(परिवृत्यावलोक्य च।) दृष्ट इदानीम्—

प्रभापल्लवितेनासौ करोति मणिना खगः।
अशोकस्तवकेनेव दिङ्मुखस्यावतंसकम् ॥३॥

यव०—(चापहस्ता प्रविश्य।) भट्टा एदं हत्थावाव-सहिदं सरासणं[4]।
(भर्तः ! एतद् हस्तावापसहितं शरासनम्।)

राजा—किमिदानीं शरासनेन। बाणपथमतीतः स क्रव्यभोजनः। तथा हि—

आभाति मणिविशेषो दूरमिदानीं पतत्रिणा नीतः।
नक्तमिव लोहिताङ्गः[5] परुषघनच्छेदसंयुक्तः ॥४॥

(कञ्चुकिनं विलोक्य) आर्य लातव्य !

कञ्चु०—आज्ञापयतु देवः।

राजा—मद्वचनादुच्यन्तां नागरकाः। सायं निवासवृक्षाश्रयी विचीयतां स विहगदस्युरिति।

कञ्चु०—यदाज्ञापयति देव। (निष्क्रान्तः)

---

१. परिजनः—जं भट्टा आणवेदि सा. शा. रं.।
२. राजा सम्यगाह भवान्। धनुर्धनुस्तावत् (निष्क्रान्ता धनुर्ग्राहिणी यवनी) पं अ.
३. दक्खिणंतेण अवगतो सो सासणीओ कुणवभोअणो—च. पं. अ.
४. ससरं चावं-रं. शा.। शाकु. ६।२६-२७. हस्तावापो ज्याघातवारणम्-रा.
५. मङ्गलग्रहः ६. उच्यतां नागरिकः—च. पं. अ.

विदू०—भो । उवविसदु भवं संपदं । कहिं गदो सो रअणकुंभीलओ भवदो सासणादो मुच्चिस्सदि । (भोः ! उपविशतु भवान् साम्प्रतम् । क्व गतः स रत्नकुम्भीलको भवतः शासनान्मोक्ष्यते ।)

राजा—(विदूषकेण सहोपविश्य) वयस्य—

रत्नमिति न मे तस्मिन् मणौ प्रियत्वं विहङ्गमाऽऽक्षिप्ते ।
प्रियया तेनास्मि सखे सङ्गमनीयेन सङ्गमितः[१] ॥५॥

विदू०—णं परिगदत्थो म्हि किदो भवदा ।
(ननु परिगतार्थोऽस्मि कृतो भवता ।)

(ततः प्रविशति सशरं मणिमादाय कञ्चुकी)

कञ्चु०—जयतु जयतु देवः ।

अनेन निर्भिन्नतनुः स वध्यो रोषेण ते मार्गणतां गतेन ।
प्राप्तापराधोचितमन्तरिक्षात् समौलिरत्नः पतितः पतत्री ॥६॥

(सर्वे विस्मयं रूपयन्ति)

कञ्चु०—[२]अद्भिः प्रक्षालितोऽयं मणिः कस्मै प्रदीयताम् ।

राजा—वेधक ! गच्छ । अग्निशुद्धमेनं कृत्वा पेटकं प्रवेशय[३] ।

किरा०–जं भट्टा आणवेदि । (यद् भर्ताज्ञापयति ।)

(मणिं गृहीत्वा निष्क्रान्तः)

राजा—आर्य लातव्य ! [४]जानीते भवान् कस्यायं बाण इति ?

कञ्चु०—नामाङ्कितोऽयं दृश्यते । न तु मे वर्णविभावसहा[५] दृष्टिः ।

राजा—तेन हि उपनय[६] शरं यावदहं निरूपयामि ।

(कञ्चुकी तथा करोति । राजा नामाक्षराण्यनुवाच्य विचारयति[७] ।)

---

१. द्र. र १६।७४, शा. ६ प्रवेशकान्त्यभागे ।
२. अभिप्रक्षालितः शा. रं.
३. गच्छ कोपपेट्टके स्थापयैनम्-रं. शा.
४. जानाति-रं. शा. 'जानीते हि भवानि'-ति २।१९ पद्येऽत्रैव प्रयोगात् तु वाक्यार्थस्य कर्मत्वेऽप्यात्मनेपदं कालिदासोचितम् ।
५. वर्णविचारक्षमा च. पं. अ., वर्णविभावनसहा सा.
६. उपश्लेषय शा. रं.
७. सापत्यतां रूपयति सा. पं. अ.

कञ्चुकी—यावदहं नियोगमशून्यं करोमि। (निष्क्रान्तः)

विदू०—किं भवं विआरेदि। (किं भवान् विचारयति।)

राजा—शृणु तावत् प्रहर्तुर्नामाक्षराणि।

विदू०—अवहिदो म्हि। (अवहितोऽस्मि।)

राजा—श्रूयताम्। (वाचयति)—

उर्वशीसंभवस्यायमैलसूनोर्धनुष्मतः।
कुमारस्यायुषो बाणः [1]संहर्ता द्विषदायुषाम् ॥७॥

विदू०—(सपरितोषम्।) दिट्ठिआ संताणेण वड्ढदि भवं।
(दिष्ट्या सन्तानेन वर्धते भवान्।)

राजा—सखे! कथमेतत्? अन्यत्र नैमिषीयसत्रात् अवियुक्तोऽहमुर्वश्या। न च मया कदाचिदपि गर्भव्यक्तिरालक्षिता[2] कुत एव प्रसूतिः? किंतु—(स्मृतिं रूपयित्वा[3])

आविलपयोधराग्रं लवलीदलपाण्डुराननच्छायम्।
तानि दिनानि वपुरभूत् केवलमलसेक्षणं तस्याः[4] ॥८॥

---

१. प्रहर्तुः सा. पं. अ. च.

२. कथमेतत्? सखे! अनिमिष्या वियुक्तोऽहमुर्वश्या। न कदाचिदपि तत्रभवती गर्भाविर्भूतदोहदाऽप्युपलक्षिता शा. रं., अनिमिषीयक्रतुदर्शनादित्यपरे, अनिमिषीयरजोदर्शनादित्येके। अत्र हि गर्भ-पालन-प्रसव-संगोपनेभ्योऽभ्यर्हितस्य वियोगस्यान्यथाऽसिद्धेर्भवितव्यमेव केनचित् कारणेन। तच्चात्र नैमिषीयं सत्रम्। अवश्यं चैतेन षाण्मासिकेन दाशमासिकेन वा भवितव्यम्। कामादिविकारासंस्पर्शाय गर्भस्य तापसाश्रमेष्वेव भर्मकर्म, जन्म चाभिमतमेव शाकुन्तलादिषु कालिदासस्य।

३. इदमस्माभिर्योज्यते।

४. अत्र पाठाः आवि-ग्रम् = आनीलचूचुकाग्रम्। उत्तरार्धे च 'कानिचिदहानि वपुरभूत्—का., कतिचिदहनि शरीरं श्लथवलयमिवाभवत् तस्याः—रं. शा. कतिचिदहानि शरीरं केवलमलसेक्षणं तस्याः' क्वचित्, कानिचिदहानि जातं शरीरमलसेक्षणं तस्याः क्वचित्, कानि दिनानि वपुरभूत् केवलमलसेक्षणं तस्याः—च'। एषु 'तानी'-ति स्मृतिपरक-सर्वनाम-घटितत्वमेवोचितम्।

विदू०—मा भवं सव्वं माणुसीधम्मं दिव्वासु संभावेदु। पहावणिगूढाइँ ताणं चारिदाइँ। (मा भवान् सर्वं मानुषीधर्मं दिव्यासु संभावयतु। प्रभावनिगूढानि तासां चरितानि।)

राजा—अस्तु तावदेवं यथा भवानाह। पुत्रसंवरणे तु किमिव कारणं तत्रभवत्याः ?

विदू०—मा वुड्ढि मं राआ परिहरिस्सदित्ति।
(मा वृद्धां मां राजा परिहरिष्यतीति।)

राजा—कृतं परिहासेन। चिन्त्यताम्।

विदू०—को देवदा-रहस्साइँ तक्कइस्सदि।
(को देवतारहस्यानि तर्कयिष्यति।)

(प्रविश्य कञ्चुकी)

काञ्चु०—जयतु जयतु देवः। देव च्यवनाश्रमात् कुमारं गृहीत्वा सम्प्राप्ता तापसी देवं द्रष्टुमिच्छति।

राजा—उभयमप्यविलम्वितं प्रवेशय।

काञ्चु०—यदाज्ञापयति देवः।

(निर्गम्य चापहस्तेन कुमारेण तपस्या च सह प्रविष्टः)

काञ्चु०—इत इतो भगवती। (सर्वे परिक्रामन्ति)

विदू०—(विलोक्य) किं णु क्खु सो एसो तत्तभवं खत्तिअकुमारओ जस्स णामंकिदो गिद्धलक्खबेधी अद्धणाराओ। तह हि वहुअरं भवदो अणुकरेदि। (किं नु खलु स एष तत्रभवान् क्षत्रियकुमारकः, यस्य नामाङ्कितो गृध्रलक्ष्यवेधी अर्धनाराचः। तथा हि बहुतरं भवतोऽनुकरोति।)

राजा—स्यादेवम्। अतः खलु—

बाष्पायते निपतिता मम दृष्टिरस्मिन्
वात्सल्यवन्धि हृदयं मनसः प्रसादः।
संजात-वेपथुभिरुज्झित-धैर्यवृत्ति—
रिच्छामि चैनमदयं परिरब्धुमङ्गैः ॥९॥

कञ्चु०—भगवति ! एवं स्थीयताम्।

(तापसीकुमारौ स्थितौ।)

राजा—अम्ब ! अभिवादये ।

ताप०—महाभाग । सोमवंसवित्थारइत्तओ होहि । (आत्मगतम्) अम्हो अणाचक्खिदोवि विण्णादो एव्व इमस्स राएसिणा आउसो अ ओरसो संबंधो (प्रकाशम्) जाद पणम दे गुरुं । (महाभाग ! सोमवंशविस्तारयिता भव । (आत्मगतम्) अहो अनाख्यातोऽपि विज्ञात एवास्य राजर्षेरायुषश्च औरसः सम्बन्धः । (प्रकाशम्) जात ! प्रणम ते गुरुम् ।)

(कुमारश्चापगर्भमञ्जलिं बद्ध्वा प्रणमति ।)

राज—वत्स ! आयुष्मान् भव ।

कुमारः—(स्वगतम्)

यदि हार्दमिदं श्रुत्वा पिता ममायं सुतोऽहमस्येति ।
उत्सङ्गवर्धितानां गुरुषु भवेत् कीदृशः स्नेहः ॥१०॥

राजा—भगवति ! किमागमनप्रयोजनम् ?

ताप०—सुणादु महाराओ । एसो दीहाऊ आऊ जादमेत्तो एव्व उव्वसोए किंवि णिमित्तं अवेक्खिअ मम हत्ते णासीकिदो । जं खत्तिअ-कुमारअस्स जादकम्मादिविहाणं तं से भअवदा चवणेण असेसं अणुचिट्ठिदं गहीदविज्जो धणुव्वेदे अहिविणीदो । (शृणोतु महाराजः । एष दीर्घायुः आयुः जातमात्र एव उर्वश्या किमपि निमित्तमवेक्ष्य मम हस्ते न्यासीकृतः । यत् क्षत्रियकुमारस्य जातकर्मादिविधानं तदस्य भगवता च्यवनेनाशेषमनुष्ठितम् । गृहीतविद्यः धनुर्वेदे अभिविनीतः ।)

राजा—सनाथः खलु संवृत्तः ।

ताप०—अज्ज । पुप्फसमिधकुसणिमित्तं इसिकुमारएहिं सह गदेण इमिणा अस्समविरुद्धं आअरिदं । (अद्य पुष्पसमित्कुशनिमित्तं ऋषिकुमारकैः सह गतेनाश्रमविरुद्धमाचरितम् ।)

विदू०—(सावेगम्) किं विअ ? (किमिव ?)

ताप०—गहीदामिसो किल गिद्धो पादवसिहरे णिलीअमाणो अणेण लक्खीकिदो बाणस्स । (गृहीतामिषः किल गृध्रः पादपशिखरे निलीयमानः अनेन लक्ष्यीकृतो बाणस्य ।)

(विदूषको राजानमवलोकयति)

राजा—ततस्ततः ।

ताप०—तदो उवलद्धवुत्तंतेण भअवदा चवणेण अहं समादिट्ठा—णिज्जादेहि एदं उव्वसीहत्थे णासं त्ति । ता इच्छामि देविं उव्वसिं पेक्खिदुं । (तत उपलब्धवृत्तान्तेन भगवता च्यवनेनाहं समादिष्टा—निर्यातय एनमुर्वशीहस्ते न्यासमिति । तदिच्छामि देवीमुर्वशीं प्रेक्षितुम् ।)

राजा—तेन ह्यासनमनुगृह्णातु भगवती ।

(तापसो उपनीत आसन उपविशति ।)

राजा—आर्य लातव्य । आहूयतामुर्वशी ।

कञ्चु०—यदाज्ञापयति देवः । (निष्क्रान्तः ।)

राजा—(कुमारमवलोक्य) एहि एहि वत्स !

सर्वाङ्गीणः स्पर्शः सुतस्य किल तेन मामुपगतेन ।
आह्लादयस्व तावच्चन्द्रकरश्चन्द्रकान्तमिव ।।११।।

ताप०—जाद ! णंदेहि पिदरम् । (जात ! नन्दय पितरम्)

(कुमारो राजानमुपगम्य पादग्रहणं करोति ।)

राजा—(कुमारमालिङ्ग्य पादपीठे चोपवेश्य) वत्स ! इतस्तव पितुः प्रियसखं ब्राह्मणमशङ्कितो वन्दस्व ।

विदू०—किंति संकिस्सदि । णं अस्समवासपरिचिदो एव्व सहामिओ । (किमिति शङ्किष्यते । नन्वाश्रमवासपरिचित एव शाखामृगः ।)

कुमार—(सस्मितम्) तात वंदे ।

विदू०—सोत्थि भवदो । वड्ढदु भवं । (स्वस्ति भवतो । वर्धतां भवान् ।)

(ततः प्रविशत्युर्वशी कञ्चुकी च)

कञ्चु०—इत इतो देवी ।

उर्व०—(कुमारमवलोक्य) को णु क्खु एसो सवाणासणो पादपीठे अअं महाराएण संजमीअमाणसिहण्डओ चिट्ठदि । (तापसीं दृष्ट्वा) अम्मो सच्चवदी-सूइदो अअं मे पुत्तओ आऊ । महंतो क्खु

संवत्तो। (को नु खल्वेष सबाणासनः पाठपीठे स्वयं महाराजेन संयम्यमानशिखण्डकस्तिष्ठति। अहो सत्यवतीसूचितः अयं मे पुत्रक आयुः। महान् खलु संवृत्तः।)

(सहर्षं परिक्रामति)

राजा—(उर्वशीं दृष्ट्वा।) वत्स—

इयं ते जननी प्राप्ता त्वदालोकनतत्परा।
स्नेहप्रस्नवनिर्भिन्नमुद्वहन्ती स्तनांशुकम् ॥१२॥

ताप०—जाद एहि। पच्चुग्गच्छ मादरं। (जात एहि। प्रत्युद्गच्छ मातरम्।)

(कुमारेण सह उर्वशीमुपसर्पति)

उर्व०—अंब पादवंदणं करेमि। (अम्ब! पादवन्दनं करोमि।)

ताप०—वच्छे भत्तुणो वहुमदा होहि। (वत्से भर्तुर्बहुमता भव।)

कुमार—अम्ब! अभिवादये।

उर्व०—(कुमारमुन्नमितमुखं परिष्वज्य) वच्छ पिदरं आराधइत्तओ होहि। (राजानमुपेत्य।) जेदु जेदु महाराओ। (वत्स पितरमाराधयिता भव। (राजानमुपेत्य) जयतु जयतु महाराजः।)

राजा—स्वागतं पुत्रवत्यै। इत आस्यताम् (अर्धासनं ददाति)

(उर्वशी उपविशति। सर्वे यथोचितमुपविशन्ति)

ताप०—वच्छे। एसो गहीदविज्जो आऊ संपदं कवअहरो[1] संवुत्तो। ता एदस्स दे भत्तुणो समक्खं णिज्जादिदो हत्थणिक्खेवो। ता विसज्जेदुं इच्छामि। उवरुज्झइ मह अस्समधम्मो। (वत्से! एष गृहीतविद्य आयुः साम्प्रतं कवचहरः संवृत्तः। तत् एतस्य ते भर्तुः समक्षं निर्यातितो हस्त-निक्षेपः। तद् विसर्जयितुमिच्छामि। उपरुध्यते ममाश्रमधर्मः।)

उर्व०—चिरस्स अज्जं देक्खिअ अहिअदरं अवितिण्हम्हि। ण सक्कणोमि विसज्जिदुं। अण्णय्यं उण उवरोहिदुं। ता गच्छदु अज्जा पुणो दंसणाअ। (चिरस्यार्यां दृष्ट्वा अधिकतरमवितृष्णास्मि। न शक्नोमि विस्रष्टुम्। अन्याय्यं पुनरुपरोद्धुम्। तद् गच्छत्वार्या पुनर्दर्शनाय।)

---

१. र. ८/९४

राजा०—अम्ब ! भगवते च्यवनाय मां प्रणिपातय ।

ताप०—एव्वं भोदु । (एवं भवतु)

कुमा०—आर्ये ! सत्यं यदि निवर्तसे मामप्याश्रमं नेतुमर्हसि ।

राजा—अयि वत्स ! उषितं त्वया पूर्वस्मिन्नाश्रमे । द्वितीयमध्यासितुं तव समयः ।

ताप०—जाद । गुरुओ वअणं अणुचिट्ठ । (जात ! गुरोर्वचनमनुतिष्ठ)

कुमा०—तेन हि—

यः सुप्तवान् मदङ्के शिखण्डकण्डूयनोपलब्धसुखः ।
तं मे जातकलापं प्रेषय मणिकण्ठकं शिखिनम्[1] ॥१३॥

ताप०—विहस्य) एव्वं करेमि । (एवं करोमि)

उर्व०—भअवदि ! पादवंदणं करेमि । (भगवति ! पादवन्दनं करोमि)

राजा—भगवति ! प्रणमामि ।

ताप०—सोत्थि भोदु तुम्हाणं । (स्वस्ति भवतु युष्मभ्यम्)

(निष्क्रान्ता)

राजा—(उर्वशीं प्रति) कल्याणि !

अद्याहं पुत्रिणामग्र्यः सत्पुत्रेणामुना तव ।
पौलोमीसंभवेनेव जयन्तेन पुरन्दरः[2] ॥१४॥

(उर्वशी स्मृत्वा रोदिति ।)

विदू०—(विलोक्य सावेगम्) भो, किं णु क्खु संपदं अत्तहोदी एक्कवदे अस्सुमुही संवुत्ता । (भोः ! किं नु खलु साम्प्रतमत्रभवती एकपदे अश्रुमुखी संवृत्ता ।)

---

१. द्र. शाकु.—सप्तमेऽङ्के शकुन्त—लावण्य—प्रसङ्गः, चतुर्थेऽङ्के च मृग्या अनघप्रसवत्वसूचनाप्रसङ्गः ।

२. र. ३।२३, ७८, शा. ७।२८

राजा—(सावेगम्)

किं सुन्दरि! प्ररुदितासि ममोपनीते
वंशस्थितेरधिगमान्महति प्रमोदे।
पीनस्तनोपरि निपातिभिरानयन्ती
मुक्तावलीविरचनां पुनरुक्तिमस्त्रैः[1] ॥१५॥

(अस्या बाष्पं प्रमार्ष्टि)

उर्व०—सुणादु महाराओ। पढमं उण पुत्तदंसणसमुत्थेण आणंदेण विसुमरिद म्हि। दाणिं महिंदसंकित्तणेण सुमरिओ समओ मह हिअअं आआसेसि। (श्रृणोतु महाराजः। प्रथमं पुनः पुत्रदर्शन-समुत्थेनानन्देन विस्मृतास्मि। इदानीं महेन्द्रसंकीर्तनेन स्मृतः समयो मम हृदयमायासयति।)

राजा—कथ्यतां समयः।

उर्व०—अहं पुरा महाराअगहीदहिअआ गुरुसावसंमूढा महिंदेण आणत्ता। (अहं पुरा महाराजगृहीतहृदया गुरुशापसंमूढा महेन्द्रेण आज्ञप्ता।)

राजा—किमिति?

उर्व०—जदा सो मे पिअसहो राएसी तुइ समुप्पण्णस्स वंसकरस्स मुहं पेक्खिस्सदि तदा तुए भूओ वि मं समीवं आअंतव्वं त्ति। तदो मए महाराअविओअभीरुदाए जादमेत्तो एव्व विज्जागमणिमित्तं भअवदो चवणस्स अस्समे एसो पुत्तओ अज्जाए सच्चवदीए हत्थे अप्पआसं णिक्खित्तो। अज्ज पिदुणो आराहणसमत्थो संवुत्तो त्ति कलअंतीए ताए णिज्जादिदो एसो मे दीहाऊ आऊ। ता एत्तिओ मे महाराएण सह संवासो। (यदा स मे प्रियसखो राजर्षिस्त्वयि समुत्पन्नस्य वंशकरस्य मुखं प्रेक्षिष्यते तदा त्वया भूयोऽपि मम समीपमागन्तव्यमिति। ततो मया महाराजवियोगभीरुतया जातमात्र एव विद्यागमनिमित्तं भगवतश्च्यवनस्याश्रमे एष पुत्रक आर्यायाः सत्यवत्या हस्ते अप्रकाशं निक्षिप्तः। अद्य पितुराराधनसमर्थः संवृत्त इति कलयन्त्या तया निर्यातित एष मे दीर्घायुरायुः। तत् एतावान् मे महाराजेन सह संवासः।)

(सर्वे विषादं नाटयन्ति। राजा मोहमुपगच्छति।)

१. र. ६।२८, मे. २।४३.

विदू०—अब्बम्हण्णं अब्बम्हण्णं। (अब्रह्मण्यमब्रह्मण्यम्)

कञ्चु०—समाश्वसितु समाश्वसितु महाराजः।

राजा—(समाश्वस्य सनिःश्वासम्) अहो ! सुखप्रत्यर्थिता दैवस्य—

आश्वासितस्य मम नाम सुतोपलब्ध्या
सद्यस्त्वया सह कृशोदरि ! विप्रयोगः।
व्यावर्तितातपरुजः प्रथमाभ्रवृष्ट्या
वृक्षस्य वैद्युत इवाग्निरुपस्थितोऽयम् ॥१६॥

विदू०—अअं सो अत्थो अणत्थाणुबंधी संवुत्तो। संपदं तक्केमि अत्तभवदा वक्कलं गेण्हिअ तवोवणं गंदव्वं त्ति। (अयं सोऽर्थः अनर्थानुबन्धी संवृत्तः। साम्प्रतं तर्कयामि अत्रभवता वल्कलं गृहीत्वा तपोवनं गन्तव्यमिति।)

उर्व०—मं वि मंदभाइणिं किदविणअस्स पुत्तस्स लाभाणंतरं सग्गारोहणेण अवसिदकज्जं विप्पओअमुहिं महाराओ समत्थइस्सदि ? (मामपि मन्दभागिनीं कृतविनयस्य पुत्रस्य लाभानन्तरं स्वर्गारोहणेनावसितकार्यां विप्रयोगमुखीं महाराजः समर्थयिष्यति ?)

राजा—सुन्दरी मा मैवम्।

न हि सुलभवियोगा कर्तुमात्मप्रियाणि
प्रभवति परवत्ता शासने तिष्ठ भर्तुः।
अहमपि तव सूनावद्य विन्यस्य राज्यं
विचरितमृगयूथान्याश्रयिष्ये वनानि[1] ॥१७॥

कुमा०—नार्हति तातः पुङ्गवधारितायां धुरि दम्यं नियोजयितुम्[2]।

राजा—अयि वत्स ! मा मैवम्।

शमयति गजानन्यान् गन्धद्विपः कलभोऽपि सन्
भवति सुतरां वेगोदग्रं भुजङ्गशिशोर्विषम्।
भुवमधिपतिर्बालावस्थोऽप्यलं परिरक्षितुं
न खलु वयसा जात्यैवायं स्वकार्यसहो भरः[3] ॥१८॥

आर्य लातव्य ?

१. र. ७।७१, शाकु. १।२५. २. र ६।७८, ३।३२.
३. र. ११।१, १८।३-५१.

कञ्चु०—आज्ञापयतु देवः ।

राजा—मद्वचनादमात्यपरिषदं ब्रूहि संभ्रियतामायुषो राज्याभिषेक इति ।

कञ्चु०—यदाज्ञापयति देवः । (दुःखितो निष्क्रान्तः)

(सर्वे दृष्टिविघातं रूपयन्ति)

राजा—(आकाशमवलोक्य) किं नु खलु निरभ्रे विद्युत्संपातः[1] ।

उर्व०—(विलोक्य) अम्मो भअवं णारदो । (अहो भगवान् नारदः)

राजा—(निपुणमवलोक्य) अये भगवान् नारदः । य एषः—

गोरोचनानिकषपिङ्गजटाकलापः
संलक्ष्यते शशिकलामलवीतसूत्रः ।
मुक्तागुणातिशयसंभृतमण्डनश्रीर्
हेमप्ररोह इव जङ्गमकल्पवृक्षः[2] ॥१९॥

अर्घं तावदस्मै ।

उर्व०—(यथोक्तमादाय) इअं भअवदे अरिहणा । (इयं भगवतेऽर्हणा ।)

(ततः प्रविशति नारदः । सर्वे उत्तिष्ठन्ति)

नार०—विजयतां विजयतां मध्यमलोकपालः ।

राजा—(उर्वशीहस्तादर्घमादायावर्ज्य च) भगवन्नभिवादये ।

उर्व०—भअवं पणमामि । (भगवान् प्रणमामि)

नर०—अविरहितौ दम्पती भूयास्ताम् ।

राजा—(आत्मगतम्) अपि नामैवं स्यात् । (कुमारमाश्लिष्य प्रकाशम्) वत्स भगवन्तमभिवादयस्व ।

कुमा०—भगवन् ! और्वशेय आयुः प्रणमति ।

नारद—आयुष्मानेधि ।

---

१. नारदावतरणवर्णने माघो वराकीमिमां विद्युतमेव विस्मरति ।

२. कु. ६।६, ८।६८.

राजा—अयं विष्टरोऽनुगृह्यताम् ।

नारद—तथा । (उपविष्टः)

(सर्वे नारदमनूपविशन्ति ।)

राजा—(सविनयम्) भगवन् किमागमनप्रयोजनम् ?

नारद—राजन् ! श्रूयतां महेन्द्रसन्देशः ।

राजा—अवहितोऽस्मि ।

नारद—प्रभावदर्शी मघवा वनगमनाय कृतबुद्धि भवन्तमनुशास्ति ।

राजा—किमाज्ञापयति ?

नार०—त्रिकालदर्शिभिर्मुनिभिरादिष्टो महान् सुरासुरसङ्गरो भावी । भवाँश्च[1] सांयुगीनः सहायो नः । तेन न त्वया शस्त्रं संन्यस्तव्यम् । इयं चोर्वशी यावदायुः, तव सहधर्मचारिणी भवत्विति ।

उर्व०—(अपवार्य) अम्महे सल्लं विअ मे हिअआदो अवणीदं । (अहो शल्यमिव मे हृदयादपनीतम् ।)

राजा—परवानस्मि देवेश्वरेण ।

नार०—युक्तम् ।

त्वत्कार्यं वासवः कुर्यात् त्वं च तस्येष्टमाचरेः ।
सूर्यः समेधयत्यग्निमग्निः सूर्यं स्वतेजसा ॥२०॥

(आकाशमवलोक्य ।) रम्भे ! उपनीयतां स्वयं महेन्द्रेण संभृतः कुमारस्यायुषो यौवराज्याभिषेकः ।

(प्रविष्टा यथोक्तहस्ता अप्सरसः)

अप्स०—भअवं इमे अहिसेअसंभारा । (भगवन्नेतेऽभिषेकसंभाराः ।)

नार०—उपवेश्यतामयमायुष्मान् भद्रपीठे ।

रम्भा—इदो वच्छ । (इतो वत्स) (कुमारं भद्रपीठ उपवेशयति)

नार०—(कुमारस्य शिरसि कलशमावर्ज्य) रम्भे ! निर्वर्त्यतां शेषो विधिः ।

रम्भा—(यथोक्तं निर्वर्त्य) वच्छ ! पणम भअवंतं पिदरो अ । (वत्स ! प्रणम भगवन्तं पितरौ च ।) (कुमारो यथाक्रमं प्रणमति)

---

१. कु २।५७

नार०—स्वस्ति भवते ।

राजा—कुलधुरन्धरो भव ।

उर्व०—पिदुणो आराहओ होहि । (पितुराराधको भव ।)

(नेपथ्ये वैतालिकद्वयम् ।)

वैता०—विजयतां युवराजः ।

प्रथमः—

अमरमुनिरिवात्रिर्ब्रह्मणोऽत्रेरिवेन्दुर्,[1]
बुध इव शिशिरांशोर्बोधनस्येव देवः ।
भव पितुरनुरूपस्त्वं गुणैर्लोककान्तै—
रतिशयिनि समस्ता वंश एवाशिषस्ते ॥२१॥

द्वितीयः—

तव पितरि पुरस्तादुन्नतानां स्थितेऽस्मिन्
स्थितिमति च विभक्ता त्वय्यनाकम्पधैर्ये ।
अधिकतरमिदानीं राजते राजलक्ष्मीर्
हिमवति जलधौ च व्यस्ततोयेव गङ्गा ॥२२॥

अप्स०—(उर्वशीमुपेत्य ।) दिट्ठिआ पिअसही पुत्तस्स जुवराअसिरीए भत्तुणो अविरहेण अ वड्ढदि । (दिष्ट्या प्रियसखी पुत्रस्य युवराजश्रिया भर्तुरविरहेण च वर्धते।) ।

उर्व० —णं साहारणो एसो अब्भुदयो । (कुमारं हस्ते गृहीत्वा) एहि वच्छ । जेट्ठमादरं अभिवंदेहि । (ननु साधारण एषोऽभ्युदयः (कुमारं हस्ते गृहीत्वा) एहि वत्स । ज्येष्ठमातरमभिवन्दस्व ।)

(कुमारः प्रतिष्ठते)

राजा— तिष्ठ । सममेव तत्रभवत्याः समीपं यास्यामस्तावत् ।

नारदः—

आयुषो यौवराज्यश्रीः स्मारयत्यात्मजस्य ते ।
अभिषिक्तं महासेनं सैनापत्ये मरुत्वता[2] ॥२३॥

---

१. र. २।७२. २. कुमारसंभवं स्मरणीयमत्र । र. ७।१

राजा—अनुगृहीतोऽस्मि मघवता ।

नार०—भो राजन् ! किं ते भूयः प्रियमुपकरोतु पाकशासनः ?

राजा—यदि मे मघवा प्रसन्नः किमतः परमिच्छामि । तथापि इदमस्तु—

(भरतवाक्यम्)

परस्पर-विरोधिन्योरेकसंश्रय-दुर्लभम् ।
सङ्गतं श्रीसरस्वत्योर्भूतयेऽस्तु सदा सताम्[1] ॥२४॥

अपि च—

सर्वस्तरतु दुर्गाणि सर्वो भद्राणि पश्यतु ।
सर्वः कामानवाप्नोतु सर्वः सर्वत्र नन्दतु ॥२५॥

(निष्क्रान्ताः सर्वे ।)

॥ इति पञ्चमोऽङ्कः ॥

[समाप्तमिदं श्रीकालिदासकृतं विक्रमोर्वशीयं नाम त्रोटकम्]

१. र. ६।२९.

अभिज्ञानशाकुन्तलम्

पात्राणि

[पुरुषाः]

सूत्रधारः	नाटकप्रबन्धकः
दुष्यन्तः	नायकः
माधव्यः	विदूषकः
सर्वदमनः	शकुन्तलासूनुः
सोमरातः	पुरोहितः
श्यालः	प्रधानपुरुषः (Police officer)
सूचकः, जानुकः	पुरुषौ (Police men)
रैवतकः, करभकः, कञ्चुकी	दौवारिकाः दासाः
वैतालिकौ	वन्दिनौ
कण्वः	काश्यपः शकुन्तलायाः पालयिता पिता
वैखानसः, शार्ङ्गरवः, शारद्वतः, हारीतः, गौतमः	कण्वाश्रमिणः

[पुरुषाः]

मातलिः	इन्द्रसारथिः
मारीचः	कण्वसगोत्रः इन्द्रस्य पिता कश्यपः

[स्त्रियः]

नटी	
शकुन्तला	नायिका
अनसूया, प्रियम्वदा	नायिकासख्यौ
गौतमी	कण्वाश्रमस्य वृद्धा तपस्विनी
चतुरिका, परभृतिका, मधुकरिका, प्रतीहारी, यवन्यः	राजसेविकाः
सानुमती	मेनकासखः अप्सरोविशेषः
अदितिः	मरीचस्य दाराः, इन्द्रस्य प्रसूः

अभिज्ञानशाकुन्तलम्

[[1]पूर्वरङ्गः : नान्दी]

या सृष्टिः स्रष्टुराद्या, वहति विधिहुतं या हविर्, या च होत्री,
ये द्वे कालं विधत्तः, श्रुतिविषयगुणा या स्थिता व्याप्य विश्वम् ।
यामाहुः सर्वबीजप्रकृतिरिति, यया प्राणिनः प्राणवन्तः,
प्रत्यक्षाभिः [2]प्रपन्नस्तनुभिरवतु वस्ताभिरष्टाभिरीशः[3] ॥१॥

(नान्द्यन्ते)

॥ [4]अथ प्रस्तावना ॥

([5]प्रविशति सूत्रधारः)

सूत्र०—(नेपथ्याभिमुखमवलोक्य) आर्ये ! यदि[6] नेपथ्यविधानमवसितम्, इत आगम्यताम् ।

नटी—(प्रविश्य) अज्ज ! इयं म्हि । (आर्य ! इयमस्मि ।)

सूत्र०—आर्ये ! [7] अभिरूपभूयिष्ठा परिषदियम् । अत्र खलु कालिदासग्रथितवस्तुना अभिज्ञानशाकुन्तल[8]-नामधेयेन नवेन नाटकेनोपस्थातव्यमस्माभिः । तत् प्रतिपात्रम् आधीयतां यत्नः ।

---

१. इयमस्मद्योजना । अत्र नान्दीपदार्थाय द्र० अत्रैव २५७-८ पृ० टि० अद्यापि नाड़ीति पाञ्चापो मृदङ्गपर्यायः । सुकरोऽत्र चित्रनान्दीप्रयोगः ।

२. प्रसन्न० पा०

३. पञ्च महाभूतानि, सूर्याचन्द्रमसौ यजमानश्चेत्यष्टौ प्रत्यक्षाः ईश्वरमूर्त्तयः । द्र० र. ३।६६, ५।४, ९।२१, मा. १।१, कु. ६।७६. अस्माकं सीताचरिते ६।२०. ४-५. इमे अस्मद्योजने ।

६. अत्रेदं बोध्यम्—'यान्यत्र पादटिप्पणीषु पाठान्तराणि तानि मा. पि. सा. च. संस्करणेषु सुलभानीति न तेषामैकान्तिकोऽत्र निर्देशः ।

७. आर्ये इयं हि रसभावविशेषदीक्षागुरोर् विक्रमादित्यस्य अभिरूपभूयिष्ठा परिषत् । अस्यां च कालि०० यत्नः—च. । तत्र '०अभिरूपो बुधे रम्ये' रा. ।

८. ०शकुन्तल० मा. पि. । अत्राधिकरणल्युटाऽभिज्ञानशब्दम्, 'अधिकृत्य कृतं नाटकमि'ति शाकुन्तलशब्दं च व्युत्पाद्योभयोः कर्मधारयेण शक्यव्युत्पत्तिकः 'अभिज्ञानशाकुन्तल'-शब्दः इत्येके । शाकुन्तलः शाकुन्तलेयोऽपि, शकुन्तलायां-

नटी—सुविहिदप्पओअदाए अज्जस्स ण किं वि परिहाइस्सदि ।
(सुविहितप्रयोगतयार्यस्य न किमपि परिहास्यते ।)

सूत्र०—आर्ये कथयामि ते भूतार्थम्,—
आ परितोषाद् विदुषां न साधु मन्ये प्रयोगविज्ञानम् ।
बलवदपि शिक्षितानामात्मन्यप्रत्ययं चेतः ॥२॥

नटी—अज्ज ! एवं णेदं । दाणिं अणंतरकरणिज्जं[1] आणवेदु अज्जो ।
(आर्य ! एवं न्विदम् । अनन्तरकरणीयम्, इदानीमार्य आज्ञापयतु ।)

सूत्र०—किमन्यद्[2] अस्याः परिषदः श्रुतिप्रसादनतः ।

नटी—अध कदमं उण उदुं समास्सिअ गाइस्सं ।
(अथ कतमं पुनः ऋतुं समाश्रित्य गायानि)

सूत्र०—ननु इममेव तावत्, अचिरप्रवृत्तम् उपभोगक्षमं ग्रीष्मसमयमधिकृत्य । संप्रति हि,—
सुभगसलिलावगाहाः[3] पाटलसंसर्गिसुरभिवनवाताः ।
प्रच्छायसुलभनिद्रा दिवसाः परिणामरमणीयाः ॥३॥

नटी—तह । (तथा ।) (गायति)

ईसीसिचुंविआइं[4] भमरेहिं[5] सुउमारकेसरसिहाइं ।
ओदंसयंति दअमाणा पमदाओ सिरीसकुसुमाइं ॥४॥

(ईषदीषच्चुम्बितानि भ्रमरैः सुकुमारकेसरशिखानि ।
अवतंसयन्ति दयमानाः प्रमदाः शिरीषकुसुमानि ॥)

—जातत्वात्, मिथिलायां जातत्वान्मैथिलवत् (अ०सू० ४.३.२५, ५३) । एवं च शाकपार्थिवादित्वात् करण-ल्युण्णिष्पत्तिकाऽभिज्ञान'-पदग्राह्याङ्गुलीयकरक्षाकरण्डक-विशिष्टं यत्, 'शकुन्तलां, तस्यां जातं शाकुन्तलं चा'-धिकृत्य कृतं च यत्, तन्नाटकम् 'अभिज्ञानशाकुन्तलमि'-ति साधीयान् पन्थाः ।

१. णेदं अणंतरकरणिज्जं अज्जो आणवेदु नि.
२. ०नतः । तदिदमेव—०कृत्य गीयताम् नि. ३. सुलभ०.
४. खणचु०. ५. ०हिं उअह (= ऊहत).

सूत्र०—आर्ये ! साधु गीतम् । अहो रागलिखितचित्तवृत्तिः, आलिखित इव सर्वतो रङ्गः । तत् इदानीं कतमं प्रयोगमाश्रित्य एनमाराधयाम ?

नटी—णं अज्जमिस्सेहिं पढमं जेव्व आणत्तं अहिण्णाणसाउंदलं[1] णाम अपुव्वं णाडअं पओए अहिकरीअदु त्ति । (नन्वार्यमिश्रैः प्रथममेवाज्ञप्तम् अभिज्ञानशाकुन्तलं नाम अपूर्वं नाटकं प्रयोगे अधिक्रियतामिति ।)

सूत्र०—आर्ये ! सम्यगनुबोधितोऽस्मि । ननु अस्मिन् क्षणे विस्मृतं खलु मया ।

तवास्मि गीतरागेण हारिणा प्रसभं हृतः ।
एष राजेव दुष्यन्तः[2] सारङ्गेणातिरंहसा ।।५।।

(निष्क्रान्तौ)

।। इति प्रस्तावना [3]पूर्वरङ्गश्च ।।

---

१. ०सउंदलं = ०शकुन्तलम् मा. पि.
२. दुःषन्तः । अग्रेऽप्येवमेव दुष्षन्त इत्येव पाठः ।
३. पूर्वरङ्गश्चेत्यस्माकं योजना ।

[1]अथ प्रथमोऽङ्कः

(ततः प्रविशति मृगानुसारी सशरचापहस्तो राजा रथेन सूतश्च)

सूतः—(राजानं मृगं चावलोक्य) आयुष्मन् !

कृष्णसारे ददच्चक्षुस्त्वयि चाधिज्यकार्मुके ।
मृगानुसारिणं साक्षात् पश्यामीव पिनाकिनम् ।।६।।

राजा—सूत ! दूरममुना सारङ्गेण वयमाकृष्टाः । अयं पुनरिदानीमपि—

ग्रीवाभङ्गाभिरामं मुहुरनुपतति स्यन्दने [2]बद्धदृष्टिः
पश्चार्धेन प्रविष्टः शरपतनभयाद् भूयसा पूर्वकायम् ।
दर्भैरर्धावलीढैः श्रमविवृतमुखभ्रंशिभिः कीर्णवर्त्मा
पश्योदग्रप्लुतत्वाद् वियति वहुतरं स्तोकमुर्व्यां प्रयाति ।।७।।

तदेष कथमनुपतत एव प्रयत्नप्रेक्षणीयः संवृत्तः ?

सूतः—आयुष्मन् ! उद्घातिनी भूमिरिति मया रश्मिसंयमनाद्, रथस्य मन्दीकृतो वेगः । तेन मृग एष विप्रकृष्टान्तरः संवृत्तः । संप्रति समदेशवर्तिनस्ते न दुरासदो भविष्यति ।

राजा—तेन हि मुच्यन्तामभीषवः ।

सूतः—यदाज्ञापयत्यायुष्मान् (रथवेगं निरूप्य) आयुष्मन् ! पश्य पश्य,—

मुक्तेषु रश्मिषु निरायतपूर्वकाया
[3]निष्कम्पचामरशिखा निभृतोर्ध्वकर्णाः ।
आत्मोद्धतैरपि रजोभिरलङ्घनीया
धावन्त्यमी मृगजवाक्षमयेव रथ्याः ।।८।।

---

१. इयमस्मद्योजना   २. दत्तदृष्टिः.

३. स्वेषामपि प्रसरतां रजसामलङ्घ्याः ।
निष्कम्पचामरशिखाश्च्युतकर्णभङ्गा
धावन्ति वर्त्मनि तरन्ति नु वाजिनस्ते ॥'

राजा—(सहर्षम्) सत्यम्, अतीत्य हरितोऽपि[1] हरीन् वर्तन्ते वाजिनः। तथा हि—

यदालोके सूक्ष्मं, व्रजति सहसा तद्, विपुलतां,
यदर्धे विच्छिन्नं, भवति कृतसंधानमिव तत्।
प्रकृत्या यद् वक्रं, तदपि, समरेखं, नयनयोर्,
न मे, दूरे किंचित्, क्षणमपि, न पार्श्वे, रथजवात् ॥९॥

सूत ! पश्यैनं व्यापाद्यमानम्। (शरसंधानं नाटयति)

(नेपथ्ये)

भो भो राजन् ! आश्रममृगोऽयं न हन्तव्यो न हन्तव्यः।

सूतः—(आकर्ण्यावलोक्य च) आयुष्मन् ! अस्य खलु ते वाणपातवर्तिनः कृष्णशारस्यान्तरे, तपस्विन उपस्थिताः।

राजा—(ससंभ्रमम्) तेन हि प्रगृह्यन्तां वाजिनः[2]।

सूतः—तथा। (रथं स्थापयति)

(ततः प्रविशत्यात्मना तृतीयो वैखानसः)

वैखा०—(हस्तमुद्यम्य) राजन् ! आश्रम-मृगोऽयम्, न हन्तव्यः, न हन्तव्यः।

द्विती०—न खलु न खलु बाणः सन्निपात्योऽयमस्मिन्
मृदुनि मृगशरीरे [3]तूलराशाविवाग्निः।

तृती०—क्व वत हरिणकानां जीवितं चातिलोलं
क्व च निशितनिपाता [4]वज्रसाराः शरास्ते ॥१०॥

वैखा०— तत्, [5]साधु कृतसन्धानं प्रतिसंहर सायकम्।
आर्तत्राणाय वः शस्त्रं न प्रहर्तुमनागसि[6] ॥११॥

---

१. कथमतीत्य हरिणं हरयो वर्तन्ते, हरितो हरींश्च नि.। हरितो हरिद्वर्णान् हरीन् सूर्यस्येन्द्रस्य चाश्वान्। द्र. र. ३।२२, ३०, ४३.।

२. निगृह्यन्तामभीषवः. ३. पुष्प०

४. सारपुङ्खाः पा०, पद्यमिदं पा० नि. ५. आशु.

६. विश्वसंबोधनमिदं यावत्सृष्टिकम्.

राजा—एष प्रतिसंहृतः । (यथोक्तं करोति)

वैखा०—सदृशमेतत् पुरुवंशप्रदीपस्य ।

जन्म यस्य पुरोर्वंशे युक्तरूपमिदं तव ।
पुत्रमेवंगुणोपेतं चक्रवर्तिनमाप्नुहि[1] ।।१२।।

इत०—(बाहू उद्यम्य) सर्वथा चक्रवर्त्तिनं पुत्रमाप्नुहि[1] ।

राजा—(सप्रणामम्) प्रतिगृहीतम् ।

वैखा—राजन् ! समिदाहरणाय प्रस्थिता वयम् । एष खलु कण्वस्य [2]कुलपतेः अनुमालिनीतीरमाश्रमो दृश्यते । न चेदन्यकार्यातिपातः, प्रविश्य प्रतिगृह्यताम् आतिथेयः सत्कारः । अपि च—

[3]रम्यास्तपोधनानां प्रतिहतविघ्नाः क्रियाः समवलोक्य ।
ज्ञास्यसि कियद् भुजो मे रक्षति मौर्वीकिणाङ्क इति ।।१३।।

राजा—अपि संनिहितोऽत्र कुलपतिः ? ।

वैखा०—इदानीमेव दुहितरं शकुन्तलाम् अतिथिसत्काराय नियुज्य दैवमस्याः प्रतिकूलं शमयितुं सोमतीर्थं[4] गतः ।

राजा—भवतु । तां द्रक्ष्यामि । सा खलु विदितभक्तिं मां महर्षेः करिष्यति ।

वैखा०—साधयामस्तावत् । (सशिष्यो निष्क्रान्तः)

राजा—सूत ! चोदयाश्वान् । पुण्याश्रमदर्शनेन तावदात्मानं पुनीमहि ।

सूतः—यदाज्ञापयत्यायुष्मान् । (भूयो रथवेगं निरूपयति)

राजा—(समन्तादवलोक्य) सूत ! अकथितोऽपि ज्ञायत एव यथा अयमाभोगस्तपोवनस्येति ।

सूतः—कथमिव ? ।

---

१. एतदेव शाकुन्तलस्य प्रयोजनमिति वयम्, अभिनवभारत्यामभिनवगुप्तश्च ।
२. महर्षेः मा. ३. धर्म्याः पा०
४. सोमतीर्थमिदं दुष्यन्तोऽपि, सोमवंशीयत्वाद्, राजत्वाच्च । द्र. शा. ४।१२, आश्रममृगोऽपि कण्व एव कश्चित् ।

राजा—किं न पश्यति भवान्? इह हि,—

नीवाराः शुकगर्भकोटरमुखभ्रष्टास्तरूणामधः
प्रस्निग्धाः क्वचिदिङ्गुदीफलभिदः सूच्यन्त एवोपलाः।
विश्वासोपगमादभिन्नगतयः शब्दं सहन्ते मृगा-
स्तोयाधारपथाश्च वल्कलशिखानिष्यन्दरेखाङ्किताः[1] ॥१४॥

सूतः—सर्वमुपपन्नम्।

राजा—(स्तोकमन्तरं गत्वा) तपोवननिवासिनामुपरोधो मा भूत्। एतावत्येव रथं स्थापय। यावदवतरामि।

सूतः—धृताः प्रग्रहाः। अवतरत्वायुष्मान्।

राजा—(अवतीर्य) सूत! विनीतवेषेण प्रवेष्टव्यानि तपोवनानि नाम। इदं तावद् गृह्यताम् (सूतस्याभरणानि धनुश्चोपनीय) सूत! यावदाश्रमवासिनः प्रत्यवेक्ष्य, अहमुपावर्ते तावदार्द्रपृष्ठाः क्रियन्तां वाजिनः।

सूतः—तथा। (निष्क्रान्तः)

राजा—(परिक्रम्यावलोक्य च) इदमाश्रमद्वारम्। यावत् प्रविशामि। (प्रविश्य, निमित्तं सूचयन्)

शान्तमिदमाश्रमपदं स्फुरति च बाहुः कुतः फलमिहास्य।
अथवा भवितव्यानां द्वाराणि भवन्ति सर्वत्र ॥१५॥

(नेपथ्ये)

इदो इदो सहिओ!। (इत इतः सख्यौ!)

राजा—(कर्णं दत्त्वा) अये! दक्षिणेन वृक्षवाटिकाम् आलाप इव श्रूयते। यावदत्र गच्छामि। (परिक्रम्यावलोक्य च) अये! एतास्तपस्विकन्यकाः स्वप्रमाणानुरूपैः सेचनघटैर्बालपादपेभ्यः पयो दातुमित एवाभिवर्तन्ते। (निपुणं निरूप्य) अहो! मधुरमासां दर्शनम्,—

१. 'अपि च—कुल्याम्भोभिः पवनचपलैः शाखिनो धौतमूला भिन्नो रागः किसलयरुचामाज्यधूमोद्गमेन। एते चार्वागुपवनभुवि च्छिन्नदर्भाङ्कुरायां नष्टात-(श)-ङ्का हरिणशिशवो मन्दमन्दं चरन्ति'। अत्र प्रसृतिचपलरिति पा०

शुद्धान्तदुर्लभमिदं वपुराश्रमवासिनो यदि जनस्य ।
दूरीकृताः खलु गुणैरुद्यानलता वनलताभिः ॥१६॥

[1]यावदिमां छायामाश्रित्य प्रतिपालयामि । (विलोकयन् स्थितः)

(ततः प्रविशति यथोक्तव्यापारा सह सखीभ्यां शकुन्तला)

शकु०—इदो इदो सहीओ ! ।(इत इतः सख्यौ !)

अनसूया—हला सउंदले ! तुवत्तो वि तादकस्सवस्स अस्समरुक्खआ पिअदरेत्ति तक्केमि, जेण णोमालिआकुसुमपेलवा तुमं वि एदाणं आलवालपूरणे णिउत्ता । (हला शकुन्तले ! त्वत्तोऽपि तातकाश्यपस्य आश्रमवृक्षकाः प्रियतरा इति तर्कयामि, येन नवमालिका-कुसुमपेलवा त्वमपि एतेषामालवालपूरणे नियुक्ता ।)

शकु०—ण केअलं [2]तादणिओओ एव्व, अत्थि मे सोदरसिणेहो एदेसु । (न केवलं तातनियोग एव, अस्ति मे सोदरस्नेह एतेषु ।) (वृक्षसेचनं रूपयति)

राजा—(आत्मगतम्) कथमियं सा कण्वदुहिता ? असाधुदर्शी खलु तत्रभवान् काश्यपः, य इमामाश्रमधर्मे[3] नियुङ्क्ते ।

इदं किलाव्याजमनोहरं वपुः,
तपःक्षमं[4] साधयितुं य इच्छति ।
ध्रुवं स नीलोत्पलपत्रधारया
[5]समिल्लतां छेत्तुमृषिर्व्यवस्यति ॥१७॥

भवतु; पादपान्तर्हित एव विस्रब्धं तावदेनां पश्यामि । (तथा करोति)

शकु०—हला अणसूए ! अदिपिणद्धेण वक्कलेण पिअंवदाए दिढं णिअंतिद म्हि । सिढिलेहि दाव णं । (हला अनसूये ! अतिपिनद्धेन वल्कलेन प्रियंवदया दृढं नियन्त्रितास्मि । शिथिलय तावदेतत् ।)

अन०—तह (तथा) । (शिथिलयति)

---

१. यावदेताश्छायामाश्रितास्तावत्.

२. तादस्स णिओगो ममावि सहोअरसिं०

३. वल्कलधारणे नि०

४. तपःक्लमं.

५. शमी०.

प्रियं०—(सहासम्) एत्थ पओहरवित्थारइत्तअं अत्तणो जोव्वणं उवालह[1]। (अत्र पयोधरविस्तारयितृ आत्मनो यौवनमुपालभस्व।)

राजा[2]—कामम् अननुरूपमप्यस्य वयसः[3], वल्कलम्, न पुनरलङ्कारश्रियं न पुष्यति। कुतः—

सरसिजमनुविद्धं शैवलेनापि रम्यं
मलिनमपि हिमांशोर्लक्ष्म लक्ष्मीं तनोति।
इयमधिकमनोज्ञा वल्कलेनापि तन्वी
किमिव हि मधुराणां मण्डनं नाकृतीनाम् ॥१८॥

शकु०—(अग्रतोऽवलोक्य) सहिओ! एसो वादेरिदपल्लवंगुलीहिं तुवरेदि विअ मं केसररुक्खओ। जाव णं संभावेमि। (सख्यौ! एष वातेरितपल्लवाङ्गुलीभिस्त्वरयतीव मां केसरवृक्षकः। यावदेनं संभावयामि। (परिक्रामति)

प्रियं०—हला सउंदले! एत्थ एव्व दाव मुहुत्तअं चिट्ठ।

शकु०—किं णिमित्तं? (किं निमित्तम्?)

प्रिय०—जाव तुए उवगदाए लदासणाहो विअ अअं केसररुक्खओ पडिभादि। (हला शकुन्तले! अत्रैव तावन्मुहूर्तं तिष्ठ, यावत् त्वयोपगतया लतासनाथ इवायं केसरवृक्षकः प्रतिभाति।)

शकु०—अदो खु पिअंवदा सि तुमं (अतः खलु प्रियंवदाऽसि त्वम्।

राजा—प्रियमपि तथ्यमाह शकुन्तलां प्रियंवदा। अस्याः खलु,—

अधरः किसलयरागः कोमलविटपानुकारिणौ बाहू।
कुसुममिव लोभनीयं यौवनमङ्गेषु संनद्धम् ॥१९॥

---

१. उहालहसु, मं किं उवालंभेसि.

२. सम्यगियमाह—'इदमुपहितसूक्ष्मग्रन्थिना स्कंधदेशे स्तनयुगपरिणाहाच्छादिना वल्कलेन। वपुरभिनवमस्याः पुष्यति स्वां न शोभां कुसुममिव पिनद्धं पाण्डुपत्रोदरेण॥' अथवा ३. वपुषः.

अन०—[1]हला सउंदले ! इग्रं सअंवरवहू सहआरस्स तुए किदणामहेआ वणजोसिणित्ति णोमालिग्रा । णं विसुमरिदा सि ? (हला शकुन्तले ! इयं स्वयंवरवधूः सहकारस्य त्वया कृतनामधेया वनज्योत्स्नेति नवमालिका । एनां विस्मृतवत्यसि ?)

शकु०—तदा अत्ताणं वि विसुमरिस्सं । (लतामुपेत्यावलोक्य च) हला ! रमणीए खु काले इमस्स लदापाअवमिहुणस्स वइअरो संवुत्तो । णवकुसुमजोव्वणा वणजोसिणी, सिणिद्धपल्लवदाए अ उवभोअक्खमो सहग्रारो । (तदात्मानमपि विस्मरिष्यामि (लतामुपेत्यावलोक्य च) हला ! रमणीये खलु काले एतस्य लतापादपमिथुनस्य व्यतिकरः संवृत्तः । नवकुसुमयौवना वनज्योत्स्ना, स्निग्धपल्लवतया च उपभोगक्षमः सहकारः । (पश्यन्ती तिष्ठति ।)

प्रियं०—अणसूए ! जाणासि किंणिमित्तं सउंदला वणजोसिणीं अदिमेत्तं पेक्खदित्ति ? । (अनसूये ! जानासि किंनिमित्तं शकुन्तला वनज्योत्स्नामतिमात्रं पश्यति ? ।)

अन०—ण क्खु विभावेमि । कहेहि । (न खलु विभावयामि । कथय ।)

प्रियं०—जह वणजोसिणी अणुरूवेण पाअवेण संगदा, अवि णाम एव्वं अहं वि अत्तणो अणुरूवं वरं लहेअत्ति । (यथा वनज्योत्स्ना अनुरूपेण पादपेन संगता, अपि नाम एवमहमप्यात्मनोऽनुरूपं वरं लभेयेति ।)

शकु०—एसो णूणं तुह अत्तगदो मणोरहो । (एष नूनं तवात्मगतो मनोरथः ।) (कलशमावर्जयति)

राजा—अपि नाम कुलपतेरियमसवर्णक्षेत्रसंभवा स्यात् ? अथवा कृतं संदेहेन,—

असंशयं क्षत्रपरिग्रहक्षमा यदार्यमस्यामभिलाषि मे मनः ।
सतां हि संदेहपदेषु वस्तुषु प्रमाणमन्तःकरणप्रवृत्तयः ।।२०।।

तथापि तत्त्वत एवैनामुपलप्स्ये ।

---

१. अनुसूया—हला सउंतले, इअं तादकण्णेण तुमं विअ सहत्थसंवड्ढिदा माहवीलदा । इमं विसुमरिदासि ।.

शकु०—(ससंभ्रमम्) अम्मओ ! सलिलसेअसंभमुग्गदो णोमालिअं उज्झिअ वअणं मे महुअरो अहिवट्टइ। (अहो ! सलिलसेकसंभ्रमोद्‌गतो नवमालिकामुज्झित्वा वदनं मे मधुकरोऽभिवर्तते।) (भ्रमबाधां रूपयति)

राजा—(सस्पृहं विलोक्य)[1]

चलापाङ्गां दृष्टिं[2] स्पृशसि बहुशो वेपथुमतीं
रहस्याख्यायीव स्वनसि मृदु कर्णान्तिकचरः।
करौ व्याधुन्वत्याः पिबसि रतिसर्वस्वमधरं
वयं तत्त्वान्वेषान्मधुकर ! हतास्त्वं खलु कृती[3] ॥२१॥

शकु०—ण एसो धिट्ठो विरमदि। अण्णदो गमिस्सं। (पदान्तरे स्थित्वा, सदृष्टिक्षेपम्) कहं इदो वि आअच्छदि? । हला ! परित्ताअह मं इमिणा दुव्विणीदेण दुट्ठमहुअरेण अहिभूअमाणं। (न एष धृष्टो विरमति। अन्यतो गमिष्यामि। (पदान्तरे स्थित्वा सदृष्टिक्षेपम्) कथमितोऽप्यागच्छति ?। हला ! परित्रायेथां माम् अनेन दुर्विनीतेन दुष्टमधुकरेण अभिभूयमानाम्।)

उभे—(सस्मितम्।) का अम्हे परित्तादुं ?। दुस्संदं आक्कंद। राअरक्खिदव्वाइं तवोवणाइं णाम। (के आवां परित्रातुम् ?। दुष्यन्तमाक्रन्द। राजरक्षितव्यानि तपोवनानि नाम।)

राजा—अवसरोऽयमात्मानं प्रकाशयितुम्। न भेतव्यं न भेतव्यम्— (अर्धोक्ते स्वगतम्) राजभावस्त्वाभिज्ञातो भवेत्। भवतु। एवं तावदभिधास्ये।

शकु०—(पदान्तरे स्थित्वा, सदृष्टिक्षेपम्) कहं इदो वि मं अणुसरदि ?। (कथमितोऽपि मामनुसरति ?।)

राजा—(सत्वरमुपसृत्य)

कः पौरवे वसुमतीं शासति, शासितरि दुर्विनीतानाम्।
अयमाचरत्यविनयं मुग्धासु तपस्विकन्यासु ॥२२॥

(सर्वा राजानं दृष्ट्वा किंचिदिव संभ्रान्ताः)

---

१. 'यतो यतः षट्‌चरणोऽभिवर्तते ततस्ततः प्रेरितवामलोचना। विवर्तितभ्रूरियमद्य शिक्षते भयादकामापि हि दृष्टिविभ्रमम्' ॥ अपि च.

२. चलापाङ्गं दृष्टः च., अन्ये च विदग्धाः।

३. भ्रमरस्वभावोक्त्या स्वभावोक्तिरलंकारः ध्व०.

अन०—अज्ज ! ण खु किंवि अच्चाहिदं । इअं णो पिअसही महुअरेण अहिहूअमाणा कादरीभूदा । (आर्य ! न खलु किमप्यत्याहितम् । इयं नो प्रियसखी मधुकरेणाभिभूयमाना कातरीभूता ।) (शकुन्तलां दर्शयति)

राजा—(शकुन्तलाभिमुखो भूत्वा) अपि तपो वर्धते ? ।

(शकुन्तला साध्वसादवचना तिष्ठति)

अन०—दाणिं अदिहिविसेसलाहेण । (शकुन्तलामुद्दिश्य) हला सउंदले ! गच्छ उडअं; फलमिस्सं अग्घं उवहर । इदं पादोदअं भविस्सदि । (इदानीमतिथिविशेषलाभेन । [शकुन्तलामुद्दिश्य] हला शकुन्तले ! गच्छोटजम्; फलमिश्रमर्घमुपहर । इदं पादोदकं भविष्यति ।)

राजा—[1]भवतीनां सूनृतयैव[2] गिरा कृतमातिथ्यम् ।

प्रियं०—तेण हि इमस्सिं पच्छाअसीअलाए सत्तवण्णवेदिआए मुहुत्त्रअं उवविसिअ परिस्समविणोदं करेदु अज्जो । (तेन ह्यस्यां प्रच्छायशीतलायां सप्तपर्णवेदिकायां मुहूर्तमुपविश्य परिश्रमविनोदं करोत्वार्यः ।)

राजा—नूनं यूयमप्यनेन कर्मणा परिश्रान्ताः ।

अन०—हला सउंदले ! उइदं णो पज्जुवासणं अदिहीणं; एत्थ उवविसम्ह । (हला शकुन्तले ! उचितं नः पर्युपासनमतिथीनाम्; अत्रोपविशामः ।) (सर्वं उपविशन्ति)

शकु०—(आत्मगतम्) किं णु खु इमं पेक्खिअ तवोवणविरोहिणो विआरस्स गमणीअ म्हि संवुत्ता ? । (किं नु खल्विमं प्रेक्ष्य तपोवनविरोधिनो विकारस्य गमनीयास्मि संवृत्ता ? ।)

राजा—(सर्वा विलोक्य) अहो ! समानवयोरूपरमणीयं[3] भवतीनां सौहार्दम् ।

---

१. भवति ! सूनृतयैव वाचा कृत०

२. र० १।९३, ६।२९

३. शा. ६।१४-१५ ग

प्रियं०—(जनान्तिकम्) अणसूए! को णु खु एसो चउरगंभीराकिदी चउरं पिअं आलवंतो पहाववंदो विअ लक्खीअदि ?। (अनसूये ! को नु खल्वेष चतुरगम्भीराकृतिश्चतुरंप्रियमालपन् प्रभाववानिव लक्ष्यते ?।)

अन०—सहि ! मम वि अत्थि कोदूहलं। पुच्छिस्सं दाव णं। (प्रकाशम्) अज्जस्स महुरालावजणिदो वीसंभो मं मंतावेदि—कदमो अज्जेण राएसिणो वंसो अलंकरीअदि ? कदमो वा विरहपज्जुस्सुअजणो किदो देसो ? किंणिमित्तं वा सुउमारदरो वि तवोवणगमण-परिस्समस्स अत्ता पदं उवणोदो ? (सखि ! ममाप्यस्ति कौतूहलम्। पृच्छामि तावदेनम्। (प्रकाशम्) आर्यस्य मधुरालापजनितो विस्रम्भो मां मन्त्रयते—कतम आर्येण राजर्षेर्वंशोऽलंक्रियते ? कतमो वा विरह-पर्युत्सुकजनः कृतो देशः ? किंनिमित्तं वा सुकुमारतरोऽपि तपोवनगमन-परिश्रमस्य आत्मा पदमुपनीतः ?।)

शकु०—(आत्मगतम्) हिअअ मा उत्तम्म। एसा तुए चिंतिदाइं अणसूआ मंतेदि ! (हृदय ! मा उत्ताम्य। एषा त्वया चिन्तितानि अनसूया मन्त्रयते।)

राजा—(आत्मगतम्) कथमिदानीमात्मानं निवेदयामि ? कथं [1]वा परिहारं करोमि ? भवतु; एवं तावदेनां वक्ष्ये। (प्रकाशम्) भवति ! यः पौरवेण राज्ञा धर्माधिकारे नियुक्तः सोऽहम-विघ्नक्रियोपलम्भाय पुण्याश्रमदर्शनप्रसङ्गेन धर्मारण्यमिदमा-यातः।

अन०—सणाहा दाणिं धम्मआरिणो। (सनाथा इदानीं धर्मचारिणः।)

(शकुन्तला शृङ्गारलज्जां रूपयति)

सख्यौ—(उभयोराकारं विदित्वा, जनान्तिकम्) हला सउंदले ! जइ एत्थ अज्ज तादो संणिहिदो भवे। (हला शकुन्तले ! यदि अत्र अद्य तातः संनिहितो भवेत्।)

शकु०—(सरोषमिव) तदो किं भवे ?। (ततः किं भवेत् ?।)

---

१. वात्मनः परिहारं.

सख्यौ—इमं जीविदसव्वस्सेण वि अदिहिविसेसं किदत्थं करिस्सदि !
(इमं जीवितसर्वस्वेनाप्यतिथिविशेषं कृतार्थं करिष्यति ।)

शकु०—(सकृतककोपम्) तुम्हे अवेध । किं वि हिअए करिअ मंतेध । ण वो वअणं सुणिस्सं । (युवामपेतम् । किमपि हृदये कृत्वा मन्त्रयेथे । न युवयार्वचनं श्रोष्यामि ।)

राजा—वयमपि तावद् भवत्योः सखीगतं किमपि पृच्छामः ।

सख्यौ—अज्ज ! अणुग्गहो विअ इअं अब्भत्थणा ।
(आर्य ! अनुग्रह इव इयमभ्यर्थना ।)

राजा—भगवान् काश्यपः शाश्वते ब्रह्मणि स्थित इति प्रकाशः । इयं च वः सखी तदात्मजेति कथमेतत् ? ।

अन०—सुणादु अज्जो । अत्थि को वि कोसिओत्ति गोत्तणामहेओ महाप्पहावो राएसी । (शृणोत्वार्यः । अस्ति कोऽपि कौशिक इति गोत्रनामधेयो महाप्रभावो राजर्षिः ।)

राजा—अस्ति, श्रूयते ।

अन०—तं णो पिअसहीए पहवं अवगच्छ । उज्झिआए सरीरसंवड्ढणादीहिं तादकस्सवो से पिदा । (तमावयोः प्रियसख्याः प्रभवमवगच्छ । उज्झितायाः शरीरसंवर्धनादिभिस्तातकाश्यपोऽस्याः पिता ।)

राजा—'उज्झित'-शब्देन जनितं मे कौतूहलम् । आ मूलाच्छ्रोतुमिच्छामि ।

अन०—सुणादु अज्जो; गोदमीतीरे पुरा किल तस्स राएसिणो उग्गे तवसि वट्टमाणस्स किंवि जादसंकेहिं देवेहिं मेणआ णाम अच्छरा पेसिदा णिअमविग्घकालिणी । (शृणोत्वार्यः; गौतमीतीरे पुरा किल तस्य राजर्षेः उग्रे तपसि वर्तमानस्य किमपि जातशङ्कैर्देवैर् मेनका नामाप्सराः प्रेषिता नियमविघ्नकारिणी ।)

राजा—अस्त्येतदन्यसमाधिभीरुत्वं देवानाम् ।

अन०—तदो वसंतोदाररमणीए समए से उम्मादइत्तअं रूवं पेक्खिअ,—
(ततो वसन्तोदाररमणीये समये तस्या उन्मादयितृ रूपं प्रेक्ष्य,—)
(अर्धोक्ते लज्जया विरमति ।)

राजा—[३]परस्ताज्ज्ञायत एव। सर्वथा अप्सरः००संभवैषा।

अन०—अह इं ?। (अथ किम् ?।)

राजा—उपपद्यते,—

मानुषीषु[१] कथं वा स्यादस्य रूपस्य संभवः ?।
न प्रभातरलं [२]ज्योतिरुदेति वसुधातलात् ॥२३॥

(शकुन्तलाऽधोमुखी तिष्ठति)

राजा—(आत्मगतम्।) लब्धावकाशो मे मनोरथः। किंतु सख्याः परिहासोदाहृतां वरप्रार्थनां श्रुत्वा [३]द्वैधीभावकातरं मे मनः।

प्रियं०—(सस्मितं शकुन्तलां विलोक्य नायकाभिमुखी भूत्वा) पुणो वि वत्तुकामो विअ अज्जो। (पुनरपि वक्तुकाम इवार्यः।)

(शकुन्तला सखीमङ्गुल्या तर्जयति)

राजा—सम्यगुपलक्षितं भवत्या। अस्ति नः सच्चरितश्रवणलोभादन्यदपि प्रष्टव्यम्।

प्रियं०—अलं विआरिअ। अणिअंतणाणुओओ तवस्सिअणो णाम। (अलं विचार्य। अनियन्त्रणानुयोगस्तपस्विजनो नाम)

राजा—[४]एतत् पृच्छामि—

वैखानसं किमनया व्रतमा प्रदानाद्
व्यापाररोधि मदनस्य निषेवितव्यम्।
अत्यन्तमेव[५] सदृशेक्षणवल्लभाभि[६]-
राहो निवत्स्यति समं हरिणाङ्गनाभिः ॥२४॥

प्रियं०—अज्ज! धम्मचरणे वि परवसो अअं जणो। गुरुणो उण से अणरूववरप्पदाणे संकप्पो। (आर्य! धर्मचरणेऽपि[७] परवशोऽयं जनः। गुरोः पुनरस्या अनुरूपवरप्रदाने संकल्पः।)

---

१. 'मानुषीभ्यः कथं नु स्या० २. ज्योतिस्तारका, द्र. मे. २।४, कु० ८।८४
३. धृतद्वै०. ४. इति सखीं ते ज्ञातुमिच्छामि।
५. ०मात्मसदृशे०, ० मेव मदिरे च. नि.
६. कु. ५।१३,२५, र. १।४०, ८।५९, मे. २।४१
७. अपिशब्दान्मदनव्यापारेऽपि।

राजा—(आत्मगतम्) न दुरवापा इयं खलु प्रार्थना ।

भव हृदय ! साभिलाषं संप्रति संदेहनिर्णयो जातः ।
आशङ्कसे यदग्निं तदिदं स्पर्शक्षमं रत्नम् ॥२५॥

शकु०—(सरोषमिव) अणसूए ! गमिस्सं अहं । (अनसूये ! गमिष्याम्यहम् ।)

अन०—किंणिमित्तं ? । (किंनिमित्तम् ? ।)

शकु०—इमं असंवद्धप्पलाविणिं पिअंवदं अज्जाए गोदमीए णिवेदइस्सं । (इमामसंबद्धप्रलापिनीं प्रियंवदामार्यायै गौतम्यै निवेदयिष्यामि ।)

अन०—सहि ! ण जुत्तं ते अकिदसक्कारं अदिहिविसेसं विसज्जिअ सच्छंददो गमणं । (सखि ! न युक्तं ते अकृतसत्कारमतिथिविशेषं विसृज्य स्वच्छन्दतो गमनम् ।)

(शकुन्तला न किंचिदुक्त्वा प्रस्थितैव)

राजा—कथं गच्छति ? (ग्रहीतुमिच्छन्निगृह्यात्मानम्, आत्मगतम्) अहो ! चेष्टाप्रतिरूपिका कामिजनमनोवृत्तिः । अहं हि,—

अनुयास्यन् मुनितनयां सहसा विनयेन वारितप्रसरः ।
[1]स्थानादनुच्चलन्नपि गत्वेव पुनः प्रतिनिवृत्तः ॥२६॥

प्रियं०—(शकुन्तलां निरुध्य) हला ! ण दे जुत्तं गंतुं । (हला ! न ते युक्तं गन्तुम् ।)

शकु०—(सभ्रूभङ्गम्) किंणिमित्तं ? । (किंनिमित्तम् ? ।)

प्रियं०—रुक्खसेअणे दुवे धारेसि मे । एहि जाव; अत्ताणं मोचिअ तदो गमिस्ससि । (वृक्षसेचने द्वे धारयसि मे । एहि तावत्; आत्मानं मोचयित्वा ततो गमिष्यसि ।) (बलादेनां निवर्तयति)

राजा—भद्रे ! वृक्षसेचनादेव परिश्रान्तामत्रभवतीं लक्षये । तथाहि अस्याः,—

स्रस्तांसावतिमात्रलोहिततलौ बाहू घटोत्क्षेपणा-
दद्यापि स्तनवेपथुं जनयति श्वासः प्रमाणाधिकः ।
स्रस्तं कर्णशिरीषरोधि वदने घर्माम्भसां जालकं
बन्धे स्रंसिनि चैकहस्तयमिताः पर्याकुला मूर्धजाः[2] ॥२७॥

तदहमेनामनृणां करोमि । (अङ्गुलीयं दातुमिच्छति)

---

१. स्थानादचलन्नपि

२. कुमारसंभवब्रह्मचारिणं विडम्बयत्यत्र नायकः । ब्रह्मचार्यपि पार्वत्यास्तानि तानि अङ्गानि निर्वर्णयति ।

(उभे नाममुद्राक्षराण्यनुवाच्य परस्परमवलोकयतः)

राजा—अलमन्यथा[1] संभाव्य । राज्ञः [2]परिग्रहोऽयम् ।

प्रियं०—तेण हि णारिहदि एदं [3]अंगुलीअअं अंगुलीविओअं । अज्जस्स [4]वअणेण ज्जेव अणिरिणा एसा । (किंचिद् विहस्य) हला सउंदले ! मोइदासि अणुअंपिणा अज्जेण, अहवा महाराएण; गच्छ दाणिं । (तेन हि नार्हत्येतदङ्गुलीयकमङ्गुलीवियोगम् । आर्यस्य वचनेनैव अनृणा एषा । (किञ्चिद् विहस्य) हला शकुन्तले ! मोचितासि अनुकम्पिना आर्येण, अथवा महाराजेन; गच्छेदानीम् ।)

शकु०—(आत्मगतम्) गमिस्सं जइ अत्तणो पहविस्सं । (प्रकाशम्) का तुमं विसज्जिदव्वस्स रुंधिदव्वस्स वा ? । (गमिष्यामि, यद्यात्मनः प्रभविष्यामि । (प्रकाशम्) का त्वं विसर्जितव्यस्य रोद्धव्यस्य वा ? ।)

राजा—(शकुन्तलां विलोक्य, आत्मगतम्) किं नु खलु यथा वयम् अस्याम्, एवम् इयमपि अस्मान् प्रति स्यात् । अथवा लब्धावकाशा मे प्रार्थना । कुतः—

वाचं न मिश्रयति यद्यपि मद्वचोभिः
कर्णं ददात्यवहिता[5] मयि भाषमाणे ।
कामं न तिष्ठति मदानन[6]-संमुखीयं
भूयिष्ठमन्यविषया न तु दृष्टिरस्याः ॥२८॥

(नेपथ्ये)

भो भोस्तपस्विनः ! संनिहितास्तपोवनसत्त्वरक्षायै भवत । प्रत्यासन्नः किल मृगयाविहारी पार्थिवो दुष्यन्तः ।

तुरगखुरहतस्तथा हि रेणु-
विटप-विषक्त-जलार्द्रवल्कलेषु ।
पतति परिणतारुणप्रकाशः
शलभसमूह इवाश्रमद्रुमेषु ॥२९॥

---

१. अलमस्मानन्यथा. २. ०परिग्रहोऽयम् इति राजपुरुषं मामवगच्छथ ।
३. अंगुरीअविओअं कादुं अज्जो.
४. वअणादो ज्जेव अरिणा दाणिं एसा भोदु.
५. ददात्यभिमुखं. ६. ०संमुखीना.

अपि च[1]—

तीव्राघातादभिमुख[2]तरुस्कन्धभ[3]ग्नैकदन्तः
पादाकृष्टव्रततिवलयासङ्गसंजातपाशः ।
मूर्तो विघ्नस्तपस इव नो भिन्नसारङ्गयूथो
धर्मारण्यं [4]विरुजति गजः स्यन्दनालोकभीतः ॥३०॥

(सर्वाः कर्णं दत्त्वा किंचिदिव संभ्रान्ताः)

राजा—(आत्मगतम्) अहो धिक् । [5]पौरा अस्मदन्वेषिणस्तपोवनमुपरुन्धन्ति । भवतु; प्रतिगमिष्यामस्तावत् ।

सख्यौ—अज्ज ! इमिणा आरण्णअवुत्तंतेण पज्जाउल म्ह । अणुजाणीहि णो उडअगमणस्स । (आर्य ! अनेनारण्यकवृत्तान्तेन पर्याकुलाः स्मः । अनुजानीहि नः उटजगमनाय ।)

राजा[6]—(ससंभ्रमम्) गच्छन्तु भवत्यः । वयमप्याश्रमपीडा यथा न भवति तथा प्रयतिष्यामहे ।

(सर्व उत्तिष्ठन्ति)

सख्यौ—अज्ज [7]असंभाविदअदिहिसक्कारं भूओ वि पेक्खणणिमित्तं लज्जेमो अज्जं विण्णवेदुं । (आर्य असंभावितातिथिसत्कारं भूयोऽपि प्रेक्षणनिमित्तं लज्जावहे आर्यं विज्ञापयितुम् ।)

राजा—मा मैवम्; दर्शनेनैवात्रभवतीनां पुरस्कृतोऽस्मि[8] ।

---

१. राजा—(स्वगतम्) अहो धिक्००००रुन्धन्ति ? । (पुनर्नेपथ्ये) भोस्तपस्विनः ! पर्याकुलीकुर्वन्वृद्धस्त्रीकुमारकानेष दुष्यन्तः प्राप्तः,—तीव्राघातप्रतिहततरुः०. २. ०तरुस्कन्ध०, नि. च. ३. ०लग्नै० नि. च.

४. प्रविशति.

५. कथमपराद्धस्तपस्विनामस्मि ? भवतु ; तावत्प्रतिगच्छामि.

६. अनु०—हला संउतले, आउला अज्जा गोदमी भविस्सदि । ता एहि, सिग्घं एक्कत्थाओ होम्ह । शकु०—(गतिसंरोधं रूपयित्वा) हद्धी हद्धी, ऊरुत्थंभविअल म्हि संवुत्ता । राजा—स्वैरं स्वैरं गच्छंतु.

७. विदिदभूइट्ठो सि । णं संपदं जं उवआरमज्झत्थदाए अवरद्धाओ म्ह तं मरिसेसि.

८. अहमपि गच्छामि । शकुन्तलादर्शनादेव मन्दौत्सुक्यो०.

शकु०—अहिणवकुससूइपरिक्खदं मे चलणं। कुरुवअसाहापरिलग्गं च मे वक्कलं। ता पडिवालेध मं जाव णं मोग्रावेमि। (अभिनव-कुशसूचि-परिक्षतौ मे चरणौ कुरवकशाखापरिलग्नं च मे वल्कलम्। तत् प्रतिपालयतं माम्, यावदेतत् मोचयामि।)

(शकुन्तला राजानमवलोकयन्ती सव्याजं विलम्ब्य सह सखीभ्यां निष्क्रान्ता)

राजा—(निश्श्वस्य) हन्त। गताः सर्वाः। अहं पुनः मन्दौत्सुक्योऽस्मि [१]गमनं प्रति। यावदानुयात्रिकान् समेत्य नातिदूरे तपोवनस्य निवेशयेयम्। (द्विपदिकया[२]) न खलु शक्नोमि शकुन्तलाव्यापा-रादात्मानं निवर्तयितुम्। मम हि,—

गच्छति पुरः शरीरं धावति पश्चा[३]दसंस्तुतं चेतः।
चीनांशुकमिव केतोः प्रतिवातं नीयमानस्य ॥३१॥

(निष्क्रान्ताः सर्वे)

॥ [४]इति प्रथमोऽङ्कः ॥

---

१. नगरागमनं.
२. इयमस्मत्कृता योजना.
३. ०दसंस्थितं.।
४. इत्याखेटको नाम.

द्वितीयोऽङ्कः

(ततः प्रविशति विषण्णो विदूषकः)

विदू०—(निःश्वस्य) भो कट्ठं । एदस्स मअआसीलस्स रण्णो वअस्स-भावेण णिव्विण्णो म्हि । अअं मओ अअं वराहो अअं सद्दूलो त्ति मज्झण्णे वि गिम्हविरलपाअवच्छाआसु वणराईसु आहिंडी-अदि अडवीदो अडवी । पत्तसंकरकसाआइं कडुआइं गिरिणई-जलाइं पीअंति अणिअदवेलं सुल्लमंसभूइट्ठो आहारो अण्ही-अदि । तुरगाणुधावणकंडिदसंधिणो रत्तिम्मि वि णिकामं सइदव्वं णत्थि । तदो महंते एव्व पच्चूसे दासीए-पुत्तेहिं सउणिलुद्धएहिं वणग्गहणकोलाहलेण पडिबोधिदो म्हि । एत्तएण दाणिं वि पीडा ण णिक्कमदि । तदो [1]गंडस्स उवरि पिडओ संवुत्तो । हिओ किल अम्हेसु ओहीणेसु तत्तहोदो मआणुसारेण अस्समपदं पविट्ठस्स तावसकण्णआ सउंदला मम अधण्णदाए दंसिदा । संपदं णअरगमणस्स मणं कहं वि ण करेदि । अज्ज वि से तं एव्व चिंतअंतस्स अक्खीसु पभादं आसि । का गदी ? जाव णं किदाचारपरिक्कमं पेक्खामि । (परिक्रम्यावलोक्य च) एसो बाणासणहत्थाहिं जवणीहिं वण-पुप्फमालाधारिणीहिं पडिवुदो इदो एव्व आअच्छदि पिअव-अस्सो । होदु; अंगभंगविअलो वि भविअ चिट्ठिस्सं जइ एव्वं वि णाम विस्समं लहेअं । (निश्श्वस्य) (भोः ! कष्टम् । एतस्य मृगयाशीलस्य राज्ञो वयस्यभावेन निर्विण्णोऽस्मि । अयं मृगः, अयं वराहः, अयं शार्दूल इति मध्याह्नेऽपि ग्रीष्मविरलपादपच्छायासु वनराजी-ष्वाहिण्ड्यतेऽटवीतोऽटवी । पत्रसंकरकषायाणि कटूनि गिरीनदीजलानि पीयन्ते । अनियतवेलं शूल्यमांसभूयिष्ठ आहारो भुज्यते । तुरगानु-धावनकण्डितसंधे रात्रावपि निकामं शयितव्यं नास्ति । ततो महत्येव प्रत्यूषे दास्याः पुत्रैः शकुनिलुब्धकैर्वनग्रहणकोलाहलेन प्रतिबोधितोऽस्मि । इयतेदानीमपि पीडा न निष्क्रामति । ततो गण्डस्योपरि पिटकः संवृत्तः ।

---

१. गंडस्स उवरि पिंडिआ संवुत्ता.

ह्यः किलास्मास्ववहीनेषु तत्रभवतो मृगानुसारेणाश्रमपदं प्रविष्टस्य तापसकन्यका शकुन्तला ममाधन्यतया दर्शिता। सांप्रतं नगरगमनस्य मनः कथमपि न करोति। अद्यापि तस्य तामेव चिन्तयतोऽक्ष्णोः प्रभातमासीत्। का गतिः? यावत् तं कृताचारपरिक्रमं पश्यामि। (परिक्रम्यावलोक्य च) एष बाणासनहस्ताभिर्यवनीभिर्वनपुष्पमालाधारिणीभिः परिवृतः इत एवागच्छति प्रियवयस्यः। भवतु; अङ्गभङ्गविकल इव भूत्वा स्थास्यामि। यद्येवमपि नाम विश्रमं लभेय। (दण्डकाष्ठमवलम्ब्य स्थितः)

(ततः प्रविशति यथानिर्दिष्टपरिवारो राजा)

राजा—(आत्मगतम्)

कामं प्रिया न सुलभा मनस्तु तद्भावदर्शनाश्वासि[1]।
अकृतार्थेऽपि मनसिजे रतिमुभयप्रार्थना[2] कुरुते[3] ॥१॥

(स्मितं कृत्वा) एवमात्माभिप्रायसंभावितेष्टजनचित्तवृत्तिः प्रार्थयिता विडम्ब्यते[4]—

स्निग्धं वीक्षितमन्यतोऽपि नयने यत् [5]प्रेरयन्त्या तया
यातं यच्च नितम्बयोर्गुरुतया मन्दं विलासादिव।
मा गा इत्युपरुद्धया यदपि सा सासूयमुक्ता सखी
सर्वं तत् किल मत्परायणमहो [6]कामः स्वतां पश्यति। २॥

विदू०—(तथास्थित एव) भो वअस्स! ण मे हत्थपाआ पसरंति। वाआमेत्तएण जीआपइस्सं। (भो वयस्य! न मे हस्तपादं प्रसरति। वाङ्मात्रेण जापयिष्यामि।)

राजा—(सस्मितम्) कुतोऽयं गात्रोपघातः?।

विदू०—कहं कुदो किल? सअं अच्छी आउलीकरिअ अस्सुकारण पुच्छेसि?। (कथं? कुतः किल? स्वयमेव अक्षि अकुलीकृत्य अश्रुकारणं पृच्छसि?।)

राजा—न खल्ववगच्छामि?

---

१. दर्शनायासि. २. उभयप्रार्थना—व्याख्या वि. २।१५.
३. माल. ३।१५, वैपरीत्ये च वि. २।२१, माल. ३।३. ४. विप्रलम्यते.
५. प्रेषय०. ६. कामी

विदू०—भो वअस्स ! जं वेदसो खुज्जलीलं विडंबेदि तं किं अत्तणो पहावेण उद णईवेअस्स ? । (भो वयस्य ! यद् वेतसः कुब्जलीलां विडम्बयति, तत् किमात्मनः प्रभावेण, उत नदीवेगस्य ? ।)

राजा—नदीवेगस्तत्र कारणम् ।

विदू०—मम वि भवं । (ममापि भवान् ।)

राजा—कथमिव ? ।

विदू०—एव्वं राअकज्जाणि उज्झिअ तारिसे आउलप्पदेसे वणचरवुत्तिणा तुए होदव्वं जंसच्चं पच्चहं सावद-समुच्छारणेहिं संखोहिअसंधिबंधाणं मम गत्ताणं अणीसो म्हि संवुत्तो । ता पसादइस्सं विसज्जिदुं मं एक्काहं वि दाव विस्समिदुं । (एवं राजकार्याणि उज्झित्वा तादृश आकुलप्रदेशे वनचरवृत्तिना त्वया भवितव्यम् ? यत्सत्यम्, प्रत्यहं श्वापदसमुत्सारणैः संक्षोभितसंधिबन्धानां मम गात्राणामनीशोऽस्मि संवृत्तः । तत् प्रसादयिष्यामि विसर्जितुं मामेकाहमपि तावद् विश्रमितुम् ।)

राजा—(आत्मगतम्) अयं चैवमाह, ममापि काश्यपसुतामनुस्मृत्य [1]मृगयां प्रति निरुत्सुकं चेतः । तथाहि—

न नमयितुमधिज्यमस्मि शक्तो
धनुरिदमाहितसायकं मृगेषु ।
सहवसतिमुपेत्य यैः प्रियायाः
कृत इव मुग्धविलोकितोपदेशः[2] ॥३॥

विदू०—(राज्ञो मुखं विलोक्य) अत्तभवं किं वि हिअए करिअ मंतेदि । अरण्णे मए रुदिअं आसि । (अत्रभवान् किमपि हृदये कृत्वा मन्त्रयते । अरण्ये मया रुदितमासीत् ।)

राजा—(सस्मितम्) किमन्यत् ? अनतिक्रमणीयं मे सुहृद्वाक्यमिति स्थितोऽस्मि ।

---

१. मृगयाविक्लवं चेतः । कुतः—
२. इव लोचनकान्तिसंविभागः, कु. १।४६, र. १।४०.

विदू०—चिरं जीअ। (चिरं जीव।) (गन्तुमिच्छति)

राजा—वयस्य ! तिष्ठ; सावशेषं मे वचः।

विदू०—आणवेदु भवं। (आज्ञापयतु भवान्।)

राजा—विश्रान्तेन भवता ममाप्यनायासे कर्मणि सहायेन भवितव्यम्।

विदू०—किं मोदअखंडिआए ? तेण हि अअं सुगहीदो खणो[1]।
(किं मोदकखण्डिकायाम् ? तेन ह्ययं सुगृहीतः क्षणः[1]।)

राजा—यत्र वक्ष्यामि। कस्कोऽत्र भोः ?।

(प्रविश्य)

दौवा०—(प्रणम्य) आणवेदु भट्टा। (आज्ञापयतु भर्ता।)

राजा—रैवतक ! सेनापतिस्तावदाहूयताम्।

दौवा०—तह। (तथा।) (निष्क्रम्य सेनापतिना सह पुनः प्रविश्य) एसो अण्णावअणुक्कंठो भट्टा इदो दिण्णदिट्ठी एव्व चिट्ठदि उवसप्पदु अज्जो। (निष्क्रम्य सेनापतिना सह पुनः प्रविश्य) (एष आज्ञावचनोत्कण्ठो भर्ता इतो दत्तदृष्टिरेव तिष्ठति। उपसर्पत्वार्यः।)

सेना०—(राजानमवलोक्य) कथं दृष्टदोषापि स्वामिनि मृगया केवलं गुण एव संवृत्ता। तथा हि देवः—

अनवरतधनुर्ज्यास्फालनक्रूरपूर्वं
रविकिरणसहिष्णु स्वेदलेशैरभिन्नम्।
अपचितमपि गात्रं व्यायतत्वादलक्ष्यं
गिरिचर इव नागः प्राणसारं बिभर्ति ॥४॥

(उपेत्य) [2]जयतु स्वामी; गृहीतश्वापदमरण्यम्। किमन्यदनुष्ठीयताम् ?।

राजा—भद्रसेन ! मन्दोत्साहः कृतोऽस्मि मृगयापवादिना माधव्येन।

---

१. क्षणः अवकाशः। द्र. २६३ पृष्ठान्ते गणदास-वचः। २. 'जयति जयति स्वामी ! गृहीतमृगप्रचारसूचितश्वापदमरण्यम्। तत्किमन्यत्रावस्थीयते ?'

सेना०—(जनान्तिकम्) सखे ! स्थिरप्रतिबन्धो भव। अहं तावत् स्वामिनश्चित्तवृत्तिमनुवर्तिष्ये। (प्रकाशम्) प्रलपत्वेष वैधेयः[1]। ननु प्रभुरेव निदर्शनम्,—

मेदश्छेदकृशोदरं लघु भवत्युत्थानयोग्यं[2] वपुः
सत्त्वानामपि लक्ष्यते विकृतिमच्चित्तं भयक्रोधयोः।
उत्कर्षः स च धन्विनां यदिषवः सिध्यन्ति लक्ष्ये चले
मिथ्यैव व्यसनं वदन्ति मृगयामीदृग् विनोदः कुतः ? ॥५॥

विदू०—अवेहि रे [3]उच्छाहहेतुअ ! अत्तभवं पकिदिं आपण्णो। तुमं दाव अडवीदो अडवीं आहिंडंतो णरणासिआ-लोलुवस्स जिण्णरिच्छस्स कस्स वि मुहे पडिस्ससि। (अपेहि रे उत्साह-हेतुक ! अत्रभवान् प्रकृतिमापन्नः। त्वं तावदटवीतोऽटवीमाहिण्डमानो नरनासिकालोलुपस्य जीर्णऋक्षस्य कस्यापि मुखे पतिष्यसि।)

राजा—[4]भद्रसेन ! आश्रमसंनिकृष्टे स्थिताः स्मः। अतस्ते वचो नाभिनन्दामि। अद्य तावत्,—

गाहन्तां महिषा निपानसलिलं शृङ्गैर्मुहुस्ताडितं
छायाबद्धकदम्बकं मृगकुलं रोमन्थमभ्यस्यतु।
विस्रब्धं[5] क्रियतां वराहपतिभिर्मुस्ताक्षतिः पल्वले
विश्रामं लभतामिदं च शिथिलज्याबन्धमस्मद्धनुः ॥६॥

सेना०—यत् प्रभविष्णवे रोचते।

राजा—तेन हि निवर्तय पूर्वगतान् वनग्राहिणः। यथा न मे सैनिकास्तपोवनमुपरुन्धन्ति तथा निषेद्धव्याः। पश्य—

शमप्रधानेषु तपोधनेषु[6]
गूढं हि दाहात्मकमस्ति तेजः।
स्पर्शानुकूला अपि[7] सूर्यकान्ता-
स्तेजोऽन्यतेजोभिभवाद् वमन्ति[8] ॥७॥

---

१. वैधवेयः. २. ०त्युत्साह०
३. तथा च कुटलस्य तोकमर्थशास्त्रे ८।३।५०, र. ९।८९.
४. 'भद्र सेनापते. ५. 'विस्रब्धैः'. ६. वनेषु
७. इव. ८. तदन्यतो ००दहन्ति.

सेना०—यदाज्ञापयति स्वामी ।

भो[1] उच्छाहइत्थआ णिक्कम्म णिक्कम्म । (भो उत्साहयितः, निष्क्राम निष्क्राम)

(निष्क्रान्तः सेनापतिः)

राजा—(परिजनं विलोक्य) अपनयन्तु भवत्यो मृगयावेशम् । रैवतक ! त्वमपि स्वं नियोगमशून्यं कुरु ।

परि०—जं [2]देवो आणवेदि । (यद् देव आज्ञापयति ।)

(निष्क्रान्तः)

विदू०—किदं भवदा णिम्मच्छिअं । संपदं एदस्सिं पादवच्छाआए विरइदलदाविदाणदंसणीआए[3] आसणे णिसीददु भवं, जाव अहं वि सुहासीणो होमि । (कृतं भवता निर्मक्षिकम् । सांप्रतमेतस्यां पादपच्छायायां विरचितलतावितानदर्शनीयायामासने निषीदतु भवान्, यावदहमपि सुखासीनो भवामि ।)

राजा—गच्छाग्रतः ।

विदू०—एदु भवं । (एतु भवान् ।)

(उभौ परिक्रम्योपविष्टौ)

राजा—माधव्य ! अनवाप्तचक्षुःफलोऽसि, येन त्वया [4]द्रष्टव्यानां परं न दृष्टम् ।

विदू—णं भवं अग्गदो मे वट्टदि । (ननु भवानग्रतो मे वर्तते ।)

राजा—सर्वः खलु [5]कान्तमात्मीयं पश्यति । [6]तामाश्रमललामभूतां शकुन्तलामधिकृत्य ब्रवीमि ।

विदू०—(आत्मगतम्) होदु[7], से ओसरं ण दाइस्सं (प्रकाशम्) भो [8]वअस्स! जदो सा तावसकण्णआ अणब्भत्थणीआ तदो ताए किं दिठ्ठाए?

---

१. धंसदु दे उच्छाहवुत्तंतो. २. महाराओ. ३. आविरइदविदाणसणा०.
४. दर्शनीयं न. ५. कान्तमात्मानं
६. अहं तु तामेवाश्रम० ७. भोदु ण से पसरं वट्टाइस्सं ।
८. ते तावसकण्णआ अब्भत्थणीआ दीसदि ? राजा—सखे न परिहार्ये वस्तुनि पौरवाणां मनः प्रवर्त्तते । सुरयुवतिसंभवं०० कुसुमम् ।

(भवतु, अस्यावसरं न दास्यामि (प्रकाशम्) भो वयस्य यतः सा तापसकन्यका अनभ्यर्थनीया ततः किं तया दृष्टया ?)

राजा—सखे !

निराकृतनिमेषाभिः पक्ष्मपङ्क्तिभिरुन्मुखः ।
नवामिन्दुकलां लोकः केन भावेन पश्यति[1] ॥८॥

न च परिहार्ये वस्तुनि पौरवाणां मनः प्रवर्त्तते ।

विदू०—[2]ता कहेधि (तत् कथय) ।

राजा— सुर-युवति-संभवं किल मुनेरपत्यं तदुज्झिताधिगतम् ।
अर्कस्योपरि शिथिलं च्युतमिव नवमालिकाकुसुमम् ॥९॥

विदू०—(विहस्य) जह कस्स वि पिंडखज्जूरेहिं उव्वेजिदस्स तिंतिणीए अहिलासो भवे, तह अंतेउर-[3]इत्थिआ-रअण-परिभोइणो भवदो इअं अब्भत्थणा। (यथा कस्यापि पिण्डखर्जूरैरुद्वेजितस्य तिन्तिण्यामभिलाषो भवेत्, तथा अन्तःपुर-स्त्रीरत्नपरिभोगिनो भवत इयमभ्यर्थना ।

राजा—न तावदेनां पश्यसि येन त्वमेवंवादी[4] ।

विदू०—तं क्खु रमणिज्जं जं भवतो वि विम्हअं उप्पादेदि । (तत् खलु रमणीयं यद् भवतोऽपि विस्मयमुत्पादयति ।

राजा—वयस्य ! किं बहुना,—

चित्रे[5] निवेश्य परिकल्पित-[6]सत्त्वयोगा,
रूपोच्चयेन [7]मनसा विधिना कृता नु ।
स्त्रीरत्नसृष्टिरपरा प्रतिभाति सा मे
धातुर्विभुत्वमनुचिन्त्य वपुश्च तस्याः ॥१०॥

---

१. र. १।७३, ४।३ अत्र पुरूहूतध्वजश्चन्द्रः-हे०, ६।३१, ८।६५. अत एव पद्यमिदं मूलतया पठितम् ।

२. तां कहेधि । राजा ललिताप्सरोभवं किल । सुरयुवतिसंभव ००कुसुमम् ।

३. इत्थिआ-रअण-परिभाविणा ४. येनैवमवादीः

५. चित्ते इत्यपपाठः । तथा च विष्णुधर्मोत्तरस्य चित्रसूत्रप्रकरणीये ३५-तमेऽध्याये-'अतः परं प्रवक्ष्यामि चित्रसूत्रं तवानघ । उर्वशीं सृजता प्रोक्तं चित्रसूत्रं नृपात्मज । नारायणेन मुनिना लोकानां हितकाम्यया सहकाररसं गृह्य उर्व्यां चक्रे वरस्त्रियम् । चित्रेण, सा ततो जाता रूपयुक्ता वराप्सराः । यथा नृत्ते तथा चित्रे त्रैलोक्यानुकृतिः स्मृता ॥

६. ०सर्वयोगाद् ७. महता मनसा ।

विदू०—[1]जइ एव्वं पञ्चादेसो [2]क्ख सा रूववदीणं। (यद्येवं, प्रत्यादेशः खलु सा रूपवतीनाम्।)

राजा—इदं च मे मनसि वर्तते,—

अनाघ्रातं पुष्पं किसलयमलूनं कररुहै-
रनाविद्धं[3] रत्नं मधु नवमनास्वादितरसम्।
अखण्डं पुण्यानां फलमिव च तद्रूपमनघं
न जाने भोक्तारं कमिह समुपस्थास्यति विधिः ॥११॥

विदू०—तेण हि लहु लहु परित्ताअदु णं भवं। मा कस्स वि तवस्सिणो इंगुदीतेल्लमिस्सचिक्कणसीस्सस्स हत्थे पडिस्सदि। (तेन हि लघु लघु परित्रायतामेनां भवान्। मा कस्यापि तपस्विन इङ्गुदीतैलमिश्रचिक्कणशीर्षस्य हस्ते पतिष्यति।)

राजा—परवती खलु तत्रभवती। न च संनिहितो गुरुजनः[4]।

विदू०—अध [5]अत्तभवंतं अंतरेण कीदिसो से दिट्ठिराओ? (अत्रभवन्तमन्तरेण कीदृशस्तस्या दृष्टिरागः?।)

राजा—[6]निसर्गादप्रगल्भास्तपस्विकन्यकाः। तथापि तु,—

अभिमुखे मयि [7]संहृतमीक्षणं
हसितमन्यनिमित्त-[8]कृतोदयम्।
विनयवारितवृत्तिरतस्तया
न[9] मदनो विवृतो न च संवृतः ॥१२॥

---

१. सव्वधा पच्चादेसो क्खु सा.। द्र. पच्चादेसो रूपगव्विदाए सिरिगोरिए. वि०-आरम्भे।   २. दाणि।

३. अनाभुक्तं। अत्र प्रथमविशेषणेनैव कन्यकात्वं स्पष्टभूयिष्ठमिति विशेषणान्तराणि दुष्यन्तस्य शकुन्तलार्कामिकां मानसीं क्रियानिर्वृतिमेव प्रकाशयन्तीत्युदात्तत्वविसंवादीनि। नास्ति च प्रयोजनं श्लोकपूर्तेः। तदुक्तमानन्देन 'नातिनिर्वहणैषिते,-ति। 'आविद्धं कुटिलमि'-त्यमरोऽपि नात्र रोद्धा प्रतीयमानसंपत्स्यन्दस्य। उपस्थानं पूजनमित्यन्ये। तत्र पुष्पादीनामुल्लेखः उद्बोधकः। द्र. तु र. ४।६.

४. संनिहितोऽत्र गुरुजनः.

५. तुह उवरि कीदिशो उण से चित्तराओ.

६. 'स्वभावादप्रगल्भास्तपस्विकन्यकाः'.   ७. संवृतमीक्षितं.

८. '०कथोदयम्'.   ९. 'न विवृतो मदनो न च संवृतः' नि.

विदू०—ण[1] खु दिट्ठमेत्तस्स तुह अंकं समारोहदि । (न खलु दृष्टमात्रस्य तवाङ्कं समारोहति ।)

राजा—[2]मिथ:प्रस्थाने पुन: [3]शालीनतयापि काममाविष्कृतो भाव: तत्रभवत्या । तथा हि—

दर्भाङ्कुरेण चरण: क्षत इत्यकाण्डे
तन्वी स्थिता कतिचिदेव पदानि गत्वा ।
आसीद् विवृत्तवदना च विमोचयन्ती
शाखासु वल्कलमसक्तमपि द्रुमाणाम्[4] ।।१३।।

विदू०—[5]गहीदपाधेओ किदोसि ताए । किदं तुए उववणं तवोवणं त्ति पेक्खामि । (तेन हि गृहीतपाथेय: कृतोऽसि तया । कृतं त्वयोपवनं तपोवनमिति पश्यामि ।)

राजा—सखे ! [6]तपस्विभि: कैश्चित् परिज्ञातोऽस्मि । चिन्तय तावत् केनापदेशेन सकृदप्याश्रमे गच्छाम ।

विदू०—णं भवं राआ (ननु भवान् राजा) ।

राजा—तत: किम् ?

विदू०—को अवरो अवदेसो । णीवारछट्ठभाअं अम्हाणं उवहरंतु त्ति । (क: अपरोऽपदेश: ? नीवारषष्ठभागमस्माकमुपहरन्त्विति ।)

राजा—मूर्ख ! [7]अन्यमेव भागमेते तपस्विनो निर्वपन्ति यो रत्नराशीनपि विहायाभिनन्द्यते । पश्य,—

यदुत्तिष्ठति वर्णेभ्यो नृपाणां क्षयि [8]तद् धनम् ।
तप:षड्भागमक्षय्यं ददत्यारण्यका हि न: ।।१४।।

---

१. किं णु खु दिट्ठमेत्तस्स जेव भवदो अङ्कं आरोहदु. २. सखीभ्यां मिथ:प्रस्थाने.
३. तत्रभवत्या मयि भूयिष्ठमाविष्कृतो भाव: ।. ४. वि. १।१७-१८ मध्य-संवादवस्तु.
५. तेण हि गहीदपाहेओ होहि । ता अणुरत्तं तवोवणे तुमं तक्केमि.
६. सखे ! चिन्तय०० वसाम. ७. अन्यद् भागधेयमेतेषां रक्षणे निपतति.
८. तत् फलम्.

(नेपथ्ये)

हन्त, सिद्धार्थौ स्वः ।

राजा—(कर्णं दत्त्वा) अये! [1]धीरप्रशान्तः स्वरः । तपस्विभिर्भवितव्यम् ।

(प्रविश्य)

दौवा०—जेदु भट्टा । एदे दुवे इसिकुमारआ पडिहारभूमिं उवट्ठिदा । (जयतु भर्ता । एतौ द्वौ ऋषिकुमारकौ प्रतीहारभूमिमुपस्थितौ ।)

राजा—[2]अविलम्बितं प्रवेशय ।

दौवा०—एसो पवेसेमि । (निष्क्रम्य, ऋषिकुमाराभ्यां सह प्रविश्य) इदो इदो भवंतौ । (एष प्रवेशयामि ।) (निष्क्रम्य, ऋषिकुमारकाभ्यां सह प्रविश्य) (इत इतो भवन्तौ ।)

(उभौ राजानं विलोकयतः)

प्रथमः—अहो दीप्तिमतोऽपि विश्वसनीयतास्य वपुषः । अथवोपपन्नमेतद् [3]मुनिभ्यो नातिभिन्ने राजनि । कुतः

अध्याक्रान्ता वसतिरमुनाप्याश्रमे सर्वभोग्ये,
रक्षायोगादयमपि तपः प्रत्यहं संचिनोति ।
अस्यापि द्यां स्पृशति वशिनश्चारणद्वन्द्वगीतः
पुण्यः शब्दो मुनिरिति मुहुः केवलं राजपूर्वः ॥१५॥

द्वितीयः—[4]गौतम ! अयं स वलभित्सखो दुष्यन्तः ।

प्रथमः—अथ किम् ? ।

द्वितीयः— तेन हि,—

नैतच्चित्रं यदयमुदधिश्यामसीमां धरित्री-
मेकः कृत्स्नां नगरपरिघ[5]प्रांशुबाहुर्भुनक्ति[6] ।
आशंसन्ते[7] सुरयुवतयो[8] बद्धवैरा हि दैत्यै-
रस्याधिज्ये धनुषि विजयं पौरुहूते च वज्रे ॥१६॥

---

१. ०प्रशान्तस्वरैस्तप नि. २. तेन हि अविलम्बितं प्रवेशय तौ नि०
३. ०दृषिकल्पे राजनि, ऋषिभ्यो. सर्वे. ४. सखे ! अयं ००दुषंतः.
५. माल. ५।२, प्राचीरः कश्चित्, प्रांशुत्वस्य तत्रैव संगतत्वात् । ६. रक्षति.
७. रं १४।५०, 'आङः शसि इच्छायाम्'. ८. समितिषु सुराः सक्तवैराः.

उभौ—(उपगम्य) विजयस्व राजन् ! ।

राजा—(आसनादुत्थाय) अभिवादये भवन्तौ ।

उभौ—स्वस्ति भवते । (फलान्युपहरतः)

राजा—(सप्रणामं परिगृह्य) [1]आज्ञापयितुमिच्छामि ।

उभौ—विदितो [2]भवानाश्रमसदामिहस्थः । ते भवन्तं प्रार्थयन्ते ।

राजा—किमाज्ञापयन्ति ?

उभौ—तत्रभवतः [3]कुलपतेरसांनिध्याद् रक्षांसि नः इष्टिविघ्नमुत्पादयन्ति । तत् कतिपयरात्रं सारथिद्वितीयेन भवता सनाथीक्रियतामाश्रम इति ।

राजा—अनुगृहीतोऽस्मि ।

विदू०—(अपवार्य) [4]अअं दाणिं अणुऊलो दे गलहत्थो । (अयमिदानीम् अनुकूलस्ते गलहस्तः ।)

राजा—(स्मितं कृत्वा) रैवतक ! मद्वचनादुच्यतां सारथिः सबाणासनं रथमुपस्थापयेति ।

दौवा०—जं देवो आणवेदि । (यद्देव आज्ञापयति ।)

(निष्क्रान्तः)

उभौ—(सहर्षम्)

अनुकारिणि पूर्वेषां युक्तरूपमिदं त्वयि ।
आपन्नाभयसत्रेषु दीक्षिताः खलु पौरवाः ।।१७।।

राजा—(सप्रणामम्) गच्छतं भवन्तौ । अहमप्यनुपदमागत एव ।

उभौ—विजयस्व । (निष्क्रान्तौ)

राजा—माधव्य ! अप्यस्ति शकुन्तलादर्शने कुतूहलम् ? ।

विदू०—पढमं सपरीवाहं आसि । दाणिं रक्खसवुत्तंतेण बिंदु वि णावसेसिदो । (प्रथमं सपरीवाहमासीत् । इदानीं राक्षसवृत्तान्तेन विन्दुरपि नावशेषितः ।)

---

१. आगमनप्रयोजनं ज्ञातुमिच्छामि. २. भवानिह स्थितो००स्तपस्विभिस्ते च भवन्तमभ्यर्थयन्ते. ३. कण्वस्य महर्षेरसान्निध्याद्रक्षांसि नस्तपोविघ्न०.
४. एषा दाणिं अणुऊला ते अब्भत्थणा.

राजा—मा भैषीः, ननु मत्समीपे वर्तिष्यसे ।

विदू०—एसो[1] रक्खसादो रक्खिदो म्हि । (एष राक्षसाद् रक्षितोऽस्मि ।)

(प्रविश्य)

दौवा०—सज्जो रधो भट्टिणो विजअप्पत्थाणं अवेक्खदि । एस उण णअरादो देवीणं[2] आणत्तिहरओ करभओ आअदो । (सज्जो रथः भर्तुर्विजयप्रस्थानमपेक्षते । एष पुनर्नगराद् देवीनामाज्ञप्तिहरः करभक आगतः ।)

राजा—(सादरम्) किम् अम्बाभिः प्रेषितः ? ।

दौवा०—अध इं । (अथ किम् ? ।)

राजा—ननु प्रवेश्यताम् ।

दौवा०—तह । (निष्क्रम्य करभकेण सह प्रविश्य) एसो भट्टा, उवसप्प । (तथा) । (निष्क्रम्य करभकेण सह प्रविश्य) एष भर्ता; उपसर्प ।)

कर०—जेदु भट्टा । देवीओ आणवेंदि । (जयतु भर्ता । देव्य आज्ञापयन्ति)

राजा—किमाज्ञापयन्ति ?

कर०– आगामि-चदुट्ठदिअसे पुत्तपिंडपालणो णाम पउत्थपारणो मे उववासो भविस्सदि । तहिं दीहाउणा अवस्सं संभाविदव्वा-त्ति । (आगामिचतुर्थदिवसे पुत्रपिण्डपालनो नाम प्रवृत्तपारणो मे उपवासो भविष्यति । तत्र दीर्घायुषा अवश्यं संभावनीया-इति ।)

राजा—इतस्तपस्विकार्यम्, इतो गुरुजनाज्ञा । द्वयमप्यनतिक्रमणीयम् । किमत्र प्रतिविधेयम् ? ।

विदू०—तिसंकू विअ अंतराले चिट्ठ । (त्रिशङ्कुरिव अन्तराले तिष्ठ ।)

राजा—सत्यमाकुलीभूतोऽस्मि—

कृत्ययोर्भिन्नदेशत्वाद् द्वैधीभवति मे मनः ।
पुरः प्रतिहतं शैले स्रोतः स्रोतोवहो यथा ।।१८।।

---

१. एसो खु तुह चक्करक्खी भूदो म्हि.   २. किमार्याभिः.

(विचिन्त्य) सखे ! त्वमम्वाभिः पुत्र इति प्रतिगृहीतः[१] । अतो भवानितः प्रतिनिवृत्य तपस्विकार्यव्यग्रमानसं मामावेद्य तत्र-भवतीनां पुत्रकृत्यमनुष्ठातुमर्हति ।

विदू०—ण खु मं रक्खोभीरुग्रं गणेसि । (न खलु मां रक्षोभीरुकं गणय ।)

राजा—(सस्मितम्) कथमेतद् भवति संभाव्यते ?

विदू०—तेण हि जह राम्राणुएण गंतव्वं तह गच्छामि । (यथा राजानुजेन गन्तव्यं तथा गच्छामि ।)

राजा—ननु तपोवनोपरोधः परिहरणीय इति सर्वानानुयात्रिकांस्त्वयैव सह [२]प्रस्थापयामि ।

विदू०—ही ही, जुवराओ म्हि दाणिं संवुत्तो । (ही ही, युवराजोऽस्मि इदानीं संवृत्तः ।)

राजा—(आत्मगतम्) चपलोऽयं वटुः । कदाचिदस्मत्प्रार्थनाम् अन्तःपुरेभ्यः कथयेत् । भवतु; एनमेवं वक्ष्ये । (विदूषकं हस्ते गृहीत्वा, प्रकाशम्) वयस्य ! ऋषिगौरवादाश्रमं गच्छामि । न खलु सत्यमेव तापसकन्यायां ममाभिलाषः । पश्य,—

क्व वयम्, क्व परोक्षमन्मथो
मृगशावैः[३] सममेधितो जनः ।
परिहासविजल्पितं[४] सखे !
परमार्थेन न गृह्यतां वचः ॥१९॥

(निष्क्रान्ताः सर्वे)

॥ [५]इति द्वितीयोऽङ्कः ॥

---

१. त्वमार्याभिः पुत्र इव गृहीतः . २. प्रेषयामि.
३. मृगशावैः सह वर्धितो. ४. ०विकल्पितं. ५. इत्याख्यानगुप्तिर्नाम

।।[a]अथ विष्कम्भकः।।

(ततः प्रविशति कुशानादाय यजमानशिष्यः)

शिष्यः—अहो ! महानुभावो[1] राजा दुष्यन्तः । प्रविष्टमात्र एव आश्रमं तत्रभवति[2] निरुपप्लवानि नः कर्माणि ।

का कथा बाणसंधाने ज्याशब्देनैव दूरतः ।
हुंकारेणेव धनुषः स हि विघ्नानपोहति[3] ।।१।।

यावदिमान् वेदिसंस्तरणार्थं दर्भान् ऋत्विग्भ्य उपनयामि[4] । (परिक्रम्यावलोक्य च, आकाशे)

प्रियंवदे ! कस्येदमुशीरानुलेपनं मृणालवन्ति च नलिनीपत्राणि नीयन्ते ? ।

(आकर्ण्य)

किं ब्रवीषि ? आतपलङ्घनाद् बलवसुस्था शकुन्तला; तस्याः शरीरनिर्वापणायेति ?

तर्हि[5], त्वरितं गम्यताम् । सखि ! सा खलु भगवतः कण्वस्य कुलपतेरुच्छ्वसितम् । अहमपि तावद् वैतानिकं[6] शान्त्युदकम्, अस्यै, गौतमीहस्ते विसर्जयिष्यामि ।

(निष्क्रान्तः)

।। इति विष्कम्भकः ।।



---

१. पार्थिवो दुःषन्तः । येन.   a इयमस्मद्योजना

२. एव तत्रभवति निरुपद्रवाणि नः कर्माणि प्रवृत्तानि भवन्ति नि.

३. विघ्नान्व्यपोहति.

४. उपहरामि मा.

५. प्रियंवदे ! यत्नादुपचर्यताम् । सा हि तत्र भगवतः.

६. यज्ञीयम् इत्यर्थः ।

अथ तृतीयोऽङ्कः

(ततः प्रविशति [1]कामयानावस्थो राजा)

राजा—(निःश्वस्य)

जाने तपसो वीर्यं सा बाला परवतीति मे विदितम् ।
[2]न च निम्नादिव सलिलं निवर्तते मे ततो हृदयम् ॥२॥

(मदनबाधां निरूप्य) भगवन् कुसुमायुध ! त्वया चन्द्रमसा च विश्वसनीयाभ्यामतिसंधीयते कामिजनसार्थः । कुतः

तव कुसुमशरत्वं शीतरश्मित्वमिन्दोर्,
द्वयमिदमयथार्थं दृश्यते मद्विधेषु ।
विसृजति हिमगर्भैरग्निमिन्दुर्मयूखैस्,
त्वमपि कुसुमबाणान् वज्रसारीकरोषि[3] ॥३॥

अथवा,

अनिशमपि मकरकेतुर्मनसो रुजमावहन्नभिमतो मे ।
यदि मयि संभृतहृदयां तामधिकृत्य प्रहरतीति[4] ॥

(परिक्रम्य) क्व नु खलु संस्थिते कर्मणि सदस्यैरनुज्ञातः श्रमक्लान्तमात्मानं विनोदयामि ? । (निःश्वस्य) किं नु खलु मे प्रियादर्शनादृते शरणमन्यत् ? यावदेनामन्विष्यामि । (सूर्यमवलोक्य) इमामुग्राम् आतपवेलां प्रायेण लतावलयवत्सु मालिनीतीरेषु ससखीजना शकुन्तला गमयति । तत्रैव

---

१. द्र. २८३ पृ. पादटि०—२.

२. अलमस्मि ततो हृदयं तथापि नेदं निवर्तयितुम् । द्र. कु. ५।५३.

३. भगवन्मन्मथ ! कुतस्ते कुसुमायुधस्य सतस्तैक्ष्ण्यमेतत् ? (स्मृत्वा) आं ज्ञातम्,—अद्यापि नूनं हरकोपवह्निस्त्वयि ज्वलत्यौर्व इवाम्बुराशौ ।
त्वमन्यथा मन्मथ मद्विधानां भस्मावशेषः कथमेवमुष्णः ? ॥

४. भगवन् ! 'वृथैव संकल्पशतैरजस्रमनङ्ग ! नीतोऽसि मयातिवृद्धिम् ।
आकृष्य चापं श्रवणोपकण्ठे मय्येव युक्तस्तव बाणमोक्षः ॥'
क्व नु खलु निरस्तविघ्नैस्तपस्विभिरनुज्ञातः खिन्नमात्मानं विनोदयामि.

तावद् गच्छामि[१]। अनया बालपादपवीथ्या सुतनुरचिरगतेति तर्कयामि। कुतः—

संमीलन्ति न तावद् बन्धनकोशास्तयाऽवचितपुष्पाः।
क्षीरस्निग्धाश्चामी दृश्यन्ते किसलयच्छेदाः ॥४॥

(परिक्रम्य संस्पर्शं रूपयित्वा) अहो, प्रवातसुभगोऽयमुद्देशः।

शक्यमरविन्दसुरभिः कणवाही मालिनीतरङ्गाणाम्।
अङ्गैरनङ्ग[२]तप्तैरविरलमालिङ्गितुं पवनः ॥५॥

(परिक्रम्यावलोक्य च) अस्मिन् वेतसपरिक्षिप्ते लतामण्डपे भवितव्यं तया। तथा हि (अधो विलोक्य)—

अभ्युन्नता पुरस्तादवगाढा जघनगौरवात् पश्चात्।
द्वारेऽस्य पाण्डुसिकते पदपङ्क्तिर्दृश्यतेऽभिनवा[३] ॥६॥

यावद् विटपान्तरेण अवलोकयामि। (परिक्रम्य, तथा कृत्वा, सहर्षम्) अये, लब्धं नेत्रनिर्वाणम्। एषा मे मनोरथप्रियतमा सकुसुमास्तरणं शिलापट्टमधिशयाना सखीभ्यामन्वास्यते। भवतु। श्रोष्यामि आसां विस्रम्भकथितानि। (विलोकयन् स्थितः)

(ततः प्रविशति यथोक्तव्यापारा सह सखीभ्यां शकुन्तला)

सख्यौ—(उपवीज्य सस्नेहम्) हला सउंदले! अवि सुहेदि दे णलिणीपत्तवादो?। (हला शकुन्तले! अपि सुखयति ते नलिनीपत्रवातः?।)

शकु०—किं वीअअंति मं सहीओ?। (किं वीजयतो मां सख्यौ?।)

(सख्यौ विषादं नाटयित्वा परस्परमवलोकयतः)

राजा—बलवदसुस्थशरीरा शकुन्तला दृश्यते (सवितर्कम्) तत् किमयमयमातपदोषः स्यात्, उत यथा मे मनसि वर्तते?। (साभिलाषं निर्वर्ण्य) अथवा कृतं संदेहेन,—

स्तनन्यस्तोशीरं शिथिलितमृणालैकवलयं
प्रियायाः साबाधं किमपि[४] कमनीयं वपुरिदम्।
समस्तापः कामं मनसिजनिदाघप्रसरयो-
र्न तु ग्रीष्मस्यैवं [५]सुभगमपराद्धं युवतिषु ॥७॥

---

१. निर्दयमालि. २. अस्मिन्नेव वेतसलतामण्डपे भवितव्यं शकुन्तलया.
३. वि. ४।६ श्लोकः। ४. 'तदपि',
५. सुलभमिति पाठे रक्ष्येत सारवत्त्वं चक्रवर्तिजननीत्वौपयिकम्। द्र. कु. ५।१९।

प्रियं॰—(जनान्तिकम्) अणसूए ! तस्स राएसिणो पढमदंसणादो आरहिय [१]पज्जुस्सुआ विअ सउंदला। किं णु खु से [२]तण्णिमित्तो अअं भवे ?। (अनसूये ! तस्य राजर्षेः प्रथमदर्शनादारभ्य पर्युत्सुकेव शकुन्तला। किं नु खलु तस्यास्तन्निमित्तोऽयमातङ्को भवेत् ?।

अन॰—सहि ! मम वि[३] ईदिसी आसंका हिअअस्स। होदु; पुच्छिस्सं दाव णं (प्रकाशम्) सहि ! पुच्छिदव्वासि किंपि। वलवं[४] खु दे संदावो[५]। (सखि ! ममापीदृशी आशङ्का हृदयस्य। भवतु, प्रक्ष्यामि तावदेनाम्। (प्रकाशम्) सखि ! प्रष्टव्यासि किमपि। बलवान् खलु ते संतापः।)

शकु॰—(पूर्वार्धेन शयनादुत्थाय) हला ! किं[६] वत्तुकामासि ?। (हला ! किं वक्तुकामासि ?।)

अन॰—हला सउंदले ! अणब्भंतरा खु अम्हे मदणगदस्स वुत्तंतस्स। किंदु जादिसी इदिहासणिबंधेसु कामअमाणाणं अवत्था सुणीअदि [७]तादिसीं दे पेक्खामि; कहेहि किंणिमित्तं दे[८] संदावो। विआरं खु परमत्थदो अजाणिअ अणारंभो पडिआरस्स। (हला शकुन्तले ! अनभ्यन्तरे खल्वावां मदनगतस्य वृत्तान्तस्य। किंतु यादृशी इतिहासनिबन्धेषु कामयमानानामवस्था श्रूयते तादृशीं तव पश्यामि; कथय किंनिमित्तस्ते संतापः। विकारं खलु परमार्थतः अज्ञात्वा अनारम्भः प्रतीकारस्य।)

राजा—[९]अनसूयामप्यनुगतो, मदीयस्तर्कः। नहि स्वाभिप्रायेण मे दर्शनम्।

शकु॰—(आत्मगतम्) वलवं खु मे अहिणिवेसो। दाणिं वि सहसा एदाणं ण सक्कणोमि णिवेदिदुं। (बलवान् खलु मेऽभिनिवेशः। इदानीमपि सहसा एतयोर्न शक्नोमि निवेदयितुम्।)

---

१. पज्जस्सुअमणा सउंतला. २. अण्णणिमित्तो.

३. ममावि एरिसी आसंका। भोदु, पुच्छिस्सं। सहि. ४. बलीओ खु.

५. 'राजा—वक्तव्यमेव,-शशिकरविशदान्यस्यास्तथा हि दुःसहनिदाघशंसीनि।
भिन्नानि श्यामिकया मृणालनिर्माणवलयानि॥

६. भण जं वत्तुकामासि. ७. तादिसी तुहत्ति तक्केमि. ८. दे आआसो.

९. अनुसूययापि मदीयस्तर्कोऽनुगतः, अनु०॰वगतः मा.। शकुं॰—बलीओ खु मे आआसो। ण सहसा सक्कणोमि.

प्रियं०—सहि सउंदले ! सुट्ठु एसा भणादि । किं अत्तणो आतंकं[1] उवेक्खसि ? । अणुदिअहं खु परिहीअसि अंगेहिं । केवलं लावण्णमई छाआ तुमं ण मुंचदि । (सखि शकुन्तले ! सुष्ठु एषा भणति । किमात्मन आतङ्कमुपेक्षसे ? । अनुदिवसं खलु परिहीयसेऽङ्गैः । केवलं लावण्यमयी छाया त्वां न मुञ्चति ।)

राजा—अवितथमाह प्रियंवदा । तथा हि,—

क्षामक्षामकपोलमाननमुरः काठिन्यमुक्तस्तनं
मध्यः क्लान्ततरः प्रकामविनतावंसौ छविः पाण्डुरा[2] ।
शोच्या च प्रियदर्शना च मदन-[3]क्लिष्टेयमालक्ष्यते
पत्राणामिव शोषणेन मरुता स्पृष्टा लता माधवी ॥८॥

शकु०—सहि ! कस्स वा अण्णस्स कहइस्सं ? किदु आआसइत्तिआ दाणिं वो भविस्सं[2] । (सखि ! कस्य वा अन्यस्य कथयिष्यामि ? । किन्तु आयासयित्री इदानीं वां भविष्यामि ।)

उभे— अदो एव्व क्खु णिब्बंधो । सिणिद्धजणसंविभत्तं[4] हि दुक्खं सज्झवेअणं भोदि । (अत एव खलु निर्बन्धः । स्निग्धजनसंविभक्तं हि दुःखं सह्यवेदनं भवति ।)

राजा—

पृष्टा जनेन समदुःखसुखेन[5] वाला
नेयं न वक्ष्यति मनोगतमाधिहेतुम् ।
दृष्टो विवृत्य[6] वहुशोऽप्यनया सतृष्ण-
मत्रान्तरे श्रवणकातरतां गतोऽस्मि ॥९॥

शकु०—सहि[2] ! जदो पहुदि मम दंसणपहं आअदो सो तवोवणरक्खिदा राएसी, (अर्धोक्ते लज्जां नाटयति) । (सखि ! यतः प्रभृति मम दर्शनपथमागतः स तपोवनरक्षिता राजर्षिः (अर्धोक्ते लज्जां नाटयति) ।

उभे— कहेहु पिअसहि । (कथयतु प्रियसखी) ।

शकु०—तदो आरहिअ तग्गदेण अहिलासेण एतदवत्थम्हि संवुत्ता । (तत आरभ्य तद्गतेनाभिलाषेणैतदवस्थास्मि संवृत्ता[7] ।)

---

१. उवदव्वं णिगूहसि. २. पाण्डरा. ३. ग्लाने०,
४. संविभत्तं ५. द्र. र ८।६५ । ६. निवृत्य नि.
७. उभे—दिट्ठिआ इदाणिं दे अणुरूवे वरे अहिणिवेसो । अध वा, साअरं उज्झिअ कहिं वा महाणदीए पविसिदव्वं ? ।

राजा—(सहर्षम्) श्रुतं यत् श्रोतव्यम्;

स्मर एव तापहेतुर्निर्वापयिता स एव मे जातः।
दिवस इवाभ्र[1]श्यामस्तपात्यये जीवलोकस्य ॥१०॥

शकु०—तं जइ वो अणुमदं ता तह वट्टह जह तस्स राएसिणो अणुकंपणिज्जा होमि। अण्णहा अवस्सं सिंचध मे तिलोदग्रं। (तद् यदि वामनुमतम्, तदा, तथा वर्तेथाम्, यथा, तस्य राजर्षेरनुकम्पनीया भवामि। अन्यथा अवश्यं सिञ्चतं मे तिलोदकम्।)

राजा—[2]संशयच्छेदि वचनम्।

प्रियं—(जनान्तिकम्) अणसूए ! दूरगअमम्महा अक्खमा इग्रं [3]कालहरणस्स। जस्सि वद्धभावा एसा सो ललामभूदो पोरवाणं। ता जुत्तं से ग्रहिलासो अहिणंदिदुं। (अनसूये ! दूरगतमन्मथा अक्षमेयं कालहरणस्य। यस्मिन् बद्धभावैषा स ललामभूतः पौरवाणाम्। तद् युक्तमस्या अभिलाषोऽभिनन्दितुम्।)

अन०—सहि ! तह, जह भणसि। (सखि ! तथा, यथा भणसि।)

प्रियं०—(प्रकाशम्) सहि ! दिट्ठिआ अणुरूवो दे अहिणिवेसो। साअरं उज्झिअ कहिं वा महाणई ओदरइ ? को दाणि सहआरं अंतरेण अदिमुत्तलदं पल्लविदं सहेदि ?। (सखि ! दिष्ट्या अनुरूपस्तेऽभिनिवेशः[4]। सागरमुज्झित्वा कुत्र वा महानदी अवतरति ? क इदानीं सहकारमन्तरेणातिमुक्तलतां पल्लवितां सहते ?)

राजा—किमत्र चित्रं यदि विशाखे शशाङ्कलेखामनुवर्तते ?।

अन०—को उण उवाओ भवे जेण अविलंविअं णिहुग्रं ग्र सहीए मणोरहं संपादेम्ह ?। (कः पुनरुपायो भवेद् येनाविलम्बितं निभृतं च सख्या मनोरथं संपादयावः ?।)

प्रियं०—णिहुअंत्ति चिंतणिज्जं भवे। सिग्घंत्ति सुअरं। (निभृतमिति चिन्तनीयं भवेत्। शीघ्रमिति सुकरम्।)

अन०—कहं विअ ? (कथमिव ?)

---

१. ०र्घ०। २. विमर्श०.
३. ०हरणस्स। अनु०—प्रिअंवदे ! को उवाओ भवे जेण अविलंबिदं णिहुदं च सहीए मणोरधं संपादेमो। ४. कु. ५।७

प्रियं०—णं सो राएसी इमस्सिं सिणिद्धदिट्ठीए सूइदाहिलासो इमाइं दिअहाइं पज्जाअरकिसो लक्खीअदि। (ननु स राजर्षिरेतस्यां स्निग्धदृष्ट्या सूचिताभिलाषः एतान् दिवसान् प्रजागरकृशो लक्ष्यते।)

राजा—सत्यमित्थंभूत एवास्मि तथा हि,—

इदमशिशिरैरन्तस्तापाद्[1] विवर्णमणीकृतं
निशि निशि भुजन्यस्तापाङ्ग[2]प्रसारिभिरश्रुभिः।
अनतिलुलितज्याघाताङ्कं[3] मुहुर्मणिबन्धनात्
कनकवलय[4] स्रस्तं स्रस्तं मया प्रतिसार्यते॥१०॥

प्रियं०—(विचिन्त्य) [5]हला! मअणलेहो से करीअदु। इमं देवता-सेसा[5]-वदेसेण सुमणोगोविदं करिअ से हत्थअं पावइस्सं। (हला! मदनलेखोऽस्य क्रियताम्। इमं देवता-शेषापदेशेन सुमनोगोपितं कृत्वा तस्य हस्तं प्रापयिष्यामि।)

अन०—रोअइ[6] मे सुउमारो पओओ। किं वा सउंदला भणदि?। (रोचते मे सुकुमारः प्रयोगः। किं वा शकुन्तला भणति?।)

शकु०—को णिओओ विकप्पीअदि?। (को नियोगो विकल्प्यते?।)

प्रियं०—तेण हि अत्तणो [7]उवण्णासाणुरूवं चिंतेहि दाव ललिअपद-बंधणं। (तेन हि, आत्मनः उपन्यासानुरूपं चिन्तय तावल्ललितपदबन्धनम्।)

शकु०—हला! [8]चिंतेमि अहं। अवहीरणभीरुअं पुणो [9]वेवइ मे हिअअं। (हला! चिन्तयाम्यहम्। अवधीरणाभीरु पुनर् वेपते मे हृदयम्।)

---

१. अशिशिरतरैरन्तस्तापैर्वि०. २. ०वर्त्ति०, ०वृत्ति० सा.
३ अनभि००ङ्कान् ४. मे १।२. ५. हला अणसूए! मअणलेहो दाणिं से करीअदु। तं अहं सुमणोगोविदं कदुअ देवप्पासादावदेसेण तस्स रण्णो हत्थं०। शेषाशब्दाय कु. ३।२२, र १७।७९ अत्रैव ७।२
६. सहि! रोअदि. ७. उवण्णासपुव्वं चिंतेहि किं पि ललिदोवणिबंधणं.
८. चिंतइस्सं. ९. वेवदि.

राजा—(सहर्षम्)—

अयं स ते तिष्ठति संगमोत्सुको
विशङ्कसे भीरु! यतोऽवधीरणाम्।
लभेत वा प्रार्थयिता न वा [1]श्रियं,
श्रिया दुरापः कथमीप्सितो भवेत्[2] ? ।।११।।

सख्यौ—अइ! अत्तगुणावमाणिणि! को णाम[3] सरीरणिव्वापइत्तिअं सारदिअं [4]जोसिणिं पडंतेण वारेदि ? । (आत्मगुणावमानिनि! को नाम शरीरनिर्वापयित्रीं शारदीं ज्योत्स्नां पटान्तेन वारयति ? ।)

शकु०—(सस्मितम्) णिओइआ दाणिं म्हि। (नियोजिता इदानीमस्मि।)
(उपविष्टा चिन्तयति)

राजा—स्थाने खलु विस्मृत-[5]निमेषेण चक्षुषा प्रियामवलोकयामि। यतः,—

उन्नमितकभ्रूलतमाननमस्याः पदानि रचयन्त्याः।
कण्टकितेन[6] प्रथयति मय्यनुरागं कपोलेन ।।१२।।

शकु०—[7]हला! चिंतिदं मए गीदवत्थु, ण [8]सण्णिहिदाणि उण लेहसाहणाणि। (हला! चिन्तितं मया गीतवस्तु। न संनिहितानि पुनर्लेखसाधनानि।)

प्रियं—णं [9]इमस्सिं सुओदरसुउमारे णलिणीपत्ते पत्तच्छेदभत्तीए णहेहिं णिक्खित्तवण्णं करेहि। (ननु एतस्मिन् शुकोदरसुकुमारे नलिनीपत्रे पत्रच्छेदभक्त्या नखैर् निक्षिप्तवर्णं कुरु।)

शकु०—(यथोक्तं रूपयित्वा) [10]हला! सुणुह दाव संगदत्थं ण वे त्ति।

---

१. श्रियो. २. अपि च—
अयं स यस्मात्प्रणयावधीरणामशङ्कनीयां करभोरु! शङ्कसे।
उपस्थितस्त्वां प्रणयोत्सुको जनो न रत्नमन्विष्यति मृग्यते हि तत् ।।

३. दाणिं. नि. ४. जोण्हं आदवत्तेण वारइस्सदि.
५. विस्मृति०. ६. पुलकाचितेन कथयति.
७. हला चिंतिदा मए गीदिआ. ८. ण खु, असंणिहि००लेहसाहणाइं.
९. णं इमस्सिं००णलिणीवत्ते पतच्छेदभत्तीए णहेहिं आलिहीअदु.
१०. सुणध दाणिं.

(हला ! शृणुतं तावत्, संगतार्थं न वेति ।)

उभे— अवहिदे[१]म्ह । (अवहिते स्वः ।)

शकु०—(वाचयति)

तुज्झ ण आणे हिअअं मम उण [२]मदनो दिवा वि र्त्ति वि ।
णिग्घिण[३] ! तवइ बलीअं तुइ वुत्तमणोरहाइँ अंगाइं ॥१३॥

(तव न जाने हृदयं मम पुनः कामो दिवापि रात्रावपि ।
निर्घृण ! तपति बलीयस्त्वयि वृत्तमनोरथान्यङ्गानि ॥)

राजा—(सहसोपसृत्य)

तपति तनुगात्रि ! मदनस्त्वामनिशं मां पुनर्दहत्येव ।
ग्लपयति यथा शशाङ्कं न तथा हि कुमुद्वतीं दिवसः ॥१४॥

सख्यौ—(सहर्षम्) साअदं [४]अविलंबिणो मणोरहस्स ।
(स्वागतमविलम्बिनो मनोरथस्य ।) (शकुन्तलाऽभ्युत्थातुमिच्छति)

राजा—अलमलमायासेन

संदष्टकुसुमशयनान्याशु-[५]विर्वाणितमृणालवलयानि ।
गुरुपरितापानि न ते गात्राण्युपचारमर्हन्ति ॥१५॥

अन०—इदो सिलातलेक्कदेसं अलंकरेदु महाराओ ।[६] (इतः शिलातलैक-देशमलंकरोतु महाराजः)

(राजा उपविशति, शकुन्तला सलज्जा[७] किञ्चिदपसरति)

राजा—कच्चित् सखीं वो नातिबाधते शरीरतापः ?

---

१. अवहिदाओ.

२. कामो दिवा अ र्त्ति च रत्तिम्मि-नि. दुष्यन्त-प्रतिवचने मदनशब्दस्यैव प्रयोगादत्रापि मदनशब्द एव युक्तः ।

३. णिक्किव ! दावइ बलिअं तुह हुत्तमणोरहाइ अंगाइ.

४. जधा समीहिदफलस्स अवि० द्र. र. ३।९ एवमन्यत्राप्यनेकशः ।

५. ०क्लान्तबिसभङ्गसुरभीणि, ०विमर्दितमृ००नि०., ६. वअस्सो

७. तिष्ठति । प्रियं० दुवेणं णु वो अण्णोण्णाणुराओ पच्चक्खो । सहीसिणेहो उण मं पुणरुत्तवादिणिं करेदि । राजा-भद्रे०००जनयति । प्रियं०-आवण्णस्स०० होदव्वं त्ति वो धम्मो । राजा-नास्मात् परम्, अस्मात् परं किं तत् ।

प्रियं०—[1]संपदं उपसमं गमिस्सदि ।

शकु०—(ससाध्वसमात्मगतम्) हिअअ ! तथा उत्तम्मिअ दाणिं किं ण, ण किं पि पडिवज्जसि (हृदय ! तथा उत्ताम्य इदानीं किं न, न किमपि प्रतिपद्यसे ?)

अन०—महाभाअ । अत्थि प्रियंवदा किं पि वत्तुकामा ।
(महाभाग ! अस्ति प्रियंवदा किमपि वक्तुकामा ।

प्रियं०—महाराअ ! ण किं वि । सखीसणेहो मं पुणरुत्तवादिणिं करिस्सदि । (महाराज ! न किमपि, सखीस्नेहो मां पुनरुक्तवादिनीं करिष्यति)

राजा—भद्रे ! नैतत् परिहार्यम् । विवक्षितं हि अनुक्तमनुतापं जनयति ।

प्रियं—तेण हि सुणादु महाराओ (तेन हि शृणोतु महाराजः)

राजा—अवहितोऽस्मि ।

प्रियं०—णणु आवण्णस्स [2]विसअवासिणो जणस्स अत्तिहरेण रण्णा होदव्वम् । (ननु आपन्नस्य विषयवासिनो जनस्य आर्त्तिहरेण राज्ञा भवितव्यम्) ।

राजा—नन्वेष नो धर्मः ।

प्रियं०—तेण हि इअं णो पिअसही तुमं उद्दिसिअ इमं अवत्थंतरं भअवता मअणेण आरोविदा । ता अरुहसि अब्भुववत्तीए जीविदं से अवलंविदुं । (तेन हि इयमावयोः प्रियसखी, त्वामुद्दिश्य इदमवस्थान्तरं भगवता मदनेनारोपिता । तत् अर्हसि अभ्युपपत्त्या जीवितमस्या अवलम्बितुम् ।)

राजा—भद्रे ! साधारणोऽयं[3] प्रणयः । सर्वथा अनुगृहीतोऽस्मि ।

---

१. लंद्धोसधो संपदं०   २. अस्सम०, । विषयो जनपदः, चित्तविक्रिया च ।
३. वि. २।१

शकु०—(¹प्रियंवदामवलोक्य) हला ! किं अंतेउर-विरहपज्जुंस्सुअस्स राएसिणो उवरोहेण ? । (हला ! किमन्तःपुरविरहपर्युत्सुकस्य राजर्षेरुपरोधेन ? ।)

राजा—

इदमनन्यपरायणमन्यथा हृदयसंनिहिते ! हृदयं मम ।
यदि समर्थयसे मदिरेक्षणे! मदनवाणहतोऽस्मि² हतः पुनः॥१६॥

अन०—³महाराअ ? वहुवल्लहा राम्राणो सुणोअंति । ता जहा इअं णो पिअसही वंधुअणसोअणिज्जा ण भोदि तइ णिव्वत्तेहि । (वयस्य ! बहुवल्लभा राजानः श्रूयन्ते । यथा इयं नौ प्रियसखी बन्धुजनशोचनीया न भवति तथा निर्वर्तय ।)

राजा—भद्रे ! किं वहुना,—

परिग्रहवहुत्वेऽपि द्वे प्रतिष्ठे कुलस्य मे ।
समुद्ररसना⁴ चोर्वी सखी च युवयोरियम् ॥१७॥

उभे—णिव्वुदेम्ह । (निर्वृते स्वः ।)

रूपान्तरम्

उभे—'णिव्वुदाओ म्ह । (शकुन्तला हर्षं सूचयति) प्रियं०—अणुसूए ! पेक्ख पेक्ख मेहवादाहदं विअ गिम्हमोरिं खणे खु पच्चाअदजीविदं पिअसहिं. शकु०—मरिसावेध लोअवालं जं अम्हेहिं वीसद्धपलाविणीहिं उवआरादिक्कमेण भणिदं । उभे—(सस्मितम्) जेण तं मंतिदं सो जेव मरिसावेदु; अण्णस्स को अच्चो । शकु०—अरिहदि खु महाराओ इमं पच्चक्खवणं विसोढुं । परोक्खं वा किं ण मंतीअदि । राजा (सस्मितम्)—अपराधमिमं ततः सहिष्ये यदि रम्भोरु ! तवाङ्गसङ्गसंसृष्टे । कुसुमास्तरणे क्लमापहं मे सुजनत्वादनुमन्यसेऽवकाशम् । प्रियं०—ण एत्तिएण उण तुट्ठीभविस्सदि । शकु०—विरम दुल्ललिदे ! । एदावत्थं गदाए वि मए कीलसि अनु०—(बहिर्विलोक्य) प्रियंवदे । एसो तपस्सिमिअपोदओ इदो तदो दिण्णदिट्ठी णूणं मादरं पब्भट्ठं अणुसरेदि । ता संजोएमि दाव णं प्रियं०—हला, चवलो क्खु एसो । णं णिवारिदुं एकाकी ण पारेसि । ता अहं वि सहा—

१. सप्रणयकोपस्मितम्
२. अस्मीत्यहमर्थे विभक्तिप्रतिरूपकमव्ययम् ।
३. वअस्स.
४. ०रशना, ०वसना

प्रियं०—(सदृष्टिक्षेपम्) अणसूए ! जह एसो इदो दिण्णदिट्ठी उत्सुओ मिअपोदओ मादरं अण्णेसदि। एहि; संजोएम णं (अनसूये ! यथैष इतो दत्तदृष्टिरुत्सुको मृगपोतको मातरमन्विष्यति, एहि; संयोजयाव एनम् ।) (उभे प्रस्थिते)

शकु०—हला ! असरण म्हि। अण्णदरा वो आअच्छदु।
(हला ! अशरणास्मि । अन्यतरा युवयोरागच्छतु ।)

उभे—पुहवीए जो सरणं सो तुह समीवे वट्टइ ।
(पृथिव्या यः शरणं स तव समीपे वर्तते ।) (निष्क्रान्ते)

शकु०—कहं गदाओ एव्व ? । (कथं गते एव ?।)

राजा—अलमावेगेन । नन्वयमाराधयिता जनस्तव समीपे वर्तते ।

किं सीकरैः [1]क्लमविनोदिभिरार्द्रवातं
संचारयामि नलिनीदलतालवृन्तम् ? ।
अङ्के निधाय करभोरु ! यथासुखं ते
संवाहयामि चरणावुत पद्मताम्रौ ॥१८॥

—अत्तणं करइस्सं । (उभे प्रस्थिते ।) शकु०—इदो अण्णदो ण वो गं अणुमण्णे जदो असहाइणि म्हि । उभे—(सस्मितम्) तुमं दाव असहाइणि जाए पुहिवीणाहो समीवे वट्टदि (निष्क्रान्ते ।) शकु०—कधं गदाओ पिअसहीओ राजा—(दिशोऽवलोक्य) सुन्दरि ! अलमावेगेन । ननु अयम् आराधयिता जनस्ते सखीभूमौ वर्त्तते । तदुच्यतां—'किं शीकरैः ००अङ्के नि० ०ताम्रौ संवा० ०करभोरु यथासुखं ते' । शकु०—ण माणणी एसु०

(धारयति) । शकुं०—मुंच मुंच ण खु अत्तणो पहवामि; अध वा सहीमेत्तसरणा किं दाणिं एत्थ करइस्सं ? राजा—धिक्; व्रीडितोऽस्मि । शकुं०—ण खु महाराअं भणामि । देव्वं उवालहामि । राजा—अनुकूलकारि दैवं किमुपालभ्यते ? शकुं०—कधं दाणिं उवालहिस्सं जं मं अत्तणो अणीसं परगुणेहिं लोहावेदि ? । राजा—(स्वगतम्) 'अप्यौत्सुक्ये महति दयितप्रार्थनासु प्रतीपाः कांक्षन्त्योऽपि व्यतिकरसुखं कातराः स्वाङ्गदाने । आबाध्यन्ते न खलु मदनेनैव लब्धान्तरत्वादाबाधन्ते मनसिजमपि क्षिप्तकालाः कुमार्यः ॥' (शकुन्तला गच्छत्येव) राजा—कथमात्मनः प्रियं न करिष्ये ? (उपसृत्य पटान्तरमवलम्बते)—

१. शीतलैः, ०वातान्, ०वृत्तैः—पा०

शकु०—ण माणणीएसु अत्ताणं अवराहइस्सं। (न माननीयेष्वात्मानमपराधयिष्ये।) (उत्थाय गन्तुमिच्छति)

राजा—सुन्दरि! [1]अनिर्वाणो दिवसः। इयं च ते शरीरावस्था,

उत्सृज्य कुसुमशयनं नलिनीदलकल्पितस्तनावरणा।
कथमातपे गमिष्यसि परिबाधा-[2]पेलवैरङ्गैः? ॥१९॥

(बलादेनां निवर्तयति)

शकु०—पोरव! रक्ख विणअं। मअणसंतत्तावि ण हु अत्तणो पहवामि। (पौरव! रक्ष विनयम्। मदनसंतप्तापि न खल्वात्मनः प्रभवामि।)

शकुं०—पौरव रक्खाविणअं। इदो तदो इसीओ संचरंति। राजा—सुन्दरि! अलं गुरुजनाद् भयेन ०००श्चानुमोदिताः।

(दिशोऽवलोक्य) कथं प्रकाशं निर्गतोऽस्मि॥ (शकुन्तलां हित्वा पुनस्तैरेव पदैः प्रतिनिवर्तते) शकुं०—(पदान्तरे प्रतिनिवृत्य साङ्गभङ्गं) पोरव! अणिच्छापूरओ वि संभासणमेत्तएण परिचिदो अअं जणो ण विसुमरिदव्वो। राजा—सुन्दरि, 'त्वं दूरमपि गच्छन्ती हृदयं न जहासि मे। दिनावसानच्छायेव पुरोमूलं वनस्पतेः॥' शकुं०—(स्तोकमन्तरं गत्वात्मगतम्) हद्धी हद्धी, इमं सुणिअ ण मे चलणा पुरोमुहा पसरंति। भोदु, इमेहिं पज्जंतकुरुवएहिं ओवारिदसरीरा पेक्खिस्सं दाव से भावाणुबंधं। (तथा कृत्वा स्थिता) राजा—कथमेवं प्रिये अनुरागैकरसं मामुत्सृज्य निरपेक्षैव गतासि। 'अनिर्दयोपभोग्यस्य रूपस्य मृदुनः कथम्। कठिनं खलु ते चेतः शिरीषस्येव बन्धनम्॥' शकुं०—एदं सुणिअ णत्थि मे विहवो गच्छिदुं। राजा—संप्रति प्रियाशून्ये किमस्मिन् करोमि। (अग्रतोऽवलोक्य) हन्त! व्याहतं गमनम्। 'मणिबन्धनगलितमिदं संक्रान्तोशीरपरिमलं तस्याः। हृदयस्य निगडमिव मे मृणालवलयं स्थितं पुरतः॥' (सबहुमानमादत्ते) शकुं०—(हस्तं विलोक्य) अम्मो, दोब्बल्लसिढिलदाए परिब्भट्टं पि मुणालवलअं मए ण परिण्णादं। राजा—(मृणालवलयमुरसि निक्षिप्य) अहो स्पर्शः। 'अनेन लीलाभरणेन ते प्रिये विहाय कान्तं भुजमत्र तिष्ठता। जनः समाश्वासित एष दुःखभागचेतनेनापि सता न तु त्वया॥' शकुं०—अदो वरं असमत्थ म्हि विलंबिदुं। भोदु, एदेण जेव—

---

१. अपरिनिर्वाणो. २. कोमलैरङ्गैः

राजा—भीरु ! अलं गुरुजनभयेन । दृष्ट्वा ते विदितधर्मा तत्रभवान्न तत्र दोषं ग्रहीष्यति कुलपतिः । अपि च,—

गान्धर्वेण[1] विवाहेन बह्व्यो राजर्षिकन्यकाः ।
श्रूयन्ते परिणीतास्ताः पितृभिश्चाभिनन्दिताः ॥२०॥

शकु०—मुंच दाव मं । भूओ वि सहीजणं अणुमाणइस्सं । (मुञ्च तावन्माम् । भूयोऽपि सखीजनमनुमानयिष्ये ।)

—अवदेसेण अत्ताणअं दंसइस्सं । (उपसर्पति) राजा—(दृष्ट्वा सहर्षम्) अये, जीवितेश्वरी मे प्राप्ता । परिदेवितानन्तरं प्रसादेनोपकर्तव्योऽस्मि खलु दैवस्य । 'पिपासक्षामकण्ठेन याचितं चाम्बु पक्षिणा । नवमेघोज्झिता चास्य धारा निपतिता मुखे ॥' शकुं०—(राज्ञः प्रमुखे स्थित्वा) अज्ज, अद्धपधे सुमरिअ एदस्स हत्थ-भंसिणो मुणालवलअस्स किदे पडिणिउत्त म्हि । आचक्खिदं विअ मे हिअएण तए गहिदं ति । ता णिक्खिव एदं । मा मं अत्ताणअं च मुणिअणेसुं पआसइस्ससि । राजा—एकेनाभिसंधिना प्रत्यर्पयामि । शकुं०—केण उण । राजा—यदिदमहमेव यथास्थानं निवेशयामि । शकुं०—(आत्मगतम्) का गदी । (उपसर्पति) राजा-इतः शिलापट्टकमेव संश्रयाव । (उभौ परिक्रम्योपविष्टौ) राजा—शकुंतलाया हस्तमादाय अहो स्पर्शः । 'हरकोपाग्निदग्धस्य दैवेनामृतवर्षिणा । प्ररोहः संभृतो भूयः किं स्वित् कामतरोरयम्' ॥ शकुं०—(स्पर्शं रूपयित्वा) तुवरदु तुवरदु अज्जउत्तो । राजा—(सहर्षमात्मगतम्) इदानीमपि विश्वस्तः । भर्तुराभाषणपद-—मेतत् । (प्रकाशम्) सुन्दरि, नातिश्लिष्टः संधिरस्य मृणालवलयस्य । यदि तेऽभिप्रेतमन्यथा घटयिष्यामि । शकुं०—(स्मितं कृत्वा) जधा दे रोअदि । राजा—(सव्याजं विलम्ब्य प्रतिमुच्य) सुन्दरि, दृश्यताम् । 'अयं स ते श्यामलता-मनोहरं विशेषशोभार्थमिवोज्झिताम्बरः । मृणालरूपेण नवो निशाकरः करं समेत्योभयकोटिमाश्रितः ॥' शकुं०—ण दाव णं पेक्खामि । पवणुक्कंपिणा अण्णुप्पलरेणुणा कलुसीकिदा मे दिट्ठी । राजा—(सस्मितम्) यदि मन्यसे अहमेनां वदनमारुतेन विशदां करिष्ये । शकु०—तदो अणुकंपिता भवे । किं उण ण दे—

---

१. मनुः—इच्छयान्योन्यसंयोगः कन्यायाश्च वरस्य च ।
गान्धर्वः स तु विज्ञेयो मैथुन्यः कामसंभवः इति ॥ (३।३२)
याज्ञवल्क्यश्च 'गान्धर्वः समयान्मिथः' (१।६१)

राजा—भवतु; मोक्ष्यामि ।

शकु०—कदा ? (कदा ? ।)

राजा—

अपरिक्षतकोमलस्य यावत् कुसुमस्येव नवस्य षट्पदेन ।
अधरस्य पिपासता मया ते सदयं सुन्दरि ! गृह्यते रसोऽस्य ।।२१।।

(मुखमस्याः समुन्नमयितुमिच्छति, शकुन्तला नाट्येन परिहरति)

(नेपथ्ये)

चक्कवाकवहुए ! आमंतेहि सहअरं । उवट्ठिआ रअणी ।
(चक्रवाकवधूः ! आमन्त्रयस्व सहचरम् । उपस्थिता रजनी ।)

शकु०—(ससंभ्रमम्) पोरव ! असंसअं मम सरीरवुत्तंतोवलंभस्स अज्जा गोदमी इदो एव्व आअच्छदि । जाव विडवंतरिदो होहि । (पौरव ! असंशयं मम शरीरवृत्तान्तोपलम्भाय आर्या गौतमी इत एवागच्छति । यावद् विटपान्तरितो भव ।)

—वीससामि । राजा—मा मैवम्; नवो हि परिजनः सेव्यानामादेशात् परं न वर्तते । शकुं०—अअं जेव अच्चुवआरो अविस्सासजणओ । राजा—(स्वगतम्) नाहमेतं रमणीयं सेवावकाशमात्मनः शिथिलयिष्ये । (मुखमुन्नमयितुं प्रवृत्तः) । शकुं०—(प्रतिषेधं रूपयन्ती विरमति) राजा—अयि मदिरेक्षणे, अलमस्मदविनयाशङ्कया । शकुं०—(किंचिद् दृष्ट्वावनतमुखी तिष्ठति) राजा—(अङ्गुलीभ्यां मुखमुन्नमय्यात्मगतम्) चारुणा स्फुरितेनायमपरिक्षतकोमलः । पिपासतो ममानुज्ञां ददातीव प्रियाधरः' ।। शकु०—पडिण्णादमंथरो विअ अज्जउत्तो । राजा—सुन्दरि, कर्णोत्पलसंनिकर्षादीक्षणसादृश्यमूढोऽस्मि । (मुखमारुतेन चक्षुः सेवते) शकुं०—भोदु, पइदित्थदंसण म्हि संवुत्ता । लज्जामि उण अणुवआरिणी पिअआरिणो अज्जउत्तस्स । राजा—सुन्दरि, किमन्यत् । 'इदमप्युपकृतिपक्षे सुरभिमुखं ते मया यदाघ्रातम् । ननु कमलस्य मधुकरः संतुष्यति गन्धमात्रेण' ।। शकुं०—असंतोसे उण किं करेदि । राजा—इदमिदम् । (व्यवसितो वक्त्रं ढौकते)[1] । (नेपथ्ये) चक्कवाअवहु ! ००।

---

१. वयन्त्वत्रैवंदर्शिनः 'रूपान्तरगताः श्लोका दूरं मूलानुहारिणः ।
अनिगृह्यास्तथाप्येते हन्त स्थालीस्तना इव

राजा—तथा। (आत्मानमावृत्य तिष्ठति)

(ततः प्रविशति पात्रहस्ता गौतमी सख्यौ च)

सख्यौ—इदो इदो अज्जा गोदमी। (इत इत आर्या गौतमी।)

गौत०—(शकुन्तलामुपेत्य) जादे! अवि लहुसंदावाइं दे अंगाइं?। (जाते! अपि लघुसंतापानि ते अङ्गानि? ।)

शकु०—अत्थि मे विसेसो। (अस्ति मे विशेषः।)

गौत०—इमिणा दब्भोदएण णिरावाधं एव्व दे सरीरं भविस्सदि (शिरसि शकुन्तलामभ्युक्ष्य) वच्छे! परिणदो दिअहो। एहि, उडजं एव्व गच्छम्ह। (प्रस्थिताः)। (अनेन दर्भोदकेन निराबाधमेव ते शरीरं भविष्यति। (शकुन्तलामभ्युक्ष्य) वत्से! परिणतो दिवसः। एहि, उटजमेव गच्छामः) (प्रस्थिताः)

शकु०—(आत्मगतम्) हिअअ! पढमं एव सुहोवणदे मणोरहे कादरभावं ण मुंचसि। साणुसअ-विहडिअस्स कहं दे संपदं संदावो? (पदान्तरे स्थित्वा, प्रकाशम्) लदावलअ संदावहारअ! आमंतेमि तुमं भूओ वि परिभोअस्स। (हृदय! प्रथममेव सुखोपनते मनोरथे कातरभावं न मुञ्चसि। सानुशयविघटितस्य कथं ते सांप्रतं संतापः?। (पदान्तरे स्थित्वा प्रकाशम्) लतावलय संतापहारक! आमन्त्रये त्वां भूयोऽपि परिभोगाय।) (दुःखेन निष्क्रान्ता शकुन्तला सहेतराभिः)

राजा—(पूर्वस्थानमुपेत्य, सनिःश्वासम्) अहो, विघ्नवत्यः प्रार्थितार्थसिद्धयः।

मया हि,—

मुहुरङ्गुलिसंवृताधरोष्ठं
प्रतिषेधाक्षरविक्लवाभिरामम्।
मुखमंसविवर्ति पक्ष्मलाक्ष्याः
कथमप्युन्नमितं न चुम्बितं तु[1] ॥२२॥

क्व नु खलु संप्रति गच्छामि? अथवा,—इहैव [2]प्रियापरिभुक्तमुक्ते लतामण्डपे मुहूर्तं स्थास्यामि[3]। (सर्वतोऽवलोक्य)

---

१. 'तु'-शब्दोऽत्र वाक्ये समुद्बिभ्रत्कुर्वद्रूपताक इति ध्वनिकारः।

२. ०भुक्ते लतावलये. ३. तिष्ठामि.

तस्याः पुष्पमयी शरीरलुलिता शय्या शिलायामियं
क्लान्तो मन्मथलेख एष नलिनीपत्रे नखैरर्पितः ।
हस्ताद् भ्रष्टमिदं बिसाभरणमित्यासज्यमानेक्षणो
निर्गन्तुं सहसा न वेतस[1]गृहाच्छक्नोमि शून्यादपि[2] ।।२३।।

(नेपथ्ये)

भो भो राजन् !

सायंतने सवनकर्मणि संप्रवृत्ते
वेदीं हुताशनवतीं परितः प्रकीर्णाः[3] ।
छायाश्चरन्ति बहुधा भयमादधानाः
संध्यापयोदकपिशाः पिशिताशनानाम् ।।२४।।

राजा— (आकर्ण्य, सावष्टम्भम्) भो भोस्तपस्विनः ! मा भैष्ट [4]अयमहमागतोऽस्मि । (निष्क्रान्तः)

।। इति तृतीयोऽङ्कः[5] ।।



१. वेतसगृहादीशोऽस्मि.

२. (विचिन्त्य) अहो, धिक् । असम्यक् चेष्टितं प्रियां समासाद्य कालहरणं कुर्वता मया । तदिदानीं—

रहः प्रत्यासत्तिं यदि सुवदना यास्यति पुनर्
न कालं हास्यामि प्रकृतिदुरवापा हि विषयाः ।
इति क्लिष्टं विघ्नैर्गणयति च मे मूढहृदयं
प्रियायाः प्रत्यक्षं किमपि च तथा कातरमिव ।।

३. प्रयस्ताः. ४. अयमयमागच्छामि. ५. इति शृङ्गारभोगो नाम॰.

।। [1]अथ मिश्रविष्कम्भकः ।।

[१]

(प्रविशतः कुसुमावचयं नाटयन्त्यौ सख्यौ)

अन०—पिअंवदे ! जइ वि गंधव्वेण विहिणा णिव्वुत्तकल्लाणा सउंदला अणुरूवभत्तुगामिणी संवुत्तेति णिव्वुदं मे हिअअं, तह वि एत्तिअं चिंतणिज्जं । (प्रियंवदे ! यद्यपि गान्धर्वेण विधिना निर्वृत्त-कल्याणा शकुन्तला अनुरूपभर्तृगामिनी संवृत्तेति निर्वृतं मे हृदयम्, तथाप्ये-तावच्चिन्तनीयम् ।)

प्रियं०—कहं विअ ? । (कथमिव ? ।)

अन०—अज्ज सो राएसी [2]इट्ठिं परिसमाविअ इसीहिं विसज्जिओ अत्तणो णअरं पविसिअ अंतेउरसमागदो इदोगदं वुत्तंतं सुमरदि वा ण वेत्ति ? (अद्य स राजर्षिरिष्टिं परिसमाप्य ऋषिभिर्विसर्जित आत्मनो नगरं प्रविश्य अन्तःपुरसमागतः इतोगतं वृत्तान्तं स्मरति वा न वेति ?)

प्रियं०—वीसद्धा होहि । ण तादिसा आकिदिविसेसा गुणविरोहिणो होंति । तादो दाणिं इमं वुत्तंतं सुणिअ, ण आणे किं पडिवज्जिस्सदि त्ति । (विस्रब्धा भव । न तादृशा आकृतिविशेषा गुणविरोधिनो भवन्ति । तात इदानीमिमं वृत्तान्तं श्रुत्वा न जाने किं प्रतिपत्स्यत इति ।)

अन०—जह अहं पेक्खामि, तस्स अणुमदं भवे ।
(यथाहं पश्यामि, तस्यानुमतं भवेत् ।)

प्रियं०—कहं विअ ? । (कथमिव)

अन०—[3]गुणवदे कण्णआ पडिवादणिज्जे त्ति अअं दाव पढमो संकप्पो । तं जइ देव्वं एव्व संपादेदि णं अप्पआसेण किदत्थो गुरुअणो ।

---

१. इयमस्मत्कृता योजना । अत्र चतुर्थोऽङ्कः इति प्रवेशक एष, सोऽपि च शिष्यप्रवेशात् पूर्वं यावदेवेति च । मा.सा.नि.पि.खि.च. ।

२. इष्टिरियं चतुर्दिनावसानकः सोमयागः इति मीमांसकाः ।

३. किं अण्णं । वरस्स अणुरूवस्स कण्णआ पडिवादणीअअ त्ति अअं दाव पढमो संकप्पो तं जइ देव्वं जेव संपादेदि णं किदत्थो गुरुअणो.

(गुणवते कन्यका प्रतिपादनीयेत्ययं तावत् प्रथमः संकल्पः । तं यदि दैवमेव संपादयति ननु अप्रयासेन कृतार्थो गुरुजनः ।)

प्रियं०—सहि एवं णेदं (पुष्पभाजनं विलोक्य) सहि ! अवइदाइं बलिकम्म-पज्जत्ताइं कुसुमाइं । (सखि ! एवं नन्विदं (? णेदं) (पुष्पभाजनं विलोक्य) अवचितानि बलिकर्मपर्याप्तानि कुसुमानि ।)

अन०—णं सहीए सउंदलाए सोहग्गदेवआ अच्चणीआ ।
(ननु सख्याः शकुन्तलायाः सौभाग्यदेवताऽर्चनीया ।)

प्रियं०—जुज्जदि । (युज्यते ।) (तदेव कर्मारभेते)

(नेपथ्ये)

अयमहं भोः !

अन०—(कर्णं दत्त्वा) सहि ! अदिधीणं विअ णिवेदिदं । (सखि ! अतिथीनामिव निवेदितम् ।)

प्रियं०—णं उडजसंणिहिदा सउंदला । (आत्मगतम्) अज्ज उण हिअएण असंणिहिदा । (ननु उटजसंनिहिता शकुन्तला । आत्मगतम् अद्य पुनर्हृदयेनासंनिहिता ।)

अन०—होदु; अलं एत्तिएहिं कुसुमेहिं । (भवतु; अलमेतावद्भिः कुसुमैः ।)

(प्रस्थिते)

(नेपथ्ये) [1]आः, अतिथिपरिभाविनि !

विचिन्तयन्ती यमनन्यमानसा
तपोधनं[2] वेत्सि न मामुपस्थितम् ।
स्मरिष्यति त्वां न स बोधितोऽपि सन्
कथां प्रमत्तः प्रथमं कृतामिव ॥१॥

प्रियं०—हद्धी । अप्पिअं जेव्व संवुत्तं । कस्सिं पि पुज्जारिहे अवरद्धा सुण्णहिअआ सउन्दला[3] ।

---

१. आः ! कथमतिथिं मां परिभवसि !

२. तपोनिधिं ३. सुण्णहिअआ सउन्दला । (पुरोवलोक्य) णहु—हुदहादो दहिदुं पहवदि । अनु०—गच्छ पादयोः००नि. मा.खि. च.

(हा धिक्, अप्रियमेव संवृत्तम्। कस्मिश्चित् पूजार्हे अपराद्धा शून्यहृदया शकुन्तला।)

अन०—(पुरोऽवलोक्य) णहु जस्सिं कस्सिं क्खु। एसो दुव्वासो सुलहकोवो महेसी। तह सविअ वेअवलुप्फुल्लाए दुव्वाराए गईए पडिणिवुत्तो। (न हि यस्मिन् कस्मिन् खलु। एस दुर्वासाः सुलभकोपो महर्षिः। तथा शप्त्वा वेगबलोत्फुल्लया दुर्वारया गत्या प्रतिनिवृत्तः)।

प्रियं०—को अण्णो हुदवहादो दहिदुं पहवदि[1] ? (कोऽन्यो हुतवहाद् दग्धुं प्रभवति !

अनु०—गच्छ, पायेसु पणमिअ णिवत्तेहि णं, जाव अहं अग्घोदअं उवकंपेमि। (गच्छ, पादयोः प्रणम्य निवर्त्तय एनम्, यावदहम् अर्घोदकमुपकल्पयामि।)

प्रियं०[2]—तह। (तथा।) (निष्क्रान्ता)

अन०[3]—(पदान्तरे स्खलितं निरूप्य) अव्वो ! आवेगक्खलिदाए गईए पब्भट्टं मे अग्गहत्थादो पुप्फभाअणं। (अहो ! आवेगस्खलितया गत्या प्रभ्रष्टं ममाग्रहस्तात् पुष्पभाजनम्।) (पुष्पोच्चयं रूपयति)

(प्रविश्य)

प्रियं०[4]—सहि ! पकिदिवक्को सो कस्स अणुणअं पडिगेण्हदि ?। किं वि उण साणुक्कोसो किदो। (सखि ! प्रकृतिवक्रः स कस्यानुनयं प्रतिगृह्णाति ?। किमपि पुनः सानुक्रोशः कृतः।)

अन०[5]—(सस्मितम्) तस्सि वहु एदं वि। कहेहि। (तस्मिन् बह्वेतदपि कथय।)

प्रियं०[6]—जदा णिवत्तिदुं ण इच्छदि तदा विण्णविदो मए—भअवं ! पढम त्ति पेक्खिअ अविण्णादतवप्पहावस्स दुहिदुजणस्स भअवदा एक्को अवराहो मरिसिदव्वोत्ति। (यदा निवर्तितुं नेच्छति तदा विज्ञापितो मया—भगवन् ! प्रथम इति प्रेक्ष्य अविज्ञाततपःप्रभावस्य दुहितृजनस्य भगवता एकोऽपराधो मर्षितव्य इति)

---

१. दहिदुं पहवदि। ता गच्छ। पायेसु णमिअ पसादेहि णं जाव०० । अन० तह (निष्क्रान्ता)-सा.। प्रसादने प्रियंवदाया एव व्यापार उचितः।

२. अनुसूया—. ३. प्रियंवदा—अम्मो.

४. अनुसूया—सहि, सरीरी विअ कोवो कस्स सो.

५. प्रियंवदा-एदं जेव तस्सि बहुदर ता कधेहि. ६. अनसूया—

अन०[1]—तदो तदो ? । (ततस्ततः ?।)

प्रियं०[2]—तदो मे वअणं अण्णहाभविदुं णारिहदि । किंदु अहिण्णाणाभरणदंसणेण सावो णिवत्तिस्सदि त्ति मंतअंतो सअं अंतरिहिदो । (ततो मे वचनमन्यथाभवितुं नार्हति, किंत्वभिज्ञानाभरणदर्शनेन शापो निवर्तिष्यत इति मन्त्रयन् स्वयमन्तर्हितः ।)

अन०[3]—सक्कं दाणिं अस्ससिदुं । अत्थि तेण राएसिणा सपत्थिदेण सणामहेअंकिअं अंगुलीअअं [4]सुमरणीअंत्ति सअं पिणद्धं । तस्सिं साहीणोवाआ सउंदला भविस्सदि । (शक्यमिदानीमाश्वसितुम् । अस्ति तेन राजर्षिणा संप्रस्थितेन स्वनामधेयाङ्कितमङ्गुलीयकं स्मरणीयमिति स्वयं पिनद्धम् । तस्मिन् स्वाधीनोपाया शकुन्तला भविष्यति ।)

प्रियं०[5]—सहि ! एहि; देवकज्जं दाव णिव्वत्तेम्ह ।
(सखि ! एहि; देवकार्यं तावन्निर्वर्तयावः ।)

(परिक्रामतः)

प्रियं०[6]—(विलोक्य) अणसूए ! पेक्ख दाव । वामहत्थोवहिदवअणा आलिहिदा विअ पिअसही । भत्तुगदाए चिंताए अत्ताणं पि एसा ण विभावेदि, किं उण आअंतुअं ? । (अनसूये ! पश्य तावत्; वामहस्तोपहितवदना आलिखितेव प्रियसखी । भर्तृगतया चिन्तया आत्मानमपि नैषा विभावयति, किं पुनरागन्तुकम् ? ।)

अन०[7]—पिअंवदे ! दुवेणं एव्व णं णो मुहे एसो वुत्तंतो चिट्ठदु । रक्खिदव्वा खु पकिदिपेलवा पिअसही । (प्रियंवदे ! द्वयोरेव ननु नौ मुखे एष वृत्तान्तस्तिष्ठतु । रक्षितव्या खलु प्रकृतिपेलवा प्रियसखी ।)

प्रियं०[8]—को णाम उण्होदएण णोमालिअं सिंचेदि ? (को नामोष्णोदकेन नवमालिकां सिञ्चति ? ।) (उभे निष्क्रान्ते)[9]

---

१. प्रियंवदा—. २. अनु०—तदो सो ण....भविदुं अरिहदि ।
३. प्रियं०—. ४. सुमरावणीअं ति सउंतलाहत्थे सअं जेव पिणद्धाविदं । एसो जेव तस्सिं साहीणो उवाओ भविस्सदि ।
५-८ अनु०—. ९. अत्रैव विष्कम्भकसमाप्तिरिति सर्वे । प्रवेशक इत्यन्ये ।—

[२]

(ततः प्रविशति सुप्तोत्थितः शिष्यः)

शिष्यः—[1]वेलोपलक्षणार्थमादिष्टाऽस्मि तत्रभवता प्रभासप्रवासादुपावृत्तेन काश्यपेन। प्रकाशं निर्गतस्तावदवलोकयामि कियदवशिष्टं रजन्या इति। (परिक्रम्यावलोक्य च) हन्त प्रभातम्। तथा हि,—

यात्येकतोऽस्तशिखरं पतिरोषधीना-
माविष्कृतोऽरुणपुरःसर एकतोऽर्कः।
तेजोद्वयस्य युगपद् व्यसनोदयाभ्यां
लोको नियम्यत [2]इवात्मदशान्तरेषु ॥२॥

अपि च,— अन्तर्हिते शशिनि सैव कुमुद्वती मे
दृष्टिं न नन्दयति संस्मरणीयशोभा।
इष्टप्रवासजनितान्यबलाजनस्य
दुःखानि नूनमतिमात्र[3]सुदुःसहानि ॥३॥[4]

यावदुपस्थितां होमवेलां गुरवे निवेदयामि।

(निष्क्रान्तः)

—वयं तु शकुन्तलाप्रवेशावधि सूच्यत्वस्याखण्डितत्वान्मध्ये संस्कृतोक्तेश्च मिश्रविष्कम्भकत्वमेवात्र तदवधिकं मन्यामहे। ननु सख्योः स्वैरालापोऽत्र सूच्येतर इति चेत् स इतः पूर्वमपीत्यदोषः।

१. वेलोपलक्षणायादिष्टोऽस्मि प्रभासात्प्रतिनिवृत्तेन तत्रभवता कण्वेन तत्प्रकाशं निर्गत्यावलोकयामि किमवशिष्टं०

२. इवैष दशान्तरेषु स्वस्व-विपत्ति-संपत्तिदशायां केनापि दुःखहर्षौ न कार्यौ इति भावः रा.

३. ०दुरुद्वहानि.

४. अपिच-'कर्कन्धूनामुपरि तुहिनं रञ्जयत्यग्रसन्ध्या दार्भं मुञ्चत्युटजपटलं वीतनिद्रो मयूरः। वेदिप्रान्तात्खुरविलिखितादुत्थितश्चैष सद्यः पश्चादुच्चैर्भवति हरिणः स्वाङ्गमायच्छमानः॥' अपि च'पादन्यासं क्षितिधरगुरोर्मूर्ध्नि कृत्वा सुमेरोः क्रान्तं येन क्षयिततमसा मध्यमं धाम विष्णोः। सोऽयं चन्द्रः पतति गगनादल्पशेषैर्मयूखैर-त्यारूढिर्भवति महतामप्यपभ्रंशनिष्ठा॥ पा०

(प्रविश्यापटीक्षेपेण[1])

अन०—णं प्रभादा रअणी। ता लहु पडिबुद्धम्हि। अथवा पडिबुद्धा वि किं करिस्सं? ण मे उइदेसु वि णिअकरणिज्जेसु हत्थपाआ पसरंति। कामो दाणिं सकामो होदु। जेण असच्चसंधे जणे सुण्णहिअआ सही पदं कारिदा। विसअपरम्मुहस्स वि जणस्स एदं ण विदिअं जह तेण रण्णा सउंदलाए अणज्जं आअरिदं। अहवा, दुव्वाससो कोवो एसो विआरेदि। अण्णहा कहं सो राएसी तारिसाणि मंतिअं एत्तिअस्स कालस्स लेहमेत्तं पि ण विसज्जेदि? ता इदो अहिण्णाणं अंगुलीअअं से विसज्जेम। दुक्खसीले तवस्सिजणे को अब्भत्थीअदु? णं सहीगामी दोसो त्ति व्ववसिदा वि ण पारेमि, पवासपडिणिउत्तस्स तादकस्सवस्स दुस्संतपरिणीदं आवण्णसत्तं सउंदलं णिवेदिदुं एत्थगए अम्हेहिं किं करणिज्जं? (ननु प्रभाता रजनी तत् लघु प्रतिबुध्ये। अथवा प्रतिबुद्धापि किं करिष्ये? न मे उचितेष्वपि निजकार्येषु हस्तपादं प्रसरति। कामः इदानीं सकामो भवतु। येन असत्यसंधे जने शून्यहृदया सखी पदं कारिता। विषयपराङ्मुखस्यापि जनस्य, एतन्न विदितं यथा तेन राज्ञा शकुन्तलायामनार्यमाचरितम्। अथवा, दुर्वाससः कोप एष विकारयति। अन्यथा कथं स राजर्षिस्तादृशानि मन्त्रयित्वा एतावत् कालस्य लेखमात्रमपि न विसृजति? तदितः अभिज्ञानमङ्गुलीयकं तस्य विसृजावः। दुःखशीले तपस्विजने कोऽभ्यर्थ्यताम्? ननु सखीगामी दोष इति व्यवसितापि न पारयामि, प्रवासप्रतिनिवृत्तस्य तातकाश्यपस्य दुष्यन्तपरिणीताम् आपन्नसत्त्वां शकुन्तलां निवेदयितुम्। इत्थंगते अस्माभिः किं करणीयम्?।)

प्रियं०—(सहर्षम्) सहि! तुवर सउंदलाए पत्थाण[2]कोदुअं णिव्वत्तिदुं। (सखि! त्वरस्व शकुन्तलायाः प्रस्थानकौतुकं निर्वर्तयितुम्।)

---

१. ०सहानि ॥३॥ (प्रविश्यापटी (पटा) क्षेपेण) अन०—जइ वि (एवं) णाम विसअपरंमुहस्स वि जणस्स (ण) एदं ण (णि)विदिअं तह वि तेण रण्णा सकुंदलाए अणज्जं आचरिअं त्ति। शिष्यः—याव०० (निष्क्रान्तः) अन०—प्रतिबुद्धा०० कारिदा०० अथवा।'—एवंप्रायः सार्वत्रिकः पाठः। योजनेयमस्मत्कृता।

२. ०कोदूहलाइं करीअंति.

(प्रविश्य)

अन॰—(सविस्मयम्) [१]सहि ! कहं एदं ? । (सखि ! कथमेतत् ? ।)

प्रियं॰—सुणाहि; दाहिं [२]सुहसइदपुच्छिआ सउंदलासआसं गदम्हि[३] । तदो जाव एणं लज्जावणदमुहिं परिस्सजिअ [४]तादकस्सवेण एव्वं अहिणंदिदं—[५]दिट्ठिआ धूमाउलिददिट्ठिणो वि जअमाणस्स [६]पाअए एव्व आहुदी पडिदा । वच्छे ! [७]सुसिस्सपरिदिण्णा विज्जा विअ असोअणिज्जा सि संवुत्ता । [८]अज्ज एव्व इसिरक्खिदं तुमं भत्तुणो सआसं वसज्जेमि—त्ति । (शृणु । इदानीं सुखशयितपृच्छिका शकुन्तलासकाशं गतास्मि । ततो यावदेनां लज्जावनतमुखीं परिष्वज्य तातकाश्यपेनैवमभिनन्दितम्-दिष्ट्या धूमाकुलितदृष्टेरपि यजमानस्य पावक एवाहुतिः पतिता । वत्से ! सुशिष्यपरिदत्ता विद्येव अशोचनीयाऽसि संवृत्ता । अद्यैव ऋषिरक्षितां त्वां भर्तुः सकाशं विसर्जयामि—इति ।)

अन॰—अह केण सूइदो तादकस्सवस्स अअं वुत्तंतो ? । (अथ केन सूचितः तातकाश्यपस्य अयं वृत्तान्तः ? ।)

प्रियं॰—अग्गिसरणं पविट्ठस्स सरीरं विणा छंदोमईए अणआ वाणिआए । (अग्निशरणं प्रविष्टस्य शरीरं विना छन्दोमय्या अनया वाण्या—)

(संस्कृतमाश्रित्य)

दुष्यन्तेनाहितं तेजो दधानां भूतये भुवः ।
अवेहि तनयां ब्रह्मन्नग्निगर्भां शमीमिव[९] ॥४॥

अन॰—(प्रियंवदामाश्लिष्य) सहि ! पिअं मे; किंदु अज्ज एव्व सउंदला णीअदित्ति उक्कंठासाधारणं परितोसं अणुहोमि । (सखि !

---

१. सहि, कधं विअ ।
२. सहसुत्तिआपुच्छणणिमित्तं॰
३. अनु॰—तदो तदो । प्रियं॰—तदो जाव॰
४. तादकण्णो॰॰ अहिणंदेदि.
५. वच्छे दिट्ठिआ धूमोवरुद्धदिट्ठिणो॰
६. मुहे ज्जेव णिवडिदा आहुदी॰
७. सुसिस्सपरिग्गहीदा विअ.
८. ता अज्ज ज्जेव तुमं इसिपारग्गहीदं कदुआ.
९. र. ३१९.

प्रियं मे; किंतु अद्यैव शकुन्तला नीयत इति [1]उत्कण्ठासाधारणं परितोष-मनुभवामि ।)

प्रियं०—सहि ! अम्हं कधं वि उक्कंठं विणोदइस्सामो । सा तवस्सिणी णिव्वुदा होदु । (सखि ! आवां कथमपि उत्कण्ठां विनोदयिष्यावः । सा तपस्विनी निर्वृता भवतु ।)

अन०—तेण हि एदस्सिं चूदसाहावलंविदे णारिएरसमुग्गए एतण्णिमित्तं जेव्व कालहरणक्खमा णिक्खित्ता मए केसरमालिआ । तुमं इमं हत्थसंणिहिदं[2] करेहि । अहंपि से [3]मिअलोअणं तित्थ-मिट्टिअं दुव्वाकिसलअणित्ति मंगलसमालंभणाणि [4]विरएमि । (तेन हि एतस्मिन् चूतशाखावलम्बिते नालिकेरसमुद्गके एतन्निमित्तमेव कालहरणक्षमा निक्षिप्ता मया केसरमालिका । त्वम्, इमां हस्तसंनिहितां कुरु, अहमपि तस्यै मृगरोचनां तीर्थमृत्तिकां दूर्वाकिसलयानीति मङ्गल-समालम्भनानि विरचयामि ।)

प्रियं०—तह करीअदु । (तथा क्रियताम् ।)

(अनसूया निष्क्रान्ता; प्रियंवदा नाट्येन सुमनसो गृह्णाति)

(नेपथ्ये)

गौतमि ! आदिश्यन्तां शार्ङ्गरवमिश्राः[5] शकुन्तला-नयनाय ।

प्रियं०—(कर्णं दत्त्वा) अनसूए ! तुवरसु; एदे खु हत्थिणाउरगामिणो इसीओ आआरीअंति । (अनसूये ! त्वरस्व; एते खलु हस्तिनापुरगामिन ऋषय आकार्यन्ते ।) (प्रविश्य समालम्भनहस्ता)

अन०—सहि ! एहि; गच्छम्ह । (सखि ! एहि, गच्छाव ।) (परिक्रामतः)

प्रियं०—(विलोक्य) एसा सुज्जोदए एव्व सिहामज्जिदा पडिच्छिद-णीवारहत्थाहिं सोत्थि-वाअणकाहिं तावसीहिं अहिणंदीअमाणा सउंदला चिट्ठइ । उवसप्पम्ह णं । (एषा सूर्योदय एव शिखा-मज्जिता प्रतिष्ठितनीवारहस्ताभिः स्वस्तिवाचनिकाभिस्तापसीभिरभिनन्द्य-माना शकुन्तला तिष्ठति । उपसर्पाव एनाम् ।) (उपसर्पतः)

॥ [6]इति मिश्रविष्कम्भकः ॥

---

१. उत्कण्ठा नाम विरहपर्युत्सुकत्वम्-मे. २।४०.
२. णलिणीवत्तसंगदे. ३. गोरोअणं तित्थमट्टिअं. ४. विरअआमि.
५. शार्ङ्गरवशारद्वतमिश्राः. ६. इयमस्मत्कृता वस्तुयोजना ।

[1]अथ चतुर्थोऽङ्कः

(ततः प्रविशति यथोद्दिष्टव्यापाराऽऽसनस्था शकुन्तला)

शकु०—भवदीओ ! वन्दामि । (भगवत्यः ! वन्दे ।)

एका— (शकुन्तलां प्रति) जादे ! भत्तुणो वहुमाणसूअअं देईसद्दं लहेहि । (जाते ! भर्त्तुः बहुमानसूचकं देवीशब्दं लभस्व)

द्विती०—वच्छे ! वीरप्पसविणी होहि । (वत्से ! वीरप्रसविनी भव ।)

तृती०—अच्छे ! भत्तुणो वहुमदा होहि । (वत्से ! भर्तुर्बहुमता भव ।)

(आशिषो दत्त्वा गौतमीवर्जं निष्क्रान्ताः)

सख्यौ—(उपसृत्य) सहि ! सुहमज्जणं दे होदु । (सखि ! सुखमज्जनं ते भवतु ।)

शकु०—साअयं मे पिअसहीणं । इदो णिसीदह । (स्वागतं मे प्रियसख्योः । इतो निषीदतम् ।)

उभे—(मङ्गलपात्राण्यादाय उपविश्य) हला ! [2]सज्जा होहि । जाव मंगलसमालंभणं विरएम । (हला ! सज्जा भव । यावन्मङ्गल-समालम्भनं विरचयाव ।)

शकु०—उइदं वि एदं अज्ज वहु मंदव्वं । दुल्लहं दाणिं मे सहीमंडणं भवस्सदि त्ति । ([3]उचितमपि इदमद्य बहु मन्तव्यम् । दुर्लभमिदानीं मे सखीमण्डनं भविष्यतीति ।) (बाष्पं विसृजति)

उभे—सहि ण जुत्तं मंगलकाले रोइदुं । (सखि ! न युक्तं मङ्गलकाले रोदितुम् ।) (अश्रूणि प्रमृज्य नाट्येन प्रसाधयतः)

प्रियं०—[4]आहरणोइदं रूवं अस्समसुलहेहिं पसाहणेहिं विप्पआरीअदि । (आभरणोचितं रूपमाश्रमसुलभैः प्रसाधनैर्विप्रकार्यते ।)

---

१. इयमस्मद्योजना
२. उज्जुआ ।
३. उचितं चिराभ्यस्तम् ।
४. अहो, आहरणारिहं

(¹प्रविश्योपायनहस्तौ ऋषिकुमारकौ)

एकः²—इदमलंकरणम् । अलंक्रियतामत्रभवती ।

(सर्वा विलोक्य विस्मिताः)

गौत०—वच्छ ³णारअ ! कुदो एदं ? (वत्स नारद ! कुत एतत् ? ।

प्रथ०—तातकाश्यपप्रभावात् ।

गौत०—किं माणसी सिद्धी ? । (किं मानसी सिद्धिः ? ।)

द्विती०—न खलु । श्रूयताम् । तत्रभवता वयमाज्ञप्ताः—शकुन्तलाहेतोर्वनस्पतिभ्यः कुसुमान्याहरत—इति । तत इदानीं,—

क्षौमं केनचिदिन्दुपाण्डु तरुणा माङ्गल्यमाविष्कृतं
निष्ठ्यूतश्चरणोपभोगसुलभो लाक्षारसः केनचित् ।
अन्येभ्यो वनदेवताकरतलैरापर्वभागोत्थितै-
र्दत्तान्याभरणानि तत्किसलयोद्भेद-⁴ प्रतिद्वन्द्विभिः ॥५॥

प्रियं०⁵—(शकुन्तलां विलोक्य) हला ! इमाए अब्भुववत्तीए सूइया दे भत्तुणो गेहे अणुहोदव्वा राअलच्छित्ति । (हला ! अनया अभ्युपपत्त्या सूचिता, ते भर्तुर्गेहे अनुभवितव्या राजलक्ष्मीरिति ।)

(शकुन्तला व्रीडां रूपयति)

प्रथमः⁶—गौतम ! एह्येहि; अभिषेकोत्तीर्णाय भगवते काश्यपाय निवेदयाव यावदिमां वनस्पतिसेवाम् ।

द्विती०—तथा । (निष्क्रान्तौ)

सख्यौ—अए ! ⁷अणुवजुत्तभूसणो अअं जणो । ता चित्तकम्मपरिअएण अङ्गेसु दे आहरणविणिओअं करेम्ह । (अये ! अनुपयुक्तभूषणोऽयं जनः । तत्, चित्रकर्मपरिचयेन, अङ्गेषु ते आभरणविनियोगं कुर्वः ।)

शकु०—जाणे वो णेउणं । (जाने वां नैपुणम् ।) (उभे नाट्येनालंकुरुतः)

(ततः प्रविशति स्नानोत्तीर्णः काश्यपः)

---

१. (प्रविश्याभरणहस्तो मुनिकुमारकः) इदमलंकारजातमलंक्रियतामायुष्मती.
२. हारीतः—. ३. हारीद. ४. व्यच्छायाप्रतिस्पर्धिभिः ।
५. प्रियं०—(शकुन्तलां विलोक्य) कोडरसंभवा वि महुअरी पोक्खरमहुं जेव अहिलसदि । गौतमी-इमाए अब्भुव०० लच्छी । ६. हारीतः-यावदिमां वनस्पतिसेवामभिषेकार्थं मालिनीतीरमवतीर्णाय भगवते कण्वाय निवेदयामि । (निष्क्रान्तः). ७. अणणुभूदभूसणो अअं जणो कधं तुमं अलंकरेदु (चिंतयित्वा विलोक्य च) चित्तपरिचएण दाणिं दे अंगेसुं आहरणविणिओअं करेम्ह.

काश्यपः— यास्यत्यद्य शकुन्तलेति हृदयं [1]संस्पृष्टमुत्कण्ठया
कण्ठः[2] स्तम्भितबाष्पवृत्तिकलुषश्चिन्ताजडं दर्शनम् ।
वैक्लव्यं मम तावदीदृशमिदं[3] स्नेहादरण्यौकसः
पीड्यन्ते गृहिणः कथं नु[4] तनयाविश्लेषदुःखैर्नवैः[5] ।।६।।

(परिक्रामति)

सख्यौ—हला सउंदले ! अवससिदमंडणासि । परिधेहि संपदं विचित्तं खोमजुअलं । (हला शकुन्तले ! अवसितमण्डनासि । परिधत्स्व सांप्रतं विचित्रं क्षौमयुगलम् ।) (शकुन्तलोत्थाय परिधत्ते)

गौतमी—जादे ! एसो दे आणंदपरिवाहिणा चक्खुणा परिस्सजंतो विअ गुरू उवट्ठिदो । [6]आआरं दाव पडिवज्जस्स । (जाते ! एष ते आनन्दपरिवाहिणा चक्षुषा परिष्वजमान इव, गुरुरुपस्थितः, आचारं तावत् प्रतिपद्यस्व ।)

शकु०—(सव्रीडम्) ताद ! वंदामि । (तात ! वन्दे ।) (वन्दते)

काश्यपः—वत्से !
यथातेरिव शर्मिष्ठा [7]भर्तुर्बहुमता भव ।
सुतं त्वमपि सम्राजं सेव पूरुमवाप्नुहि ।।७।।

गौतमी—भअवं ! वरो खु एसो; ण आसिसा ।
(भगवन् ! वरः खल्वेषः, नाशिषः ।)

काश्यपः—वत्से ? इतः सद्योहुताग्नीन् प्रदक्षिणीकुरुष्व ।

(सर्वे परिक्रामन्ति)

काश्यपः—(ऋक्छन्दसाऽऽशास्ते)
अमी वेदिं परितः क्लृप्तधिष्ण्याः
समिद्वन्तः प्रान्तसंस्तीर्णदर्भाः ।
अपघ्नन्तो दुरितं हव्यगन्धैर्
वैतानास्त्वां वह्नयः पावयन्तु ।।८।।

---

१. स्पृष्टं समुत्कण्ठया. २. अन्तर्बाष्पभरोपरोधि गदितं
३. ०महो ४. कियन्नु
५. 'काव्येषु नाटकं रम्यं तत्रापि च शकुन्तला । तत्रापि च चतुर्थोऽङ्कस्तत्र श्लोकचतुष्टयम् ।।' इति प्रसिद्धिः । तत्रायं प्रथमः श्लोकः ।
६. समुदाआरं ।
७. पत्युः । अत्र ययातिशर्मिष्ठौपम्येन भावि दुर्निमित्तमपि सूच्यते ।

प्रतिष्ठस्वेदानीम् । (सदृष्टिक्षेपम्) क्व ते शार्ङ्गरवमिश्राः ? ।

(प्रविश्य)

शिष्यौ—भगवन् ? इमौ स्वः ।

काश्यपः—भगिन्यास्ते मार्गमादेशय ।

शार्ङ्ग०—इत इतो भवती । (सर्वे परिक्रामन्ति)

काश्यपः—भो भोः संनिहितास्तपोवनतरवः[1] !

पातुं न प्रथमं व्यवस्यति जलं युष्मास्वपीतेषु[2] या
नादत्ते प्रियमण्डनापि भवतां स्नेहेन या पल्लवम् ।
आद्ये वः कुसुमप्रसूतिसमये[3] यस्या भवत्युत्सवः
सेयं याति शकुन्तला पतिगृहं सर्वैरनुज्ञायताम्[4] ॥९॥

(कोकिलरवं सूचयित्वा)

अनुमतगमना शकुन्तला तरुभिरियं वनवासबन्धुभिः ।
परभृतविरुतं कलं [5]यथा प्रतिवचनीकृतमेभिरीदृशम् ॥१०॥

([6]आकाशे)

रम्यान्तरः कमलिनीहरितैः सरोभिश्,
छायाद्रुमैर्नियमितार्कमयूख[7]-तापः ।
भूयात् कुशेशयरजोमृदुरेणुरस्याः
शान्तानुकूलपवनश्च शिवश्च पन्थाः ॥११॥

(सर्वे सविस्मयमाकर्णयन्ति)

गौत०—जादे ! [8]ण्णादिजणसिणिद्धं अब्भणुण्णादासि तवोवणदेवदाहिं । पणम भअवदीणं (जाते ! ज्ञातिजनस्निग्धाभिरनुज्ञातासि तपोवन-देवताभिः । प्रणम भगवतीः ।)

शकु०—(सप्रणामं परिक्रम्य जनान्तिकम्) हला पिअंवदे ! णं अज्जउत्त-दंसणुस्सुआए वि अस्समपदं परिच्चअंतीए दुक्खदुक्खेण मे चलणा पुरदो पवट्टंति[9] । (हला प्रियंवदे ! ननु आर्यपुत्रदर्शनोत्सुकाया अपि आश्रमपदं परित्यजन्त्या दुःखदुःखेन मे चरणौ पुरतः प्रवर्तेते ।)

---

१. ०वनदेवतास्तपो० । २. ०सिक्तेषु । ३. ०प्रवृत्ति०, ४. इदं चतुर्षु पद्येषु द्वितीयम् । ५. यदासीत्० ०तमेभिरात्मनः. ६. (नेपथ्ये).
७. ०मरीचि०, र. ११।११
८. ण्णादि०० द्धाहिं अणुण्णादगमणासि. नि. ९. पुरोमुहा णिवडंति.

प्रियं०—ण केवलं तवोवणविरहकादरा सही जेव्व, तुए उवट्ठिदविओ-अस्स तवोवणस्स वि दाव समवत्था दीसइ। (न केवलं तपोवन-विरहकातरा सख्येव, त्वयोपस्थितवियोगस्य तपोवनस्यापि तावत् समवस्था दृश्यते।)

उग्गलिअदब्भकवला मिआ परिच्चत्तणच्चणा मोरा।
ओसरिअपंडुपत्ता मुंअइ अस्सू विअ लदाओ ॥१२॥
(उद्गलितदर्भकवला मृग्यः परित्यक्तनर्तना मयूराः।
अपसृतपाण्डुपत्रा मुञ्चन्त्यश्रूणीव लताः[1] ॥)

शकु०—(स्मृत्वा) ताद ! लदावहिणिअं वणजोसिणिं दाव आमंतइस्सं। (तात ! लताभगिनीं वनज्योत्स्नां तावदामन्त्रयिष्ये।)

काश्य०—अवैमि ते तस्यां [2]सोदरस्नेहम्। इयं सा दक्षिणेन।

शकु०—(लतामुपेत्यालिङ्ग्य) वणजोसिणि ! चूदसंगता वि मं पच्चालिंग इदोगदाहिं साहावाहाहिं। अज्जप्पहुदि दूरपरिवत्तिणी भविस्सम्हि[3]। (वनज्योत्स्ने ! चूतसंगतापि मां प्रत्यालिङ्ग इतोगताभिः शाखाबाहाभिः। अद्यप्रभृति दूरपरिवर्तिनी भविष्यामि।)

काश्यपः—
संकल्पितं प्रथममेव मया [4]त्वदर्थे
भर्तारमात्मसदृशं [5]सुकृतैर्गता त्वम्।
चूतेन संश्रितवती नवमालिकेय-
मस्यामहं त्वयि च संप्रति वीतचिन्तः ॥१३॥

इतः पन्थानं प्रतिपद्यस्व।

शकु०—(सख्यौ प्रति) हला ! एसा दुवेणं वो हत्थे णिक्खेवो। (हला ! एषा, द्वयोर्युवयोर्ननु हस्ते निक्षेपः।)

सख्यौ—अअं जणो कस्स हत्थे समप्पिदो ?। (अयं जनः कस्य हस्ते समर्पितः ?।) (बाष्पं विहरतः)

काश्य०—अनसूये ! अलं रुदित्वा। ननु भवतीभ्यामेव स्थिरीकर्तव्या शकुन्तला। (सर्वे परिक्रामन्ति)

---

१. द्र. र. १४।६९. २. सौहार्दम् ३. ताद, अहं विअ इअं तुए चिंतणीआ. ४. तवार्थे. ५. ०स्वगुणैर्गतासि। अस्यास्तु संप्रति वरं त्वयि वीतचिन्तः, कान्तं समीपसहकारमिमं करिष्ये।)

शकु०—ताद ! एसा उडजपज्जंतचारिणी [1]गब्भमंथरा मिअवहू जदा अणहप्पसवा[2] होइ, तदा मे कं पि पिअणिवेदइत्तअं विसज्जइस्सह। (तात ! एषा उटजपर्यन्तचारिणी गर्भमन्थरा मृगवधूः यदा अनघप्रसवा भवति तदा मह्यं कमपि प्रियनिवेदयितृकं विसर्जयिष्यथ।)

काश्य०—वत्से ! नेदं विस्मरिष्यामः।

शकु०—(गतिभङ्गं रूपयित्वा) को णु खु एसो णिवसणे मे सज्जइ ?। (को नु खल्वेष निवसने मे सज्जते ?) (परावर्तते)

काश्य०—वत्से !

यस्य त्वया व्रणविरोपणमिङ्गुदीनां
तैलं न्यषिच्यत मुखे कुशसूचिविद्धे।
श्यामाकमुष्टिपरिवर्धितको जहाति
सोऽयं न पुत्रकृतकः पदवीं मृगस्ते ॥१४॥

शकु०—वच्छ ! किं सहवासपरिच्चाइणिं मं अणुसरसि ?। [3]अचिरप्पसूदाए जणणीए विणा वड्ढिदो। दाणिं पि मए विरहिदं तुमं तादो चिंतइस्सदि। णिवत्तेहि वच्छ, णिवत्तेहि। (वत्स ! किं सहवासपरित्यागिनीं मामनुसरसि ?। अचिरप्रसूतया जनन्या विना वर्धितोऽसि[3]। इदानीमपि मया विरहितं त्वां तातश्चिन्तयिष्यति। निवर्तस्व वत्स निवर्तस्व।) (रुदती प्रस्थिता)

काश्यपः—

उत्पक्ष्मणोर्नयनयोरुपरुद्धवृत्ति
बाष्पं कुरु स्थिरतया विरतानुबन्धम्[4]।
अस्मिन्नलक्षितनतोन्नतभूमिभागे
मार्गे पदानि खलु ते विषमीभवन्ति ॥१५॥

शार्ङ्ग०—भगवन् ! ओदकान्तं स्निग्धो जनोऽनुगन्तव्य इति श्रूयते। तदिदं सरस्तीरम्। अत्र संदिश्य प्रतिगन्तुमर्हसि।

काश्य०—तेन हीमां क्षीरवृक्षच्छायामाश्रयामः। (सर्वे परिक्रम्य स्थिताः)

---

१. कब्भहार. २. सुहप्पसवा.

३. एष हि शकुन्तलायाः सोदरो भ्राता, समानव्यसनतया। दीर्घापाङ्गो नाम दीर्घदर्शन एष न ह्येव विशश्वास, न च विश्वसिति दुष्यन्तस्य, प्रतिरुणद्धि च त्वां स्वसारमृषिरिव। ४. शिथिलानु०, विहतानु०.

काश्य०—(आत्मगतम्) किं नु खलु तत्रभवतो [1]दुष्यन्तस्य युक्तरूपमस्माभिः संदेष्टव्यम् ?। (चिन्तयति)

शकु०—(जनान्तिकम्) हला ! पेक्ख; [2]णलिणीपत्तंतरिदं वि सहअरं अपेक्खंती आदुरा चक्कवाई आरडदि दुक्करं अहं करेमि त्ति तक्केमि। (हला ! पश्य; नलिनीपत्रान्तरितमपि सहचरमपश्यन्ती आतुरा चक्रवाकी आरौति। दुष्करमहं करोमीति तर्कयामि।)

अन०—सहि[3] ! मा एव्वं मंतेहि।

एसा वि पिएण विणा गमअइ रअणिं विसाअदीहअरं।
गरुअं पि विरहदुक्खं आसाबंधो[4] सहावेदि ॥१६॥

(सखि ! मैवं मन्त्रय।)

एषापि प्रियेण विना गमयति रजनीं विषाददीर्घतराम्।
गुर्वपि विरहदुःखमाशाबन्धः[4] साहयति ॥

काश्य०—शार्ङ्गरव ! इति त्वया मद्वचनात् स राजा शकुन्तलां पुरस्कृत्य वक्तव्यः।

शार्ङ्ग०—आज्ञापयतु भवान्।

काश्यपः—अस्मान् साधु विचिन्त्य संयमधनानुच्चैःकुलं चात्मनस्-
त्वय्यस्यां कथमप्यबान्धवकृतां स्नेहप्रवृत्तिं च ताम्[5]।
सामान्य[6]प्रतिपत्तिपूर्वकमियं दारेषु दृश्या त्वया
भाग्यायत्तमतः परं न खलु तद् वाच्यं वधूबन्धुभिः[7] ॥१७॥

शार्ङ्ग०—गृहीतः संदेशः।

---

१. दुःषंतस्य   २. वि. ४।२० श्लो.

३. सही, ण णो अस्समपदे अत्थि को वि चित्तवंतो जो तए विरहीअन्तो अज्ज ण ऊसुओ किदो। पेक्ख,—पुडइणिवत्तंतरिअं बाहरिओ णाणुवाहरेइ पिअं।
मुहउव्वूढमुणालो तुइ दिट्ठिं देइ चक्काओ ॥
कण्वः—वत्स शार्ङ्गरव ! इति त्वया मद्वच०

४. मे. १।१० वि. ३।७-८ ग.   ५. गर्भाधानक्षणपरिचयावधिकाम्।

६. सा मान्यप्र० इत्यपिच्छेदः। ततश्च शकुन्तलाबहुमानसूचनमप्यत्र।

७. दैवाधीनम ००तत् स्त्रीबन्धुभिर्याच्यते।

काश्य०—वत्से ! त्वमिदानीमनुशासनीयासि। वनौकसोऽपि सन्तो लौकिकज्ञा[1] वयम्।

शार्ङ्ग०—न खलु धीमतां कश्चिदविषयो नाम।

काश्य०—सा त्वमितः पतिकुलं[2] प्राप्य,—

शुश्रूषस्व[3] गुरून् कुरु प्रियसखीवृत्तिं सपत्नीजने
[4]भर्तुर्विप्रकृतापि रोषणतया मा स्म प्रतीपं गमः।
भूयिष्ठं भव दक्षिणा परिजने [5]भोगेष्वनुत्सेकिनी
यान्त्येवं गृहिणीपदं युवतयो वामाः कुलस्याधयः ॥१८॥

कथं वा गौतमी मन्यते ?।

गौत०—एत्तिओ वहूजणस्स उवदेसो। जादे ! एदं खु सव्वं ओधारेहि। (एतावान् वधूजनस्योपदेशः। जाते ! एतत् खलु सर्वमवधारय।)

काश्य०—एहि वत्से ! परिष्वजस्व मां सखीजनं च।

शकु०—ताद ! इदो एव्व किं पिअंवदामिस्साओ सहीओ णिवत्तिस्संति ?। (तात ! इत एव किं प्रियंवदामिश्राः सख्यो निवर्तिष्यन्ते ?।)

काश्य०—वत्से ! इमे अपि प्रदेये। न युक्तमनयोस्तत्र गन्तुम्। त्वया सह गौतमी गमिष्यति।

शकु०—(पितरमाश्लिष्य) कहं दाणिं तादस्स अङ्कादो परिब्भट्टा मलअपव्वदुम्मूलिआ चंदणलदा विअ देसंतरे जीविअं धारइस्सं ?। (कथमिदानीं तातस्य आङ्कात् परिभ्रष्टा मलयपर्वतोन्मूलिता चन्दनलतेव देशान्तरे जीवितं धारयिष्यामि।)

काश्य०—वत्से ! किमेवं कातरासि ?।

अभिजनवतो भर्तुः श्लाघ्ये स्थिता गृहिणीपदे
विभवगुरुभिः कृत्यैस्तस्य प्रतिक्षणमाकुला।
तनयमचिरात् प्राचीवार्कं प्रसूय च पावनं
मम विरहजां वत्से ! न त्वं शुचं गणयिष्यसि ॥१९॥

---

१. लोकज्ञा एव. २. पतिगृहं।
३. काम. ४।१।५, ३७,३८। इदं च चतुर्षु पद्येषु तृतीयम्।
४. पत्युः। ५. भाग्येष्व.

शकु०—(पितुः पादयोः अवनम्य) ताद ! वंदामि (तात ! वन्दे)

काश्यपः—यदिच्छामि ते तदस्तु ।

शकु०—(सख्यावुपेत्य) सहीओ एत्थ दुवे वि मं समं जेव्व परिस्सजह । (हला ! द्वे अपि मां सममेव परिष्वजेथाम् ।)

सख्यौ—(तथा कृत्वा) सहि ! जइ णाम सो राआ पच्चहिण्णाणमंथरो भवे तदो से इमं अत्तणामहेअअंकिअं अंगुलीअअं दंसेहि । (सखि ! यदि नाम स राजा प्रत्यभिज्ञानमन्थरो भवेत् ततः तस्य इमाम् आत्मनामधेयाङ्कितमङ्गुलीयकं दर्शय ।)

शकु०—इमिणा संदेहेण वो आकंपिद म्हि । (अनेन संदेहेन वामाकम्पितास्मि ।)

सख्यौ—मा भाआहि; सिणेहो पावसंकी । (मा भैषीः, स्नेहः पापशङ्की ।)

शार्ङ्ग०—[1]अगान्तरमारूढः सविता । त्वरतामत्रभवती ।

शकु०—(आश्रमाभिमुखी स्थित्वा) ताद ! कदा णु भूओ तवोवणं पेक्खिस्सं ? (तात ! कदा नु भूयस्तपोवनं प्रेक्षिष्ये ? ।)

काश्य०—वत्से ! श्रूयताम्—

भूत्वा चिराय [2]चतुरन्तमहीसपत्नी
[3]दौष्यन्तिमप्रतिरथं तनयं निवेश्य[4] ।
[5]भर्त्रा तदर्पितकुटुम्बभरेण सार्धं
शान्ते करिष्यसि पदं पुनराश्रमेऽस्मिन् ॥२०॥

गौत०—जादे परिहीअदि गमणवेला । णिवत्तेहि पिदरं । अहवा चिरेण वि पुणो पुणो एसा एव्वं मंतइस्सदि । णिवत्तदु भवं । (जाते ! परिहीयते गमनवेला । निवर्तय पितरम् । अथवा चिरेणापि पुनः पुनरेषा एवं मन्त्रयिष्यते । निवर्ततां भवान् ।)

काश्य०—वत्से ! उपरुध्यते तपोऽनुष्ठानम् ।

---

१. युगा० २. सदिगन्त००.

३. दौःषन्ति०० प्रसूय.

४. निवेश्य विवाह्य्य । र. ११।५७. मनु. ४।२.

५. तत्संनिवेशितधुरेण सहैव भर्त्रा शान्त्यै

शकु०—(भूयः पितरमाश्लिष्य) तवच्चरणपीडिदं तादसरीरं। ता मा अदिमेत्तं मम किदे उक्कंठिदुं। (तपश्चरणपीडितं तातशरीरम्। तन्मातिमात्रं मम कृते उत्कण्ठितुम्।)

काश्य०[1]–(सनिःश्वासम्)

शममेष्यति मम शोकः कथं नु वत्से! त्वया रचितपूर्वम्?।
उटजद्वारविरूढं नीवारबलिं विलोकयतः॥२१॥

गच्छ, शिवास्ते पन्थानः सन्तु। (निष्क्रान्ता शकुन्तला सहयायिनश्च)

सख्यौ—(शकुन्तलां विलोक्य) हद्धी हद्धी। अंतरिदा सउंदला वणराईए। (हा धिक् हा धिक्। अन्तर्हिता शकुन्तला वनराज्या।)

काश्य०–(सनिःश्वासम्) अनसूये! प्रियम्वदे! गतवती वां सहधर्मचारिणी। निगृह्य शोकमनुगच्छतं मां प्रस्थितम्। (सर्वे प्रस्थिताः)

उभे—ताद! सउंदलाविरहिदं सुण्णं विअ तवोवणं कहं पविसावो?। (तात! शकुन्तलाविरहितं शून्यमिव तपोवनं कथं प्रविशावः?।)

काश्य०–स्नेहप्रवृत्तिरेवंदर्शिनी। (सविमर्शं परिक्रम्य) हन्त भोः! शकुन्तलां पतिकुलं विसृज्य लब्धमिदानीं स्वास्थ्यम्। कुतः—

अर्थो हि कन्या परकीय एव
तामद्य[2] संप्रेष्य परिग्रहीतुः।
जातो ममायं विशदः प्रकामं
प्रत्यर्पितन्यास इवान्तरात्मा[3]॥२२॥

(निष्क्रान्ताः सर्वे)

॥ इति चतुर्थोऽङ्कः[4] ॥

---

१. कण्वः—अयि, किं मामेवं जडीकरोषि (निःश्वस्य) अपयास्यति मे शोकः०० त्वयाव०० द्वारि००। २. ०मेव.

३. जातोऽस्मि सद्यो विशदान्तरात्मा चिरस्य निक्षेप इवार्पयित्वा॥ इदं च चतुर्षु श्लोकरत्नेषु चतुर्थम्।

४. शकुन्तलाप्रस्थानं नाम चतुर्थोऽङ्कः।

विज्ञाप्यम्

पञ्चमस्यास्याङ्कस्यारम्भेऽत्रेयं द्विधा वस्तुयोजना—

मा. नि. खि. च.	पि. सा.
१. सविदूषकराजप्रवेशः	१. प्रविष्टस्य कञ्चुकिनश्चतुश्लोकी एष राजेति निर्देशश्च
२. वर्णपरिचये हंसपदिकोपालम्भः	२. सविदूषकराजप्रवेशः
३. हंसप०सान्त्वनाय विदू०-विसर्जनम्	३. राज्ञः स्वाधिकार-खेदोक्तिः
४. राज्ञोऽहेतु विरहपर्युत्सुकत्वम्	४. वैतालिकोक्त्य राजखेदापनोदः
५. कञ्चुकिप्रवेशस्तत्त्रिश्लोकी एष राजेति निर्देशश्च	५. वर्णपरिचये हंसपदिकोपालम्भः
६. राज्ञोऽग्निशरणप्रस्थान्	६. हंसप०सान्त्वनाय विदू०विसर्जनम्
७. राज्ञः स्वाधिकारखेदोक्तिः	७. राज्ञोऽहेतु विरहपर्युत्सुकत्वम्
८. वैतालिकोक्त्या राजखेदापनोदः	८. पर्युत्सुकाय राज्ञे कञ्चुकिनः कण्व-शिष्यागमनसूचना
९. राज्ञश्चित्तसौस्थ्योपपत्तिः	९. राज्ञः पर्युत्सुकेनैव चेतसाऽग्निशरण-प्रस्थानम्
१०. अग्निशरणे कण्वशिष्यप्रवेशः	१०. अग्निशरणे कण्वशिष्यप्रवेशः

अत्र पि. सा. पाठे चतुर्थाङ्कवस्तुसमनन्तरवस्तुकत्वमित्येको गुणः, अवगुणाः पुनरेते १. कञ्चुकिन 'एष राजे'-ति अप्रविष्टाय राज्ञे निर्देशस्य निराधारत्वम्, २. राज्ञोऽग्निशरणप्रस्थानावसरे वस्त्वभावः, (मा. आदिपाठे पुनर्वैतालिकोक्त्या तत्पूर्त्तिः,) ३. शकुन्तलाप्रख्यान-निर्णयेऽभ्यर्हितस्य चेतः—सौस्थ्यस्य विरहपर्युत्सुकत्वौपयिकं शैथिल्यं, शैथिल्यं च ततः प्रखरतायाः। (मा. आदिपाठे कञ्चुकिनः श्लोकत्रयोक्ति यावद् राज्ञः पर्याकुलत्वाभिन-येनारिक्ताभिनयकत्वलाभः, एकश्लोकन्यूनतया लाघवं चापरौ गुणौ) ॥

पञ्चमोऽङ्कः

(ततः प्रविशति आसनस्थो राजा विदूषकश्च)

विदू०—(कर्णं दत्त्वा) भो वअस्स ! संगीदसालंतरे अवधाणं देहि। [1]लअविशुद्धाए गीदीए सरसंजोओ सुणीअदि । जाणे तत्तहोदी हंसवदिआ [2]वण्णपरिअअं करेदि त्ति । (भो वयस्य ! संगीतशालान्तरे अवधानं देहि । [1]लयविशुद्धाया गीतेः स्वरसंयोगः श्रूयते । जाने तत्रभवती हंसपादिका [2]वर्णपरिचयं करोतीति ।)

रूपान्तरम्

(पञ्चमोऽङ्कः)

(ततः प्रविशति कञ्चुकी) कञ्चु०—(निरश्वस्य) अहो वत । कीदृशो वयोवस्थामापन्नोऽस्मि । आचार इ०० लम्वनाय ॥१॥ । यावदभ्यन्तर गताय देवाय स्वमनुष्ठेयमकालक्षेपाहं निवेदयामि (स्तोकमन्तरं गत्वा) किं पुनस्तत् ? (विचिन्त्य) आं, ज्ञातम् । कण्वशिष्यास्तपस्विनो देवं द्रष्टुमिच्छन्ति । भोश्चित्रमेतत् 'क्षणात् प्रबोधमायाति लङ्घ्यते तमसा पुनः निर्वास्यतः प्रदीपस्य शिखेव जरतो मतिः ॥२॥ (परिक्रम्य दृष्ट्वा) एष देवः प्रजाः०० षेवते शान्त०० द्विपेन्द्रः ॥३॥ यत्सत्यं शङ्कितोऽस्मीदानीमेव धर्मासनादुत्थिताय देवाय कण्वशिष्यागमनं निवेदयितुम् । अथवा कुतो वा विश्रमो लोकपालानाम् । तथा हि—'भानुः सकृद्०० धर्मं एषः ॥४॥ (परिक्रामति) (ततः प्रविशति राजा विदूषको विभवतश्च परिवारः) राजा—(अधिकारखेदं निरूप्य) सर्वः प्रार्थितमधिगम्य सुखी संपद्यते । राज्ञां तु चरितार्थतापि दुःखोत्तरैव । कुतः औत्सुक्यमात्र०० तपत्रम् ॥५॥ (नेपथ्ये वैतालिकौ) जयति जयति देवः । एकः—

---

१. लयविशुद्धा = कलविशुद्धा नि. मा., तालगतिविशुद्धा० सा. । लयोऽत्र मध्यमः शृङ्गारप्रस्तावात् । तथा च माल० २।१ संवादे का. लयश्च तालमानम् इति, 'तालवर्ती तु यः कालः स काललयनाल्लयः' इति च तत्रैव २।८ पद्यटिप्पणे ।

२. वर्णो गानक्रिया 'गानक्रियोच्यते वर्णः' रा. । क्रिया च शिक्षा । तथा च च र. ३।२९, एवमेवार्थशास्त्रे कौटल्यः—क्रिया हि द्रव्यं विनयति नाद्रव्यं ।

राजा—तूष्णीं भव यावदाकर्णयामि। (आकाशे गीयते)

अहिणव-महु-लोलुवो भवं तह परिचुंबिअ चूअमंजरिं।
कमलवसइमेत्तणिव्वुदो महुअर! विम्हरिओ सि णं कहं॥१॥

राजा—अहो रागपरिवाहिणी गीतिः।

विदू०—किं दाव गीदीए अवगओ अक्खरत्थो ?
(किं तावत् गीतेरवगतः अक्षरार्थः ?)

राजा—(स्मितं कृत्वा) सकृत् कृतप्रणयोऽयं जनः। तस्याः देवीं वसुमतीमन्तरेण मदुपालम्भमवगतोऽस्मि। सखे! माधव्य ? मद्वचनादुच्यतां हंसपदिका 'निपुणमुपालब्धोऽस्मी'-ति।

विदू०—जं भवं आणवेदि (उत्थाय) भो वअस्स! गहीदस्स ताए परकीएहिं सिहण्णए ताडीअमाणस्स अच्छराए वीदराअस्स विअ णत्थि दाणिं मे मोक्खो। (यद् भवान् आज्ञापयति (उत्थाय) भो वयस्य! गृहीतस्य तया परकीयैः हस्तैः शिखण्डके ताड्यमानस्य अप्सरसा वीतरागस्येव नास्ति इदानीं मे मोक्षः।)

राजा—गच्छ नागरकवृत्त्या संज्ञापय एनाम्।

—स्वसुःख०० संश्रितानाम् ॥६॥ द्वितीयः—नियमयसि विमा०० जानानाम् ॥७॥ राजा—(आकर्ण्य) आश्चर्यम्। एतेन कार्यानुशासनपरिश्रान्ताः पुनर्नवीकृताः स्मः। विदूषकः—भो गोविन्दारओ त्ति भणिदस्स रिसभस्स परिस्समो णस्सदि। राजा—ननु क्रियतामासनपरिग्रहः। (उभावुपविष्टौ परिजनश्च यथास्थानं स्थितः, नेपथ्ये वीणाशब्दः) विदूषकः—(कर्णं दत्वा) भो वअस्स सं०० कर्णं देहि। लय०० कर्णयामि (पृ० ४९५)। कञ्चुकी—(विलोक्य) अये अन्यासक्तचित्तो देवः। तदवसरं प्रतिपालयामि (एकान्ते स्थितः) (नेपथ्ये गीयते) अ०० कहं ॥८॥ राजा—अहो०० गीतिः। विदू०—भो वअस्स०० देवीं हंसवतीमन्तरेण०० स्मीति०० गहिदो ताए सिहण्डए अच्छभक्तो। ता अवीदराअस्स००० शान्तयैनाम्०० जन्मान्तर०० सौहृदानि ॥९॥ (अस्मृतिनिमित्तमुन्मनस्कत्वं रूपयति) कञ्चु०—(उपसृत्य) जयति जयति देवः। एते खलु०० प्रतीहारी—इदो इदो देवः (परिक्रम्य) भट्टा एसो अहिणवसंमज्जणरमणीओ००० देवो०० कण्वेन०० तपस्विनः०० मे मनः ॥१०॥ प्रतीहारी—देवस्स भु असद्दणिव्वुदे असस्मे कुदो इदं।—

विदू०—का गई ? । (का गतिः ? ।) (निष्क्रान्तः)

राजा—(आत्मगतम्) किं नु खलु [1]गीतमेवंविधमाकर्ण्य इष्टजनविरहादृतेऽपि बलवदुत्कण्ठितोऽस्मि । अथवा,—

रम्याणि वीक्ष्य मधुरांश्च निशम्य शब्दान्
पर्युत्सुकीभवति यत्सुखितोऽपि जन्तुः ।
तच्चेतसा स्मरति नूनमबोधपूर्वं
भावस्थिराणि जननान्तरसौहृदानि ॥२॥

(पर्याकुलस्तिष्ठति)

(ततः प्रविशति कञ्चुकी)

कञ्चु०—अहो नु खल्वीदृशीमवस्थां प्रतिपन्नोऽस्मि ।

आचार इत्यवहितेन मया गृहीता
या वेत्रयष्टिरवरोधगृहेषु राज्ञः ।
काले गते बहुतिथे मम सैव जाता
प्रस्थानविक्लवगतेर-वलम्बनार्था ॥३॥

भोः ! कामं धर्मकार्यमनतिपात्यं देवस्य, तथापीदानीमेव धर्मासनादुत्थिताय पुनरुपरोधकारि कण्वशिष्यागमनमस्मै नोत्सहे निवेदयितुम् । अथवा अविश्रमोऽयं लोकतन्त्राधिकारः । कुतः—

भानुः सकृद् युक्ततुरङ्ग एव रात्रिन्दिवं गन्धवहः प्रयाति ।
शेषः सदैवाहितभूमिभारः षष्ठांशवृत्तेरपि धर्म एषः ॥४॥

यावन्नियोगमनुतिष्ठामि । (परिक्रम्यावलोक्य च) एष देवः—

—किं तु सुचरिदाहि०० तक्केमि (ततः प्रविशतो गौतमीसहितौ शकुन्तलामादाय कण्वशिष्यौ पुरतश्चैषां पुरोहितकञ्चुकिनौ) कञ्चु०—इत इतो भवन्तः । शार्ङ्गरवः—सखे शारद्वत ! महाभागः०० गृहमिव ॥११॥

---

१. गीतार्थमाक०

प्रजाः प्रजाः स्वा इव तन्त्रयित्वा
निषेवते[१]ऽशान्तमना विविक्तम् ।
यूथानि संचार्य रविप्रतप्तः
शीतं दिवा स्थानमिव द्विपेन्द्रः ।।५।।

(उपगम्य) जयतु जयतु देवः । एते खलु हिमगिरेरुपत्यकारण्यवासिनः काश्यपसंदेशमादाय सस्त्रीकास्तपस्विनः संप्राप्ताः । श्रुत्वा देवः प्रमाणम् ।

राजा—(सादरम्) किं काश्यपसंदेशहारिणः ? ।

कञ्चु०—अथ किम् ? ।

राजा—तेन हि मद्वचनाद् विज्ञाप्यतामुपाध्यायः सोमरातः—अमूनाश्रमवासिनः, श्रौतेन विधिना सत्कृत्य, स्वयमेव प्रवेशयितुमर्हति—इति । अहमप्यत्र तपस्विदर्शनोचिते प्रदेशे स्थितः प्रतिपालयामि ।

कञ्चु०—यदाज्ञापयति देवः । (निष्क्रान्तः)

रजा—(उत्थाय) वेत्रवति ! अग्निशरणमार्गमादेशय ।

प्रती०—इदो इदो देवो । (इत इतो देवः ।)

राजा—(परिक्रामति, अधिकारखेदं निरूप्य) सर्वः प्रार्थितमर्थमधिगम्य सुखी संपद्यते जन्तुः । राज्ञां तु चरितार्थता दुःखान्तरैव ।

औत्सुक्यमात्रमवसाययति प्रतिष्ठा
क्लिश्नाति लब्धपरिपालनवृत्तिरेनम् ।
नातिश्रमापनयनाय न[२] च श्रमाय
राज्यं स्वहस्तधृतदण्डमिवातपत्रम् ।।६।।

(नेपथ्ये वैतालिकौ)

विजयतां देवः ।

प्रथमः—

स्वसुखनिरभिलाषः खिद्यसे लोकहेतोः
प्रतिदिनमथवा ते [३]वृत्तिरेवंविधैव ।
अनुभवति हि मूर्ध्ना पादपस्तीव्रमुष्णं
शमयति परितापं छायया संश्रितानाम् ।।७।।

---

१. ०ते शान्त०, ते श्रान्त०. २. यथा श्रमाय. ३. सृष्टिरे०

द्वितीयः—

नियमयसि [1]कुमार्गप्रस्थितानात्तदण्डः
प्रशमयसि विवादं कल्पसे रक्षणाय।
अतनुषु विभवेषु ज्ञातयः सन्तु नाम
त्वयि तु परिसमाप्तं बन्धुकृत्यं प्रजानाम् ॥८॥

राजा—[2]एते क्लान्तमनसः पुनर्नवीकृताः स्मः। (परिक्रामति)

प्रती०—एसो अहिणवसम्मज्जणसस्सिरीओ सण्णिहिदहोमधेणू अग्गिसरणालिदो। आरुहदु देवो। (एषोः अभिनवसंमार्जनसश्रीकः संनिहितहोमधेनुरग्निशरणालिन्दः। आरोहतु देवः।)

राजा—(आरुह्य परिजनांसावलम्बी तिष्ठति) वेत्रवति! किमुद्दिश्य भगवता काश्यपेन मत्सकाशमृषयः प्रेषिताः स्युः?।

किं तावद् व्रतिनामुपोढतपसां विघ्नैस्तपो दूषितं
धर्मारण्यचरेषु केनचिदुत प्राणिष्वसच्चेष्टितम्[3]।
आहोस्वित् प्रसवो ममापचरितैर्विष्टम्भितो वीरुधा[4]-
मित्यारूढबहुप्रतर्कमपरिच्छेदाकुलं मे मनः ॥९॥

प्रती०—सुचरिदणंदिणो इसीओ देवं सभाजइदुं आअदेत्ति तक्केमि। (सुचरितनन्दिन ऋषयो देवं सभाजयितुमागता इति तर्कयामि।)

(ततः प्रविशन्ति गौतमीसहितौ शकुन्तलां पुरस्कृत्य कण्वशिष्यौ पुरश्च कन्चुकी पुरोहितश्च)

कन्चु०—इत इतो भवन्तः। (शार्ङ्गरव-शारद्वतौ परस्परम्[5])

शार्ङ्ग०—शारद्वत!

महाभागः कामं नरपतिरभिन्नस्थितिरहो
न कश्चिद् वर्णानामपथमपकृष्टोऽपि भजते।
तथापीदं शश्वत् परिचितविविक्तेन मनसा
जनाकीर्णं मन्ये हुतवहपरीतं गृहमिव ॥१०॥

---

१. विमार्ग०.
२. (आकर्ण्य) आश्चर्यम्, एतेन कार्यानुशासनपरिश्रान्ताः पुन०।
३. रघु ५। आरम्भः। ४. कु ५।३४ ५. इयमस्मद्योजना।

शार०—[1]जाने भवान् पुरप्रवेशादित्थंभूतः संवृत्तः। अहमपि,—

अभ्यक्तमिव स्नातः शुचिरशुचिमिव प्रबुद्ध इव सुप्तम्।
बद्धमिव स्वैरगति[2]र्जनमिह सुखसङ्गिनमवैमि[3] ॥११॥

शकु०—(अनिमित्तं सूचयित्वा) अम्महे, किं मे वामेदरं णअणं विप्फुरदि ?। (अहो, किं मे वामेतरं नयनं विस्फुरति ?।)

गौतमी—जादे ! पडिहदं अमंगलं। सुहाइं दे भत्तुकुलदेवदाओ वितरंदु ! (जाते ! प्रतिहतममङ्गलम्। सुखानि ते भर्तृकुलदेवता वितरन्तु।) (परिक्रामति)

पुरो०—(राजानं निर्दिश्य) भो भोस्तपस्विनः ! असावत्रभवान् वर्णाश्रमाणां रक्षिता प्रागेव मुक्तासनो वः प्रतिपालयति। पश्यतैनम्।

शार्ङ्ग०—[4]काममेतदभिनन्दनीयं तथापि वयमत्र मध्यस्थाः। कुतः—

भवन्ति नम्रास्तरवः [5]फलोद्गमै-
र्नवाम्बुभिर्दूरविलम्बिनो घनाः।
अनुद्धताः सत्पुरुषाः समृद्धिभिः
स्वभाव एवैष परोपकारिणाम् ॥१२॥

प्रती०—देव ! [6]पसण्णमुहवण्णा दीसंति। जाणामि विसद्धकज्जा इसीओ। (देव ! प्रसन्नमुखवर्णा दृश्यन्ते। जानामि विस्रब्धकार्या ऋषयः।)

राजा—(शकुन्तलां दृष्ट्वा) अथात्रभवती,—

का स्विदवगुण्ठनवती नातिपरिस्फुटशरीरलावण्या।
मध्येतपोधनानां किसलयमिव पाण्डुपत्राणाम् ॥१३॥

---

१. शार्ङ्गरव, स्थाने खलु पुरप्रवेशात्तवेदृशः संवेगः। अहमपि।
२. ०र्जनमवशः संगिनमवैमि.
३. पुरोधाः—अत एव भवद्विधा महान्तः। शकुं—.
४. भो महाब्राह्मण ! काम०. नि.मा.सा.खि.च.
५. फलागमैः नि०
६. पसण्णमुहा सुत्थकप्पा विअ इसीओ दीसंति। राजा—अये, —कैयम.

प्रती०—देव[१] ! कुतूहलगब्भोपहिदो ण मे तक्को पसरदि । णं दंसणीआ उण से अकिदी लक्खीअदि । (देव ! कुतूहलगर्भोपहितो न मे तर्कः प्रसरति । ननु दर्शनीया पुनरस्या आकृतिर्लक्ष्यते ।)

राजा—([२]दोहदलक्षणं विभाव्य) भवतु, अनिर्वर्णनीयं परकलत्रम् ।

शकु०—(हस्तमुरसि कृत्वा, आत्मगतम्) हिअअ ! किं एव्वं वेवसि ? [३]अज्जउत्तस्स भावबंधं ओहारिअ धीरं दाव होहि । (हृदय ! किमेवं वेपसे ? । आर्यपुत्रस्य भावबन्धमवधार्य धीरं तावद् भव ।)

पुरो०—(पुरो गत्वा) एते विधिवदर्चितास्तपस्विनः । कश्चिदेषामुपाध्यायसंदेशः । तं देवः श्रोतुमर्हति ।

राजा—अवहितोऽस्मि ।

शिष्यौ–(हस्तानुद्यम्य) स्वस्ति भवते[४] ।

राजा—अभिवादये[५] वः ।

शिष्यौ–इष्टेन युज्यस्व ।

राजा—अपि [६]निर्विघ्नतपसो मुनयः ? ।

शिष्यौ— कुतो धर्मक्रियाविघ्नः सतां रक्षितरि त्वयि ।
तमस्तपति घर्मांशौ कथमाविर्भविष्यति ?[७] ।।१४।।

राजा—(आत्मगतम्) [८]अर्थवान् खलु मे राजशब्दः । (प्रकाशम्) अथ भगवाँल्लोकानुग्रहाय कुशली काश्यपः ? ।

शिष्यौ—स्वाधीनकुशलाः सिद्धिमन्तः । स भवन्तमनामयप्रश्नपूर्वकमिदमाह ।

राजा—किमाज्ञापयति भगवान् ? ।

शार्ङ्ग०—यन्मिथःसमयाद् इमां मदीयां दुहितरं भवानुपायंस्त, तन्मया प्रीतिमता युवनोरनुज्ञातम् । कुतः ?—

---

१. प्रती०–भट्टा, दंसणीआकिदी खु लक्खीअदि । २. इयमस्मद्योजया
३. भावाणुवंधं सुमरिअ धीरत्तणं दाव अवलंबसु.
४. ऋषयः विजयस्व राजन्. ५. सर्वानभि०
६. निर्विघ्नं तपः ?. ७. र. ५।१३. ८. सर्वथाऽर्थवान्०

त्वमर्हतां प्राग्रसरः स्मृतोऽसि नः[१]
शकुन्तला मूर्तिमती[२] च सत्क्रिया।
समानयंस्तुल्यगुणं वधूवरं
चिरस्य वाच्यं न गतः प्रजापतिः[३] ॥१५॥

— तदिदानीमापन्नसत्त्वा[४] प्रतिगृह्यतां सहधर्मचरणायेति।

गौत०—[५]भद्दमुह! किंपि वत्तुकाम म्हि। (भद्रमुख! किमपि वक्तुकामास्मि।)

राजा—आर्ये! कथ्यताम्।

गौत०—अहवा ण मे वअणावसरो अत्थि। जदो[६]

णावेक्खिओ गुरुअणो[७] इमाए ण तुमे वि पुच्छिआ बंधू।
एक्कक्कमेव्व चरिए भणामि किं एक्कमेक्कस्स ॥१६॥

(अथवा, न मे वचनावसरोऽस्ति। यतः—

नापेक्षितो गुरुजनोऽनया न त्वयापि पृष्टो बन्धुः।
एकैकस्मिन्नेव चरिते भणामि किमेकमेकस्य ॥)

शकु०—([८]आत्मगतम्) किं णु खु अज्जउत्तो भणादि ?।
(किं नु खल्वार्यपुत्रो भणति ?)

राजा—किमिदमुपन्यस्तम् ?।

शकु०—(आत्मगतम्) हुं[९] सावलेवो से वअणावक्खेवो।
(हुं। सावलेपोऽस्य वचनोपक्षेपः)

शार्ङ्ग०—किं नाम किमिदमुपन्यस्तमिति।[१०] ननु भवन्त एव सुतरां लोकवृत्तान्तनिष्णाताः।

१. कथंत्ति २. ०तीव. ३. र. ७।१४. ४. ०सत्त्वेयं गृह्यताम्
५. अज्ज किंपि वत्तु० ६. कधिदुं ति। राजा-आर्ये, कथ्यताम्। गौतमी-.
७. इमीअ ण हु पुच्छिदो अवंधुअणो। तुए पुच्छिदो ण बन्धुअणो च. एक्कक्कमेण वरिए कीं भण्णउ एक्कमेक्कस्स. ८. (साशंकमाकुलमुपवर्ण्य)
९. पावओ खु वअणोवण्णासो। नि. मा. १०. ननु भवानेव ००निष्णातः।

सतीमपि [1]ज्ञातिकुलैकसंश्रयां
जनोऽन्यथा भर्तृमतीं विशङ्कते ।
अतः समीपे परिणेतुरिष्यते
प्रियाऽप्रिया वा प्रमदा स्वबन्धुभिः ॥१७॥

राजा—किं ?[2] किमत्रभवती, मया परिणीतपूर्वा ?।

शकु०—(सविषादम्; आत्मगतम्) हिअअ ! [3]संपदं दे आसंका । (हृदय ! सांप्रतं त आशङ्का ।)

शार्ङ्ग०—किं ? कृतकार्यद्वेषः ? धर्मं प्रति विमुखता ? कृतेऽवज्ञा[5] ?

राजा—कुतोऽयमसत्कल्पनाप्रसङ्गः[6] ?।

शार्ङ्ग०—

मूर्च्छन्त्यमी विकाराः प्रायेणैश्वर्यमत्तेषु[7] ॥१८॥

राजा—विशेषेणाधिक्षिप्तोऽस्मि ।

गौत०—जादे मुहुत्तअं मा लज्ज । अवणइस्सं दाव दे ओउंठणं । तदो तुमं भट्टा अहिजाणिस्सदि । (जाते ! मुहूर्तं मा लज्जस्व । अपनेष्यामि तावत् ते अवगुण्ठनम् । ततस्त्वां भर्ता अभिज्ञास्यति ।)

(यथोक्तं करोति)

राजा—(शकुन्तलां निर्वर्ण्य आत्मगतम्)

इदमुपनतमेवं रूपमक्लिष्टकान्ति,
प्रथमपरिगृहीतं स्यान्न वेत्यध्यवस्यन्[8] ।
भ्रमर इव [9]विभाते कुन्दमन्तस्तुषारं
न [10]च खलु परिभोक्तुं नापि शक्नोमि [11]मोक्तुम् ॥१९॥

प्रती०—(आत्मगतम्) अहो धम्मावेक्खिआ भट्टिणो । ईदिसं णाम सुहोवणदं रूवं देक्खिअ को अण्णो विआरेदि ? (अहो धर्मावेक्षिता भर्तुः । ईदृशं नाम सुखोपनतं रूपं दृष्ट्वा कोऽन्यो विचारयति ?।)

---

१. ज्ञातिः पिता. २. किं चात्र मा. नि. च. ३. संवुत्ता दे आसंका
४. राजन् किं कृतकार्यद्वेषाद् धर्मं प्रति विमुखतोचिता राज्ञः मा., अमीति बहुत्वापेक्षया तु पाठ एषोऽस्पष्टः । ५. कृतावज्ञा सार्वत्रिकः पाठः । ६. ०प्रश्नः ७. ०मत्तानाम् । ८. वेति व्यवस्यन्. ९. निशान्ते. १०. न खलु सपदि भोक्तुं. ११. हातुम्–नि. मा.

शार्ङ्ग०—भो राजन् ! [१]किमिति जोषमास्यते ? ।

राजा—[२]भोस्तपोधनाः ! चिन्तयन्नपि न खलु स्वीकरणमत्रभवत्याः स्मरामि । तत्कथमिमाम् अभिव्यक्तसत्त्वलक्षणां प्रति आत्मानं [३]क्षेत्रिणमाशङ्कमानः प्रतिपत्स्ये ? ।

शकु०—([४]आत्मगतम्) हद्धी हद्धी । कधं परिणए एव्व संदेहो । कुदो दाणिं मे दूराहिरोहिणी आसा ? । (हाधिक् हाधिक् । कथं परिणय एव संदेहः । कुत इदानीं मे दूराधिरोहिणी आशा ? ।)

शार्ङ्ग०—मा तावत्,—

[५]कृताभिमर्शामनुमन्यमानः
सुतां त्वया नाम मुनिर्विमान्यः ।
[६]मुष्टं प्रतिग्राहयता स्वमर्थं
पात्रीकृतो दस्युरिवासि येन ॥२०॥

शार०—शार्ङ्गरव ! विरम त्वमिदानीम्; शकुन्तले! वक्तव्यम् उक्तमस्माभिः । सोऽयमत्रभवानेवमाह । दीयतामस्मै प्रतिवचनम्[७] ।

शकु०—([८]आत्मगतम्) इमं अवत्थंतरं गदे तारिसे अणुराए किं वा सुमराविदेण ? । [९]अत्ता दाणिं मे सोअणीआ त्ति ववसिसं एदं । (प्रकाशम्) अज्जउत्त ! (अर्धोक्ते आत्मगतम्)[१०] अहवा संसइदा दाणिं एसो णो समुआहारो । (प्रकाशम्) पोरव ! ण जुत्तं णाम दे तह पुरा अस्समपदे [११]सहावुत्ताणहिअअं इमं जणं समअपुव्वं[१२]-प्पतारिअ ईदिसेहिं अक्खरेहिं पच्चाचक्खिदुं । (इदमवस्थान्तरं गते तादृशेऽनुरागे किं वा स्मारितेन ? । आत्मेदानीं मे शोचनीय इति व्यवसिष्याम्येतत् । (प्रकाशम्) आर्यपुत्र ! (अर्धोक्ते आत्मगतम्) अथवा संशयितः इदानीमेष नः समुदाहारः । (प्रकाशम्) पौरव ! न युक्तं नाम ते तथा पुराश्रमपदे स्वभावोत्तानहृदयमिमं जनं समयपूर्वं प्रतार्य ईदृशैरक्षरैः प्रत्याख्यातुम् ।)

---

१. किमिदं. २. भोस्तपस्विन्. ३. क्षेत्रियमिव मन्यमानः, क्षेत्री वीजनिपेक्ता ।
४. (अपवार्य) अज्जस्स परिणए ज्जेव संदेहो । भग्गा०० आसालदा ।.
५. कृतावमर्शाम. ६. दुष्टं. ७. प्रत्ययप्रतिवचनम् नि. मा. च.
८. अपवार्य. ९. अप्पा दाणिं मे भोदु; ववसिस्सं.
१०. अधं वा संसइदो दाणिं एसो. ११. सब्भावुत्ताणहिअअं.
१२. संभाविअ संपदं ईदिसेहिं.

राजा—(कर्णौ पिधाय) शान्तं पापम् ।

व्यपदेशमाविलयितुं [1]समीहसे जनमिमं च पातयितुम् ?
कूलङ्कषेव सिन्धुः [2]प्रसन्नमम्भः, तटतरुं च ॥२१॥

शकु०—होदु; जइ परमत्थतो परपरिग्गहसंकिणा [3]तुए एव्वं वत्तं पउत्तं ता अहिण्णाणेण इमिणा तुह आसंकं अवणइस्सं। [भवतु; यदि परमार्थतः परपरिग्रहशङ्किना त्वयैवं वक्तुं प्रवृत्तं तदभिज्ञानेनानेन तवाशङ्कामपनेष्यामि ।)

राजा—[4]प्रथमः कल्पः ।

शकु०—(मुद्रास्थानं परामृश्य) हद्धी, अंगुली अअसुण्णा मे अंगुली। (हा धिक् अङ्गुलीयकशून्या मेऽङ्गुलिः ।) (सविषादं गौतमीवेक्षते)

गौत०—[5]णूणं दे सक्कावदारब्भंतरे सचीतित्थसलिलं वंदमाणाए पब्भट्टं अंगुलीअअं। (नूनं ते शक्रावताराभ्यन्तरे शचीतीर्थे सलिलं वन्दमानायाः प्रभ्रष्टमङ्गुलीयकम् ।)

राजा—(सस्मितम्) इदं तत् प्रत्युत्पन्नमति [6]स्त्रैणमिति यदुच्यते ।

शकु०—एत्थ दाव विहिणा दंसिदं पहुत्तणं। अवरं दे [7]कहिस्सं। (अत्र तावद् विधिना दर्शितं प्रभुत्वम् । अपरं ते कथयिष्यामि ।)

राजा—श्रोतव्यमिदानीं संवृत्तम् ।

शकु०—णं एक्कस्सिं दिअहे णोमालिआमंडवे णलिणीपत्तभाअणगअं उअअं तुह हत्थे संणिहिदं आसि। (ननु, एकस्मिन् दिवसे नवमालिकामण्डपे नलिनीपत्रभाजनगतमुदकं, तव हस्ते संनिहितमासीत् ।)

राजा—शृणुमस्तावत् ।

शकु०—तक्खणं सो मे पुत्तकिदओ दीहापंगो णाम मिअपोदओ उवट्ठिओ। तुए अअं दाव पढमं पिअउ त्ति अणुअंपिणा उवच्छंदिदो उअएण। ण उण दे अपरिचआदो हत्थब्भासं उवगदो।

---

१. किमीहसे मां च पातयितुम्. २. प्रसन्नमोघं तट०.

३. तए एदं पउत्तं०० तुह संदेहं अवणइस्सं.

४. उदारः कल्पः। प्रथमशब्दार्थाय द्र. ४०९–पृष्ठगता ४–पादटि०.

५. णं दे सक्कावदारे सचीतित्थे उदअं वंदमाणाए गंगासोते०.

६. स्त्रीणाम् । शंकु०—एत्थ. ७. कधइस्सं.

पच्छा तस्सिं एव्व मए गहिदे सलिले णेण किदो पणओ। तदा तुमं पहसिदो सि एत्थं—'सव्वो सगंधेसु[1] विस्ससिदि दुवे वि एत्थ आरण्णआ'—त्ति। (तत्क्षणे स मे पुत्रकृतको दीर्घापाङ्गो नाम मृगपोतक उपस्थितः। त्वयायं तावत् प्रथमं पिबत्वित्यनुकम्पिनोपच्छन्दित उदकेन। न पुनस्तेऽपरिचयाद् हस्ताभ्याशमुपगतः। पश्चात् तस्मिन्नेव मया गृहीते सलिले अनेन कृतः प्रणयः। तदा त्वमित्थं प्रहसितोऽसि—'सर्वः सगन्धेषु[1] विश्वसिति द्वावप्यत्रारण्यकौ' इति।)

राजा—एव[2]मादिभिरात्मकार्यनिर्वर्तिनीनाम् [3]अनृतवाङ्मधुभिराकृष्यन्ते विषयिणः।

गौत०—महाभाअ! ण[4] अरुहसि एव्वं मंतिदुं। तवोवणसंवड्ढिदो अणभिण्णो खु अअं जणो [5]कइदवस्स। (महाभाग! नार्हस्येवं मन्त्रयितुम्। तपोवनसंवर्धितः अनभिज्ञोऽयं जनः कैतवस्य।)

राजा—तापसवृद्धे!

स्त्रीणामशिक्षितपटुत्वममानुषीषु
संदृश्यते किमुत याः प्रतिबोधवत्यः।
प्रागन्तरिक्षगमनात् स्वमपत्यजात-
मन्यैर्[6] द्विजैः परभृताः खलु पोषयन्ति॥२२॥

शकु०—(सरोषम्) अणज्ज! अत्तणो हिअआणुमाणेण पेक्खसि। को दाणिं अण्णो धम्मकंचुअप्पवेसिणो तिणच्छण्णकूवोवमस्स तव अणुकिदिं पडिवदिस्सदि?। (अनार्य! आत्मनो हृदयानुमानेन पश्यसि। क इदानीमन्यो धर्मकञ्चुकप्रवेशिनः तृणच्छन्नकूपोपमस्य तवानुकृतिं प्रतिपत्स्यते?।)

राजा—(आत्मगतम्[7]) संदिग्धबुद्धिं मां कुर्वन्नकैतव इवास्याः कोपो लक्ष्यते। तथा ह्यनया,—

---

१. मे. ११९ २. आभिस्ताभिरात्म०

३. ०रनृतमथवा०, अमृतवाग्भिः. ४. णारिहसि. ५. केदवस्स.

६. अन्यद्विजैः। अत्र हि मेनकाव्यापारसमाधिरपि। तत्रान्ये द्विजाः शकुन्ताः तेभ्यः सद्योजातत्यक्तां शकुन्तलामादाता कण्वपादश्च।

७. वनवासादविभ्रमः पुनरत्रभवत्याः कोपो लक्ष्यते—

मय्येव विस्मरणदारुणचित्तवृत्तौ
वृत्तं रहः प्रणयमप्रतिपद्यमाने ।
भेदाद् भ्रुवोः कुटिलयोरतिलोहिताक्ष्या
भग्नं शरासनमिवातिरुषा स्मरस्य ॥२३॥

(प्रकाशम्) भद्रे ! प्रथितं दुष्यन्तस्य चरितम्[1] ।

शकु०—सुट्ठु दाव अत्त सच्छंदचारिणी किदम्हि, जा अहं इमस्स पुरुवंसप्पच्चएण मुहमहुओ [2]हिअअविसस्स हत्थब्भासं उवगदा । (सुष्ठु तावदत्र स्वच्छन्दचारिणी कृतास्मि, याहमस्य पुरुवंशप्रत्ययेन मुखमधोर्हृदयविषस्य हस्ताभ्याशमुपगता ।) (पटान्तेन मुखमावृत्य रोदिति ।)

शार्ङ्ग०—[3]इत्थमप्रतिहतं चापलं दहति ।

अतः [4]परीक्ष्य कर्तव्यं विशेषात् संगतं रहः ।
अज्ञातहृदयेष्वेवं वैरीभवति सौहृदम् ॥२४॥

राजा—अयि भोः ! किमत्रभवतीप्रत्ययादेव अस्मान् [5]संवृतदोषाक्षरैरधिक्षिपथ ।

शार्ङ्ग०—(सासूयम्) श्रुतं भवद्भिरधरोत्तरम् ?

आ जन्मनः शाठ्यमशिक्षितो यः,
तस्याप्रमाणं वचनं जनस्य ।
परातिसंधानमधीयते यैर्
विद्येति[6], ते सन्तु किलाप्तवाचः ॥२५॥

राजा—भोः सत्यवादिन् ! अभ्युपगतं तावदस्माभिरेवंविधा[7] एव वयम् । किं पुनरिमाम[8]तिसंधाय लभ्यते ? ।

—तथा हि—'न तिर्यगवलोकितं भवति चक्षुरालोहितं वचोऽपि परुषाक्षरं न च पदेषु संसज्जते । हिमार्त इव वेपते सकल एष बिम्बाधरः स्वभावविनते भ्रुवौ युगपदेव भेदं गते ॥' अथवा संदिग्ध०.

१. चरितम् । नापीदं दृश्यते, तथापीदं न लक्षये-नि.

२. हिअअपत्थरस्स, हिअअट्ठिअविसस्स मा. नि. च. खि.

३. इत्थमात्मकृतमप्र० इत्थमात्मकृतं प्रतिहतं०. नि. खि. च.

४. समीक्ष्य   ५. संभृतदोषाक्षरैरधिक्षिपथ मा. संवृतदोषाक्षरेण क्षिणुथ, संयुतदोषाक्षरैः क्षिणुथ नि.   ६. द्र. अर्थशास्त्रस्यान्तिममधिकरणम्

७. ०भिरेवम्   ८. ०मभि०

शार्ङ्ग०—विनिपातः ।

राजा—विनिपातः ? विनिपातः [1]पौरवैर्लभ्यत इति अश्रद्धेयमेतत् ।

शार०—[2]शार्ङ्गरव ! किमुत्तरेण ?। अनुष्ठितो गुरोर्निसंदेशः । प्रतिनिवर्तामहे वयम् । (राजानं प्रति)—

तदेषा भवतः [3]कान्ता त्यज वैनां गृहाण वा ।
उपपन्ना[4] हि दारेषु प्रभुता सर्वतोमुखी ॥२६॥

गौतमि ! गच्छाग्रतः ।

(प्रस्थिताः)

शकु०—(शार्ङ्गरव-शारद्वतौ प्रति[5]) कहं इमिणा किदवेण विप्पलद्ध म्हि ! । तुम्हे वि मं परिच्चअह ? । (कथमनेन कितवेन विप्रलब्धास्मि ? । युवमपि मां परित्यजथः ? ।) (अनुप्रतिष्ठते)

गौत०—(स्थित्वा) वच्छ संगरव ! अणुगच्छदि इअं खु णो करुणपरिदेविणी सउंदला । [6]पच्चादेसपरुसे भत्तुणि, किं वा मे पुत्तिआ करेदु ? । (वत्स शार्ङ्गरव ! अनुगच्छतीयं खलु नः करुणपरिदेविनी शकुन्तला । प्रत्यादेशपरुषे भर्तरि, किं वा मे पुत्रिका करोतु ? ।)

शार्ङ्ग०–(सरोषं निवृत्य) [7]किं पुरोभागे ! स्वातन्त्र्यमवलम्बसे ?

(शकुन्तला भीता वेपते)

शार्ङ्ग०–शकुन्तले !

यदि यथा वदति क्षितिपस्, तथा
त्वमसि, किं पितुरुत्कुलया त्वया ।
अथ तु वेत्सि, शुचि व्रतमात्मनः,
पतिकुले[8] तव दास्यमपि क्षमम् ॥२७॥

तिष्ठ; साधयामो [9]वयम् ।

---

१. पौरवैः प्राथ्यंत इति न श्रद्धेयम् । अन्यानतिसन्धायाभ्युदयः, इमां पुनरतिसन्धाय विनिपात इत्यर्थः ।

२. भो राजन् किमत्रोत्तरोत्तरैः । अनुष्ठितो गुरोर्नियोगः । संप्रति निवर्त्तामहे वयम् । तदेषा० । ३. पत्नी. ४. उपयन्तुर्हि.

५. इदमस्माभिरयोजि ६. ०पिसुणे भत्तारे किं करेदु तवस्सिणी ।

७. आः पुरोभागिनी, किमिदं स्वातन्त्र्य०. ८. पतिगृहे.

९. र. ११।९१, नै. २।६२. अत्रैव ५४५ पा. टि.

राजा—भोस्तपस्विन् ! किमत्रभवतीं विप्रलभसे ? । पश्य—

कुमुदान्येव शशाङ्कः सविता बोधयति पङ्कजान्येव[१] ।
वशिनां हि परपरिग्रहसंश्लेषपराङ्मुखी वृत्तिः ॥२८॥

शार्ङ्ग०—[२]यदा तु पूर्ववृत्तमन्यसङ्गाद्, विस्मृतो भवान्, तदा कथमधर्मभीरुः ? ।

राजा—(पुरोहितं प्रति) भवन्तमेवात्र गुरुलाघवं पृच्छामि ।

मूढः स्यामहमेषा वा वदेन्मिथ्येति संशये ।
दारत्यागी भवाम्याहो परस्त्रीस्पर्शपांसुलः[३] ॥२९॥

पुरो०—(विचार्य) [४]यदि तावदेवं क्रियताम् ।

राजा—अनुशास्तु [५]भवान् ।

पुरो०—अत्रभवती तावद् आप्रसवाद् अस्मद्गहे तिष्ठतु[६] ।

राजा—कुत इदम् ?

पुरो०—त्वं साधुनिमित्तकैरादिष्टः 'प्रथममेव चक्रवर्तिनं पुत्रं जनयिष्यसी'-ति । स चेन्मुनिदौहित्रः, तल्लक्षणोपपन्नो भविष्यति, [७]अभिनन्द्य शुद्धान्तमेनां प्रवेशयिष्यसि । विपर्यये तु पितुरस्याः [८]समीपनयनमवस्थितमेव ।

राजा—यथा गुरुभ्यो रोचते ।

पुरो०—वत्से ! अनुगच्छ[९] माम् ।

शकु०—भवअदि वसुहे! देहि मे [१०]विवरं (भगवति वसुधे ! देहि मे विवरम्) ।

(रुदती प्रस्थिता, निष्क्रान्ता सह पुरोधसा तपस्विभिश्च)

(राजा शापव्यवहितस्मृतिः शकुन्तलागतमेव चिन्तयति)

(नेपथ्ये)

आश्चर्यम् ।

राजा—(आकर्ण्य) किं नु खलु स्यात् ? ।

१. र. ६।३६, ४४; वि ३।१६.
२. अथ पुनः पूर्ववृत्तं व्यासंगाद्विस्मृतं भवेत्तदा कथमधर्मभीरोर्दारपरित्यागः ।.
३. दारत्यागे लाघवं, गौरवं च परस्त्रीस्पर्शे इति भावः
४. यदि तावदेवं क्रियते ।
५. गुरुः । पा०पांसनः
६. कुत इदमुच्यत इति चेत् भवान् साधुभिरुद्दिष्टः प्रथममेवोभयचक्रवर्तिनं००
७. ततः प्रतिनन्द्य
८. समीपगमनमवस्थितमेव ।
९. इत इतोऽनुगच्छ
१०. अंदरं

(प्रविश्य)

पुरो०—(सविस्मयम्) देव ! अद्भुतं खलु संवृत्तम् ।

राजा—किमिव ? ।

पुरो०—देव ! परावृत्तेषु कण्वशिष्येषु

सा निन्दन्ती स्वानि भाग्यानि बाला
बाहूत्क्षेपं [1]क्रन्दतुं च प्रवृत्ता ।

राजा—किं च,

पुरो०—

स्त्रीसंस्थानं चाप्सरस्तीर्थमारा-
[2]दुत्क्षिप्यैनां ज्योतिरेकं जगाम ।।३०।।

राजा—भगवन्[3] ! प्रागेव, सोऽस्माभिरर्थः प्रत्यादिष्ट एव । किं वृथा तर्केणान्विष्यते ? । विश्राम्यतु भवान् ।

पुरो०—(विलोक्य) विजयस्व । (निष्क्रान्तः)

राजा—वेत्रवति ! [4]पर्याकुलोऽस्मि । शयनभूमिमार्गमादेशय ।

प्रती०—इदो इदो[5] देवो । (इत इतो देवः ।) (प्रस्थिता)

राजा—

कामं प्रत्यादिष्टां स्मरामि न परिग्रहं मुनेस्तनयाम् ।
बलवत् तु दूयमानं प्रत्याययतीव [6]मे हृदयम् ।।३१।।

(निष्क्रान्ताः सर्वे)

।। इति [7]पञ्चमोऽङ्कः ।।



१. रोदितुं च. २. ०क्षिप्त्वैवाशु ज्योतिरेनां तिरोऽभूत् ।।
३. गुरो ! प्रथममेवास्माभिरर्थः स प्रत्यादिष्टः । किं मृषा तर्केणान्विष्यते, विश्रम्यताम् । ४. पर्याकुल इवास्मि । शयनीयगृह०
५. एदु ६. मां ७. शकुन्तलाप्रत्याख्यानं नाम०० ।

॥ [1]अथ मिश्रविष्कम्भकः ॥

[१]

(ततः प्रविशति नागरकः श्यालः पश्चाद्बद्धपुरुषमादाय रक्षिणौ च)

रक्षिणौ—(ताडयित्वा) [2]अले कुंभीलआ ! कहेहि कहिं तुए एशे [3]महालदणभाशुले उक्किण्ण-णामहेए लाअकीए अंगुलीअए [4]शमाशादिए? । (अरे कुम्भीलक! कथय कुत्र त्वयैतन्महारत्नभासुरम् उत्कीर्णनामधेयं राजकीयमङ्गुलीयकं समासादितम् ? ।)

पुरुषः—(भीतिनाटितकेन) पशीदंतु [5]भावमिश्शे । हगे णे[6] ईदिशकम्मकाली । (प्रसीदन्तु भावमिश्राः । अहं नेदृशकर्मकारी ।)

प्रथमः—किं[7] सोहणे बम्हणेत्ति कलिअ रज्जा पडिग्गहे दिण्णे ? । (किं शोभनो ब्राह्मण इति कलयित्वा राज्ञा प्रतिग्रहो दत्तः ? ।)

पुरुषः—[8]सुणध दाणिं । हगे शक्कावदालब्भंतरालवाशी धीवले । (शृणुत इदानीम् । अहं शक्रावताराभ्यन्तरालवासी धीवरः ।)

द्विती०—पाडच्चला ! किं[9] अम्हेहिं जादी पुच्छिदा ? । (पाटच्चर ! किमस्माभिर्जातिः पृष्टा ? ।)

श्या०—[10]सूअअ ! कहेदु शव्वं अणुक्कमेण । मा णं अंतरा पडिबंधह । (सूचक ! कथयतु सर्वमनुक्रमेण । मैनमन्तरे प्रतिबन्धय ।)

उभौ—जं आवुत्ते आणवेदि (धीवरं प्रति) कहेहि[11] । (यदावुत्त आज्ञापयति (धीवरं प्रति) कथय ।)

---

१. इयमस्मद्योजना । मा. पुनः 'अथ पञ्चमषष्ठाङ्कमध्ये प्रवेशक' इति.
२. हण्डे.
३. मणिबंधणुक्किण्ण-णामहेए.
४. शमाशाबिदे.
५. भावमिस्शा.
६. ण हगे ईदिशश्श अकय्यश्श कालके.
७. किं णु खु शोहणे बम्हणे शित्ति कदुअ लञ्ञा.
८. शुणाध दाव । हगे खु शक्कावदालवाशी.
९. किं तुमं अस्मेहिं यादिं वशदिं पुश्चिदे.
१०. नागरकः—सूअअ००सव्वं कमेण । मा णं पडिबंधेध.
११. लवेहि ले लवेहि.

पुरुषः—हगे[1] जालुग्गालादिहिं मच्छबंधणोवाएहिं कुडुंवभलणं कलेमि। (अहं जालोद्गालादिभिर् मत्स्यबन्धनोपायैः कुटुम्बभरणं करोमि।)

श्या०—(विहस्य) विसुद्ध दाणिं आजीवो। (विशुद्ध इदानीमाजीवः)

पुरुषः—भस्टके मा एवं भण। (भर्त्तः! मैवं भण)

शहए[2] किल[3] ये विणिंदिए ण हु से कम्म विवज्जणीग्रए[4]।
पशुमालणकम्मदालुणे ग्रणुकंपामिदु जेव्व शोत्तिए[5]॥१॥
(सहजं किल यद् विनिन्दितं न हि तत् कर्म विवर्जनीयकम्।
पशुमारणकर्मदारुणोऽप्यनुकम्पामृदुरेव श्रोत्रियः (वैदिकः)॥)

श्या०—तदो तदो?। (ततस्ततः?।

पुरुषः—एक्कशिंश दिअशे खंडशो लोहिअमच्छे मए कप्पिदे जाव, तश्श उदलब्भंतले एदं [6]लदणभाशुलं अंगुलोअग्रं पेस्कामि[7]। पच्छा अहके शे विक्कआअ दंशग्रंते गहिदे भावमिश्शेहिं। [8]मालेह वा मुंचेह वा। अअं शे आग्रमवुत्तंते। (एकस्मिन् दिवसे खण्डशो रोहितमत्स्यो मया कल्पितो यावत्, तस्योदराभ्यन्तर इदं रत्नभासुर-मङ्गुलीयकं पश्यामि। पश्चादहं तस्य विक्रयाय दर्शयन्, गृहीतो भावमिश्रैः। मारयत वा मुञ्चत वा। अयमस्यागमवृत्तान्तः।)

श्या०[9]—जाणुअ! विस्सगंधी गोहादी एसो मच्छबंधो एव्व णिस्संग्रअं। ग्रंगुलीग्रअदंसणं शे विमरिसिदव्वं। राअउलं येव्व गच्छामो। (जानुक! विस्रगन्धी गोधादी एषः मत्स्यबन्ध एव निःसंशयम्। अङ्गुलीयक-दर्शनमस्य विमर्शयितव्यम्। [10]राजकुलमेव गच्छामः।).

---

१. शे हगे यालवडिशप्पहुदीहिं. २. शहए. ३. अ.
४. मनुः—वरं स्वधर्मो विगुणो न पारक्यः स्वनुष्ठितः।
परधर्मेण जीवन् हि सद्यः पतति जातितः॥ (१०।९७) इति.
५. पशुमालि कलेदि दालुणं००मिदुले वि शोणिके।.
६. महालदण० ७. देक्खिअ पच्छा इध.
८. एत्तिके दाव एदश्श आगमे। अधुणा मालेध वा कुस्टेध वा.
९. नागरिकः—(अङ्गुलीयकमाघ्राय) जाणुअ, मच्छोदरसंठिदं त्ति णत्थि संदेहो। तधा अअं से विस्सगंधो। आगमो दाणिं एदस्स विमरिसिदव्वो। ता एध। राअउलं जेव०. १०. राजनिवासदुर्गम् इत्यर्थः

रक्षि०—तह। गच्छ अले गंडभेदअ! (तथा। गच्छ अरे गण्डभेदक!।)

(सर्वे परिक्रामन्ति)

श्या०—सूअअ! इमं गोपुरदुआरे अप्पमत्ता पडिवालह जाव इमं अंगुलीअअं जहागमणं [1]भट्टिणो णिवेदिअ तदो सासणं पडिच्छिअ णिक्कयामि। (सूचक! इमं गोपुरद्वारे अप्रमत्तौ प्रतिपालयतम्, यावदिदमङ्गुलीयकं यथागमनं भर्तुर्निवेद्य, ततः शासनं प्रतीष्य, निष्क्रामामि।)

उभौ—पविसदु आउत्ते शामिपशादश्श। (प्रविशत्वावुत्तः स्वामिप्रसादाय।)

(निष्क्रान्तः श्यालः)

सूच०—याणुअ! चिलाअदि खु आवुत्ते। (जानुक! चिरायते खल्वावुत्तः।)

जानु०—णं अवशलोवशप्पणीआ [2]लाआणो। (नन्ववसरोपसर्पणीया राजानः।)

सूच०—[3]याणुअ! स्फुलंति मे अग्गहत्था (धीवरं निर्दिश्य) गठिश्चेदअश्श इमश्श वहशुमणा पिणद्धुं[4] (जानुक! प्रस्फुरतो मम अग्रहस्तौ (धीवरं निर्दिश्य) अस्य ग्रन्थिच्छेदकस्य वधसुमनसः पिनद्धुम्।)

पुरु०—[5]ण अलुहदि भावे अकालण-मालणं भाविदुं। (नार्हति भावः, अकारणमारणं भावयितुम्।)

जानु०—(विलोक्य) एशे [6]अम्हाणं शामी पत्तहत्थे लाअशाशणं पडिच्छिअ इदोमुहे देक्खीअदि। गिद्धवली भविश्शशि, शुणो मुहं वा पेक्खिश्शशि। (एष नः स्वामी पत्रहस्तो राजशासनं प्रतीष्य इतोमुखो दृश्यते। गृध्रबलिर्भविष्यसि, शुनो मुखं वा द्रक्ष्यसि।)

(प्रविश्य)

श्या०—सुणअ! मुंचेदु एसो जालोअजीवी। उववण्णो खु अंगुलीअअस्स आअमो। (सूचक! मुच्यतामेष जालोपजीवी। उपपन्नः खलु अङ्गुलीयकस्यागमः।)

---

१. राअउलं पविसिअ णिक्कमामि-।. २. लाआणो होंति।

३. याणुअ, स्फुलंति मे अग्गहत्था. ४. इमं गंठिश्चेदअं वावादेदुं।.

५. णालिहदि भावे अकालणमालके भविदुं।.

६. अस्माणं ईशले पत्ते गेण्हिअ लाअशाशणं। (धीवरं प्रति) ता शउलाणं मुहं पेस्कशि अथवा गिद्धशिआलाणं वली भविश्शशि।.

सूच०—जह आवुत्ते भणादि । (यथावुत्तो भणति ।)

जानु०—एशे यमशदणं पविशिअ पडिणिवुत्ते । (एष यमसदनं प्रविश्य प्रतिनिवृत्तः ।) ([1]पुरुषं परिमुक्तबन्धनं करोति)

पुरु०—(श्यालं प्रणम्य) [2]भस्टके ! अह कहअ कीलिशे मे आजीवे ? । (भर्तः ! अथ कथय कीदृशो मे आजीवः ? ।)

श्या०—एसो भट्टिणा[3] अंगुलीअअमुल्लसम्मिदो पसादो वि दाविदो । (एष भर्त्रा अङ्गुलीयकमूल्यसंमितः प्रसादोऽपि दापितः ।)

(पुरुषाय स्वं प्रयच्छति)

पुरु०—(सप्रणामं प्रतिगृह्य) भस्टके ! अणुग्गहीदे[4] म्हि । (भर्तः ! अनुगृहीतोऽस्मि ।)

सूच०—[5]एशे णाम अणुग्गहे जे शूलादो अवदालिअ हस्थिक्कंधे पडिट्ठाविदे । (एष नामानुग्रहो यच्छूलादवतार्य हस्तिस्कन्धे प्रतिष्ठापितः ।)

[6]जानु०—आवुत्त ! पलिदोशं कहेदि, तेण महालिह-लदणेण अगुलीअएण भट्टिणो शम्मदेण होदव्वं । (आवुत्त ! परितोषः कथयति, महार्हरत्नेन तेनाङ्गुलीयकेन भर्तुः संमतेन भवितव्यम् ।)

श्या०—ण तस्सि [7]महारुहं रदणं भट्टिणो बहुमदं त्ति तक्केमि । तस्स दंसणेण भट्टिणो अभिमदो जणो सुमराविदो । मुहुत्तअं पकिदि-गंभीरो वि पज्जुस्सुअणअणो आसि । (न तस्मिन् महार्हं रत्नं भर्तुर्बहुमतमिति तर्कयामि[8] । तस्य दर्शनेन भर्तुरभिमतो जनः स्मारितः । मुहूर्तं प्रकृतिगम्भीरोऽपि पर्युत्सुकनयन आसीत् ।)

सूच०—[9]शेविदो णाम भस्टा आवुत्तेण । (सेवितो नाम भर्त्ता आवुत्तेन ।)

---

१. धीवरं. २. भस्टके, तव केलके मम यीविदे ।.

३. पारिदोसिओ पसादीकिदो ता गेण्ह एदं ।. ४. ०ग्गहीदे स्मि.

५. 'जानुकः—एशे सु लब्भा तधा णाम अणुग्गहीदे यं शूलादो ओदालिअ हस्तिस्कंधं शमालोविदे ।' . हस्तिस्कन्धं त्रय एवारोहन्ति राजा, वरः, नगर-श्रेष्ठी चेतीतिहासविदः । धीवरो नगरश्रेष्ठी कृत इत्यत्राभिप्रायः ।

६. सूचकः—लाउत्ते पालिदोशिए कधेदि महालिहलदणेण तेण अंगुलीएण .

७. महारिहरदणं तिण परिदोसो । एत्तिकं उण । उभौ—किं णाम । नागरकः—तक्केमि तस्स दंसणेण .

८. र. १६।७४, वि. ५।५ . ९. तोशिदे दाणिं भस्टा लाउत्तेण । .

जानु०—णं भणाहि। इमश्श कए मच्छिआभत्तुणोत्ति। (ननु भण। अस्य कृते मात्स्यिकभर्तुरिति।) (पुरुषमसूयया पश्यति)

पुरु०[1]—भट्टालक! इदो अद्धं तुम्हाणं शुमणोमुल्लं होदु। (भट्टारक! इतोऽर्धं युष्माकं सुमनोमूल्यं भवतु।)

जानु०—एत्तके जुज्जइ (एतावद् युज्यते।)

श्यालः—धीवर! महत्तरो तुमं पिअवअस्सओ दाणिं मे संवुत्तो। [2]कादंवरीसक्खिअं अम्हाणं पढमसोहिदं इच्छीअदि। ता सोंडिआपणं एव्व गच्छामो। (धीवर! महत्तरस्त्वं प्रियवयस्यकः इदानीं मे संवृत्तः। कादम्बरीसाक्षिकमस्माकं प्रथमसौहृदमिष्यते। तच्छौण्डिकापणमेव गच्छामः।)

(निष्क्रान्ताः सर्वे)[3]

[२]

(ततः प्रविशत्याकाशयानेन सानुमती [4]नामाप्सराः)

[5]सानु०—णिव्वट्टिदं मए पज्जाअणिव्वत्तणिज्जं अच्छरातित्थसण्णिज्झं जाव साहुजणस्स अभिसेअकालो त्ति। संपदं इमस्स राएसिणो उदंतं पच्चक्खीकरिस्सं। मेणआसंबंधेण सरीरभूदा मे सउंदला। ताए अ दुहिदुणिमित्तं आदिट्ठपुव्व म्हि। (समन्तादवलोक्य) किं ण खु उदुच्छवे वि णिरुच्छवारंभं विअ राअउलं दीसइ। अत्थि मे विहवो पणिधाणेण सव्वं परिण्णादुं। किं दु सहीए आदरो मए माणइदव्वो। होदु, इमाणं एव्व उज्जाणिपालिआणं तिरक्खरिणीपडिच्छणा वस्सवत्तिणी भविअ उवलहिस्सं। (निर्वर्तितं मया पर्यायनिर्वर्तनीयम् अप्सरस्तीर्थसांनिध्यं

१. धीवरकः–भस्टका,००तुस्माणं पि शुलामुल्लं. २. कादंबलिशद्धिके खु पडमं अस्माणं शोहिदे इच्छीअदि। ता शुंडिकागालं येव गश्चस्म।

३. अत्रैव प्रवेशकरूपार्थोपक्षेपकसमाप्तिरिति मा. पि. नि. खि. च.—प्रभृतयः सर्वे। वयं पुनर्दुष्यन्तप्रवेशं यावत् सूच्यत्वस्याव्युच्छिन्नत्वात् तदवधिकत्वमत्र योजयामहे, मिश्रविष्कम्भकत्वं च, संस्कृतमिश्रितत्वात्। प्रवेशको मिश्रविष्कम्भकश्चेति द्वितीयमप्यत्र क्रमेण कृतस्थितिकमिति तु युक्तिहीनम्।

४-५. मिश्रकेशी. अप्सरःशब्द एकवचनान्तोऽपि.

यावत् साधुजनस्याभिषेककाल इति। सांप्रतमस्य राजर्षेरुदन्तं प्रत्यक्षीकरिष्यामि। मेनकासंबन्धेन शरीरभूता मे शकुन्तला। तया च दुहितृनिमित्तमादिष्टपूर्वास्मि। (समन्तादवलोक्य) किं नु खलु ऋतूत्सवेऽपि निरुत्सवारम्भमिव राजकुलं दृश्यते। अस्ति मे विभवः प्रणिधानेन सर्वं परिज्ञातुम्। किं तु सख्या आदरो मया मानयितव्यः। भवतु, अनयोरेव उद्यानपालिकयोस्तिरस्करिणीप्रतिच्छन्ना पार्श्ववर्तिनी भूत्वा उपलप्स्ये।)

(नाट्येनावतीर्य स्थिता)

(ततः प्रविशति चूताङ्कुरमवलोकयन्ती चेटी, अपरा च पृष्ठतस्तस्याः)

प्रथमा—

आतम्महरिअपंडुर[1] जीविदसव्वं[2] वसंदमासस्स।
दिट्ठो[3] सि चूअकोरअ ! उदुमंगल ! तुमं पसाएमि ॥२॥

(आताम्रहरितपाण्डुर जीवित-सर्वं वसन्तमासस्य।
दृष्टोऽसि चूतकोरक ! ऋतुमङ्गल ! त्वां प्रसादयामि ॥)

द्वितीया—परहुदिए ! किं एआइणी मंतेसि ?। (परभृतिके ! किमेकाकिनी मन्त्रयसे ?।)

पर०—महुअरिए[4] ! चूदकलिअं देक्खिअ उम्मत्तिआ परहुदिआ होदि। (मधुकरिके ! चूतकलिकां दृष्ट्वा उन्मत्ता परभृतिका भवति !)

मधु०—(सहर्षं त्वरयोपगम्य) कहं उवट्ठिदो महुमासो ?। (कथमुपस्थितो मधुमासः ?।)

पर०—महुअरिए ! [5]तव दाणिं कालो एसो मदविब्भमगीदाणं। (मधुकरिके ! तवेदानीं काल एष मदविभ्रमगीतानाम्।)

मधु०—सहि ! अवलंब मं जाव अग्गपादट्ठिआ [6]भविअ चूदकलिअं गेण्हिअ कामदेवच्चणं करेमि। (सखि ! अवलम्बस्व मां यावदग्रपादस्थिता भूत्वा चूतकलिकां गृहीत्वा कामदेवार्चनं करोमि।)

---

१. आअंबहरिअवेंटं ऊससिसं विअ वसंत० २. ०सत्तं
३. दिट्ठं चूअकरअं छणमंगलअं णिअच्छामि
४. सहि महुअरिए, चूदलदिअं००भोदि। ५. तुहावि.
६. भविअ इमिणा पसवेण संपादेमि कामदेवस्स वाअणं.

पर०—जइ मम वि खु अद्धं [1]अच्चणफलस्स ।
(यदि ममापि खलु अर्धमर्चनफलस्य ।)

मधु०—अकहिदे वि एदं संपज्जइ, जदो [2]एक्कं एव्व णो जीविदं, दुधा ट्ठिदं सरीरं । (सखीमवलम्ब्य स्थिता चूताङ्कुरं गृह्णाति) अए, अप्पडिबुद्धो वि चूदप्पसवो एत्थ बंधणभंगसुरभी होदि ।
(कपोतहस्तकं [3]कृत्वा)

तुमं[4] सि मए चूदंकुर दिण्णो कामस्स गहीदचावस्स ।
पहिअजणजुवइलक्खो पंचब्भहिओ सरो होहि ॥३॥

(अकथितेऽप्येतत् संपद्यते । यतः एकमेव नो जीवितम्, द्विधा स्थितं शरीरम् । (सखीमवलम्ब्य स्थिता चूताङ्कुरं गृह्णाति) अये, अप्रतिबुद्धोऽपि चूतप्रसवोऽत्र बन्धनभङ्गसुरभिर्भवति) (कपोतहस्तकं[3] कृत्वा)

(त्वमसि मया चूताङ्कुर ! दत्तः कामाय गृहीतचापाय ।
पथिकजनयुवतिलक्ष्यः पञ्चाभ्यधिकः शरो भव ॥)

(चूताङ्कुरं क्षिपति)

(प्रविश्यापटीक्षेपेण कुपितः)

कञ्चुकी—मा तावत् । अनात्मज्ञे ! [5]देवेन प्रतिषिद्धे वसन्तोत्सव त्व चूतकलिकाभङ्गम् आरभसे ?

उभे—(भीते) पसीददु अज्जो । अग्गहीदत्थाओ अम्हे[6] ।
(प्रसीदत्वार्यः । अग्रहीतार्थे आवाम् ।)

कञ्चु०—[7]हुं, न किल श्रुतं युवाभ्यां यद् वासन्तिकैस्तरुभिरपि देवस्य शासनं प्रमाणीकृतं तदाश्रयिभिश्च । तथा हि,—

चूतानां चिरनिर्गतापि कलिका बध्नाति न स्वं रजः,
सन्नद्धं यदपि स्थितं कुरबकं तत्कोरकावस्थया ।
कण्ठेषु स्खलितं गतेऽपि शिशिरे पुंस्कोकिलानां रुतं
शङ्के संहरति स्मरोऽपि चकितस्तूणार्धकृष्टं शरम् ॥४॥

---

१. वाअणफलस्स. २. एक्कं जेव णो एदं सरीरं.
३. 'कपोतोऽसौ करो यत्र श्लिष्टमूलाग्रपार्श्वकाः' रा.
४. 'अरिहसि मे चूअंकुर दिण्णो कामस्स गहिअचावस्स ।
सच्चविअजुअइलक्खो पंचब्भहिओ सरो होउं ॥'.
५. देवेनैवं निषिद्धेऽपि मधूत्सवे चूतकलिकाभङ्गमारभसे ।. ६. वअं.
७. हुं । न खलु श्रुतं भवतीभ्यां तावद्वासन्तैस्तरुभिरपि प्रमाणीकृतं देवस्य शासनं तदाश्रयिभिः पत्रिभिश्च ।.

उभे— णेत्थ संदेहो । महाप्पहाओ राएसी[1] ।
(नात्र संदेहः । महाप्रभावो राजर्षिः ।)

पर०—अज्ज ! कदि दिअहाइं [2]अम्हाणं मित्तावसुणा रट्ठिएण भट्टिणीपाअमूलं पेसिदाणं ? [3]दाणिं अ णो पमदवणस्स पालण-कम्म समप्पिदं । ता आअंतुअदाए अस्सुदपुव्वो अम्हेहिं एसो वुत्तंतो । (आर्य ! कति दिवसानि आवयोर्मित्रावसुना राष्ट्रियेण भट्टिनी-पादमूलं प्रेषितयोः ? । इदानीं च नौ प्रमदवनस्य पालनकर्म समर्पितम् । तत् आगन्तुकतया अश्रुतपूर्व आवाभ्यामेष वृत्तान्तः ।)

कञ्चु०–[4]भवतु । पुनरेवं न प्रवर्तितव्यम् ।

उभे— अज्ज ! कोदूहलं णो । जइ इमिणा जणेण सोदव्वं कहेदु । अअं किंणिमित्तं भट्टिणा वसंतुस्सवो [5]पडिसिद्धो ? (आर्य ! कौतूहलं नौ । यद्यनेन श्रोतव्यं कथय, अयं किंनिमित्तं भर्त्रा वसन्तोत्सवः प्रतिषिद्धः ?)

सानु०—उस्सवप्पिआ खु [6]मणुस्सा । गुरुणा कारणेण होदव्वं । (उत्सवप्रियाः खलु मनुष्याः । गुरुणा कारणेन भवितव्यम् ।)

कञ्चु०–[7]वहुलीभूतमेतत् किं न कथ्यते । किमत्रभवत्योः कर्णपथं नायातं शकुन्तलाप्रत्यादेशकौलीनम् ? ।

उभे०—सुदं रट्ठिअमुहादो जाव अंगुलीअदंसणं ।
(श्रुतं राष्ट्रियमुखाद् यावदङ्गुलीयकदर्शनम् ।),

कञ्चु०–(आत्मगतम्) तेन हि अल्पं कथयितव्यम् । (प्रकाशम्) यदैव खलु स्वाङ्गुलीयकदर्शनादनुस्मृतं देवेन 'सत्यमूढपूर्वा [8]मे तत्रभवती रहसि शकुन्तला मोहात् प्रत्यादिष्टे'ति, [9]तदाप्रभृत्येव पश्चात्ता-पमुपगतो देवः । तथा हि,—

---

१. एत्थ संदेहो । महाप्पहावो खु एसो.
२. अम्हाणं इध पमदवणे चित्तकम्मं अप्पिदुं । अदो ण सुदपुव्वो.
३. एत्थं. ४. तेन हि पुनरेवं न. ५. णिसिद्धो.
६. राआणो होंति । ता गुरुणा. ७. (स्वगतम्) बहुलीभूतोऽयमर्थः किं न कथ्यते । (प्रकाशम्) अस्ति०० पथमागतं । र. १४।३६,३८.
८. रहसि मया. ९. तदैव. 'यदैव० ०तदाप्रभृत्येव'—कु. १।५३.

रम्यं द्वेष्टि यथा पुरा प्रकृतिभिर्न प्रत्यहं सेव्यते
शय्याप्रान्त[1]-विवर्तनैर्विगमयत्युन्निद्र एव क्षपाः ।
दाक्षिण्येन ददाति वाचमुचितामन्तःपुरेभ्यो यदा
गोत्रेषु स्खलितस्तदा भवति च व्रीडाविलक्षश्चिरम् ॥५॥

सानु०—पिअं मे । (प्रियं मे ।)

कञ्चु०—अस्मात् प्रभवतो वैमनस्यादुत्सवः प्रत्याख्यातः ।

उभे— जुज्जइ । (युज्यते ।)

(नेपथ्ये)

एदु एदु भवं । (एतु एतु भवान् ।)

कञ्चु०—(कर्णं दत्त्वा परिचारिके विलोक्य) अये ! इत एवाभिवर्तते देवः[2] । स्वकर्मानुष्ठीयताम् ।

उभे— तह । (तथा ।)

(निष्क्रान्ते)[3]

॥ इति मिश्रविष्कम्भकः[4] ॥

---

१. शय्योपान्त०. २. तद् गच्छतम्. ३. (उभे निष्क्रान्ते).

४. इयमस्मत्कृताऽर्थसंघटना । विष्कम्भकत्वस्याहीनसंस्कृतोक्तिक-सूच्यवस्तुत्व-व्याप्यत्वात् तस्य च चतुर्थाङ्कारम्भ इवात्र यावदनुक्रान्तत्वादेषाऽस्माकं प्रतिपत्तिः । अन्ये पुनः सानुमतीप्रवेशावधिकत्वमेव सूच्यत्वेऽभिवीक्षमाणा-स्तत्रैव प्रवेशकसमाप्तिमुल्लिखन्ति । अस्मत्क्रमे द्राघीयस्त्वं दोष इति सत्यम्, तथापि लक्षणैकचक्षुष्का अत्र न ह्येव लभामहे मार्गान्तरमिति तत्राचार्या वा चोद्यास्तत्रभवान् कविरेव वा। अभिनयमिश्रत्वाभावं सूच्यतावच्छेदककोटौ निवेश्यापि न क्षेममुत्पश्यामः, चतुर्थाङ्कोपक्षेपकस्यासंग्रहप्रसक्तेः, अभिनयस्य उभयत्रापि समानत्वात् ।

[1]अथ षष्ठोऽङ्कः

(ततः प्रविशति पश्चात्तापसदृशवेषो राजा विदूषकः प्रतीहारी च)

कञ्चु०—(राजानमवलोक्य) अहो सर्वास्ववस्थासु [2]रमणीयत्वमाकृतिविशेषाणाम्। [3]एवमुत्सुकोऽपि प्रियदर्शनो देवः। तथा हि,—

प्रत्यादिष्टविशेषमण्डनविधिर्वामप्रकोष्ठे श्लथं[4]
बिभ्रत् काञ्चनमेकमेव वलयं श्वासोपरक्ताधरः।
चिन्ताजागरण[5]प्रताम्रनयनस्तेजोगुणैरात्मनः
संस्कारोल्लिखितो महामणिरिव क्षीणोऽपि नालक्ष्यते ॥६॥

सानु०—(राजानं दृष्ट्वा) ठाणे खु पच्चादेसविमाणिदा वि इमस्स[6] किदे सउंदला किलम्मदि त्ति। (स्थाने खलु प्रत्यादेशविमानिताप्यस्य कृते शकुन्तला क्लाम्यतीति।)

राजा—(ध्यानमन्दं परिक्रम्य)

प्रथमं सारङ्गाक्ष्या प्रियया प्रतिबोध्यमानमपि सुप्तम्।
अनुशयदुःखायेदं हतहृदयं संप्रति विबुद्धम् ॥७॥

सानु०—णं ईदिसाणि तवस्सिणीए भाअहेआणि ?
(नन्वीदृशानि तपस्विन्या भागधेयानि ?)

विदू०—(आत्मगतम्) लंघिदो [7]एसो भूओ वि सउंदलावाहिणा। ण आणे कहं चिकिच्छिदव्वो भविस्सदि त्ति। (लङ्घित एषः भूयोऽपि शकुन्तलाव्याधिना। न जाने कथं चिकित्सितव्यो भविष्यतीति।)

कञ्चु०—(उपगम्य) [8]जयतु महाराजः। महाराज ! प्रत्यवेक्षिताः प्रमदवनभूमयः। यथाकाममध्यास्तां विनोदस्थानानि [9]महाराजः।

---

१. इयमस्मत्कृता योजना २. रामणीयकम्

३. तथा ह्येयं वैमनस्यपरीतोऽपि प्रिय०

४. ०ष्ठार्पितं ५. ०प्रतान्त०० गुणादा०, द्र. माल. १।१२

६. कारणादो. ७. (स्वगतम्, अपवार्य) भूओ वि एसो सउंदलावादेण

८. जयति जयति महाराजः, देवः. ९. देवः.

राजा—वेत्रवति ! मद्वचना[1]दमात्यमार्यपिशुनं ब्रूहि । [2]चिरप्रबोधनान्न संभावितमस्माभिरद्य धर्मासनमध्यासितुम् । यत् प्रत्यवेक्षितं पौरकार्यमार्येण तत् [3]पत्रारूढं कृत्वा प्रस्थाप्यतामिति ।

प्रती०—जं देवो आणवेदि । (यद् देव आज्ञापयति) (निष्क्रान्ता)

राजा—[4]वातायन ! त्वमपि स्वं नियोगमशून्यं कुरु ।

कञ्चु०—[5]यदाज्ञापयति देवः । (निष्क्रान्तः)

विदू०—किदं भवदा णिम्मच्छिअं । संपदं [6]सिसिरातवच्छेअरमणीए इमस्सि पमदवणुद्देसे अत्ताणं रमइस्ससि । (कृतं भवता निर्मक्षिकम् । सांप्रतं शिशिरातपच्छेदरमणीये अस्मिन् प्रमदवनोद्देशे आत्मानं रमयिष्यसि ।)

राजा—वयस्य ! रन्ध्रोपनिपातिनोऽनर्था इति यदुच्यते [7]तदव्यभिचारि । कुतः

मुनिसुताप्रणयस्मृतिरोधिना
मम च मुक्तमिदं तमसा मनः ।
मनसिजेन सखे ! प्रहरिष्यता
धनुषि चूतशरश्च निवेशितः ॥८॥[8]

विदू०—[9]चिट्ठ दाव; इमिणा दंडकट्ठेण कंदप्पवाणं णासइस्सं । (तिष्ठ तावत्; अनेन दण्डकाष्ठेन कन्दर्पबाणं नाशयिष्यामि ।)

(दण्डकाष्ठमुद्यम्य चूताङ्कुरं पातयितुमिच्छति)

---

१. ०दमात्यपिशुन. २. अद्य चिर०.
३. पत्रमारोप्य दीयतामिति नि. मा. च. खि. ४. पार्वतायन.
५. तथा. ६. सिसिरविच्छेदरमणीए इमस्सि उज्जाणे अत्ता०.
७. तदव्यभिचारि वचः नि. मा. च. खि. पश्य—.
८. अपि च—'उपहितस्मृतिरङ्गुलिमुद्रया प्रियतमामनिमित्तनिराकृताम् ।
अनुशयादनुरोदिमि चोत्सुकः सुरभिमासमुखं समुपस्थितम् ॥'
९. भो वअस्स, चिट्ठ०० कंदप्पवाहिं (व्याधिं) णासेमि.

राजा—(सस्मितम्) भवतु; दृष्टं ब्रह्मवर्चसम्। सखे! [१]क्वोपविष्टः प्रियायाः किंचिदनुकारिणीषु लतासु दृष्टिं विलोभयामि[२]।

विदू०—[३]णं आसण्णपरिआरिआ चदुरिआ भवदा संदिट्ठा–माहवीमंडवे इमं वेलं अदिवाहिस्सं। तहिं मे चित्तफलअगदं सहत्थलिहिदं तत्तहोदीए सउंदलाए पडिकिदिं आणेहि त्ति। (ननु आसन्नपरिचारिका चतुरिका भवता संदिष्टा—माधवीमण्डपे इमां वेलामतिवाहयिष्ये। तत्र मे चित्रफलकगतां [४]स्वहस्तलिखितां तत्रभवत्याः शकुन्तलायाः [५]प्रतिकृतिमानयेति।)

राजा—[६]ईदृशं हृदयविनोदनस्थानम्। तत् तमेव मार्गमादेशय।

विदू०—इदो इदो भवं। (इत इतो भवान्।)

(उभौ परिक्रामतः, सानुमत्यनुगच्छति)

विदू०—एसो मणिसिलापट्टअसणाहो [७]माहवीमंडवो [८]उवहाररमणिज्जदाए णिस्संसअं साअदेण विअ णो पडिच्छदि। ता पविसिअ णिसीददु भवं। (एष मणिशिलापट्टकसनाथो माधवीमण्डपः उपहाररमणीयतया निःसंशयं स्वागतेनेव नौ प्रतीच्छति। तत् प्रविश्य निषीदतु भवान्।)

(उभौ प्रवेशं कृत्वोपविष्टौ)

सानु०—लदासंस्सिदा पेक्खिस्सं दाव सहीए पडिकिदिं। तदो से भत्तुणो बहुमुहं अणुराअं णिवेदइस्सं। (लतासंश्रिता द्रक्ष्यामि तावत् सख्याः प्रतिकृतिम्। ततोऽस्या भर्तुर्बहुमुखमनुरागं निवेदयिष्यामि।)

(तथा कृत्वा स्थिता)

---

१. क्वेदानीमुप०० विनोदयामि.

२. र. ८।५९, १३।३२, कु० ५।१३, मे. २।४१, वि. ४।३८, ३९ श्लो.

३. णं भवदा०० लिविअरी मेधाविणी आविट्ठा.

४. कु० ५।५८. ५. र. ८।९२, १८।५३.

६. ईदृशमेव मे हृदयप्रत्याश्वासनम्। तत्तदेवादेशय माधवीलतागृहम्.

७. माधवीलदामंडवो ८. उपहारो भूमिकुट्टिमे क्लृप्ता प्रसूनरचना र. ५।७४, कु. ६।४२

राजा—सखे ! सर्वमिदानीं स्मरामि शकुन्तलायाः [1]प्रथमवृत्तान्तम् । कथितवानस्मि भवते च । स भवान् [2]प्रत्यादेशवेलायां मत्समोपगतो[3] नासीत् । [4]पूर्वमपि न त्वया कदाचित् संकीर्तितं तत्रभवत्या नाम । कच्चिदहमिव विस्मृतवानसि त्वम् ?

विदू०—ण विसुमरामि । किंतु सव्वं कहिअ अवसाणे उण तुए परिहासविअप्पग्रो एसो, ण भूदत्थो त्ति ग्राचक्खिदं । मए वि मिप्पिण्ड-बुद्धिणा तह एव्व गहीदं । अहवा भविदव्वदा खु बलवदी । (न विस्मरामि । किंतु सर्वं कथयित्वा अवसाने पुनस्त्वया परिहासविजल्प एष, न भूतार्थ[5] इत्याख्यातम् । मयापि मृत्पिण्डबुद्धिना तथैव गृहीतम् । अथवा भवितव्यता खलु बलवती ।)

सानु०—एव्वं णेदं । (एवं नन्वेतत् ।)

राजा—(ध्यात्वा) सखे ! [6]त्रायस्व माम् ।

विदू०—भो ! किं एदं ? ग्रणुववण्णं खु ईदिसं तुइ । कदा वि सत्पुरिसा सोअपत्तप्पाणो ण होंति । णं पवादे वि[7] णिक्कंपा गिरीओ । (भोः ! किमेतत् ? अनुपपन्नं खल्वीदृशं त्वयि । कदापि सत्पुरुषाः शोकपात्रात्मानो[8] न भवन्ति । ननु प्रवातेऽपि निष्कम्पा गिरयः[9] ।)

राजा—वयस्य ! निराकरणविक्लवायाः प्रियायाः[10] समवस्थामनुस्मृत्य बलवदशरणोऽस्मि । सा हि,—

इतः [11]प्रत्यादिष्टा स्वजनमनुगन्तुं व्यवसिता
स्थिता [12]तिष्ठेत्युच्चैर्वदति गुरुशिष्ये गुरुसमे ।
पुनर्दृष्टिं बाष्पप्रसरकलुषामर्पितवती
मयि क्रूरे यत्, तत्, सविषमिव शल्यं दहति माम् ॥९॥

---

१. प्रथमदर्शन० २. प्रत्याख्यानकाले ३. ०गत एव नासीत्
४. प्रथममपि तत्रभवत्याः कीर्तितं नाम मया००त्वमपि । ५. र. १०।३३
६. परित्रायस्व ७. णिक्कंपा जेव गिरीओ
८. सोअवत्तव्वा—नि. च. खि. पि. । काटयवेमपाठं तु मा.वदाद्रियामहे.
९. र. २।३४, ८।९० १०. सख्यास्तामवस्था०
११. प्रत्यादेशात्—नि. च. मा. १२. मुहुस्तिष्ठे० नि. च. मा. खि.

सानु०—अम्महे[1], ईदिसी स्वकज्जपरदा। इमस्स संदावेण अहं रमामि।
(अहो, ईदृशी स्वकार्यपरता। अस्य संतापेनाहं रमे।)

विदू०—भो ! अत्थि मे तक्को—केण वि तत्तहोदी आआसचारिणा णीदे त्ति। (भोः ! अस्ति मे तर्कः—केनापि तत्रभवती आकाशचारिणा नीतेति।)

राजा—[2]कः पतिदेवतामन्यः परामर्ष्टुमुत्सहेत[3] ? मेनका किल सख्यास्ते जन्मप्रतिष्ठेति[4] श्रुतवानस्मि। तत्सहचारिणीभिः सखी ते हृतेति मे हृदयमाशङ्कते।

सानु०—संमोहो खु विम्हअणिज्जो ण पडिवोहो।
(संमोहः खलु विस्मयनीयः, न प्रतिबोधः।)

विदू०—जह एवं ता समस्ससदु भवं। अत्थि खु समाअमो तत्तहोदीए[5]।
(यद्येवम्, समाश्वसितु भवान् अस्ति खलु समागमः कालेन तत्रभवत्या।)

राजा—कथमिव ?।

विदू०—ण खु [6]मादापिदरा भत्तुविओअदुक्खिअं दुहिदरं चिरं [7]पेक्खिदुं पारेंति। (न खलु मातापितरौ भर्तृवियोगदुखितां दुहितरं चिरं द्रष्टुं पारयतः।)

राजा—वयस्य !

स्वप्नो नु, माया नु, मतिभ्रमो नु,
क्लृप्तं[8] नु तावत् फलमेव पुण्यम्।
असंनिवृत्त्यै तदतीतमेव[9]
मनोरथा नाम तटप्रपाताः[10] ॥१०॥

---

१. इमस्स ईदिसी अकज्ज००संतावेदि। २ कः पतिव्रतां तामन्यः, र. १४।७४.
३. परिमार्ष्टुं-मा. ०मुत्सहते. ४. सखीजनादस्मि श्रुतवान्।०
५. जह एव्वं अत्थि खु समाअमो कालेण नि. मा. च. खि. पिशेलपाठस्तु युक्तः.
६. मादा पिदा वाण भत्तुविरहिदं चिरं दुहिदरं पेक्खिदुं पारेंदि। ७. पेक्खिदुं-नि.
८. क्लिष्टं नु तावत् फलमेव पुण्यम्—नि. च. खि. मा. सा.
क्लृप्तं नु ,, ,, पुण्यैः–पि. (क्लृप्तं व्यतीतम्।)
९. तदतीव मन्ये मनो००० प्रयातम्—पि.
तदतीतमेव मनोरथानामतटप्रपाताः—नि. मा.
तदतीतमेते ०००००००००ताः च. खि.
००००मनोरथा नाम तटप्रपाताः नि. सा.
१०. द्वितीये चरण एवकारस्य क्लृप्तमेवेत्यन्वयः।

विदू०—मा एव्वं; णं अंगुलीअअं एव्व णिदंसणं अवस्संभाविणो अचिंतणिज्जो समाअमो होदि त्ति। (मैवम्; नन्वङ्गुलीयकमेव निदर्शनम्, अवश्यंभाविनः अचिन्तनीयः समागमो भवतीति।)

राजा—(अङ्गुलीयकं विलोक्य) अये! इदं तावदसुलभस्थानभ्रंशि शोचनीयम्।

तव सुचरितमङ्गुलीय! नूनं
प्रतनु ममेव विभाव्यते फलेन।
अरुणनखमनोहरासु तस्या-
श्च्युतमसि लब्धपदं यदङ्गुलीषु ॥११॥

सानु०—जइ अण्णहत्थगदं भवे [1]सच्चं एव्व सोअणिज्जं भवे। (यदि अन्यहस्तगतं भवेत् सत्यमेव शोचनीयं भवेत्।)

विदू०—भो! इअं णाममुद्दा केण [2]उग्घादेण तत्तहोदीए [3]हत्थाब्भासं पाविदा?। (भोः! इयं नाममुद्रा केनोद्घातेन तत्रभवत्या हस्ताभ्याशं प्रापिता?)

सानु०—[4]मम विअ कोदूहलेण [5]आलाविदो एसो। (ममेव कौतूहलेनालापित एषः।)

राजा—[6]श्रूयताम्; स्वनगराय प्रस्थितं मां प्रिया [7]सवाष्पमाह—कियच्चिरेणार्यपुत्रः [8]प्रतिपत्तिं दास्यतीति।

विदू०—तदो तदो?। (ततस्ततः?।)

राजा—[9]पश्चादिमां मुद्रां तदङ्गुलौ निवेशयता मया प्रत्यभिहिता,—

एकैकमत्र दिवसे दिवसे मदीयं
नामाक्षरं गणय [10]यासि न यावदन्तम्।
तावत् प्रिये! [11]मदवरोधनिदेशवर्त्ती
नेता जनस्तव समीपमुपैष्यतीति ॥१२॥

[12]तच्च दारुणात्मना मया मोहान्नानुष्ठितम्।

---

१. सच्चं सोअणीअं भवे। सहि, दूरे वट्टसि। एआइणी जेव कण्णसुहाइं अणुभवामि पि. २. उवुग्घादेण पि. ३. हत्थसंसग्गं
४. मम वि ५. आआरिदो. ६. वयस्य, श्रूयताम्। यदा तपोवनात्स्वनगराय. ७. सबाष्पमिदमाह.
८. पुनरस्माकं स्मरिष्यतीति. ९. अथेमां नाममुद्रामंगुल्यां.
१०. गच्छसि यावदन्तम्. नि. ११. मदवरोधगृहप्रवेशं. नि.
१२. तच्च मोहाद्दारुणमनुष्ठितम्.

सानु०—रमणीओ खु अवही विहिणा विसंवादिदो ।
(रमणीयः खल्ववधिर् विधिना विसंवादितः ।)

विदू०—[1]कहं धीवलकप्पिअस्स लोहिअमच्छस्स उदलब्भंतले आसि ?
(कथं धीवरकल्पितस्य रोहितमत्स्यस्योदराभ्यन्तर आसीत् ?)

राजा—[2]शचीतीर्थं वन्दमानायाः[3] सख्यास्ते हस्ताद् गङ्गास्रोतसि परिभ्रष्टम् ।

विदू०—जुज्जइ । (युज्यते ।)

सानु०—अदो एव्व तवस्सिणीए सउंदलाए अधम्मभीरुणो[4] इमस्स राएसिणो परिणए [5]संदेहो आसि । अहवा, ईदिसो अणुराओ अहिण्णाणं अवेक्खदि । [6]कहं विअ एदं ? (अत एव तपस्विन्याः शकुन्तलाया अधर्मभीरोरस्य राजर्षेः परिणये संदेह आसीत् । ([a]सविमर्शं) अथवा ईदृशोऽनुरागः अभिज्ञानमपेक्षते । ([a]संवितर्कं) कथमिवैतत् ?)

राजा—[7]उपालप्स्ये तावदिदमङ्गुयकम् ।

विदू०—(आत्मगतम्[8]) गहीदो णेण पंथा उम्मत्तआणं । (सस्मितम्) अहं पि एदं दंडकट्ठं उवालहिस्सं कधं उजुअस्स मे कुडिलं तुमं सि त्ति । (कथं गृहीतोऽनेन पन्था उन्मत्तानाम् । ([a]प्रकाशं, सस्मितम्) अहमपि एतद् दण्डकाष्ठमुपालप्स्ये कथम् ऋजुकस्य मे कुटिलं त्वमसीति ।)

राजा—(अनाकर्णितनाटितकेन अङ्गुलीयकं विलोक्य) मुद्रिके !

कथं नु तं वन्धुरकोमलाङ्गुलिं
करं विहायासि निमग्नमम्भसि ?

अथवा

अचेतनं नाम गुणं न[9] लक्षये-
न्मयैव कस्मादवधीरिता प्रिया ॥१३॥

---

१. कधं रोहिदमच्छस्स मुहं बडिसं विअ एदं पविट्ठं आसि.
२. शचीतीर्थे सलिलं.
३. व्यास्तव सख्याः परिभ्रष्टम्.
४. ००भीरुणो राएसिणो.
५. संदेहो. अध वा
६. ता कधं विअ.
७. भवतु, उपालप्स्ये.
८. गहीदो००त्तआणं । राजा—(अना०००प्रिया । विदू०—नि.
९. न वीक्षते.
a. एता मम योजनाः

सानु०—सअं ज्जेव्व पडिवण्णो जं म्हि वत्तुकामा ।
(स्वयमेव प्रतिपन्नो यदस्मि वक्तुकामा)

विदू०—(आत्मगतम्) कहं बुभुक्खाए खादिव्वो म्हि ।
(कथं बुभुक्षया खादितव्योऽस्मि ।)

राजा—अकारणपरित्यागानुशय[1]दग्धहृदयस्तावदनुकम्प्यतामयं जनः पुनर्दर्शनेन ।

(प्रविश्यापटीक्षेपेण [2]चित्रफलकहस्ता)

चतु०—इअं चित्तगदा भट्टिणी । (इयं चित्रगता भट्टिनी ।)
(चित्रफलकं दर्शयति)[3]

विदू०—(निर्वर्ण्य) साहु वअस्स ! । [4]महुरावत्थाणदंसणिज्जो भावाणुप्पवेसो । क्खलदि विअ मे दिट्ठी णिण्णुण्णअप्पदेसेसु । (साधु वयस्य ! । मधुरावस्थानदर्शनीयो भावानुप्रवेशः । स्खलतीव मे दृष्टिर्निम्नोन्नतप्रदेशेषु ।)

सानु०—[5]अंमो, एसा राएसिणो णिउणदा । जाणे सही अग्गदो मे वट्टदि त्ति । (अहो, एषा राजर्षेर्निपुणता । जाने सखी अग्रतो मे वर्तत इति ।)

राजा—वयस्य !

यद् यत् साधु न चित्रे स्यात् क्रियते तत् तदन्यथा ।
तथापि तस्या लावण्यं रेखया[6] किंचिदन्वितम् ॥१४॥

---

१. ०तप्तहृदय नि.
२. 'अपटी काण्डपटिका प्रतिसीरा जवानिका तिरस्करिणी' रा.
३. राजा-अहो, रूपमालेख्यस्य; दीर्घापाङ्गविसारिनेत्रयुगलं लीलाञ्चितभ्रूलतं
दन्तातःपरिकीर्णहासकिरणज्योत्स्नाभिषिक्ताधरम् ।
कर्कन्धूद्युतिपाटलोष्ठरुचिरं तस्यास्तदेतन्मुखं
चित्रेऽप्यालपतीव विभ्रमलसत्प्रोद्भिन्नकान्तिद्रवम् ॥' पि.
४. भावमहुरा रेहा । खलदि०००प्पदेसेसुं । किं बहुणा, सत्ताणुप्पवेससंकाए आलवणकोदूहलं मे जणेदि ।
५. अहो राएसिणो वत्तिआरेहाणिउणदा
६. रेखा शिरोनेत्रकरादीनामङ्गानां मेलने सति ।
कायस्थितिर्यतो नेत्रहरा रेखा प्रकीर्तिता ॥ रा.

सानु०—[1]सरिसं एदं पच्छादावगुरुणो सिणेहस्स अणवलेवस्स अ। (सदृशमेतत् पश्चात्तापगुरोः स्नेहस्य अनवलेपस्य च।)

विदू०—भो! दाणिं[2] तिण्हिओ तत्तहोदीओ दीसंति। सव्वाओ अ दंसणीआओ। कदमा एत्थ तत्तहोदी सउंदला?। (भोः! इदानीं तिस्रस्तत्रभवत्यो दृश्यन्ते। सर्वाश्च दर्शनीयाः। कतमात्र तत्रभवती शकुन्तला?।)

सानु०—[3]अणभिण्णो खु ईदिसस्स रूवस्स मोहदिट्ठी अअं जणो। (अनभिज्ञः खलु ईदृशस्य रूपस्य मोहदृष्टिरयं जनः।)

राजा—त्वं तावत् कतमां तर्कयसि?।

विदू०—तक्केमि जा एसा सिढिलकेसबंधणुव्वंतकुसुमेण केसंतेण उब्भिण्णस्सेअबिंदुणा वअणेण विसेसदो ओसरिआहिं वाहाहिं [4]अवसेअसिणिद्धतरुणपल्लवस्स चूअपाअवस्स पासे[5] ईसिपरिस्संता विअ आलिहिदा सा सउंदला। इदराओ सहीओ त्ति। (तर्कयामि यैषा शिथिलकेशबन्धनोद्वान्तकुसुमेन केशान्तेन, उद्भिन्नस्वेदबिन्दुना वदनेन, विशेषतोऽपसृताभ्यां बाहुभ्याम्, अवसेकस्निग्धतरुणपल्लवस्य चूतपादपस्य पार्श्वे ईषत् परिश्रान्तेव आलिखिता सा शकुन्तला, इतरे सख्याविति।)

राजा—निपुणो भवान्। अस्त्यत्र [6]मे भावचिह्नम्।

स्विन्ना[7]ङ्गुलिविनिवेशो रेखाप्रान्तेषु दृश्यते मलिनः।
अश्रु च कपोलपतितं [8]दृश्यमिदं [9]वर्तिकोच्छ्वासात्॥१५॥

---

१. सरिसं पच्छा००सिणेहस्स। साक्षादिति ६।१६ पद्यमत्रैव प.
२. तिण्णि आइदीओ दीसंति।
३. अणहिण्णो एस तवस्सी सहीए रूवस्स। मोहचक्खुणो इअं ण गदा से पच्चक्खदं। ४. अवसेअसिणिद्धपल्लवं असोअलदिअं संसिदा सिढि.
५. वद्धसेदबिंदुणा वअणेण विसेसणमिदसाहाहिं वाहालदिआहिं उससीदणीविणा वसणेण ईसिप्परिस्संता विअ आलिहिदा सा तत्तभोदी सउंतला सेसाओ सहीओ त्ति. ६. ममापि.
७. ०ङ्गुलीनिवेशाद्रेखाप्रान्तेषु दृश्यते मलिना। ८. लक्ष्यमिदं वर्णकोच्छ्वासात्.
९. वर्तिका चित्रपटे लेपविशेषः, 'पटलेपे पक्षिभेदे तूलिकायां च वर्तिका'. रा.

चतुरिके ! अर्धलिखितमेतद् विनोदस्थानम्[1] । गच्छ, वर्तिकां तावदानय ।

चतु०—अज्ज माढव्व ! अवलंब चित्तफलअं, जाव आअच्छामि । (आर्य माधव्य ! अवलम्बस्व चित्रफलकं, यावदागच्छामि ।)

राजा --अहमेवैतदवलम्बे । (यथोक्तं करोति)

(निष्क्रान्ता चेटी)

राजा—(निःश्वस्य) अहं हि,—

साक्षात् प्रियामुपगतामपहाय पूर्वं
चित्रार्पितां पुनरिमां बहु मन्यमानः ।
स्रोतोवहां पथि निकामजलामतीत्य
जातः सखे! प्रणयवान् मृगतृष्णिकायाम् ।।१६।।

विदू०—(आत्मगतम्) एसो अत्तभवं णदिं अदिक्कमिअ मिअतिण्हिआं संकंतो । (प्रकाशम्) भो ! अवरं किं एत्थ आलिहिदव्वं[2] ? । (एषोऽत्रभवान्नदीमतिक्रम्य मृगतृष्णिकां संक्रान्तः । (प्रकाशम्) भोः ! अपरं किमत्र आलेखितव्यम् ।)

सानु०—जो जो पदेशो सहीए मे अहिरूवो तं तं आलिहिदुकामो भवे । (यो यः प्रदेशः सख्या मे अभिरूपस्, तं तमालिखितुकामो भवेत् ।)

राजा—श्रूयताम्,—

कार्या सैकतलीनहंसमिथुना स्रोतोवहा मालिनी
[3]पादास्तामभितो निषण्णहरिणा गौरीगुरोः पावनाः ।
शाखालम्बितवल्कलस्य च तरोर्निर्मातुमिच्छाम्यधः
श्रृङ्गे कृष्णमृगस्य वामनयनं कण्डूयमानां मृगीम् ।।१७।।

विदू०—(आत्मगतम्) [4]जह अहं पेक्खामि पूरिदव्वं णेण चित्तफलअं लंबकुच्चाणं तावसाणं कदंबेहिं । (यथाहं पश्यामि पूरयितव्यमनेन चित्रफलकं लम्बकूर्चानां तापसानां कदम्बैः ।)

---

१. ०स्थानस्माभिः तद्गच्छ वर्तिकास्तावदानय । चेटी—अज्ज०० जाव गच्छामि.

२. विदू०—भो किं एत्थ अवरं आलिहिदव्वं । मिश्रकेशी—जो जो पिअसहीए अहिमदो पदेसो तं तं आलिहिदुकामो त्ति तक्केमि । राजा—सखे, श्रूयताम्—. ३. पादस्तामभितो निषण्णचमरो००पावनः.

४. जधा मंतेदि तधा तक्केमि पूरिदो अणेण चित्ताफलओ आइदीहिं कुच्चाणदाणं तावसाणं ति ।.

३४

राजा—वयस्य ! अन्यच्च शकुन्तलायाः [1]प्रसाधनमभिप्रेतमस्माभिः ।

विदू०—किं विअ । (किमिव ? ।)

सानु०—[2]वणवासस्स सोउमारस्स अ जं सरिसं भविस्सदि ।
(वनवासस्य सौकुमार्यस्य च यत् सदृशं भविष्यति ।)

राजा—

कृतं न कर्णार्पितबन्धनं सखे !
शिरीषमागण्डविलम्बिकेसरम् ।
न वा शरच्चन्द्रमरीचिकोमलं
मृणालसूत्रं रचितं स्तनान्तरे ॥१८॥

विदू०—भो ! किं णु तत्तहोदी [3]रत्तकुवलअपल्लवसोहिणा अग्गहत्थेण मुहं ओवारिअ चइदचइदा विअ ठिआ । (सावधानं निरूप्य) आ, एसो दासीएपुत्तो कुसुमरसपाडच्चरो तत्तहोदीए वअणं अहिलंघेदि [4]महुअरो । (भोः ! किं नु तत्रभवतो रक्तकुवलयपल्लव-शोभिना अग्रहस्तेन मुखमपवार्य चकितचकितेव स्थिता । (सावधानं निरूप्य) आः, एष दास्याः पुत्रः कुसुमरसपाटच्चरः तत्रभवत्या वदनमभिलङ्घति मधुकरः ।)

राजा—ननु वार्यतामेष धृष्टः ।

विदू०—[5]भवं एव्व अविणीदाणं सासिदा इमस्स वारणे पहविस्सदि ।
(भवानेव अविनीतानां शासिता अस्य वारणे प्रभविष्यति ।)

राजा—युज्यते । अयि भोः कुसुमलताप्रियातिथे! [6]किमत्र परिपतन-खेदमनुभवसि ?

एषा कुसुमनिषण्णा तृषितापि सती भवन्तमनुरक्ता ।
प्रतिपालयति [7]मधुकरी न खलु [8]मधु त्वया विना पिबति[9]॥१९॥

---

१. प्रसाधनमभिप्रेतमत्रालिखितुं विस्मृतमस्माभिः ।.
२. कण्णआभावस्स विणअस्स अ सरिसं. ३. रत्तकुवलअसोहिणा.
४. घिट्ठमहुअरो० ०वअणकमलं अहिलसदि.
५. तुमं जेव अविणीदसासणे पहवसि. ६. किमितः. ७. भ्रमरी.
८. मधु त्वां विना पिबति. ९. कु. ३।५६.

सानु०—अज्ज [1]अभिजादं खु एसो वारिदो।
(अद्य अभिजातं खल्वेष वारितः।)

विदू०—पडिसिद्धा वि[2] वामा एसा जादी। (प्रतिषिद्धापि वामैषा जातिः।)

राजा[3]–एवं भोः, न मे शासने तिष्ठसि ?। श्रूयतां तर्हि संप्रति,—

अक्लिष्टवालतरुपल्लवलोभनीयं
पीतं मया सदयमेव रतोत्सवेषु।
बिम्बाधरं [4]स्पृशसि चेद् भ्रमर ! प्रियाया-
स्त्वां कारयामि कमलोदरबन्धनस्थम् ॥२०॥

विदू०—[5]एव्वं तिक्खणदंडस्स किं ण भाइस्सदि ?। (प्रहस्य आत्मगतम्) एसो दाव उम्मत्तो। अहं पि एदस्स संगेण ईदिस[6]वअणो जेव्व संवुत्तो। (प्रकाशम्) भो ! चित्तं खु एदं। (एवं तीक्ष्णदण्डस्य किं न भेष्यति ? (प्रहस्य आत्मगतम्)। एष तावदुन्मत्तः। अहमप्येतस्य सङ्गेन ईदृशवचन एव संवृत्तः। (प्रकाशम्) भोः ! चित्रं खल्वेतत्।)

राजा०—कथं चित्रम् ?।

सानु०—अहं पि दाणिं अवगदत्था, किं उण [7]जहाचिंदिदाणुभावी एसो।
(अहमपीदानीमवगतार्था, किं पुनर्यथाचिन्तितानुभाव्येषः।)

राजा—वयस्य ! किमिदमनुष्ठितं पौरोभाग्यम्[8] ?।

दर्शनसुखमनुभवतः साक्षादिव तन्मयेन हृदयेन।
स्मृतिकारिणा त्वया मे पुनरपि चित्रीकृता कान्ता ॥२१॥

(बाष्पं [9]विहरति)

---

१. अहिजादं खु वारिदो. २. ०सिद्धवामा खु एसा.
३. (सकोपम्) भोः. ४. दशसि.
५. भो एव्वं तिक्खदंडस्स दे कधंण.
६. इदिसो जेव्व पि. सा.,। ईदिसवण्णो विअ. नि. खि. च., ईदिसवअणो विअ. मा. राजा-कथं निवार्यमाणोऽपि स्थित एव। मिश्र०- धीरं पि जणं रसो विआरेदि। विदू०–भो, चित्तं खु एदं। राजा - कथं चित्रम्।.
७. जधालिहिदाणुभावी. चिंदिआणुसारी ८. पौरोभाग्यं दोषदर्शित्वम्। 'दोषैकदृक्पुरोभागी' इत्यमरः रा.। ९. विसृजति।

सानु०—पुव्वावरविरोही अपुव्वो एसो [१]विरहमग्गो। (पूर्वापरविरोधी अपूर्व एष विरहमार्गः।)

राजा—वयस्य! [२]कथमेवमविश्रान्तदुःखमनुभवामि?।

प्रजागरात् खिलीभूतस्तस्याः [३]स्वप्ने समागमः।
वाष्पस्तु न ददात्येनां द्रष्टुं चित्रगतामपि ॥२२॥

सानु०—[४]सव्वहा पमज्जिदं तुए पच्चादेसदुक्खं सउंदलाए। (सर्वथा प्रमार्जितं त्वया प्रत्यादेशदुःखं शकुन्तलायाः।)

(प्रविश्य चतुरिका)

चतु०—जेदु जेदु भट्टा। वट्टिआकरंडअं गेण्हिअ [५]इदोमुहं पत्थिद म्हि। (जयतु जयतु भर्ता। वर्तिकाकरण्डकं गृहीत्वा इतोमुखं प्रस्थितास्मि।

राजा—किं[६] च?।

चतु०—सो मे हत्थादो अंतरा [७]तरलिआदुदीआए देवीए वसुमदीए अहं एव्व अज्जउत्तस्स उवणइस्सं त्ति सबलक्कारं गहीदो। (तत् मे हस्ताद् अन्तरा तरलिकाद्वितीयया देव्या वसुमत्या अहमेव आर्यपुत्रस्योपनेष्यामीति सबलात्कारं गृहीतः।)

विदू०—दिट्ठिआ [८]तुमं मुक्का। (दिष्ट्या त्वं मुक्ता।)

चतु०—जाव देवीए [९]विडवलग्गं उत्तरीअं तरलिआ मोचेदि ताव मए णिव्वाहिदो अत्ता। (यावद्देव्या विटपलग्नमुत्तरीयं तरलिका मोचयति तावन्मया निर्वाहित आत्मा।)

राजा—वयस्य! उपस्थिता देवी बहुमानगर्विता च। भवानिमां प्रतिकृतिं रक्षतु।

---

१. विहिणो मग्गो. २. कथमविश्रामं दुःख०.

३. स्वप्नसमागमः द्र. मे. २।२२, वि. २।१०.

४. वअस्स संमज्जिदं तए०० पिअसहीए सउंतलाए पच्चक्खं जेव सहीअणस्स।

५. इदो अहं. ६. किं ततः. ७. पिंगलिआदुदिआए देवीए.

८. तुमं कधं विमुक्का।

९. लदाविडवलग्गं देवीए परिचारिआ अंचलं ताव णिण्हुविदो मए अप्पा। (नेपथ्ये) एदु एदु भट्टिणी। विदू०—(कर्णं दत्त्वा) भो, अहिधावंती एसा अंतेउरवग्घी मेधाविणिं मइं विअ कवलिदुं उवत्थिदा।

विदू०—अत्ताणं[1] त्ति भणाहि। (चित्रफलकमादायोत्थाय च) जइ भवं [2]अंतेउरवाउरादो मुंचीअदि तदो मं मेहप्पडिच्छंदे[3] प्पासादे सद्दावेहि। (आत्मानमिति भण। (चित्रफलकमादायोत्थाय च) यदि भवानन्तःपुरवागुरातो मोक्ष्यते तदा मां मेघप्रतिच्छन्दे प्रासादे शब्दापय।) (द्रुतपदं निष्क्रान्तः)

सानु०—अण्णसंकंतहिअओ वि पढमसंभावणं [4]अवेक्खदि सिढिलसोहदो दाणिं एसो। (अन्यसंक्रान्तहृदयोऽपि प्रथमसंभावनामपेक्षते शिथिल-सौहृद इदानीमेषः।)

(प्रविश्य पत्रहस्ता)

प्रती०—जेदु जेदु देवो। (जयतु जयतु देवः।)

राजा—वेत्रवति! न खल्वन्तरे दृष्टा त्वया देवी।

प्रती०—देव दिट्ठा। पत्तहत्थं मं पेक्खिअ उण पडिणिउत्ता। (देव दृष्टा! पत्रहस्तां मां प्रेक्ष्य पुनः प्रतिनिवृत्ता।)

राजा—कार्यज्ञा कार्योपरोधं मे परिहरति।

प्रती०—देव! अमच्चो विण्णवेदि—[5]अत्थजादस्स गणणाबहुलदाए एक्कं एव्व पोरकज्जं अवेक्खिदं, तं देवो पत्तारूढं पच्चक्खीकरेदु—त्ति। (देव! अमात्यो विज्ञापयति—अर्थजातस्य गणनाबहुलतया एकमेव पौरकार्यमवेक्षितम्, तद् देवः पत्रारूढं प्रत्यक्षीकरोतु—इति।)

राजा—इतः पत्रं दर्शय।

(प्रतीहार्युपनयति)

राजा—(अनुवाच्य) कथम्?। [6]समुद्रव्यवहारी सार्थवाहो धनमित्रो नाम नौव्यसने विपन्नः। अनपत्यश्च किल तपस्वी। 'राजगामी

---

१. ०णअं पि किं ति ण भणसि २. अंतेउरकालकूडादो मुच्चिस्सदि

३. मेहच्छण्णप्पासादे सद्दावेसि। एदं च तहिं गोवेमि जहिं पारावदं उज्झिअ ण को वि अण्णो पेक्खदि। ४. रक्खदि थिरसोहिदो दाव एसो।

५. विदितमस्तु देवपादानाम्। ६. धनवृद्धिनामा वणिग् वारिपथोपजीवी नौव्यसनेन०० तस्यानेककोटिसंख्यं वसु। तदिदानीं राजार्थतामापद्यते। इति श्रुत्वा देवः प्रमाणमिति। ०००पत्यता.

तस्यार्थसंचयः' इत्येतदमात्येन लिखितम्। (सविषादं) कष्टं खल्वनपत्यता। बहुधनत्वाद् बहुपत्नीकेन तत्रभवता भवितव्यम्। विचार्यतां यदि काचिदापन्नसत्त्वा तस्य भार्यासु स्यात्।

प्रती०—देव! दाणिं एव्व साकेदअस्स सेट्ठिणो दुहिआ णिव्वुत्तपुंसवणा जाआ से सुणीअदि। (देव! इदानीमेव साकेतकस्य श्रेष्ठिनो दुहिता निर्वृत्तपुंसवना जायाऽस्य श्रूयते।)

राजा—ननु गर्भः पित्र्यं [1]रिक्थमर्हति। गच्छ एवममात्यं ब्रूहि।

प्रती०—जं देवो आणवेदि। (यद्देव आज्ञापयति।) (प्रस्थिता)

राजा—एहि तावत्।

प्रती०—इअम्हि। (इयमस्मि।)

राजा—किमनेन संततिरस्ति नास्तीति।

येन येन वियुज्यन्ते प्रजाः स्निग्धेन वन्धुना।
स स पापादृते तासां दुष्यन्त इति घुष्यताम्॥२३॥

प्रती०—एव्वं णाम घोसइदव्वं। (निष्क्रम्य, पुनः प्रविश्य) काले पवुट्ठं विअ अहिणंदिदं देवस्स सासणं महाजणेण। (एवं नाम घोषयितव्यम्। (निष्क्रम्य, पुनः प्रविश्य) काले प्रवृष्टमिव अभिनन्दितं देवस्य शासनं महाजनेन।)

राजा—(दीर्घमुष्णं च निःश्वस्य) एवं भोः, संततिच्छेदनिरवलम्बा[2] मूलपुरुषावसाने संपदः परमुपतिष्ठन्ति। ममाप्यन्ते पुरुवंशश्रीरेवंवृत्ता।

प्रती०—पडिहदं अमंगलं। (प्रतिहतममङ्गलम्।)

राजा—धिङ् माम् उपस्थितश्रेयोवमानिनम्।

सानु०—असंसअं सहिं एव्व हिअए करिअ णिंदिदो णेण अप्पा। (असंशयं सखीमेव हृदये कृत्वा निन्दितोऽनेनात्मा।)

---

१. ऋक्थम्

२. ०निरवलम्बानां कुलानां मूल००न्ति। ००पुरुवंश–श्रीरकाल इवोप्तबीजा भूरेवंवृत्ता नि. मा.। निरवलम्बना००००न्ते००पुरुषवंशश्रिय एष वृत्तान्तः- सा. खि. पि. च.

राजा—

संरोपितेऽप्यात्मनि धर्मपत्नी
त्यक्ता मया नाम कुलप्रतिष्ठा।
कल्पिष्यमाणा महते फलाय
वसुन्धरा काल इवोप्तबीजा ॥२४॥

सानु०—अपरिच्छिण्णा दाणिं दे संददी भविस्सदि। (अपरिच्छिन्नेदानीं ते संततिर्भविष्यति।)

चतु०—(जनान्तिकम्) अए! इमिणा सत्थवाहवुत्तंतेण दुउणुव्वेओ भट्टा। णं अस्सासिदुं [1]मेहप्पडिच्छंदादो अज्जं माढव्वं गेण्हिअ आअच्छामि। (अयि! अनेन सार्थवाहवृत्तान्तेन द्विगुणोद्वेगो भर्ता। एनमाश्वासयितुं मेघप्रतिच्छन्दाद् आर्यं माधव्यं गृहीत्वा आगच्छामि।)

प्रती०—सुट्ठु भणसि। (सुष्ठु भणसि) (निष्क्रान्ता)

राजा—अहो दुष्यन्तस्य संशयमारूढाः पिण्डभाजः। कुतः

अस्मात् परं वत यथाश्रुति[2] संभृतानि
को नः कुले निवपनानि [3]नियच्छतीति।
नूनं प्रसूतिविकलेन मया प्रसिक्तं
धौताश्रुसेकमुदकं[4] पितरः पिबन्ति ॥२५॥

(मोहमुपगतः)

चतु०—(ससंभ्रममवलोक्य) समस्ससदु भट्टा। (समाश्वसितु भर्ता।)

सानु०—हद्धी हद्धी। सदि खु दीवे ववधाणदोसेण एसो अंधआरदोसं अणहोदि[5]। अहं दाणिं एव्व णिव्वुदं करेमि। अहवा सुदं मए

---

१. मेहच्छण्णावट्टिदं संतावणिव्वावइत्तअं. २. यथास्मृति.
३. करिष्यतीति. ४. धौताश्रुशेषमुदकं. नि., र. १।६७
५. अणुभवदि राएसी. चेटी—भट्टा, अलं संदाविदेण। वअत्थो ज्जेव पहू अवरासुं देवीसुं अणुरूवपुत्तजम्मेण पुव्वपुरिसाणं अरिणो भविस्सदि (आत्मगतम्।) ण मे वअणं पडिच्छदि भट्टा। अध वा अणुरूवं जेव ओसधं आदंकं णिअत्तेदि। राजा-(शोकनाटितकेन) सर्वथा-'आमूलशुद्धसन्तति कुलमेतत् पौरवं प्रजावन्ध्ये। मय्यस्तमितमनार्ये देश इव सरस्वतीस्रोतः ॥'-

सउंदलं समस्ससअंतीए महेंदजणणीए मुहादो जण्णभाओस्सुआ देवा एव्व तह अणुचिट्ठिस्संति जह अइरेण धम्मपदिणिं भट्टा अहिणंदिस्सदि त्ति। ता णणु जुत्तं कालं पडिपालिदुं। जाव इमिणा वुत्तंतेण पिअसहिं समस्सासेमि। (हा धिक् हा धिक्। सति खलु दीपे व्यवधानदोषेणैषः अन्धकारदोषमनुभवति। अहमिदानीमेनं निर्वृतं करोमि। अथवा श्रुतं मया शकुन्तलां समाश्वासयन्त्या महेन्द्रजनन्या मुखाद् यज्ञभागोत्सुका देवा एव तथानुष्ठास्यन्ति यथा अचिरेण धर्मपत्नीं भर्ता अभिनन्दिष्यतीति। तन्ननु युक्तं कालं प्रतिपालयितुम्। यावदनेन वृत्तान्तेन प्रियसखीं समाश्वासयामि।) (उद्भ्रान्तकेन निष्क्रान्ता)

(नेपथ्ये)

अब्बम्हण्णं। (अब्रह्मण्यम्।)

राजा—(प्रत्यागतचेतनः कर्णं दत्त्वा) अये, माधव्यस्येवार्तस्वरः। कः कोऽत्र भोः?।

—(मोहमुपगतः) चेटी–(ससंभ्रमम्) समस्ससदु समस्सदु भट्टा। मिश्र०–किं इदाणिं जेव०० सेमि (नेपथ्ये) भो अव्वम्हण्णं अव्वम्हण्णं। राजा—(प्रत्यागतचेतनः कर्णं दत्वा) अये माधव्यस्येवार्त्तनादः। चेटी—भट्टा, मा णाम सो माधव्वतवस्सी पिंगलिआमिस्सिआहिं चित्तफलअहत्थो पाविदो पविस्सदि। राजा—चतुरिके, गच्छ मद्वचनादनिषिद्धपरिजनां देवीमुपालभस्व। चेटी—जं देवो आणवेदि। (निष्क्रान्ता) (नेपथ्ये) अव्वम्हण्णं अव्वम्हण्णं राजा—परमार्थतो भीतिभिन्नस्वरो ब्राह्मणः। कः कोऽत्र भोः (प्रविश्य) कञ्चुकी—आज्ञापयतु देवः। राजा—निरूप्यतां किमेवं माधव्यमाणवकः क्रन्दतीति। कंचु०—यावदालोकयामि। (निष्क्रम्य ससंभ्रमः पुनः प्रविष्टः) राजा—पार्वतायन, न खलु किंचिदत्याहितम्। कंचु०—एवम्। राजा—तत्कुतोऽयं वेपथुः। तथा हि–'प्रागेव जरसा कम्पः स विशेषेण संप्रति। आविष्करोति सर्वाङ्गमश्वत्थमिव मारुतः॥' कंचु०—परित्रायतां सुहृदं महाराजः। राजा—कस्मात् परित्रातव्यः। कंचु०—महतः कृच्छ्रात्। राजा—अयि, भिन्नार्थमभिधीयताम्। कंचु०—योऽसौ दिगवलोकनप्रासादो मेघच्छन्नो नाम। राजा—किं तत्र। कंचु०—'तस्याग्रभागाद् गृहनीलकण्ठैरनेकविश्रामविलङ्घ्यशृङ्गात्। सखा प्रकाशेतरमूर्तिना ते केनापि सत्त्वेन निगृह्य नीतः॥' राजा०० ममापि००.।

(प्रविश्य)

प्रती०—(ससंभ्रमम्) परित्ताअदु देवो संसअगदं वअस्सं। (परित्रायतां देवः संशयगतं वयस्यम्।)

राजा—केनात्तगन्धो माणवकः?।

प्रती०—अदिट्ठरूवेण केण वि सत्तेण अदिक्कमिअ मेहप्पडिच्छंदस्स प्पासादस्स अग्गभूमिं आरोविदो। (अदृष्टरूपेण केनापि सत्त्वेनातिक्रम्य मेघप्रतिच्छन्दस्य प्रासादस्याग्रभूमिमारोपितः।)

राजा—(उत्थाय) मा तावत्। ममापि सत्त्वैरभिभूयन्ते गृहाः। अथवा,—

अहन्यहन्यात्मन एव ताव-
ज्ज्ञातुं प्रमादस्खलितं न शक्यम्।
प्रजासु कः केन पथा प्रयाती-
[1]त्यशेषतः को नु विदाङ्करोतु ॥२६॥

(नेपथ्ये)

भो वअस्स! अविहा अविहा। (भो वयस्य! अविहा अविहा।)

राजा—(गतिभेदेन परिक्रामन्) सखे! न भेतव्यं न भेतव्यम्।

(नेपथ्ये)

(पुनस्तदेव पठित्वा) कहं ण भाइस्सं?। एस मं को वि [2]पच्चवणदसिरोहरं यिच्छुं विअ तिण्णभंगं करेदि। (कथं न भेष्यामि?। एष मां कोऽपि प्रत्यवनतशिरोधरम् इक्षुमिव त्रिभङ्गं करोति।)

राजा—(सदृष्टिक्षेपम्) धनुस्तावत्।

यव०—भट्टा! एदं [3]हत्थावावसहिदं सरासणं। (भर्तः! एतद् [4]हस्तावापसहितं शरासनम्।)

(राजा सशरं धनुरादत्ते)

---

१. ०त्यशेषतः कस्य पुनः प्रभुत्वम्. पि. वेदितुमस्ति शक्तिः. नि.सा.च.खि.मा.
२. पच्छामोडिअ सिरोधरं इक्खुं विअ भग्गगंठि इच्छदि।.
३. ससरं सरासणं हत्थावाओ अ. ४. द्र. वि. ५१३-४ हस्तावापः

(नेपथ्ये)

एष त्वामभिनवकण्ठशोणितार्थी
शार्दूलः पशुमिव हन्मि चेष्टमानम् ।
आर्तानां भयमपनेतुमात्तधन्वा
दुष्यन्तस्तव शरणं भवत्विदानीम् ।।२७।।

राजा—(सरोषम्) कथं मामेवोद्दिशति ?। तिष्ठ कुणपाशन ! त्वमिदानीं न भवसि। (शार्ङ्गमारोप्य) [1]वेत्रवति ! सोपान-मार्गमादेशय।

प्रती०—इदो इदो देवो। (इत इतो देवः।)

(सर्वे सत्वरमुपसर्पन्ति)

राजा—(समन्ताद् विलोक्य) शून्यं खल्विदम्।

(नेपथ्ये)

[2]अविहा अविहा। अहं अत्तभवंतं पेक्खामि। तुमं मं ण पेक्खसि ?। [3]विडालग्गहीदो मूसओ विअ णिरासो म्हि जीविदे संवुत्तो। (अविहा अविहा। अहमत्रभवन्तं पश्यामि। त्वं मां न पश्यसि ?। बिडालगृहीतो मूषक इव निराशोऽस्मि जीविते संवृत्तः।)

राजा—भोस्तिरस्करिणीगर्वित ! मदीयं शस्त्रं त्वां [4]द्रक्ष्यति। एष तमिषुं संदधे,—

यो हनिष्यति वध्यं त्वां रक्ष्यं [5]रक्षिष्यति द्विजम्।
हंसो हि क्षीरमादत्ते तन्मिश्रा वर्जयत्यपः ।।२८।।

(अस्त्रं संधत्ते)

(ततः प्रविशति विदूषकमुत्सृज्य मातलिः)

मात०—राजन् !

---

१. पार्वतायन०० २. परित्ताहि, परित्ताहि.
३. मज्जारगहिदो विअ उंदुरो णिरासो. ४. न पश्यति.
५. रक्षति च नि.

कृताः शरव्यं हरिणा तवासुराः
शरासनं तेषु विकृष्यतामिदम् ।
प्रसादसौम्यानि सतां सुहृज्जने
पतन्ति चक्षूंषि न दारुणाः शराः ॥२९॥

राजा—(ससंभ्रममस्त्रमुपसंहरन्) अये, मातलिः । स्वागतं महेन्द्रसारथे[1] ! ।

(प्रविश्य)

विदू०—[2]अहं जेण इट्ठिपसुमारं मारिदो सो इमिणा साअदेण अहिणंदीअदि । (अहं येन इष्टिपशुमारं मारितः सोऽनेन स्वागतेनाभिनन्द्यते ।)

मात०—(सस्मितम्) आयुष्मन् ! श्रूयतां यदर्थमस्मि हरिणा भवत्सकाशं प्रेषितः ।

राजा—अवहितोऽस्मि ।

मात०—अस्ति । कालनेमिप्रसूतिर्दुर्जयो नाम दानवगणः ।

राजा—अस्ति । श्रुतपूर्वं मया नारदात् ।

मातलिः—

सख्युस्ते स किल शतक्रतोरवध्यः[3]
तस्य त्वं रणशिरसि स्मृतो निहन्ता ।
उच्छेत्तुं प्रभवति यन्न सप्तसप्तिः
तन् नैशं तिमिरमपाकरोति चन्द्रः ॥३०॥

स भवानात्तशस्त्र एव इदानीम् । [4]तत् ऐन्द्ररथमारुह्य विजयाय प्रतिष्ठताम् ।

राजा—[5]अनुगृहीतोऽहमनया मघवतः संभावनया । अथ माधव्यं प्रति भवता किमेवं प्रयुक्तम् ? ।

---

१. देवराजसारथे
२. भो मणं म्हि इमिणा अहं पसुमारणेण मारिदुं ण पारिदो । भवं उण इमं साअदेण अहिणंददि ।
३. ०रजय्यः.
४. देवरथमारुह्य.
५. गृहीतोऽस्म्यनया

माल०—तदपि कथ्यते । किंचिन्निमित्तादपि मनःसंतापाद् आयुष्मान् मया विक्लवो दृष्टः। पश्चात् कोपयितुमायुष्मन्तं तथा कृतवान् । कुतः—

ज्वलति चलितेन्धनोऽग्निर् विप्रकृतः पन्नगः फणां कुरुते ।
प्रायः स्वं महिमानं क्षोभात् प्रतिपद्यते हि जनः[1] ॥३१॥

राजा—(जनान्तिकम्) वयस्य ! अनतिक्रमणीया दिवस्पतेराज्ञा । तदत्र परिगतार्थं कृत्वा मद्वचनादमात्यपिशुनं ब्रूहि,—

त्वन्मतिः केवला तावत् परिपालयतु प्रजाः ।
अधिज्यमिदमन्यस्मिन् कर्मणि व्यापृतं धनुः ॥३२॥

विदू०—जं भवं आणवेदि । (यद् भवानाज्ञापयति ।)

माल०—रथमारोहतु आयुष्मान् !

(राजा रथाधिरोहणं नाटयति)

(निष्क्रान्ताः सर्वे)

॥ [2]इति षष्ठोऽङ्कः ॥



१. तेजस्वी संक्षोभात् प्रायः प्रतिपद्यते तेजः. २. शकुन्तलाविरहो नाम०० ।

सप्तमोऽङ्कः

(ततः प्रविशत्याकाशयानेन रथाधिरूढो राजा मातलिश्च)

---

१० ॥अथ सप्तमोऽङ्कः॥
(ततः प्रविशति नाकलासिका)

नाक० आणत्तं हि गुरुणा णादएण जहा एदेसु य्येव दिअसेसु मच्चलोआदो उत्तिण्णेण राएसिणा दुस्सन्तेण भअवदो पुरंदरस्स पिअआरिणा दाणववहणिमित्तं गन्तव्वं। जाव अब्भच्चिअ इमं ह्यापुच्छिअमाणं णिक्खिवदि ताव एव्व मए विबुहवच्चक्खं मङ्गलणिमित्तं किंपि पेक्खणअं दरसइदव्वं। ता तुमं कंपि लासिअं अण्णेसिअ संगीदसालासु आअच्छ त्ति। ता जाव लासिअं अण्णेसामि। (परिक्रम्यावलोक्य च) का उण एसा गहीदवरणेवच्छा हरिसिदुक्कण्ठिदाविअ इदो एव्वाअच्छदि। (निपुणमवलोक्य) कहं पिअसही चूदमञ्जरी। ता जाव एताए सह उवज्झाअसमीवं गच्छामि। (प्रतिपालयति) (ततः प्रविशति यथानिर्दिष्टा लासिका) चूतमञ्जरी—(सविस्मयं सहर्षं च) अहो महप्पभाओ राएसी दुस्सन्तो (सासूयम्) अहो महाबलो सो हदो दुज्जओ दाणवबलो (नृत्यति) नाक०—(उपसृत्य) सहि चूदमञ्जरिए ! उक्कण्ठिदा विअ लक्खीअसि। चूत०—(विलोक्य) कहं परिजाअमञ्जरि। सहि ! सव्वं कधयिस्सं। तुमं दाव कहिं पत्थिदेति पुच्छिस्सं। पारि०—सहि ! संखेवेण कधयिस्सं। अहं खु राएसिणो दुस्सन्तस्स दाणवविजअ—ववदेसेण अज्ज मङ्गलणिमित्तं किं पि पेक्खणअं दंसीअदुत्ति उवज्झाअस्स अण्णाए उभे य्येव समासं...। चूत०—(सोत्कण्ठम्) आसी अवसरो एदस्स। दाणिं पुणो मच्चलोअं पत्थिदे एदस्सि महाराए कस्स दंसीअदि। पारि०—(साशङ्कम्) सहि ! किं महेन्दस्स मणोरहाणि संपादिअ गदो उण अण्णधा। चूत०—सहि सुणु 'अज्ज य्येव गोसग्गसमए णवरं दुज्जअदाणवजीविदसव्वस्ससेसं गिहितुण जावअ तिदसविलासिणीं-सरस-हिअआइं अवणि अहिप्पट्ठिदो। अदोअ मे हरिसोक्कण्ठाणं कारणं। पारि०—सहि ! तए पिअं णिवेदिदं। जं एव्व उवज्झाएण पुरुवंसराएसिणो पुरदो कज्जं क्षादुं अण्णात्तं तं जेव्व गीदं कादुण एत्थ एव्व करेम्ह। चूत०—जं दे रोअसि। पारि०—ता जं य्येव गीदं मए लविदं तए वा सह णच्चेम्म। चूत०—सहि ! एव्वं करेम्ह

(उभे गायतः) रविसमअ-गमणं कंचण अण्णं अ सदाअमालि महुसमओ।
अण्णं कुणइ विसण्णं पाडीइमाणि भूमीए ॥१॥

(इत्युभे नर्त्तित्वा निष्क्रान्ते) ॥प्रवेशकः॥ (ततः प्रविशति००"—सा०

राजा—मातले ! अनुष्ठितनिदेशोऽपि मघवतः सत्क्रियाविशेषादनुपयुक्तमिवात्मानं समर्थये ।

मात०—(सस्मितम्) आयुष्मन् ! [1]उभयत्राप्यपरितोषं समर्थये ।

[2]प्रथमोपकृतं मरुत्वतः
[3]प्रतिपत्त्या लघु मन्यते भवान् ।
गणयत्यवदान[4]विस्मितो
भवतः सोऽपि न सत्क्रियागुणान् ॥१॥

राजा—मातले ! मा मैवम्; स खलु मनोरथानामप्य[5]भूमिर्विसर्जनावसरसत्कारः । मम हि दिवौकसां समक्षमर्धासनोप[6]वेशितस्य

अन्तर्गतप्रार्थनमन्तिकस्थं
जयन्तमुद्वीक्ष्य कृतस्मितेन ।
[7]आमृष्टवक्षोहरिचन्दनाङ्का
मन्दारमाला हरिणा पिनद्धा[8] ॥२॥

मात०—किमिव नामायुष्मान[9]मरेश्वरान्नार्हति ? । पश्य,—

सुखपरस्य हरेरुभयैः कृतं
त्रिदिवमुद्धृतदानवकण्टकम् ।
तव शरैरधुना नतपर्वभिः
पुरुषकेसरिणश्च पुरा नखैः ॥३॥

---

१. उभयत्राप्यसंतोषमवगच्छ । कुतः—उपकृत्य हरेस्तथा भवाँल्लघु सत्कारमवेक्ष्य मन्यते । २. प्रथमशब्दार्थाय द्र. ४०९—पृ० पादटि.
३. प्रतिपत्तिः सत्कारातिशयः, गौरवमिति रा.
४. ०संमितां भवतः सोऽपि न सत्क्रियामिमाम्.
५. ०मप्यतिदूरवर्ती विसर्जनावसरे सत्कारः.
६. ०नोपविष्टस्य र. ६।७३, १७।७. ७. प्रमृज्य वक्षो.
८. सैषा शेषा कु० ३।२२, र. १७।७९, अत्रैव ३।१०-११ संवादः.
९. सुरेशादायुष्मान्नार्हति.

राजा—अत्र खलु शतक्रतोरेव [1]महिमा । पश्य—

सिध्यन्ति कर्मसु महत्स्वपि यन्नियोज्याः
संभावनागुणमवेहि तमीश्वराणाम् ।
किं [2]वाऽभविष्यदरुणस्तमसां विभेत्ता
तं चेत् सहस्रकिरणो धुरि नाकरिष्यत् ॥४॥

मालं०—[3]सदृशमेवैतत् । (स्तोकमन्तरमतीत्य) आयुष्मन् ! इतः पश्य नाकपृष्ठप्रतिष्ठितस्य सौभाग्य[4]मात्मयशसः ।

विच्छित्तिशेषैः सुरसुन्दरीणां वर्णैरमी [5]कल्पलतांशुकेषु ।
विचिन्त्य गीतक्षममर्थबन्धं दिवौकसस्त्वच्चरितं लिखन्ति ॥५॥

राजा—मातले ! असुरसंप्रहारोत्सुकेन पूर्वेद्युर्दिव[6]मधिरोहता मया न लक्षितः स्वर्गमार्गः । तत् कतरस्मिन् मरुतां पथि वर्तामहे ? ।

मातलिः—

त्रिस्रोतसं वहति यो गगनप्रतिष्ठां
ज्योतींषि[7] वर्तयति च प्रविभक्तरश्मिः ।
[8]तस्य द्वितीयहरिविक्रमनिस्तमस्कं
वायोरिमं परिवहस्य वदन्ति मार्गम्[9] ॥६॥

राजा०—मातले ! अतः खलु सबाह्य[10]करणो ममान्तरात्मा प्रसीदति (रथाङ्गमवलोक्य)मेघपदवी[11]मवतीर्णौ स्वः ।

मात०—[12]कथमवगम्यते ? ।

---

१. महिमा स्तुत्यः नि. २. किं प्राभविष्यदरुणस्तमसां वधाय.
३. सदृशं तवैतत्. ४. लिपिसौन्दर्यम् इति, यशसो यशोलेखस्येति च भावः ।
५. कल्पलतान्तरेषु । संचिन्त्यं गीतिक्षम, ०अर्थजातम् नि.
६. ०रधिरोहता न लक्षितोऽयं प्रदेशो मया । तत्कतमस्मिन्पथि वर्तामहे मरुताम्.
७. चक्रविभक्तरश्मिः.
८. तस्य व्यपेतरजसः प्रवहस्य वायोर्मार्गो द्वितीयहरिविक्रमपूत एष.
९. र. १३।१९ लो. (१०९ पृ. चौ. सं.) १०. ०करणान्तरात्मः।.
११. ०मवतीर्णाः स्मः. १२. आयुष्मन्, कथ०.

राजा—

अयमर[1]-विवरेभ्यश्चातकैर्निष्पतद्भिर्,
हरिभिरचिरभासां तेजसा चानुलिप्तैः ।
गतमुपरि घनानां वारिगर्भोदराणां
पिशुनयति रथस्ते [2]सीकरक्लिन्ननेमिः ॥७॥

मात०—[3]क्षणादायुष्मान् स्वाधिकारभूमौ वर्तिष्यते ।

राजा—(अधोऽवलोक्य) वेगावतरणादाश्चर्यदर्शनः [4]संलक्ष्यते मनुष्य-लोकः । तथा हि,—

शैलानामवरोहतीव शिखरादुन्मज्जतां मेदिनी
[5]पर्णाभ्यन्तरलीनतां विजहति स्कन्धोदयात् पादपाः ।
संधानं तनुभागनष्टसलिलव्यक्त्या व्रजन्त्यापगाः[6]
केनाप्युत्क्षिपतेव पश्य भुवनं मत्पार्श्वमानीयते ॥८॥

मात०—साधु दृष्टम् (सबहुमानमवलोक्य) अहो ! [7]उदाररमणीया पृथिवी ।

राजा—मातले ! कतमोऽयं पूर्वापरसमुद्रावगाढः[8] कनक[9]रसनिष्यन्दः सांध्य इव [10]मेघः सानुमानालोक्यते ? ।

मात०—आयुष्मन् ! एष खलु हेमकूटो [11]नाम किंपुरुषपर्वतः तपः-संसिद्धिक्षेत्रम् । पश्य,—

स्वायंभुवान् मरीचेर्यः प्रवभूव प्रजापतिः ।
सुरासुरगुरुः सोऽत्र सपत्नीकस्तपस्यति ॥९॥

राजा—तेन ह्यनतिक्रमणीयानि श्रेयांसि । प्रदक्षिणीकृत्य भगवन्तं गन्तुमिच्छामि ।

मात०—[12]प्रथमः कल्पः ।[13]

---

१. अयमगविवरेभ्य०. २. शीकर०.
३. अथ किम् । अन्यच्च क्षणादूर्ध्वमायुष्मानात्माधिकार०. ४. संपद्यते.
५. पर्णस्वन्तरलीनतां नि. ६. संतानैस्तनुभावनष्टसलिला व्यक्ति वजन्त्यापगाः नि.
७. उदग्ररमणीया पृथ्वी. ८. कु. १।१ ९. ०रसनिष्यन्दी
१०. मेघपरिघः सानुमानवलोक्यते । ११. परं तपस्विनां सिद्धिक्षेत्रम्.
१२. आयुष्मन्, प्रथमः. द्र. ४०९ पृ. पा. टि. –४.
१३. (रथावतरणं नाटयित्वा) एताववतीर्णौ स्वः । राजा—मातले, उपोढ०.

(नाट्येनावतीर्णौ)

राजा—(सविस्मयम्)

उपोढशब्दा न रथाङ्गनेमयः
प्रवर्तमानं न च दृश्यते रजः।
अभूतलस्पर्शतया निरुद्धतिस्[1]
तवावतीर्णोऽपि रथो न लक्ष्यते ।।१०।।

मात०—[2]एतावानेव शतक्रतोरायुष्मतश्च विशेषः।

राजा—मातले ! कतमस्मिन् प्रदेशे मारीचाश्रमः।

मात०—(हस्तेन दर्शयन्)[3]

वल्मीकाग्रनिमग्नमूर्तिरुरसा[4] संदष्टसर्पत्वचा
कण्ठे जीर्णलताप्रतानवलयेना[5]त्यर्थसंपीडितः।
अंसव्यापि शकुन्तनीडनिचितं बिभ्रज्जटामण्डलं
यत्र स्थाणुरिवाचलो मुनिरसावभ्यर्कबिम्बं स्थितः ।।११।।

राजा—[6]नमोऽस्मै कष्टतपसे।

मात०—(संयतप्रग्रहं रथं कृत्वा) महाराज ! एतौ अदितिपरिवर्धितमन्दारवृक्षं प्रजापतेराश्रमं प्रविष्टौ स्वः।

राजा—[7]स्वर्गादधिकतरं निर्वृतिस्थानम्। अमृतह्रदमिवावगाढोऽस्मि।

मात०—(रथं स्थापयित्वा) अवतरत्वायुष्मान्।

राजा—(अवतीर्य) मातले ! भवान् कथमिदानीम् ?।

मात०—[8]संयन्त्रितो मया रथः वयमप्यवतरामः। (तथा कृत्वा) [9]इत आयुष्मन् ! (परिक्रम्य) दृश्यन्तामत्रभवतामृषीणां तपोवनभूमयः।

---

१. निरुन्धतः मा. खि. अनिरुन्धतः च. विरुद्धतिः सा. पि.
२. एतावानेवायुष्मतः शतक्रतोश्च रथस्य विशेषः र. २।५०
३. पश्य—वल्मीकार्धनिमग्न०
४. ०रुरगत्वग्ब्रह्मसूत्रान्तरः
५. ०नात्यन्तसंपीडितः
६. नमस्ये कष्ट नि.
७. अहो, स्वर्गा०.
८. समययन्त्रित एवायमास्ते रथः.
९. इतो दृश्यन्तां सिद्धमुनीनां तपो०.

३५

राजा—ननु [1]विस्मयादवलोकयामि ।

प्राणानामनिलेन वृत्तिरुचिता सत्कल्पवृक्षे वने
तोये काञ्चनपद्मरेणुकपिशे [2]पुण्याभिषेकक्रिया ।
ध्यानं रत्नशिलागृहेषु[3] विबुधस्त्रीसंनिधौ संयमो
[4]यत् काङ्क्षन्ति तपोभिरन्यमुनयस्तस्मिंस्तपस्यन्त्यमी ॥१२॥

मात०—[5]उत्सर्पिणी खलु महतां प्रार्थना । (परिक्रम्य आकाशे) अये वृद्धशाकल्य ! किमनुतिष्ठति भगवान् मारीचः ? । (आकर्ण्य) किं ब्रवीषि ? । दाक्षायण्या पतिव्रताधर्ममधिकृत्य पृष्टस्तस्यै महर्षिपत्नीसहितायै कथयतीति ।

राजा—(कर्णं दत्त्वा) अये ! प्रतिपाल्यावसरः खलु प्रस्तावः[6] ।

मात०—(राजानमवलोक्य) अस्मिन्नशोकवृक्षमूले तावदास्तामायुष्मान्, यावत् त्वामिन्द्रगुरवे निवेदयितुमन्तरान्वेषी भवामि[7] ।

राजा—यथा भवान् मन्यते । (स्थितः)

मात०—आयुष्मन् ! साधयाम्यहम् । (निष्क्रान्तः)

राजा—(निमित्तं सूचयित्वा)

मनोरथाय नाशंसे किं बाहो ! स्पन्दसे [8]मुधा ? ।
पूर्वावधीरितं श्रेयो दुःखं हि परिवर्तते[9] ॥१३॥

(नेपथ्ये)

मा खु चावलं करेहि । [10]कहं गदो जेव अत्तणो पकिदिं ? ।
(मा खलु चापलं कुरु । कथं गत एवात्मनः प्रकृतिम् ? ।)

---

१. विस्मयादुभयमध्य०.
२. धर्माभिषेक०० तोये हैमसहस्रपत्रसुभगे नक्तं दिवं सद् व्रतम्—सा.
३. ०तलेषु त्रि०. ४. यद्वाञ्छन्ति.
५. उत्कर्षिणी—सा., उत्सर्पिणी उपर्युपरि धावन्ती रा. ऊर्ध्वगमनशीला अनेन तेषां मोक्षार्थित्वं गम्यते. का. मा. ६. प्रतिपाल्यावसराः खलु मुनयः मा.का.
७. ०महमिन्द्रगुरवे निवेदयामि । राजा—यथा. ८. वृथा.
९. परिवर्धते. च. खि. १०. जहिं जहिं जेव अत्तणो पइदिं दंसेसि ।

राजा—(कर्णं दत्त्वा) अभूमिरियमविनयस्य । को नु खल्वेष निषिध्यते । (शब्दानुसारेणावलोक्य, सविस्मयम्) अये, ! को नु खल्वयमनुवध्यमानस्तपस्विनीभ्यामबालसत्त्वो बालः ? ।

अर्धपीतस्तनं मातुरामर्दक्लिष्टकेसरम् ।
प्रक्रीडितुं सिंहशिशुं बलात्कारेण कर्षति[1] ॥१४॥

(ततः प्रविशति यथानिर्दिष्टकर्मा तपस्विनीभ्यां सह बालः)

बालः—[2]यिंभ ले शिंहशावका यिंभ । दंताई दे गणइश्शं । (जृम्भस्व, रे सिंहशावक ! जृम्भस्व, दन्तांस्ते गणयिष्ये ।)

प्रथ॰—अविणीद ! किं णो अपच्चणिव्विसेसाणि सत्ताणि विप्पअरेसि ? । हंत, वड्ढइ दे संरंभो[3] । ठाणे खु इसिजणेण सव्वदमणो त्ति किदणामहेओ सि । (अविनीत ! किं नः अपत्यनिर्विशेषाणि सत्त्वानि विप्रकरोषि ? । हन्त, वर्धते तव संरम्भः । स्थाने खलु ऋषिजनेन सर्वदमन इति कृतनामधेयोऽसि ।)

राजा—किं नु खलु बालेऽस्मिन्नौरस इव पुत्रे स्निह्यति मे हृदयम् । नूनमनपत्यता मां वत्सलयति ।

द्विती॰—एसा खु केसरिणी तुमं लंघेदि जइ से पुत्तअं ण मुंचेसि । (एषा खलु केसरिणी त्वां लङ्घयिष्यति यदि तस्याः पुत्रकं न मुञ्चसि ।)

बालः—(सस्मितम्) अम्मो बलिअं ख भीदे स्मि[4] । (अहो, बलीयः खलु भीतोऽस्मि ।) (अधरं दर्शयति)

राजा—(सविस्मयम्)

महतस्तेजसो बीजं बालोऽयं प्रतिभाति मे ।
स्फुलिङ्गावस्थया वह्निरेधापेक्ष[5] इव स्थितः ॥१५॥

प्रथ॰—वच्छ ! एदं बालमिइंदअं मुंच । अवरं दे कीलणअं दाइस्सं । (वत्स ! एनं बालमृगेन्द्रं मुञ्च । अपरं ते क्रीडनकं दास्यामि ।)

बालः—कहिं शे, देहि णं । (कुत्र तत् ? देहि ननु ।) (हस्तं प्रसारयति)

---

१. विलम्बिनं सिंहशिशुं करेणाहृत्य कर्षति पि. प्रक्रीडितुम् = आक्रीडितुं–सा.
२. जिंभ सिघ दंताइं दे गणइस्सं ३. संपहरदि विअ दे संरंभो ।
४. भीदो म्हि ५. वह्निरेधःक्षय एधशब्दाय द्र. र. ९।८१, १३।४१

राजा—(बालस्य हस्तमवलोक्य) कथं चक्रवर्तिलक्षण[1]मप्यनेन धार्यते ? तथा ह्यस्य,—

प्रलोभ्यवस्तुप्रणयप्रसारितो
विभाति जालग्रथिताङ्गुलिः करः ।
अलक्ष्यपत्रान्तरमिद्धरागया
नवोषसा भिन्नमिवैकपङ्कजम् ।।१६।।

द्विती०—सुव्वदे ! ण सक्को एसो वाआमेत्तेण [2]विरमइदुं । गच्छ तुमं । मम केरए उडए मक्कंडेअस्स इसिकुमारअस्स वण्णचित्तिदो मित्तिआमोरओ चिट्ठदि । तं से उवहर । (सुव्रते ! न शक्य एषो वाचामात्रेण विरमयितुम् । गच्छ त्वम् । मदीये उटजे मार्कण्डेयस्य ऋषिकुमारस्य वर्णचित्रितो मृत्तिकामयूरस्तिष्ठति । तमस्योपहर ।)

प्रथ०—तह । (तथा ।) (निष्क्राता)

बालः—इमिणा येव याव कीलिश्शं (अनेनैव तावत् क्रीडिष्यामि ।) (तापसीं विलोक्य हसति)

राजा—स्पृहयामि खलु दुर्ललितायास्मै—

आलक्ष्यदन्तमुकुलाननिमित्तहासै-
रव्यक्तवर्णरमणीयवचःप्रवृत्तीन् ।
अङ्काश्रयप्रणयिनस्तनयान् वहन्तो
धन्यास्तदङ्गरजसा [3]मलिनीभवन्ति ।।१७।।

ताप०—होदु; [4]ण मं अअं गणेदि । (पार्श्वमवलोकयति) को एत्थ इसिकुमाराणं[5] ? । (राजानमवलोक्य) भद्दमुह ! एहि दाव । मोए[6]हि इमिणा दुम्मोअहत्थग्गहेण डिंभलीलाए वाहीअमाणं [7]वालमिइंदअं । (भवतु; न मामयं गणयति (पार्श्वमवलोकयति) । कोऽत्र ऋषिकुमाराणाम् ? (राजानमवलोक्य) भद्रमुख ! एहि तावत् । मोचयानेन दुर्मोकहस्तग्रहेण डिम्भलीलया बाध्यमानं बालमृगेन्द्रम् ।)

---

१. समइदुं. २. एव्व दाव कीलिस्सं नि.

३. तापसी-(विलोक्य हसन्ती) मुंच णं । राजा—(निःश्वस्य)००० रजसा परुषीभवन्ति ।

राजा—(उपगम्य सस्मितम्) अयि भो महर्षिपुत्र !

एवमाश्रमविरुद्धवृत्तिना
[1]संयमः किमिति जन्मतस्त्वया ।
सत्त्वसंश्रयसुखोऽपि दूष्यते
कृष्णसर्पशिशुनेव चन्दनः[2] ॥१८॥

ताप०—भद्दमुह ! ण खु अअं इसिकुमारओ । (भद्रमुख ! न खल्वयं ऋषिकुमारः) ।

राजा—आकारसदृशं चेष्टितमेवास्य कथयति । स्थानप्रत्ययात् तु [3]वयमेवंतर्किणः । (यथाभ्यर्थितमनुतिष्ठन् बालस्पर्शमुपलभ्य, आत्मगतम्)

अनेन कस्यापि कुलाङ्कुरेण
स्पृष्टस्य[4] गात्रेषु सुखं ममैवम् ।
कां निर्वृतिं चेतसि तस्य कुर्याद्
यस्यायमङ्कात् कृतिनः प्ररूढः[5] ॥१९॥

ताप०—(उभौ निर्वर्ण्य) अच्छरिअं अच्छरिअं । (आश्चर्यमाश्चर्यम् ।)

राजा—आर्ये ! किमिव ? ।

ताप०—इमस्स [6]बालअस्स दे वि अ संवादिणी आकिदी त्ति विम्हा-[7]विदम्हि । अपरिइदस्स वि दे अप्पडिलोमो संवुत्तो त्ति अ । (अस्य बालकस्य, तेऽपि च संवादिन्याकृतिरिति विस्मापितास्मि । अपरिचितस्यापि ते अप्रतिलोमः संवृत्त इति च ।)

राजा—(बालकमुपलालयन्) न चेन्मुनिकुमारोऽयम्, अथ कोऽस्य व्यपदेशः ? ।

ताप०—पुरुवंसो[8] । (पुरुवंशः ।)

---

१. 'संयमी किमिति जन्मदः', तदिदं दृष्टान्तविरुद्धम्, चन्दने सर्पजन्मदत्वानन्वयात् । जन्मनः मा. का.
२. चन्दनम्—नि., 'चन्दनोऽस्त्रियाम्'—अमरः ।
३. वयमतर्किणः । प्रत्ययः कारणम्, द्र. र. १०।३, कु. ३।१८. विश्वास इति रा.
४. स्पृष्टेषु. ५. प्रसूतः र. ३।२६.
६. असंबद्धे वि भद्दमुहे संवादिणी.
७. विम्हिद म्हि । अवि अ वामसीलो वि भविअ, अवरिचिदस्स ण दे पडिलोमो संवुत्तो. ८. पोरवोत्ति.

राजा—(आत्मगतम्) कथमेकान्वयो[1] मम । अतः खलु मदनुकारिणमेनमत्रभवती मन्यते । अस्त्येतत् पौरवाणामन्त्यं कुलव्रतम् ।

भवनेषु [2]रसाधिकेषु पूर्वं
क्षितिरक्षार्थमुशन्ति[3] ये निवासम् ।
नियतैकपतिव्रतानि[4] पश्चात्
तरुमूलानि गृहीभवन्ति तेषाम् ॥२०॥

(प्रकाशम्) न पुनरात्मगत्या मानुषाणामेष विषयः ।

ताप०—जह भद्दमुहो भणादि । अच्छरासंबंधेण [5]इमस्स जणणी एत्थ देवगुरुणो तवोवणे प्पसूदा । (यथा भद्रमुखो भणति । अप्सरःसंबन्धेनास्य जननी अत्र देवगुरोस्तपोवने प्रसूता ।)

राजा—(अपवार्य) हन्त, द्वितीयमिदमाशाजननम्[6] । (प्रकाशम्) अथ सा तत्रभवती किमाख्यस्य राजर्षेः पत्नी ? ।

ताप०—को तस्स धम्मदारपरिच्चाइणो [7]णाम संकोतिदुं चिंतिस्सदि ? (कस्तस्य धर्मदारपरित्यागिनो नाम संकीर्तयितुं चिन्तयिष्यति ? ।)

राजा—(आत्मगतम्) कथम्, [8]इयं खलु कथा मामेव लक्ष्यीकरोति । यदि तावदस्य शिशोर्मातरं नामतः पृच्छामि[9] । अथवा अनार्यः परदारपृच्छाव्यवहारः ।

(प्रविश्य मृण्मयूरहस्ता)

ताप०—सव्वदमण ! सउंदलावण्णं पेक्ख । (सर्वदमन ! शकुन्तलावण्यं पश्य)

बालः—(सदृष्टिक्षेपम्) कहिं शा मे अय्युए ? । (कुत्र सा मम माता ?)

उभे—णामसारिस्सेण वंचिदो माउवच्छलो । (नामसादृश्येन वञ्चितो मातृवत्सलः ।)

---

१. ०न्वयोऽयमस्माकम् । अतः खलु संभाव्यते । (प्रकाशम्) अस्त्येतत्.
२. सुधासितेषु पि. सा, ३. वश कान्तौ, कान्तिरिच्छा.
४. विहितैकयतिव्रतानि द्र. र. ३।७०, ७।७१. ५. इमस्स बालअस्स
६. वि. ३।९, ०माश्वासजननम् ७. णामं कित्तइस्सदि.
८. कथमियं कथा मामेव लक्षीकरोति. ९. शिशोर्नामतो मातरं पृच्छेयम.

द्विती०—वच्छ ! इमस्स [1]मित्तिआमोरअस्स रम्मत्तणं पेक्ख त्ति भणिदो सि। (वत्स ! अस्य मृत्तिकामयूरस्य रम्यत्वं पश्येति भणितोऽसि।)

राजा—(आत्मगतम्) किं वा शकुन्तलेत्यस्य मातराख्या। सन्ति पुनर्नामधेयसादृश्यानि। अपि नाम मृगतृष्णिकेव नाममात्रप्रस्तावो मे विषादाय कल्पेत[2]।

बालः—अज्जुए ! लोअदि मे एशे चड्लके मऊलके[3]। (मातः ! रोचते म एष चटुलो मयूरः।) (क्रीडनकमादत्ते)

प्रथ०—(विलोक्य सोद्वेगम्) अम्हहे, रक्खाकरंडअं[4] से मणिबंधे ण दीसदि ? (अहो रक्षाकरण्डकमस्य मणिबन्धे न दृश्यते।)

राजा—अलमलमावेगेन। [5]नन्विदमस्य सिंहशावविमर्दात् परिभ्रष्टम्[6]। (आदातुमिच्छति)

उभे— मा खु [7]एदं अवलंबिअ। (विलोक्य) कहं गहीदं णेण ?। (मा खल्विदमवलम्ब्य। (विलोक्य) कथं गृहीतमनेन ?।)

(विस्मयादुरोनिहितहस्ते परस्परमवलोकयतः)

राजा—किमर्थं प्रतिषिद्धाः स्मः ?।

प्रथ०—सुणादु [8]महाभाओ। एसा अवराजिदा णाम [9]ओसही इमस्स जातकम्मसमए भअवदा मारीएण दिण्णा। एदं किल [10]मादापिदरो अप्पाणं च वज्जिअ अवरो भूमिपडिदं ण गेण्हादि। (शृणोतु महाराजः। एषा अपराजिता नाम औषधिः अस्य जातकर्मसमये भगवता मारीचेन दत्ता। एतां किल मातापितरौ, आत्मानं च वर्जयित्वा अपरो भूमिपतितां न गृह्णाति।)

राजा—अथ गृह्णाति ?।

---

१. मोरस्स रमणीअत्तणं पेक्ख.
२. नायमन्ते प्रस्तावो विषादाय कल्पेत.
३. रोअदि मे एसो भद्दमोरओ.
४. ०गंडओ.
५. नन्वयमस्य.
६. परिभ्रष्टः.
७. मा खु (विलोक्य) कधं गहीदं जेव.
८. महाभाओ नि.
९. सुरमहोसही
१०. मादपिदरे अत्ताणअं च

प्रथ०—तदो तं सप्पो भविअ दंसइ[१]। (ततस्तं सर्पो भूत्वा दशति)

राजा—[२]भवतीभ्यां कदाचिदस्याः प्रत्यक्षीकृता विक्रिया ?।

उभे—अणेअसो। (अनेकशः।)

राजा—(सहर्षम्, आत्मगतम्) [३]कथमिव संपूर्णमपि मे मनोरथं नाभिनन्दामि ? (बालं परिष्वजते)

द्वती०—सुव्वदे ! एहि, इमं वुत्तंतं णिअमव्वावुडाए सउंदलाए णिवेदेम्ह। (सुव्रते ! एहि, इमं वृत्तान्तं नियमव्यापृतायै शकुन्तलायै निवेदयावः।) (निष्क्रान्ते)

बालः— मुंच मं। जाव [४]अय्युएसआसं गमिश्शं। (मुञ्च माम्। यावन्मातुः सकाशं गमिष्यामि।)

राजा—पुत्रक ! मया सहैव मातरमभिनन्दिष्यसि।

बालः—ण क्खु तुमं, दुश्शन्ते मम तादे। (न खलु त्वम्, दुष्यन्तो मम तातः)

राजा—(सस्मितम्) [५]एष विवाद एव प्रत्याययति।

(ततः प्रविशत्येकवेणीधरा शकुन्तला)

शकु०—विआरकाले वि पकिदित्थं सव्वदमणस्स ओसहिं सुणिअ ण मे आसा[७] अत्तणो भाअहेएसु। अहवा जह [६]साणुमदीए आचक्खिदं तह संभावीअदि एदं। (विकारकालेऽपि प्रकृतिस्थां सर्वदमनस्यौषधिं श्रुत्वा न मे आशा आत्मनो भागधेयेषु। अथवा यथा सानुमत्या आख्यातं तथा संभाव्यत एतत्।) (परिक्रामति)

राजा—(शकुन्तलां विलोक्य) अये ! (सहर्षखेदम्) सेयम् अत्रभवती शकुन्तला, यैषा—

वसने[८] परिधूसरे वसाना
नियमक्षाममुखी धृतैकवेणिः।
अतिनिष्करुणस्य शुद्धशीला
मम दीर्घं विरहव्रतं विभर्ति[९] ॥२१॥

---

१. तदा सप्पो भविअ तं दंसदि २. अथात्रभवतीभ्यां कदाचिदन्यत्र प्रत्यक्षीकृतमिदम् ३. तत्किं खल्विदानीं पूर्णमात्मनो मनारथं
४. अय्युआशआशं ५. एष विवाद एव मां
६. मिस्सकेसीए मे ७. आसा आसी = आशा आसीत्—मा.मि. सा. च. खि.
८. वसने अन्तरोपसंवानीये—रा. ९. वहन्ती

शकु०—(पश्चात्तापविवर्णं राजानं दृष्ट्वा सवितर्कं) ण खु अज्जउत्तो विअ। तदो को एसो दाणिं किदरक्खामंगलं दारअं मे गत्तसंसग्गेण दूसेदि। (न खल्वार्यपुत्र इव। ततः क एष इदानीं कृतरक्षामङ्गलं दारकं मे गात्रसंसर्गेण दूषयति?)

बालः—(मातरमुपेत्य) अय्यए[1] एश के वि पलकेलए मं पुत्तके त्ति आलिंगदि। (मातः! एष कोऽपि पुरुषो मां पुत्र इत्यालिङ्गति।)

राजा—प्रिये! क्रौर्यमपि मे त्वयि प्रयुक्तम् अनुकूलपरिणामं संवृत्तम्। तदहमिदानीं त्वया प्रत्यभिज्ञातमात्मानम् इच्छामि।[2]

शकु०—(आत्मगतम्) हिअअ! अस्सस। परिचत्तमच्छरेण अणुअम्पिअ म्हि देव्वेण। अज्जउत्तो खु एसो। (हृदय! आश्वसिहि आश्वसिहि। परित्यक्तमत्सरेण अनुकम्पितास्मि दैवेन। आर्यपुत्रः खल्वेषः।)

राजा—प्रिये!

स्मृतिभिन्नमोहतमसो[3] दिष्ट्या प्रमुखे स्थितासि मे सुमुखि!।
उपरागान्ते शशिनः समुपगता रोहिणी योगम्॥२२॥

शकु०—जेदु अज्जउत्तो जे। (जयतु आर्यपुत्रो ज।)

(अर्धोक्ते बाष्पकण्ठी विरमति)

राजा—सुन्दरि!

वाष्पेण प्रतिषिद्धेऽपि जयशब्दे जितं मया।
यत् ते दृष्टसंस्कारपाटलोष्ठपुटं मुखम्॥२३॥

बालः—अय्युए! के एशे? (मातः क एषः?।)

शकु०—वच्छ! दे [4]भाअधेआइं पुच्छ। (वत्स! ते भागधेयानि पृच्छ।) (रोदिति)

---

१. अज्जुए! एसो को वि पुरिसो मं पुत्त त्ति आलिं० नि., आलिंगदि = आलवदि-पि.

२. इच्छामि पश्यामि नि. मा., अप्रत्यभिज्ञात०० पश्यामि. खि. च.

३. तमो राहुः रा., र ८।३७.

४. अज्जुए को एसो. नि. (इति रोदिति) राजा—सुतनु०.

राजा—(शकुन्तलायाः पादयोः प्रणिपत्य)

सुतनु ! हृदयात् प्रत्यादेशव्यलीकमपैतु ते
किमपि मनसः संमोहो मे तदा बलवानभूत् ।
प्रबलतमसामेवंप्रायाः [1]शुभेषु हि वृत्तयः
स्रजमपि शिरस्यन्धः क्षिप्तां धुनोत्यहिशङ्कया ।।२४।।

शकुं०—उट्ठेदु अज्जउत्तो । णूणं मे [2]सुअरिअप्पडिबंधअं पुराकिदं तेसु दिअहेसु परिणाममुहं आसि जेण साणुक्कोसो वि अज्जउत्तो [3]मइ तधा संवुत्तो । (उत्तिष्ठत्वार्यपुत्रः । नूनं मे सुचरितप्रतिबन्धकं पुराकृतं तेषु दिवसेषु परिणाममुखमासीत्, येन सानुक्रोशोऽप्यार्यपुत्रो मयि तथा संवृत्तः ।)

(राजोत्तिष्ठति)

शकु०—अह कहं अज्जउत्तेण सुमरिदो दुक्खभाई अअं जणो ? । (अथ कथमार्यपुत्रेण स्मृतो दुःखभागी अयं जनः ? ।)

राजा—उद्धृतविषादशल्यः कथयिष्यामि ।

मोहान्मया सुतनु ! पूर्वमुपेक्षितस्ते
यो बाष्पबिन्दुरधरं परिबाधमानः ।
तं तावदाकुटिलपक्ष्मविलग्नमद्य
कान्ते[4] प्रमृज्य विगतानुशयो [5]भवेयम् ।।२५।।

(यथोक्तमनुतिष्ठति)

शकु०—(नाममुद्रां दृष्ट्वा) अज्जउत्त ! एदं तं अंगुलीअअं । (आर्यपुत्र ! [6]इदं तत् अङ्गुलीयकम् ।)

राजा—[7]अस्मादङ्गुलीयकात् खलु स्मृतिरुपलब्धा ।

शकु०—विसमं किदं णेण जं तदा अज्जउत्तस्स [8]पच्चअकाले दुल्लहं आसि । (विषमं कृतमनेन यत् तदार्यपुत्रस्य प्रत्ययकाले दुर्लभमासीत् ।)

---

१. शुभेष्वपि वृत्तयः पि., शुभेषु हि वृत्तयः मा. सा. खि. च., शुभेषु प्रवृत्तयः—नि.
२. सुहप्पडिबंधअं. ३. विरसोसंवुत्तो.
४. बाष्पं नि.म.सा.च.खि. । पौनरुक्त्यमत्र दोषः । ५. भवामि.
६. तं इदं ७. अस्मादद्भुतोपलम्भादङ्गु०.
८. विसंवादिदं खु अणेण जं तधा पच्चअकारणं दुल्लहं मे.

राजा—तेन हि ऋतुसमवायचिह्नं प्रतिपद्यतां लता कुसुमम् ।

शकु०—ण से विस्ससामि । अज्जउत्तो एव्व णं धारेदु । (नास्य विश्वसिमि । आर्यपुत्र एवैतद् धारयतु ।)

(ततः प्रविशति मातलिः)

मात०—दिष्ट्या धर्मपत्नीसमागमेन पुत्रमुखदर्शनेन चायुष्मान् वर्धते ।

राजा—सुहृत्संपादित इति स्वादुतरफलो मे मनोरथः[१] । मातले ! न खलु विदितोऽयमाखण्डलेन[२] वृत्तान्तः ? ।

मात०—(सस्मितम्) किमीश्वराणां परोक्षम् । एत्वायुष्मान्; भगवान् मारीचस्ते [३]दर्शनं वितरति ।

राजा—अवलम्ब्यतां पुत्रः । त्वां पुरस्कृत्य भगवन्तं द्रष्टुमिच्छामि ।

शकु०—हिरिआमि अज्जउत्तेण सह गुरुसमोवं गंतुं । (जिह्रेम्यार्यपुत्रेण सह गुरुसमीपे गन्तुम् ।)

राजा—अयि आचरितव्यमेतदभ्युदयकालेषु[४] । [५]एह्येहि ।

(सर्वे परिक्रामन्ति)

(ततः प्रविशत्यदित्या सार्धमासनस्थो मारीचः)

मारी०—(राजानमवलोक्य) दाक्षायणि !

पुत्रस्य ते रणशिरस्ययमग्रयायी
दुष्यन्त इत्यभिहितो भुवनस्य भर्ता ।
चापेन यस्य विनिर्वर्तितकर्म जातं
तत् कोटिमत् कुलिशमाभरणं मघोनः ॥२६॥

अदि०—संभावणीआणुभावा[६] से आकिदो । (संभावनीयानुभावा अस्याकृतिः ।)

---

१. अभूत् संपादितस्वादुफलो मे मनोरथः नि. खि. च. मा., सुहृत्संपादितात् साधुतरफलो०—पा.
२. ०माखण्डलस्यार्थः स्यात् नि.खि.च.मा.
३. दर्शनमिच्छति.
४. आचरितमेतदभ्युदय० अप्या० नि.
५. तदेहि तावत्.
६. ०अप्पहावा खु से,

मात०—आयुष्मन् ! एतौ पुत्रप्रीतिपिशुनेन चक्षुषा दिवौकसां पितरावायुष्मन्तमवलोकयतः। तदुपसर्प।

राजा—[1]मातले !

प्राहुर्द्वादशधा स्थितस्य मुनयो यत् तेजसः कारणं
भर्तारं भुवनत्रयस्य सुषुवे यद् यज्ञभागेश्वरम्।
यस्मिन्नात्मभवः[2] परोऽपि पुरुषश्चक्रे भवायास्पदं
द्वन्द्वं दक्षमरीचिसंभवमिदं तत्स्रष्टुरेकान्तरम्[3] ॥२७॥

मात०—अथ किम् ?।

राजा०—(उपगम्य) उभाभ्यामपि [4]वासवनियोज्यो दुष्यन्तः प्रणमति।

मारी०—वत्स ! [5]चिरं जीव; पृथिवीं पालय।

अदि०—वच्छ ! अप्पडिरहो होहि। (वत्स ! अप्रतिरथो भव।)

शकु०—दारअसहिदा वो पादवंदणं करेमि।[6] (दारकसहिता वां पादवन्दनं करोमि।) (पुत्रसहिता प्रणिपतति)

मारी०—वत्से !

आखण्डलसमो भर्ता जयन्तप्रतिमः सुतः।
आशीरन्या न ते [7]योग्या [8]पौलोमीसदृशी भव ॥२८॥

अदि०—जादे ! भत्तुणो [9]अभिमदा होहि। [10]अवस्सं दीहाऊ वच्छओ उहअकुलणंदणो होदु। उवविसह। (जाते ! भर्तुरभिमता भव। अवश्यं दीर्घायुर्वत्सकः उभयकुलनन्दनो भवतु। उपविशत।)

(सर्वे प्रजापतिमभित उपविशन्ति)

मारी०—(एकैकं निर्दिशन्)

दिष्टया शकुन्तला साध्वी सदपत्यमिदं भवान्।
श्रद्धा वित्तं विधिश्चेति[11] त्रितयं तत् समागतम् ॥२९॥

---

१. मातले—एतौ. नि. २. यस्मिन्नात्मभुवः

३. दशभ्यस्तु प्रचेतोभ्यो मारिषायां प्रजापतिः।
जज्ञे दक्षो महाभागो यः पूर्वं ब्रह्मणोऽभवत् ॥ रा.

४. वासवानुयोज्यो दुःषन्तः. ५. चिरं पृथिवीं.

६. (शकुन्तला पुत्रसहिता पादयोः पतति). ७. योज्या.

८. पौलोमीमङ्गला भव. ९. बहुमवा होहि. १०. अयं च दीहाऊ उहअपक्खं अलंकरेदु। ता एध उववसिघ. ११. र. २।१६.

राजा—भगवन् ! प्रागभिप्रेतसिद्धिः, पश्चाद्दर्शनम् । अपूर्वः खलु वोऽनुग्रहः ।

उदेति पूर्वं कुसुमं ततः फलं
घनोदयः प्राक् तदनन्तरं पयः ।
निमित्तनैमित्तिकयोरयं क्रमः[१],
तव प्रसादस्य पुरस्तु सिद्धयः[२] ॥३०॥

मात०—एवं विधातारः प्रसीदन्ति ।

राजा—भगवन् ! इमामाज्ञाकरीं वो गान्धर्वेण विवाहविधिना उपयम्य कस्यचित् कालस्य बन्धुभिरानीतां स्मृतिशैथिल्यात् प्रत्यादिशन्नपराद्धोऽस्मि तत्रभवतो युष्मत्सगोत्रस्य कण्वस्य । पश्चादङ्गुलीयकदर्शनादूढपूर्वामिमां तद्दुहितरमवगतोऽहम् । तत्, चित्रमिव मे प्रतिभाति ।

यथा गजो [३]नेति समक्षरूपे
तस्मिन्नपक्रामति संशयः स्यात् ।
पदानि दृष्ट्वा[४] तु भवेत् प्रतीति-
स्तथाविधो मे मनसो विकारः ॥३१॥

मारी०—वत्स ! अलमात्मापराधशङ्कया । संमोहोऽपि त्वय्यनुपपन्नः । श्रूयताम् ।

राजा—अवहितोऽस्मि ।

मारी०—यदैवाप्सरस्तीर्थावतरणात् प्रत्याख्यान[५]-वैक्लव्यां शकुन्तलामादाय मेनका दाक्षायणीमुपगता तदैव ध्यानादवगतोऽस्मि दुर्वाससः शापादियं तपस्विनी सहधर्मचारिणी त्वया प्रत्यादिष्टा, नान्यथेति । स चायमङ्गुलीयकदर्शनावसानः ।

राजा—(सोच्छ्वासम्) एष वचनीयान्मुक्तोऽस्मि[६] ।

शकु०—(आत्मगतम्) दिट्ठिआ अकारणपच्चादेसी ण अज्जउत्तो । ण हु सत्तं अत्ताणं सुमरेमि । अहवा पत्तो मए स हि सावो विरहसुण्णहिअआए ण विदिदो । अदो सहीहिं संदिट्ठम्हि भत्तुणो

---

१. विधिः २. संपदः
३ गजः साधुसमक्षरूपे कस्मिन्नपि. ४. दृष्ट्वाथ.
५. प्रत्यक्ष० ६. कविरप्येष वचनीयान्मुक्त इति तस्याप्ययमाश्वासनिश्वासः ।

अंगुलीअअं दंसइदव्वं त्ति। (दिष्टया अकारणप्रत्यादेशी नार्यपुत्रः। न खलु शप्तमात्मानं स्मरामि। अथवा प्राप्तो मया स हि शापो विरह-शून्यहृदयया न विदितः। अतः सखीभ्यां संदिष्टास्मि भर्तुः अङ्गुलीयकं दर्शयितव्यमिति।)

मारी०—वत्से! विदितार्थासि[1]। तदिदानीं सहधर्मचारिणं प्रति न त्वया मन्युः कार्यः। पश्य,—

शापादसि प्रतिहता स्मृतिरोध[2]रूक्षे
भर्तर्यपेततमसि प्रभुता तवैव।
छाया न मूर्च्छति मलोपहतप्रसादे
शुद्धे तु दर्पणतले सुलभावकाशा॥३२॥

राजा—यथाह भगवान्।

मारी०—वत्स! कच्चिदभिनन्दितस्त्वया विधिवदस्माभिरनुष्ठितजात-कर्मादिक्रियः पुत्र एष शाकुन्तलेयः?[3]।

राजा—भगवन्! अत्र खलु मे वंशप्रतिष्ठा[4]।

मारी०—तथा भाविनमेनं चक्रवर्तिनमवगच्छतु भवान्। पश्य,—

रथेनानुद्घातस्तिमितगतिना[5] तीर्णजलधिः
पुरा सप्तद्वीपामवति[6] वसुधामप्रतिरथः।
इहायं सत्त्वानां प्रसभदमनात् सर्वदमनः
पुनर्यास्यत्याख्यां भरत इति लोकस्य भरणात्॥३३॥

राजा—भगवता कृतसंस्कारे सर्वमस्मिन्नाशास्महे।

---

१. चरितार्थासि सह०—इति पाठे दिव्याश्रमयोर्गर्भाधान प्रसवजातकर्म-संशुद्धां पुंसन्तर्ति पतिं चावाप्येत्याकूतिः २. ०लोप०

३. शाकुन्तल इति तु युज्येत तत्र भवः तत्र जातः इत्यण्व्युत्पत्त्या। तथा सति प्रत्यभिज्ञानत्रयमत्रोपपद्येत दुष्यन्तकर्तृके शकुन्तला—शाकुन्तलेय—प्रत्यभिज्ञाने तत्कर्तृकं स्वप्रत्यभिज्ञानं चेति। द्र. ४२७ पृ० पादटिप्पणीं—८.

४. शा ३।१७, ६।२४ पद्यार्थसंवादायायमेव पाठः श्रेयान्। '०सुलभावकाशा। राजा—भगवन्नत्र०' मा. ५. ०गतिनोत्तीर्ण०

६. जयति नि. मा. खि. च. सा.

अदि०—भअवं ! इमाए दुहिदुमणोरहसंपत्तीए कण्णो वि दाव सुद-वित्थारो करीअदु । दुहिदुवच्छला मेणआ इह एव्व उपचरंती चिट्ठदि । (भगवन् ! अनया दुहितृमनोरथसंपत्त्या कण्वोऽपि तावच्छ्रुत-विस्तरः क्रियताम् । दुहितृवत्सला मेनका इहैवोपचरन्ती तिष्ठति ।)'

शकु०—(आत्मगतम्) मणोरहो खु मे भणिदो भअवदीए । (मनोरथः खलु मे भणितो भगवत्या ।)

मारी०—तपःप्रभावात् प्रत्यक्षं सर्वमेव तत्रभवतः ।

राजा—अतः खलु मम नातिक्रुद्धो मुनिः ।

मारी०—तथाप्यसौ प्रियमस्माभिः श्रावयितव्यः । कः कोऽत्र भोः ? ।

(प्रविश्य)

शिष्यः—भगवन् ! अयमस्मि ।

मारी०—गालव ! इदानीमेव विहायसा गत्वा मम वचनात् तत्रभवते कण्वाय प्रियमावेदय यथा—'पुत्रवती शकुन्तला दुर्वाससः शापनिवृत्तौ स्मृतिमता दुष्यन्तेन प्रतिगृहीता'—इति ।

शिष्यः—यदाज्ञापयति भगवान् । (निष्क्रान्तः)

मारी०—वत्स ! त्वमपि स्वापत्यदारसहितः सख्युराखण्डलस्य रथ-मारुह्य ते राजधानीं प्रतिष्ठस्व ।

राजा—यदाज्ञापयति भगवान् ।

मारी०—[1]संप्रति हि—

भवतु तव बिडौजाः प्राज्यवृष्टिः प्रजासु
त्वमपि विततयज्ञो वज्रिणं प्रीणयालम् ।
युगशतपरिवर्तैरेवमन्योन्यकृत्यैर्
भवतमुभयलोकानुग्रहश्लाघनीयौ ॥३४॥

राजा—भगवन् ! यथाशक्ति श्रेयसि प्रयतिष्ये ।

मारी०—वत्स ! किं ते भूयः प्रियमुपकरोमि ? ।

१. संप्रति०० प्रयतिष्ये च. नि. खि. न । सा. प्रतौ पुनरसौ श्लोकोऽधिकः—

राजा—अतः परमपि प्रियमस्ति। यदि हि भगवान् प्रियं कर्तुमिच्छति[1] तर्हि इदमस्तु—

(भरतवाक्यम्)

प्रवर्ततां प्रकृतिहिताय पार्थिवः
सरस्वती श्रुतिमहती महीयताम्[2]।
ममापि च क्षपयतु नीललोहितः
पुनर्भवं परिगत[3]शक्तिरात्मभूः ॥३५॥

(निष्क्रान्ताः सर्वे)

॥ इति सप्तमोऽङ्कः ॥

॥ समाप्तमिदमभिज्ञानशाकुन्तलं नाम नाटकम् ॥

॥ संपूर्णा चेयं सनातनकवि-श्रीरेवाप्रसादद्विवेदि-संपादिता कालिदासग्रन्थावली ॥

॥ श्रीः ॥

—मारी० क्रतुभिरुचितभागांस्त्वं सुरान् भावयालं
सुरपतिरपि वृष्टीस्त्वत्प्रजायै विधत्ताम्।
इति सममुपकारव्यञ्जितश्रीमहिम्नो-
र्व्रजतु बहुतिथो वां सौहृदेनैव कालः॥

१. तथाप्येतदस्तु.

२. श्रुतिमहती सरस्वती नामापौरुषेयवाङ्मयपूज्या संस्कृतभाषा। यतः सा श्रुतिमहती ततो महीयतामितीतर-व्यतिरेकि हेतुगर्भं विशेषणम्। द्र. कु. ७।९०, र. १५।७६। अत्र पाठः ०तां महीयताम्—मा. सा. पि. खि, ०तां महीयसाम्—नि.।

३. परिगत-भक्तिरात्मभूः। आत्मभूः कामोऽपि। सोऽप्यत्र कृष्णशार-भ्रमराभ्यां नीलभूमिकागतो लोहित इति नीललोहितः शिव एव। सोऽयं गार्हस्थ्य-वर्त्मना मोक्षः॥

परिशेषः

- प्रक्षेपाः
- पाठभेदाः
- श्लोकसूची

शुद्धिपत्रम्

ऋतुसंहारे

ईषत् तुषारैः कृतशीतहर्म्यं सुवासितं चारु शिरः सचम्पकैः ।
कुर्वन्ति नार्योऽपि वसन्तकाले स्तनं सहारं कुसुमैर्मनोहरैः ॥

मेघदूते

१।२ प्रथम०—प्रशम० १।३ कौतुका० = केतका० कालिदासप्रयुक्तायां ब्राह्मी-
लिपौ शीघ्रलेखे कौतुक-केतकयोरभिन्नप्रायत्वादयं भ्रमः ।

१।१७ पृ० २९ अध्वक्लान्तं प्रतिमुखगतं सानुमाँश्चित्रकूट-
स्तुङ्गेन त्वां जलद शिरसा वक्ष्यति श्लाघमानः ।
आसारेण त्वमपि शमयेस्तस्य नैदाघमग्निं
सत्काराद्रः फलति न चिरेणोपकारो महत्सु ॥

१।२१ दग्धा० = जग्ध्वा० 'अम्भोबिन्दुग्रहणचतुरांश्चातकान् वीक्षमाणाः
श्रेणीभूताः परिगणनया निर्दिशन्तो बलाकाः ।
त्वामासाद्य स्तनितसमये मानयिष्यन्ति सिद्धाः
सोत्कम्पानि प्रियसहचरीसंभ्रमालिङ्गितानि ॥

१।३१ प्रद्योतस्य प्रियदुहितरं वत्सराजोऽत्र जह्रे
हैमं तालद्रुमवनमभूदत्र तस्यैव राज्ञः ।
अत्रोद्भ्रान्तः किल नलगिरिः स्तम्भमुत्पाट्य दर्पा-
दित्यागन्तून् रमयति जनो यत्र बन्धूनभिज्ञः ॥
हारांस्तारांस्तरलगुटिकान् कोटिशः शङ्खशुक्तीः
शस्पश्यामान् मरकतमणीनु न्मयूखप्ररोहान् ।
दृष्ट्वा यस्यां विपणिरचितान् विद्रुमाणां च भङ्गान्
संलक्ष्यन्ते सलिलनिधयस्तोयमात्रावशेषाः ॥

२।२ यत्रोन्मत्तभ्रमरमुखराः पादपा नित्यपुष्पा
हंसश्रेणीरचितरशना नित्यपद्मा नलिन्यः ।
केकोत्कण्ठा भवनशिखिनो नित्यभास्वत्कलापा
नित्यज्योत्स्नाः प्रतिहततमोवृत्तिरम्याः प्रदोषाः ॥

२।९ पत्रश्यामा दिनकरहयस्पर्धिनो यत्र वाहाः
शैलोदग्रास्त्वमिव करिणो वृष्टिमन्तः प्रभेदात् ।
योधाग्रण्यः प्रतिदिशमुखं संयुगे तस्थिवांसः
प्रत्यादिष्टाभरणरुचयश्चन्द्रहासव्रणाङ्कैः ॥
२।२० वा—शब्दः = र. ४।४२, मा. ५।१२
२।२७ स्निग्धाः सख्यः कथमपि दिवा तां न मोक्ष्यन्ति तन्वी-
मेकप्रख्या भवति हि जगत्यङ्गनानां प्रवृत्तिः ।
स त्वं रात्रौ जलद शयनासन्नवातायनस्थः
कान्तां सुप्ते सति परिजने वीतनिद्रामुपेयाः ॥
अन्वेष्टव्यामत्रनिशयने संनिकीर्णैकपार्श्वां
तत्पर्यन्त (ङ्क) प्रगलितलवैश्छिन्नहारैरिवास्रैः ।
भूयो भूयः कठिनविषमां सारयन्तीं कपोला-
दामोक्तव्यामयमितनखेनैकवेणीं करेण ॥
२।४१ धारासिक्तस्थलसुरभिणस्त्वन्मुखस्यास्य बाले
दूरीभूतं प्रतनुमपि मां पञ्चबाणः क्षिणोति ।
घर्मान्तेऽस्मिन् विगणय कथं वासराणि व्रजेयु-
र्दिक्संसक्तप्रविततघनव्यक्तसूर्यातपानि ॥
२।५१ तं संदेशं जलधरवरो दिव्यवाचाऽऽचचक्षे
प्राणांस्तस्या जनहितरतो रक्षितुं यक्षवध्वाः ।
प्राप्योदन्तं प्रमुदितमनाः सापि तस्थौ स्वभर्तुः
केषां न स्यादभिमतफला प्रार्थना ह्युत्तमेषु ॥
श्रुत्वा वार्त्तां जलदकथितां तां जनेशोऽपि सद्यः
शापस्यान्तं सदयहृदयः संविधायास्तकोपः ।
संयोज्यैतौ विगलितशुचौ दम्पती हृष्टचित्तौ
भोगानिष्टानविरतसुखं भोजयामास शश्वत् ॥
इत्याख्याते सुरपतिसखः शैलकुल्यापुरीषु
स्थित्वा स्थित्वा धनपतिपुरीं वासरैः कैश्चिदाप ।
मत्वागारं कनकरुचिरं लक्षणैः पूर्वमुक्तै-
स्तस्योत्सङ्गे क्षितितलगतां तां च दीनां ददर्श ॥
तस्मादद्रेर्निगदितपथः शीघ्रमेत्यालकायां
यक्षागारं विगलितनिभं दृष्टचिह्नैर्विदित्वा ।
यत् संदिष्टं प्रणयमधुरं गुह्यकेन प्रयत्नात्
तद्गेहिन्याः सकलमवदत् कामरूपी पयोदः ॥

इत्थंभूते सुरचितपदं मेघदूताभिधानं
कामक्रीडाविरहितजने विप्रयोगे विनोदः ।
मेघस्यास्मिन्नतिनिपुणता बुद्धिभावः कवीनां
नत्वार्यायाश्चरणकमलं कालिदासश्चकार ॥

कुमारसंभवे

१।५ छायामिषे सा, १।३४ विक्रमेषु = विभ्रमेषु

१।३८ गम्भीरनाभी(भि)ह्रदसन्निधाने रराज नीला नवलोमराजिः ।
मुखेन्दुभीरु(त)स्तनचक्रवाकचञ्चुच्युता शैवलमञ्जरीव ॥

१।४१ निर्भर्त्सिताऽशोकदलप्रसूति, पाणिद्वयं चारुनखं तदीयम् ।
नवोदितेन्दुप्रतिमस्य शोभां व्योम्नः प्रदोषे विफलीचकार ॥

१।४५ कर्णद्वयस्थं नगराजपुत्र्यास्ताटङ्कयुग्मं सु(नि)तरां रराज (बभास) ।
मत्वा(ज्ञात्वा)भवित्रीं त्रिपुरारिपत्नीं तां सेवमाना(सेवासमेता) विव पुष्पवन्तौ ॥

ताटङ्कपत्रं(युग्मं) विरराज तस्याः शैलात्मजायाः श्रवणद्वयस्थम् ।
मत्वा भवित्रीं मदनारिपत्नीं सेवासमेताविव पुष्पवन्तौ ॥

१।५३ तदाप्रभृत्येव = ततः प्रभृत्येव

१।५५ दधानाः = वसानाः । अत्र स्पर्शः वर्णभक्तिविन्यासः । तथा च वत्सभट्टिरपि स्वलेखे । 'ठप्पा' इति च तद्भाषा ।

२।७ ०भागौ = ०भावौ ।

२।८ ०परिमाणेन = परिणामेन, यौ स्वप्नबोधौ तावेव, स्वप्नाबोधौ भूतानां तावेव ।

२।९ जगदन्तः निरन्तकः = अनन्तो जगदन्तकः । जगदन्तोऽप्यनन्तकः ।

२।६४ ०शृङ्गं = ०शार्ङ्गं पुष्पधन्वा = पुष्पकेतुः ३।१८ प्रत्ययसङ्गलब्धौ ।

३।२२ ऐरावत० = दिग्वारणा० ३।३० प्रकाश्य = निवेश्य

३।४४ त्रियम्बकं = त्रिलोचनम्, ते साहसिका इति म.

३।४६ कर्णावसक्त = कर्णावतंस० ।

३।५० क्षेत्र० = वेद० ।

३।५४ पर्याप्त० = सुजात० भोजोऽपि सरस्वतीकण्ठाभरणे = 'सुजात'० ।

३।५५ केसरदाम० = केसरपुष्प० । मौर्वीं द्वितीयाम् पाठान्तरमिदमिति महिमभट्ट-दण्डाभीरवः सर्वे ।

३।५८ उपासितुं सा च पिनाकपाणिम् ।
३।६७ ०परिलुप्त० = ०परिवृत्त० ३।७४ परिहर्तुकामः सोऽन्तर्दधे ।
३।७६ संपदि = अथच, ०कृताङ्गः = कृतात्मा ४।१६ कोकिलान् ०पण्डितान् ।
४।२५ ०शरैः० = फलैः० ।
४।३१ अनपायिनि = अनघापि हि । संश्रयद्रुमे = संश्रिता द्रुमे. अनवद्यापि हि. सा. पा०. ४।३३ प्रली० = विली० ।
४।४२ नियो० = स यो० ४।४३ स्मरशापान्तभवाम् ।
४।४६ परिपा० = प्रतिपा० । ५।२ गिरीशं प्रति सक्त०, त्रिनेत्रं प्रति सक्त० ।
५।५ गृहेषु = गृहेऽपि, ध्रुवेच्छां = व्रतेच्छां मनीषितामर्च गृहेषु देवतां ।
५।११ कन्दुकात् = कञ्चुकात् ५।१३ द्वयेऽपि = द्वयीषु ५।१६ ०मधीतिनीम्
५।१८ 'पूर्व० ना' = सर्वसमाधिसाधनम्. ५।१९ मृदु प्रकृत्यापि संसारमेव तत् ।
५।२९ ०पेलव० = कोमल०

सुरास्तदुद्वीक्ष्य नगेन्द्रकन्यया कृतं तपः शम्भुवशक्रियाक्षमम् ।
ययाचिरे तं प्रणिपत्य दुःखिताः पतिः पशूनां सुतमाजिहेतवे ॥ व.

५।३२ वक्तुमनुक्रमज्ञा.
५।४७ उपेक्षते = अपेक्षते, लम्बिनीः = ०बन्धनाः, ०नीरिमा जटाः कपोले० सा.
५।४९ रविमस्य = चिरमस्य. ५।५६ उपात्तवर्णश्चरितैः.
५।५८ स्वहस्तालिखि०. ५।६१ अस्त्राकुलम्. ५।६८ विकीर्णकेशास्थिपरेत०.
५।७१ पिनाकिनः = कपालिनः कुन्तकः । महिमभट्टः, मम्मटः टीकितारश्च.,
५।७४. भ्रूलतया०. ५।७७ स लोकनाथः, ५।७९ विलि० = विलु०.
५।८४ बाला स्त० = साग्रस्त० ५।८५ निक्षेपणाय = निक्षेप एव.
६।५ ०मोत्कर० = ०मौक्तिक०, व्यो००षु = आकाशगङ्गास्रोतस्सु.
६।७ साक्षात् = शश्वत्
६।१५ अथ ते = प्रथमे । प्रथम इत्येव मूलः पाठः (द्र. ४०९ पृष्ठे टि.—४). सा. पाठमिमं न वेत्ति.
६।३६ मनसा सह मानसाः—सा. ६।४२ नक्तं सोपानपंक्तिषु—सा.
६।४४ कुसुमायुधः. दर्शकः = देशकः. ६।५३ कृतासन० = नीचासन०.
६।९३ चेरुः = चेलुः. ७।३ महापथं = चतुष्पथं, स्थानान्तरस्वर्ग
७।१४ आसन्न० = उपोढ०. ७।३० पुरशासनस्य = स्मरशासनस्य
७।३३ शङ्खान्तर० = नेत्रान्तर०.
७।४१ पतद्ग००ङ्गे = वहन् गाङ्गमिव प्रवाहम् ।
७।५१ स्वबाणचिह्नात् = स्ववाहवाहात्. ७।५७ रुद्धोऽपि न = रुद्धोऽपि च, बन्धुं = बद्धुं

७।६१ स्तनन्धयन्तं००गवाक्षम्' श्लोकः. ७।७५ ह्रीयन्त्रणामानशिरे मुहूर्तम्, ह्रीयन्त्रणामानशिरे मनोज्ञाम्.

७।८९ मुक्ताफलभक्ति०. ७।९३ कार्यं काल०.

७।९५ प्रमथ० = प्रथम० ८।१९ पूर्वोत्तरार्द्धविपर्यासोऽत्र क्वापि.

८।३२ विपरिवृत्तकण्ठयोः = विरहदीनकण्ठयोः, निघ्नयोः = भिन्नयोः ।

८।३३ आविभाति शरणाय गच्छतः सान्ध्यकर्मविषयेऽनुगृह्णते. ८।३६ ०मण्डलः

८।३८ ०दघ्न = ०दघ्नि०. ८।४० दूरलग्न०, ०जीवकुसुमेन.

८।४१ स्यन्दनस्य०० स्वरैः ८।४२ शिरोरुहै०.

८।४५ वर्त्तिका० = वर्णिका०.

८।४६ भूभृता, ०रेषु चात्मनः, चास्तशिखरे विवस्वता.

८।४७ अद्रिराजतनये = पार्ष्णिमुक्तवसुधा० शुद्धये = सिद्धये.

८।५२ सेवते = सेव्यते.

८।५३ शैल००स्थिताम् = भूमिलग्नमिव संप्रति स्थिताम्, भूमिलग्नमिव संप्रतिष्ठताम्

८।५७ शुद्धमाविल० = निम्नमुन्नत० महिमभट्टः

८।६४ सामिभिन्नतिमिरं, सप्रसादमिव = संप्रसीददिव

८।६८ प्रस्फुरद्भिरविकल्पसुन्दरि ! रचना० = ०गणना०

८।६९ ०भाव = ०भाग०. ८।७० सोढु०.

८।७२ तवालकाः ८।७३ योग्यतारया, पश्य तारया

८।७४ पाकपाण्डु०, प्रतिकृतिप्रसन्नयोः प्रतिकृतिप्रदीप्तयोः, निहिताक्षिण ।

८।७६ मुखं प्रान्तरक्त०, मुखं रक्तमेव मुखं मत्तमेव, मदः = मधुः,

८।७९ नेष्यतोः = वाञ्छतोः ८।८५ ०कैशिकैः = ०वंशिकैः.

८।८८ आकुलालकमपास्तचित्रकम्.

८।९१ तज्जलेभ्यः, तज्जलेषु । अत्र सा. प्रतौ पद्यम्—

अथो शिवश्चन्द्रसुचारुमौलिः सस्मार तत्रामरशिल्पिराजम् ।
चिकीर्षयागारवरस्य विष्णुर्मायां नु संसारसिसृक्षयेव ॥

रघुवंशे

१।३४ गङ्गां भगीरथेनेव पूर्वेषां पावनक्षमाम् ।
ईप्सिता संततिं न्यस्ता तेन मन्त्रिषु कोशलाः ॥

१।५० आकीर्यमाणमासन्नविधिभिः समिधाहरैः ।
वैखानसैरदृश्याग्निप्रत्युद्गमनवृत्तिभिः ॥

१।७६ इमां देवीमृतुस्नानां स्मृत्वा सपदि सत्वरः ।
प्रदक्षिणक्रियातीतस्तस्याः कोपमजीजनः ॥
१।७९ पूर्वार्द्धे अवैमि तदवज्ञानाद् यत्नापेक्षो मनोरथः (व्यक्तिविवेके ४८५ पृष्ठे)
१।८१ स त्वमेकान्तरां तस्या मदीयां वत्स मातरम् ।
आराधय सपत्नीकः सा वां कामान्प्रदास्यति ॥
१।८३ ताम्रां ललाटजां रेखां बिभ्रती सा सितेतराम् ।
सन्ध्या प्राचीपदेनेव प्रतिभिन्ना हिमांशुना ॥
३।१ ततो विशांपत्युरनन्यसन्ततेर्मनोरथं किञ्चिदिवोदयोन्मुखम् ।
अनन्यसौहार्दरसस्य दोहदं प्रिया प्रपेदे प्रकृतिप्रियस्वदा ॥
३।२ शरीरसादादसमग्रभूषणा मुखेन साऽऽलक्ष्यत लोध्रपाण्डुना ।
स्थिताल्पतारां करुणेन्दुमण्डलां विभातकल्पां रजनीं व्यडम्बयत् ॥
मुखेन सा केतकपत्रपाण्डुना कृशाङ्गयष्टिः परिमेयभूषणा ।
स्थिताल्पतारां करुणेन्दुमण्डलां विभातकल्पां रजनीं व्यडम्बयत् ॥
३।८ दिनेषु गच्छत्सु मधूकपाण्डुरं तदीयमाश्याममुखं स्तनद्वयम् ।
समुद्गयोर्वारणदन्तकोशयोः बभार कान्तिं गवलापिधानयोः ॥
३।१७ समीक्ष्य पुत्रस्य चिरान्मुखं पिता निधानकुम्भस्य युवेव दुर्गतिः ।
मुदा शरीरे प्रबभूव नात्मनः पयोधिरिन्दूदयमूर्च्छितो यथा ॥
३।४० स्वेदाम्बुना मार्जय पुत्र लोचने ममैव येनेह तुरङ्गमीक्षसे ।
धेन्वा निशम्येति वचः समीरितं मुदं परामाप दिलीपनन्दनः ॥
४।२ न्यस्तशस्त्रं दिलीपं च तं च शश्रुवुषां पतिम् ।
राज्ञामुद्धृतनाराचे हृदि शल्यमिवार्पितम् ॥
४।१५ निर्वृष्टलघुभिर्मेघैः सवितुस्तस्य चोभयोः ।
वर्धिष्णवो दिशां भागान् प्रतापा यत्र रचितोः ॥?॥
४।२० तस्य गोप्तुर्द्विरेफाणां कर्णोत्पलनिपातिनाम् ।
स्वरसंवादिभिः कण्ठैः शालिगोप्यो जगुर्गुणान् ॥
४।२९ पुरोगैः कलुषास्तस्य सहप्रस्थायिभिः कृशाः ।
पश्चात् प्रयायिभिः पङ्काश्चक्रिरे मार्गनिम्नगाः ॥
४।४१ वायव्यास्त्रविनिर्धूतात्पक्षविद्धान्मदोदधेः ।
गजानीकात् स कालिङ्गं तार्क्ष्यः सर्पमिवाददे ॥
४।४२ च = व, वा, मा. ५१.२, मे. २.२०.
४।४७ आजानेयखुरक्षुण्णपक्वकैलाक्षेत्रसंभवम् ।
व्यानशे सपदि व्योम कीटकोशाविलं रजः ॥

४।७० उ० विविशुस्तं विशांनाथमुदन्वन्तमिवापगाः ।
४।८८ यज्ञान्ते तमवभृथाभिषेकपूतं सत्कारैः शमितपराजयव्यलीकाः ।
आमन्त्र्योत्सुकवनितानिरुद्धचित्ताः स्वानि स्वान्यवनिभुजः पुरा व्यलीकान् ॥
५।४६ स भोगिभोगाधिकवीवरेण संवेष्टितार्धप्रसृतेन दीर्घान् ।
प्रतिक्षिपंस्तीरमुखः सशब्दं हस्तेन वारीपरिघानिवोर्मीन् ॥
५।५७ गान्धर्वमस्त्रं तदिदः प्रतीच्छ प्रयोगसंहारविभक्तमन्त्रम् ।
प्रस्वापनं नाम यतः प्रहर्तुर्न चारिहिंसा विजयः स्वहस्ते ॥
५।६७ निद्रावशं त्वयि गते शशिना कथञ्चि-
दात्मानमाननरुचा भवती वियुज्य ।
लक्ष्मीर्विभातसमयेऽपि हि दर्शनेन
पर्युत्सुका प्रणयिनी निशि खण्डितेव ॥
५।६९ मन्दं विवाति हिमसंभूतशीतभावः
संसृज्यते सरसिजैररुणांशुभिन्नैः ।
सौरभ्यमीप्सुरिव ते मुखमारुतस्य
यन्नो गुणान् प्रतिनिशापरिणामवायुः ॥
५।७० उ० संलक्ष्यते दशनचन्द्रिकयानुविद्धं
बिम्बोष्ठलब्धपरभागमिव स्मितं ते ॥
५७५ इति स विहितनिद्रस्तल्पमल्पेतरांशः
सुरगज इव गंगासैकतं सुप्रतीकः ।
परिजनवनितानां पादयोर्व्यापृतानां
वलयमणिवदिष्टं प्रच्छदान्तं मुमोच ॥
६।१ स तत्र मञ्चेषु विमानकल्पेष्वाकल्पसंमूर्च्छितरूपशोभाम् ।
सिंहासनस्थान् नृपतीनपश्यत् यूपान् प्रशस्तानिव हैमवेदीन् ॥
६।३४ उ० दिवापि जालान्तरचन्द्रिकायां नारीसखः स्पर्शसुखानि भुङ्क्ते ॥
६।५४ रणेभ्यमित्रीणतया प्रकाशः शरासनज्यानिकषौ भुजाभ्यां ।
विस्पष्टरेखौ रिपुविक्रमाग्ने-र्निर्वाणमार्गाविव यो बिभर्ति ॥
६।५९ अथाधिगम्योरगराजकल्पं पतिं पुरस्योरगपूर्वनाम्नः ।
आचारपूतोभयवंशदीपं शुद्धान्तरक्ष्या जगदे कुमारी ॥
६।७५ वाणिनीनां = पाणिनीनाम् इति पाठे पणन्ते व्यवहरन्ते तच्छीलाः ।
७।८ स्तनन्धयन्तं तनयं विहाय विलोकनाय त्वरया व्रजन्ती ।
संप्रस्नुताभ्यां पदवीं स्तनाभ्यां सिषेच काचित् पयसागवाक्षात् ॥

७।२३ पू० तयोः समापत्तिषु कातराणि किञ्चिद् व्यवस्थापितसंहृतानि ।
७।३८ नेत्र क्रमेणेति पाठे रेणोरंशुकतुल्यतोत्प्रेक्षागम्या, सा च सुभगापि स्वतः सुभगेऽनुक्रमवाक्यार्थेऽन्तर्गडूयति । अत एव 'स्थिताः क्षणम्' इत्यादिषु नास्त्यलङ्कारनिवेशराभसी महाकवेः ।
७।४८ ललाटबद्धभ्रुकुटीतरङ्गैस्तनुत्यजां दन्तनिपीडितोष्ठैः ।
आतस्तरे भल्लनिकृन्तकण्ठैर्हुङ्कारगर्भैर्द्विषतां शिरोभिः ॥
८।१० अथ वीक्ष्य गुणैः प्रतिष्ठितं प्रकृतिष्वात्मजमाभिगामिकैः ।
पदवीं परिणामदेशिनीं रघुरादत्त वनान्तगामिनीम् ॥
८।१८ नयचक्षुरजो दिदृक्षया पररन्ध्रस्य ततान मण्डले ।
हृदये समरोपयन्मनः परमं ज्योतिरवेक्षितुं रघुः ॥
८।२५ पू० (i) विदधे विधिरस्य नैष्ठिकं यतिभिः सार्धमनग्निमग्निचित् ।
(ii) वितान समं पुरोधसा क्रतुमन्त्यं पृथिवीशतक्रतोः ॥ व० च०
८।५१ सुरतश्रमवारिबिन्दवो न तु तावद्विरमन्ति ते मुखे ।
स्वयमस्तमितास्यहो बत क्षयिणां देहभृतामसारता ॥
८।५९ विभ्रमाः = विभ्रमः, चेष्टितम् ।
८।६२ चरणानुग्रहदुर्लभं तव ।
८।८५ रुदितेन न सा निवर्तते नृप तत्तावदनर्थकं तव ।
न भवाननुसंस्थितोऽपि तां लभते कमवशा हि देहिनः ॥
९।११ जघननिर्विषयीकृतमेखलाननुचिताश्रुविलुप्तविशेषकान् ।
स रिपुदारगणानकरोद् बलादनलकानलकाधिपविक्रमः ॥३२॥[1]
९।१२ स्फुरितकोटिसहस्रमरीचिना समचिनोत् कुलिशेन हरिर्यशः ।
स धनुषा युधि सायकवर्षिणा स्वनवता नवतामरसाननः ॥
९।२४ हिमविवर्णितचन्दनपल्लवं विरहयन् मलयाद्रिमुदङ्मुखः ।
विहगयोः कृपयेव शनैर्ययौ रविरहर्विरहध्रुवभेदयोः ॥२५॥
९।३० दशनचन्द्रिकया व्यवभासितं हसितमाधवगन्धि मधोरिव ।
वकुलपुष्पमसेव्यत षट्पदैः शुचिरसं चिरसंचितमीप्सुभिः ॥३०॥
९।३१ अत्र यत्र पाठान्तरपद्यम् 'उपहित'मि-त्यादि तदपि र ७।६३-१३।९-समानार्थकमिति मूलमेव ।
९।३३ गमयितुं प्रभुरेष सुखेन मां न महतीं बत पान्थवधूजनः ।
इति दयात इवाभवदायता न रजनी रजनीशवती मधौ ॥२८॥


---

१. अत्र श्लोकान्ते दत्तया संख्यया सहात्र मुद्रितेन नवमसर्गीयेण पद्येन पद्यमिदं संवादमञ्चतीत्यर्थः ।

९।३६ तिलकमस्तकहर्म्यकृतास्पदः कुसुममध्वनुषङ्गसुगन्धिभिः ।
कलमगीयत भृङ्गविलासिनां स्मरयुतैरयुतैरबलासखैः ॥४१॥
९।३७ लघयति स्म न पत्यपराधजं न सहकारतरुस्तरुणीधृतम् ।
कुसुमितो नमितोऽलिभिरुन्मदैः स्मरसमाधिसमाधिकरोपितम् ॥३३॥
९।३८ . गमयितुं प्रियसंजनितां व्यथामसहया सह यामवती स्त्रिया ॥३८॥
९।४२ अनलसान्यभृतानलसान्मनः कमलधूलिभृता मरुतेरिता ।
कुसुमभारनताध्वगयोषितामसमशोकमशोकलताऽकरोत् ॥२८॥
९।६६ द्रुतमन्वयत क्वचिच्च यूथं चमराणां शरलग्नवालधीनाम् ।
नृपतीनिव तान्निनाय शान्तिं सितबालव्यजनैर्वियोज्य च ॥
९।८२ तदर्थमर्थज्ञ गते गतत्रपः किमेष ते वध्यजनोऽनुतिष्ठतु ।
स वह्निसंस्कारमयाचतात्मनः सदारसूनोर्विदधे च तन्नृपः ॥
समेयिवान् रघुवृषभः स्वसैनिकैः स्वमन्दिरं शिथिलधृतिर्निवर्तितः ।
मनोगतं गुरुमृषिशापमुद्वहन् क्षयानलं जलधिरिवान्तकास्पदम् ॥
१०।२ मनोर्वंशश्चिरं तस्मिन्ननभिव्यक्तसंततिः ।
निमज्य पुनरुत्थास्यन्नदः शोण इवाभवत् ॥
१०।१७ एकः कारणतस्तां तामवस्थां प्रतिपद्यसे ।
नानात्वं रागसंयोगात् स्फाटिकस्येव दृश्यते ॥
१०।२२ 'वैकुण्ठ'-संज्ञकेऽर्चावतारे विष्णुरपि चतुर्मुखः । तत्र पुरुषः, सिंहः, वराहः, अश्ववृषयोरन्यतरच्चेति चतुर्णां चत्वारि मुखानि । खर्जूरवाहादिषु धङ्गदेवादिभिर्मूर्त्तिरेषा प्रत्यस्थापीति तदभिलेखस्य 'दधानामेकामि'—ति मङ्गलपद्येन प्रतीतचरम् । अत्र तत् प्रायेणासङ्गतमेव ।
११।१ सोऽभिगम्य किल गाधिसूनुना राममध्वरविघातशान्तये ।
याचितः शिशुमपि प्रजेश्वरस्तेजसां हि न वयः समीक्ष्यते ॥
११।७ रेजतुश्च सुतरां महौजसः कौशिकस्य पदवीमनुद्रुतौ ।
उत्तरां प्रति दिशं विवस्वतः प्रस्थितस्य मधुमाधवाविव ॥
११।४३ तेऽपि तूर्णमवगम्य शाम्भवमासमाहरणकर्मतत्पराः ।
स्वां सक्षिप्तितिकर्कमं(?)हि तच्चिक्षिपुर्दशरथात्मजाग्रतः ॥
११।७७ तन्मदीयमिदमाततज्यतां नीयतां विजयसाधनं धनुः ।
११।९१ स्वं निवेश्य किल धाम राघवे वैष्णवं विदितविष्णुतेजसि ।
स्वस्तिदानमधिकृत्य चाक्षयं भार्गवोऽथ निजमाश्रमं ययौ ॥
१२।२२ मृगमांसं ततः सीतां रक्षन्तीमातये धृतम् ।
पक्षतुण्डनखाघातैर्वबाधे वायसो बलात् ॥

१२।८० क्लेशेन महता निद्रां त्याजितं रणदुर्जयम् ।
रावणः प्रेषयामास युद्धायानुजमात्मनः ॥
स जघान तदादेशात् कपीनुग्राननेकशः ।
विवेश च पुरीं लङ्कां समादाय हरीश्वरम् ॥
१३।१५ निस्त्रिंशकल्पस्य निधेर्जलानामेषा तमालद्रुमराजिनीला ।
दूरादरालभ्रु विभाति वेला कलङ्कलेखामलिनेव धारा ॥
१३।४९ प्रियं सुरूढोऽनुगिरं तमालस्तव प्रवालोपचयेन यस्य ।
कर्णार्पितेनाकरवं कपोलमप्रार्थ्यकालागुरुपत्रलेखम् ॥
१३।५७ तमिस्रया शुक्लनिशेव भिन्ना कुन्दस्रगिन्दीवरमालयेव ।
कृत्तिर्हरेः कृष्णमृगत्वचेव भूतिः स्मरारेरिव कण्ठभासा ॥
दृश्यार्धया शारदमेघलेखा निर्धौतनिस्त्रिंशरुचा दिवेव ।
गवाक्षकालागुरुधूमराज्या हर्म्यस्थलीलेपसुधा नवेव ॥
तुषारसंघातशिला हिमाद्रेर्जात्यञ्जनप्रस्तरशोभयेव ।
पतत्त्रिणां मानसगोचराणां श्रेणीव कादम्बविहङ्गपङ्क्त्या ॥
नितान्तशुद्धस्फटिकाक्षयोगाद् वैदूर्यकान्त्या रसनावलीव ।
गङ्गा रवेरात्मजया समेता पुष्यत्युदारं परभागमेषा ॥ चा.
१४।१ प्रत्यागतौ तत्र चिरप्रवासादपश्यतां दाशरथी जनन्यौ ।
कुमुद्वती शीतमरीचिलेखे दिवेव रूपान्तरदुर्विभाव्ये ॥
१४।७१ केयं वने लक्ष्मण लक्ष्मणेति दीनाक्षरं रोदिति योषिदुच्चैः ।
आं ज्ञातमेषा जनकात्मजेति कविर्विचिन्त्यान्तिकमाजगाम ॥
कविः = मुनिः कुन्तकः
१५।६९ तदाकर्ण्य मुनेर्वाक्यं रामो राजीवलोचनः ।
समं हर्षविषादाभ्यां युयुजे नीतिकोविदः ॥
१५।९४ गच्छ लक्ष्मण शीघ्रं त्वं मा भूद् धर्मविपर्ययः ।
त्यागो वापि वधो वापि साधूनामुभयं समम् ॥
१६।१२ ज्वलन्मुखो०
१७।४६ प्रमदाक्षादिविमुखे चपलापि स्वभावतः ।
निकषे हेमलेखेव श्रीरस्मिन्ननपायिनी ॥
१८।१६ तस्माद् बभूवाथ दलाभिधानो दमान्वितः पद्मदलाभदृष्टिः ।
कुन्दान्तदन्तो रिपुदन्तिसिंहः पतिः पृथिव्याः कुलकैरवेन्दुः ॥
१८।१९ हित्वोपभोगांस्तपसोत्तमेन त्रिविष्टपं प्राप्तवति क्षितीशे ।
तदात्मजः सागरधीरचेताः शशास पृथ्वीं सकलां नृसोमः ॥
१९।५ ऋद्धिमन्तमधिकर्द्धिरुत्सवः पूर्वमुत्सवमपोहदुत्तरः ।
१९।१४ लोलमाल्य = लोलमान० वामनः

श्लोक-सूची



परिशेषगताः श्लोका अत्र न गृहीताः ।






महर्षि-पाणिनि-प्रज्ञा-अनुसन्धान
तिथी
पु०सं०
भारती पुस्तकालय

